# प्रस्तावना.

अस्तीदमतिरोहितमन्तर्वाणिमजानाम्, यत्किल व्याकरणं नाम शब्दानुशासनं प्रकृतिप्रत्ययादिना शब्दव्युत्पादनेनाऽखिलव्यवहारसाधनं पाकशासन इव निखिलनिगमाङ्गेषु विराजतेतरामिति । अथ चास्माद्वर्णमूलं शब्दज्ञानं, ततो पदज्ञानं, ततो वाक्यज्ञानं, ततश्चाखिलवाङ्मयबोधाद्ब्रह्मज्ञानद्वारामोक्षसिद्धिरिति परमनिःश्रेयससाधकत्वात्, " ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ध्येयो ज्ञेयश्च, प्रधानं च षडङ्गेषु व्याकरणं, प्रधाने च कृतो यत्नः फलवान्भवति " इति महाभाष्योक्तेश्चावश्यमध्ययनीयमेतद्व्याकरणमिति तावत्सिद्धम् । उपदिदेश च कश्चिदात्मजमभिज्ञः–

" यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत्सकलं शकलं सकृच्छकृत् ॥ " इति ।

तत्र " इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा इत्यष्टौ शाब्दिका मताः ॥ "

इत्येभिरष्टाभिर्महावैयाकरणैः पृथक्पृथक्स्वतन्त्राणि स्वस्वतन्त्राणि प्रणीतानि, व्याख्यातानि च तानि भाष्य-वृत्ति टीकाभिर्महर्षिभिर्विद्वद्भिरिति नानुक्तानं वैयाकरणकोविदकदम्बानामिति प्रकृतं सरस्वतीव्याकरणमेवाश्रित्य किञ्चिदुच्यते ।

श्रीमाननुभूतिस्वरूपाचार्यः कदाचित्सदसि निजमुखनिर्गलदकृतश्चित्सिद्धपदप्रयोगातिरस्कृतिविपण्णमतिर्विद्वज्जनान्विश्रम्भय्य रजन्यां वाग्देवतां स्तुतिभिः प्रसाद्य तल्लब्धवरादप्रतिनिरुद्धवाग्विलासः तद्दत्तसूत्रसप्तशतीसम्पन्नव्याकरणान्तराचार्यपदसमधिष्ठितः परेद्यवि सदोगतः प्रकृष्टव्याकरणान्तरसूत्रसिद्धं पूर्वेह्नि स्वमुखोद्गत "पुङ्क्षु" इति पदं शुद्धमिति तैः स्वीकार्य प्रपूजितपादपीठः प्रतिष्ठां लेभे । सरस्वतीदत्तसूत्रसप्तशतीसिद्धव्याकरणप्रसिद्धौ विज्ञापितः स सारस्वतं नाम तद्व्याकरण सुकल्पितोदाहरणसहितं सुवृत्तिसमेतं परिकल्प्य सर्वजनानां सुखबोधाय प्रादुश्चकार ॥

तच्च सारस्वतं बहुभिर्विद्वद्वरैर्नानाविधाष्टीका विरचय्य विशदीकृतम् । तच्चेदं श्रीनागपुरस्थतपागच्छाधिराजभट्टारक–चन्द्रकीर्तिसूरिभिरनुकम्पया सकलपिपठीर्जनानां सम्यग्व्युत्पत्तिविधित्सया सुबोधिकां नाम टीकां पठितव्यपाठपाठनवत्सरलां विधाय सम्यक्परिष्कृतम् ॥

एतच्च पुस्तकं पूर्वं मथुरानिवासिमाथुरपण्डितदत्तराम 'चौबे' इत्येतैर्मुद्रितमासीत् । तदेव पुस्तकमादितोन्तपर्यंतं नगरनिवासिपंडितवर्यजिनविजयसूरिजैनयतिभ्यः सकाशात् लिखितपुस्तकमुपलभ्य रावेरग्रामनिवासिगोविन्दशास्त्रिद्वारा टिप्पणीनिवेशनपुरःसर शोधयित्वा समुद्रय मया प्रकाशितमासीत् ।

आसीच्च कालमहिम्नाऽत्र बहूनि सूत्राणि वचनरूपतामापन्नानि, गतानि च बहूनि वृद्धिमनुवर्त्यमानसूत्रान्तरपदसमेलनतः, क्वचिच्च सूत्रद्वयमेकसूत्रतामेकं च सूत्रद्वयताम्, बहुत्र चाऽसम्बद्धपाठतेत्यादिरव्यवस्था मूले, टीकायामप्यविषयसूत्रोपन्यासाऽयुक्तोदाहरणादयोऽवशिष्टास्त्रुटय आसन्नित्यस्यामावृत्तौ पुनरपि मुहम्मदपुरमाजराग्रामनिवासिपण्डितनन्दलालशर्मशास्त्रिद्वारा सूत्रपाठ–धातुवृत्ति–लघुभाष्याद्यनेकग्रन्थपरिशीलनोत्थानुभवेनाऽऽचार्यपरम्पराप्राप्तदृढीयोनिश्चयेन च यथार्थ पाठनिवेशनपुरस्सर क्षटित्यर्थावबोधकनिखिलसंस्कारविधानपूर्वकं च संशोध्य मया मुम्बय्यां स्वकीये " श्रीवेङ्कटेश्वर " ( स्टीम् ) मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम् । तदेतद्ग्रहणपठनपाठनादिना कृतार्थयन्तु मामनुग्राहका ग्राहका वैयाकरणा विद्वांस इति भृशमर्थयते–

क्षेमराज–श्रीकृष्णदास–

"श्रीवेङ्कटेश्वर" ...

॥ श्रीः ॥

# चन्द्रकीर्तिटीकोपेतसारस्वतविषयानुक्रमणिका ।



इति ।

॥ श्रीः ॥

# अथ चन्द्रकीर्तिटीकोपेतं सारस्वतं प्रारभ्यते ।

## अथ संज्ञाप्रक्रिया १.

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ॥
सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ॥ १ ॥

नमोस्तु सर्वकल्याणपद्मकाननभास्वते । जगत्त्रितयनाथाय पराय परमात्मने ॥ १॥
नमः श्रीगुरवे चारुबुद्धये दत्तसिद्धये । मतिप्रदानशीलायै सरस्वत्यै नमोनमः ॥ २॥

अथ श्रीमत्परमहंसपरिव्राजकाचार्यः श्रीमदनुभूतिस्वरूपो निश्शेषविघ्नसंघातशान्त्यर्थं सत्स्वपि देवेष्वपरेष्वैहिकामुष्मिकफललिप्सुस्तांश्च फलद्वयदानक्षमानपास्य भगवन्नमस्कृतिपूर्वकं सारस्वतीं प्रक्रियां चिकीर्षुः सरस्वतीदत्तवर आदावेव प्रस्तावनाश्लोकमाह–प्रणम्येत्यादि ॥ अथैतस्य साधनापूर्वं व्याख्यालेशः प्रारभ्यते–णम् प्रह्वीभावे । णम् ( आदेः ष्णः स्नः ) नम् प्रपूर्वः । ( समासे क्यप् ) इति क्यप्प्रत्ययः । स्वरहीनं परेण संयोज्यम् ( प्रादश्च तथा तौ सुनमाम् ) इति नकारस्य णकारः । प्रथमैकवचनं सिः । ( अव्ययाद्विभक्तेर्लुक् ) इति सिलोपः । प्रणम्येति सिद्धम् । अग्रे–परमात्मानम् । परा प्रकृष्टा मा लक्ष्मीः कान्तिर्वा यस्य स परमः । यद्वा परै-

---

व्याख्या ॥ ( तत्रादौ ग्रंथहेतुरुच्यते ) । एवं किल श्रूयते, एकदाऽनुभूतिस्वरूपाचार्यो विद्वद्गोष्ठ्यां 'पुङ्क्षु' इत्युक्तवान्, तदा तैरशुद्धोय प्रयोग इत्युपहसितः । अनेनोक्तं नैवम् । शुद्ध एव । तैरुक्तं यद्येवं तर्हि तत्साधनं दर्शय । अनेनोक्त श्वो दर्शयिष्यामीति । इत्युक्त्वा स्वगृहमागत्य सरस्वत्युपासनं चक्रे । तदार्द्धरात्रे सा देवी प्रत्यक्षीभूयाऽनुभूतिस्वरूपाचार्यं वरं वृणीष्वेति जगाद । तदा सोयमपूर्वं व्याकरणं वव्रे । सा स्वहारात्सूत्रसप्तशतीं दत्त्वाऽन्तर्दधे । तां लब्ध्वा हर्षितः सन् तदैव तदाख्यया ग्रंथं चकाराऽथ च श्वस्तने दिने विद्वद्गोष्ठ्या दर्शयामास । पुनरयमेव ग्रंथः स्वशिष्येभ्यो दर्शितो ग्रंथस्य जंबमल्पत्वं च दृष्ट्वा तैश्च स्वीकृतः-इति किंवदती । ग्रंथकर्त्ताऽनुभूतिस्वरूपाचार्यः प्रारिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय च स्वेष्टदैवतनमस्कारलक्षणं मंगलमाचरन् सरस्वतीकृतप्रक्रियाया ऋजुकरणं प्रतिजानीते । अहं सारस्वतीं प्रक्रियां ऋजु कुर्वे इत्यन्वयः । कुर्वे इत्यनेनाहमिति कर्तृपदं लभ्यते 'अस्मद्युत्तमः' इत्युक्तेः । अहं कुर्वे इति वाक्येन कर्मापेक्ष्यते करोतेः सकर्मकत्वात् । प्रक्रियामिति कर्म, प्रक्रियते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यंते शब्दा अनयेति प्रक्रिया तां प्रकृतिप्रत्ययविभागकर्त्रीमित्यर्थः । अहं प्रक्रियां कुर्वे एवमुक्तौ अस्यामप्रामाण्यमायात कृतकत्वात् । तत्परिहाराय प्रक्रियां विशिनष्टि । कथंभूतां प्रक्रियां, सारस्वतीम् । सरतीति सरः पूरः तद्विद्यते यस्याः सा सरस्वती । अथवा स्त्रियते प्राप्यते विवक्षितार्थोऽनेनेति सरः ज्ञानं तद्विद्यते यस्याः सा सरस्वती ज्ञानरूपिणी प्रसिद्धा । सरस्वत्या प्रणीतानि सारस्वतानि सूत्राणि एवं सारस्वतानि विद्यन्ते यस्यां सा सारस्वती तां सारस्वतीम् । सरस्वतीप्रणीतसूत्रसंबन्धिनीमित्यर्थः । अथवा सरस्वत्या प्रणीता सारस्वती

योगिभिर्मीयते ज्ञायते इति परमः । यद्वा परान् शत्रून् रागद्वेषादीन् मिनाति हिनस्तीति परमः । यद्वा मानं माः ज्ञानम् । परं प्रकृष्टं मा ज्ञानं यस्य स परमः । अत सातत्यगमने । अतति सातत्येन गच्छति तांस्तान् भावानिति आत्मा । मनिण्प्रत्ययः । मनिणो णित्वात् (अत उपधायाः) इति वृद्धिः । परमश्चासावात्मा च परमात्मा ( हसेपस्सेर्ल्लोपः । नाम्नो नो लोपशधौ ) २ तं परमात्मानम् ।२-१ । परमात्मन् अम् (नोपधायाः) इति दीर्घः । तम इत्यस्य तमा ।१-१ स्वरहीनं० (मोऽनुस्वारः) परमात्मानमिति सिद्धम् ॥ अग्रे-बालधीवृद्धिसिद्धिः । कल्वल् कामधेनौ । वल्-वलंति दीव्यंति गृहेष्विति बालाः । यद्वा वलंति चलन्ति दुर्बोधार्थादिति बालाः ( ज्वलादेर्णः ) णप्रत्ययः ( अत उपधायाः ) इति वृद्धिः । व इत्यस्य वा । स्वरहीनं० । अग्रे-ध्यै चिंतायाम् । ध्यै-ध्यायते इति धीः ( क्विप् ) इति क्विप् प्रत्ययः । ध्यायतेः क्विपि संप्रसारणं ध्यै इत्यस्य धीः क्विपः सर्वापहारी लोपः इति क्विल्लोपः । धीः इति सिद्धम् । अग्रे-वृधु वर्द्धने । वर्द्धनं वृद्धिः । ( क्तिः ) इति क्तिप्रत्ययः । ति (तथोर्द्धः) इति तिस्थाने धिः ( झबे जबाः ) इति धस्य दः । स्वरहीनं परेण संयोज्यम् । अग्रे पिधू शास्त्रे मांगल्ये च । पिधू ( आदेः ष्णः स्नः ) सिधू सेधनं सिद्धिः । क्तिप्रत्ययादिकं प्राग्वत् । अत्र-शब्दापशब्दाऽनभिज्ञा बाला न तु स्तनंधयाः । यदि वा । अधीतान्यशास्त्रा अप्यनभ्यस्तशब्दशास्त्रा बालाः । सर्वशास्त्रेषु शब्दशास्त्रं प्रधानम् । यतः । "अनधीत्य शब्दशास्त्रं योऽन्यच्छास्त्रं समीहते मूढः॥सोहः पदानि गणयति निशि तमसि जलं चिरगतस्य॥१॥तथा च-"अङ्गीकृतं कोटिमितं च शास्त्रं नाङ्गीकृतं व्याकरणं च येन।न शोभते तस्य मुखारविन्दं सिन्दूरबिन्दुर्विधवाललाटे"॥२॥इति वचनात्।धियो

---

ताम् । सरस्वतीकृतामित्यर्थः । गौरवलाघवयोर्मध्ये लाघवमिष्टमित्युक्तेः । सुगमं व्याख्यान प्रशस्तं यद्यर्थांतर न सभवति । अर्थान्तरेऽस्तु । ननु सरस्वतीकृता प्रक्रियास्ति चेत्तवात्र करणे कः प्रयत्न इति चेत् तत्राह । ऋजुमिति । यत्र तत्र स्थितानां सूत्राणां प्रयोगार्थमेकत्र लेखनम् ऋजुकरणम् । प्रयोगानुकुलसूत्रक्रमाम् । एव च सरलामित्यर्थः । अनेन सरस्वतीकृतप्रक्रियाया दुर्बोधत्व सूचितम् । निर्विघ्नपरिसमाप्तये मगलमाचरति । ग्रंथादौ ग्रथमध्ये ग्रथान्ते मंगलमाचरणीयमिति शिष्टाचारात् तत्र मगल किं नाम तदाह । "वन्दनं गुरुदेवाना ग्रहशांतिर्द्विजार्चनम् । शुभद्रव्यावलोकश्च मंगल परिचक्षते" ॥ इति । किमर्थं मगलं क्रियते कविना ? विघ्ननिवारणाय । शिष्टैर्विघ्ननिवारणाय मगल क्रियते इति सदाचारात् । तथोक्तम् । "नित्यं पथ्याशिनां पुंसां हितस्थाननिवासिनाम् । मगलाचरतां विघ्नैर्विनिपातो न विद्यते ॥" कादम्बर्यादौ मगले कृतेपि न तत्परिसमाप्तिः बौद्धेन न कृत तत् तत्प्रणीतसमाप्तिश्च दृष्टा, अतो मगल न सदिति चेन्न । प्राक्तनसंस्कार विना किमपि न सभवति । अतो बौद्धेन पूर्वजन्मनि मगल कृत तेनात्र मगलेऽकृतेपि विघ्नवारणमभवत् । प्राचीनसंस्काराभावादपवित्रत्वेनाचारितत्वात्कादंबर्यादीनां न सिद्धिर्जाता, अतो मगल सदेव । तदेवाह परमात्मानं प्रणम्येति । पिपर्त्तीति परः माया लक्ष्म्या आत्मा जीवन मात्मा लक्ष्मीपतिरित्यर्थः । परश्चासौ मात्मा परमात्मा तम् । अथवा परः पूर्णः निरपेक्षः एवंभूतो मात्मा लक्ष्मीपतिस्तम् । अय भावः । कविभिर्विघ्ननिवारणकं भक्ष्यान्छादनसूक्तयो नित्यभिष्यन्ते । अतोयमपि परशब्देन पालकत्वसर्वज्ञत्वोपदर्शितः

वृद्धिः धीवृद्धिः । तेषां वालानां या धीवृद्धिर्बुद्धिवृद्धिर्व्युत्पत्तिस्तस्याः सिद्धिः वालधीवृद्धिसिद्धिस्तस्यै वालधीवृद्धिसिद्धये । चतुर्थ्येकवचनम् । ङे ए (ङिति) द्धि इत्यस्य द्धे ( ए अय् ) स्वर० । वालधीवृद्धिसिद्धये । अग्रे–सरस्वती । सृ गतौ । सृ ( वचादेरप् ) गुणः । स्वरहीनं० । सरः प्रसरणं मुखेमुखे अस्त्यस्या इति ( मांतोपधाद्वत्विनौ ) इति अस्त्यर्थे वतुः । ( उगितः ) इतीप् । स्वरहीनं० । ततः सरस्वत्या प्रणीतानि सूत्राणि सारस्वतानि । ततः सारस्वतेभ्यः सूत्रेभ्यो जाता सारस्वती ( कारकात् क्रियायुक्ते ) अण्प्रत्ययः । अ ( आदिस्वरस्य ञ्णिति वृद्धिः ) इति वृद्धिः । स इत्यस्य सा ( यस्य लोपः ) ईकारलोपः । स्वरहीनं० ( ञ्ण ईप् ) इति ईप्प्रत्ययः । स्वरहीनं० २–१ अम् ( अम्शसोरस्य ) अलोपः । सरस्वत्या प्रणीतानि यानि सूत्राणि इति युक्त्या ( वृद्धाच्छः ) ( यस्य लोपः ) इति पाणिनीयस्य छप्रत्ययस्य सम्भवः । छस्य ईयादेशः । तदा सारस्वतीया इति भवति । तेन सरस्वत्या प्रणीता या सा सारस्वती तां सारस्वतीम् ॥ अग्रे–ऋजु २–१ अम् ( अम्शसोरस्य ) इति अकारस्य लोपः ( मोऽनुस्वारः ) ऋजुम् । ( वोर्गुणात् ) इति विकल्पेन ईप् । तेन स्त्रीलिंगेपि ऋज्वी, ऋजुः इति रूपद्वयं स्यात् ॥ डुकृञ् करणे । कृ आत्मनेपदे वर्तमानोत्तमपुरुषैकवचनम् ए ( तनादेरुप् ) उप्प्रत्ययः, उ, गुणः, कर् । स्वरहीनं० । करु ( ङित्यदुः ) क इत्यस्य कुः ( उ वम् । रहाद्यपो द्विः ) जलतुंबिका० । स्वरहीनं० । कुर्वे इति सिद्धम् । अग्रे–प्रक्रियाम् । पुनः डुकृञ् करणे । कृ प्रपूर्वः प्रक्रियन्ते व्युत्पाद्यन्ते साध्यन्ते शब्दा अनयेति प्रक्रिया ( सर्द्योणादयः ) इति अप्रत्ययः ( अयकि ) कृ इत्यस्य क्रि ( उधातोः ) इय्, क्रिय् । स्वरहीन० क्रिय ( आवतः स्त्रियाम् ) ( सवर्णे दीर्घः० ) तां प्रक्रियाम् (अम्श-

---

त्मा परमात्मा परमात्माशब्दो भक्ष्याच्छादनपूर्वकः तं तथाभूतम् । अथवा । परा शत्रुरूपा मा येषां ते परमा ये विरक्तास्तेषामात्मा मनो यस्मिन्स परमात्मा तम् । परमेषु आत्मा यस्येति वा षष्ठीबहुव्रीहिणा परमपुरुषार्थत्वं सूचितम् । सप्तमीबहुव्रीहिणा कृपालुत्वं च । अथवा परैरुत्कृष्टैः सर्वतो विरक्तैर्योगिभिर्मीयते प्राप्यते इति परमः । "नाम्नि च" इति डः । अततीति आत्मा सर्वग इत्यर्थः । परमश्चासौ आत्मा च परमात्मा तं परमात्मानम् इति वा छेदः । आत्मानं प्रणम्य प्रकर्षेण नत्वा । कायवाङ्मनोभिर्नमनं प्रकर्षः मंगलवाचकः । 'आत्मा जीवे सुते देहे स्वभावे परमात्मनि' इति कोशात् । ननु कतममात्मानं प्रणमसीति चेत्तत्राह । परमिति परं पूर्णं तथाभूतमात्मानं व्यापकमित्यर्थः । तथा च । वेदान्तसारे–"अखंडं सच्चिदानन्दमवाङ्मनसगोचरम् । आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये" इति । तथाभूतं ब्रह्मैव । ननु गुरुगणेशादीन् विहाय कथं परमात्मानं प्रणम्येत्युक्तम् । सत्यम् । परमात्मनि नमस्कृते सर्वं एव नमस्कृताः स्युः सर्वान्तर्यामित्वात् । तथा चोक्तम् । भागवते चतुर्थस्कंधे–'यथातरोर्मूल' इति । ननु "अधिकारी च संबंधो विषयश्च प्रयोजनम् । अवश्यमेव वक्तव्यं शास्त्रादौ तु चतुष्टयम् ॥" इति ग्रंथप्रामाण्याय चतुष्टयमपेक्षणीयम् । आचार्यैः तत्करणे किं प्रयोजनम् । "प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते" इति न्यायात् । तत्र चतुष्टयं वदन् स्वप्रयोजनमाह । वालधीवृद्धिसिद्धये इति वाला अनधीतव्याकरणाः

सोरस्य । मोऽनुस्वारः ) कृ ( स्त्रियां यजां भावे । कृञो वा रिङ् ) क्रिया कृत्या । अथवा क्रियादयः शान्ता निपात्याः । अथवा डुकृञ् करणे । कृ, ततः ( कृञः श च ) कृञो भावादौ शः स्यात् (क्यप् च) स्त्रियां शित्वात् भावे यक्, रिङादेशः, प्रपूर्वः, प्रक्रिया तां प्रक्रियाम् २-१ ( अम्शसो० । मोऽनुस्वारः ) ॥ ततः अग्रे- स्तृ विस्तारे । स्तृ विपूर्वः विस्तरतीति विस्तरः ( पचिनंदिग्रहादेरयुणि निः ) इति अप्रत्ययः । मतांतरे ( मदाम् ) इति अप्रत्ययः । गुणः, विस्तरः । ( स्वरहीनं० । अतिपूर्वः । अतिविस्तरः । निषेधार्थे नञ्पूर्वः । न विद्यते अतिविस्तरः शब्दवाहुल्यं यस्यां सा नातिविस्तरा तां नातिविस्तरामित्यत्र नाकादिवत् ( अन् स्वरे ) अनेन नञो अनादेशप्रतिषेधः । यद्वा केचित्तु बहुव्रीहौ नञो अनादेशमेव नेच्छन्ति अथवा न इति पृथगेव पदम् । ततः ( सवर्णे दीर्घः० ) ( आवतः स्त्रियाम् ) इति आप्प्रत्ययः ( सवर्णे० ) २-१ अम् ( अम्शसोरस्य । मोऽनुस्वारः ) इति प्रथमश्लोकस्य साधना ॥

अथ व्याख्या । प्रणम्य १ परमात्मानं २ बालधीवृद्धिसिद्धये३ सारस्वतीं४ऋजुं ५कुर्वे ६ प्रक्रियां ७ नातिविस्तराम्८एवम् अस्मिन् श्लोके अष्टौ पदानि सन्ति । अथान्वयः—अहमनुभूतिस्वरूपाचार्यः सारस्वतीं प्रक्रियाम् ऋजुं सरलां कुर्वे विदधे । लोकप्रसिद्धशब्दव्युत्पादनार्थमीषद्रचयामीत्यर्थः । कुर्वे इत्यत्र पठनपाठनादुत्पन्नस्य पुण्यरूपफलस्य कर्तृगामित्वादात्मनेपदप्रयोगो युक्त एव। किंनामधेयां प्रक्रियाम् ?सारस्वतीं सरस्वतीप्रणीतसूत्रसंबंधिनीमित्यर्थः । ननु शास्त्रादौ मङ्गलाचरणं विना शास्त्रसमाप्तिर्न स्यादत आह। किं कृत्वा?परमात्मानं परमेश्वरं प्रणम्य । प्रकर्षेण मनोवाक्कायैर्नत्वा परमात्मनि नमस्कृते सर्वेऽपि देवा नमस्कृताः स्युः । यथोक्तं भागवते—"यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः।प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या" इति।तथा च प्रशब्दस्य मांगलिकार्थत्वादादौ प्रयोगः।तथाच"प्रशब्दश्चाथशब्दश्चद्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभा"॥१॥ ननु"प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते"अतोत्र प्रक्रियाऋजुकरणे किं प्रयोजनमित्यतआह। कस्यै

तेषामेव शब्दाऽपशब्दज्ञानाभावात् । न तु स्तनगाः । धियो वृद्धिः धीवृद्धिः बुद्धिवृद्धिः बालेभ्यो धीवृद्धिः बालधीवृद्धिरिति तादर्थ्ये चतुर्थीतत्पुरुषः । बालाना धीवृद्धिरिति न षष्ठीतत्पुरुषः कार्यः । बालानामज्ञानिनां धीर्बुद्धिः अज्ञानधीः तस्या वृद्धिरिति दूषणात्—बालधीवृद्धिश्चासौ सिद्धिश्च बालधीवृद्धिसिद्धिस्तस्यै । बालधीवृद्धेः सिद्धिरिति तत्पुरुषो न कार्यः। कुतः । तस्य क्रियाभिर्संबधादुभयप्रधानो बलवानिति नियमात् । अत्र वृद्धिसिद्धिशब्दौ मंगलवाचकौ । अत एवायं ग्रंथः सिद्धिकरः । अत्र बाला अधिकारिणः । शब्दो विषयः । तस्य ज्ञानं प्रयोजनम् । सरस्वतीकृतत्वात्स एव संबधः । अत एवाऽप्रामाण्यशंका—निरस्ता ॥ १ ॥

१ 'ॐ कारश्चाथशब्दश्च'—इत्यन्यत्र पाठः । स एव साधुः बहुस्थलेषु तथैव दृष्टत्वात् ।

बालधीवृद्धिसिद्धये । सत्स्वपि महाभाष्यादिषु तेषां गहनत्वेन बालानां [illegible]बोधात् । स्वल्पबुद्धीन् जनांस्तेषु चानादरान् संभाव्येमां प्रक्रियाम् । अवैयाकरणजन बुद्धिवर्द्धनव्युत्पत्त्यर्थं कुर्वे इत्यर्थः । चिकीर्षितायामपि प्रक्रियायां वक्रत्वकरणे भूयांसं जना निरादरा बोभूयंत तन्निरासार्थमाह । ऋजुमिति । सरलामित्यर्थः । सरस्वतीदत्त सूत्राणां क्रमसुत्सृज्य प्रयोगसाधनार्थं यत्र तत्रस्थितानां सूत्राणामनुक्रममेलनेन ऋजुं सरलां कुर्वे इत्यर्थः । ननु भो ऋजुमित्येव कथं कृतम् ऋज्वीमिति कथं न स्यात् तत्रोच्यते । ( वोर्गुणात् ) इत्यनेन सूत्रेण वा ईप्प्रत्ययः । द्वे रूपे ऋजुम् ऋज्वीमिति भवतः । परं छंदोभंगभिया नोच्चार्यते । ऋजुरपि प्रक्रिया विस्तरबाहुल्यादध्येतुमशक्या अत आह । नातिविस्तराम् । विस्तरः शब्दबाहुल्यं तेन रहितां स्वल्पग्रंथां प्रचुरार्थामित्यर्थः । एतावता सर्वाण्यपि सूत्राण्यादायोदाहरणसाधनार्थं बालव्युत्पत्त्यर्थं च दीपिकाकल्पामिमां प्रक्रियां कुर्वे इति भावः । अत्र बालधीवृद्धिः प्रयोजनम् १ । शब्दा विषयाः २ । अधिकारिणो बालाः ३ । प्रतिपाद्यप्रतिपादकभावः संबंधः ४ । इति प्रथमश्लोकस्य व्याख्या ॥ १ ॥

ननु विस्तरः कथं निरस्तः इत्याशंकानिवारकं स्वगर्वापहारकं च द्वितीयश्लोकमाह ।

इन्द्रादयोऽपि यस्यान्तं न ययुश्शब्दवारिधेः ॥
प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम् ॥ २ ॥

इन्द्रादयोऽपीति ॥ अथैतस्य साधना । इदि परमैश्वर्ये । इन्दति ईष्टे इतींद्रः (नमादेरः) इद् अग्रे रप्रत्ययः (इदितो०) इति नुमागमः । इ अग्रे न् ( नश्चापदान्ते झसे ) नकारस्याऽनुस्वारः । स्वरहीनं० । अग्रे–डुदाञ् दाने । दा आङ्पूर्वः । आदीयत इत्यादि (नङ्गी) इति किप्रत्ययः । इ (आतोऽनपि) इत्याकारलोपः । स्वर० (सवर्णे०) इन्द्र आदिर्येषां ते इन्द्रादयः १–३ । जस् अस् ( ए ओ जसि ) दि इत्यस्य दे ( ए अय् ) स्वरहीनं० ( स्रोर्विं० ) इन्द्रादयः । (अतोऽत्युः) । उ ओ । ( एदोतोऽतः)अलोपः । अग्रे–अपि १–१ ( अव्ययात्० ) सिलोपः । यद् स्य ६–१ ( त्यदादेष्टेरः० )इति यद् इत्यस्य य (ङस्स्य) अग्रे–अन्त २–१अम् (अम्शसोरस्य) (मोनु०) अग्रे–न १–१ (अव्यया०) अग्रे–या प्रापणे । या परोक्षभूतप्रथमपुरुषबहुवचनम् । उस् ( द्विश्च ) द्वित्वं यया उस् इति स्थिते ( ह्रस्वः ) पूर्वयास्थाने य ( आतोनपि) इत्याकारलोपः । स्वर० (स्रोर्विं०) अग्रे-शप् आक्रोशे । शप् । शपति आक्रोशति जिह्वामिति शब्दः । उणादिषु दप्रत्ययः (चपा अबे जबाः) पस्य बः । स्वर० । अग्रे–डुधाञ् धारणपोषणयोः । धा वारिपूर्वः वारि धीयते यत्र स वारिधिः (नङ्गी) इति किप्रत्ययः । इ (आतोनपि) इत्याकारलोपः । स्वर० । शब्दानां वारिधिः शब्दवारिधिः । यद्वा । शब्दा एव वारीणि धीयन्ते अस्मिन्निति शब्दवारिधिः ६–१ ( ङिति ) धिस्थाने धे ( ङस्य ) इत्यकारलोपः (स्रोर्विं०) अग्रे–प्रक्रिया २–१ ( अम्शसोरस्य ) अग्रे-तद् ६–१ ( त्यदादेष्टे० )–( ङस्स्य )

अग्रे-कृत्स्न ६-१ (ङस्य) अग्रे-क्षम् सामर्थ्ये । क्षम् । क्षमते इति क्षमः (पचिनंदि० ) इति अप्रत्ययः । स्वर० । १-१ । ( स्रोर्वि० ) अग्रे-वच परिभाषणे । वच् ( तुम् तदर्थायां भविष्याति ) इति तुम्प्रत्ययः (चोः कुः) स्वर० १-१ ( अव्य० ) अग्रे-नृ विक्षेपे । नृ । न्रियते विक्षिप्यते कामादिभिरिति नरः । स्वरादेः अप्रत्ययः । गुणः । नरः। स्वर० । १-१ । (स्रोर्वि०) अग्रे-किं ३-१ (टा ना०) आ । (तत्रादिगणो विभक्त्यर्थे निपात्यते ) इति विभक्तिसहितस्य किम् इत्यस्य कथं निपातः । इति द्वितीयश्लोकसाधनिका ॥

अथ व्याख्या । इन्द्रादयोपीति । अस्मिञ्श्लोके चतुर्दश पदानि सन्ति तान्याह । इन्द्रादयः १ अपि २ यस्य ३ अन्तम् ४ न ५ ययुः ६ शब्दवारिधेः ७ प्रक्रियाम् ८ तस्य ९ कृत्स्नस्य १० क्षमः ११ वक्तुम् १२ नरः १३ कथम् १४ । अथान्वयः-इन्द्रादयो देवाः । अपिशब्दात् व्यासवाल्मीक्यादय ऋषयोपि । अथवा इन्द्रादयोष्टौ महाव्याकरणकर्त्तारोपि यस्य शब्दवारिधेः शब्दसमुद्रस्य व्याकरणस्य अन्तं पारं न ययुः न प्रापुः । तस्य कृत्स्नस्य समग्रस्य शब्दवारिधेः प्रक्रियां शब्दव्युत्पादनविधां वक्तुं नरः मल्लक्षणो मनुष्यः कथं क्षमः कथं समर्थो भवति अपि तु न समर्थो भवति। अतः कारणात्संक्षेपतः कथयामीत्यर्थः । इन्द्र आदिर्येषां ते इन्द्रादयः। यतः । "इन्द्र १ श्चन्द्रः २ काशकृत्स्नाऽ ३ पिशली ४ शाकटायनः ५ । पाणिन्य ६ मर ७ जैनेन्द्रा ८ जयन्त्यष्टौ हि शाब्दिकाः" ॥ २ ॥ इति ॥

## तत्र तावत्संज्ञा संव्यवहाराय संगृह्यते ॥

अथ प्रथमं संज्ञाप्रक्रियायां विवक्षितायां संज्ञाव्याख्यानसूचिकां फक्किकामाह । तत्र तावत्संज्ञेति ॥ तत्र तस्यां सारस्वतीप्रक्रियायां तावदादौ प्रथममेव समानस्वरादीनां संज्ञा नाम मया संगृह्यते । कस्मै प्रयोजनाय संव्यवहाराय सम्यक्शास्त्रव्यवहाराय। शास्त्रे हि संज्ञां विना न सम्यगवबुध्यते । यथा किल लोकेऽपि श्रूयते। अयं राजा, अयममात्यः, अयं देवदत्तः, अयं यज्ञदत्तः इत्यादि । तथात्रापि समानादिसंज्ञा शास्त्रव्यवहाराय संगृह्यते इति भावः ॥

## अइउऋऌ समानाः ॥ अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते तेषां समानसंज्ञा च विधीयते ॥

तत्र मातृकायां प्रथमं पठितत्वात् प्रथमं स्वराणामेव संज्ञामाह । सूत्रम् । (अइउऋ ऌ समानाः) अश्च इश्च उश्च ऋश्च ऌश्च अइउऋऌ १-३ साङ्केतिकत्वाजसलोपः । यतः-" सूत्रे विभक्तिर्नैवास्ति वृत्तौ यत्रोपलभ्यते । एकद्वित्वबहुत्वादि तत्सांकेतिकमुच्यते ॥१॥" समानाः । समानं तुल्यं मानं परिमाणं येषां ते समानाः । १-३

१ अ इ उ ऋ ऌ समानाः इति षट्पदं संज्ञासूत्रम् । तथाहि-"संज्ञा च परिभाषा च विधिर्नियम एव च । प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम्" ।

(सवर्णे०।स्रोविं०)यद्वा । अ इ उ ऋ ऌ इति प्रत्येकं प्रथमैकवचनान्तानि सांकेतिकानि पञ्चैव भिन्नानि पदानि । समाना इति प्रथमाबहुवचनान्तम् । एवं षट्पदमिदं सूत्रम् । षट्पदत्वमेव युक्तम्।यतः।"संहितैकपदे नित्या नित्या धातूपसर्गयोः।नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥" इति । यद्यपि 'अइकौ च मत्वर्थे'इत्यादौ समासेपि संधिर्न, तथाप्यसार्वत्रिकोयं विधिरिति। क्वचित्तु। एकाविति संधिरेव दृश्यते एतत्सूत्रं कार्य्यद्वयविधायकं वर्णपरिगणनानिरूपकं समानसंज्ञानिरूपकं चेत्यर्थः। तदेवाह । अनेनेति ।अनेन उक्तवक्ष्यमाणसूत्रसमुच्चयेन प्रत्याहारग्रहणाय वर्णाः अक्षराणि परिसामस्त्येन भण्यन्ते संख्याक्रियन्ते परिपाट्या प्रकाश्यते।च पुनस्तेषां पूर्वोक्तानाम् अइउऋऌ अक्षराणां समानसंज्ञा समानइति नाम विधीयते क्रियते।अथवा। अभिधीयते कथ्यते । ननु पंचानामकारादीनां न्यासवैसादृश्ये कथं समानसंज्ञा संजाघटीत्यत्रोच्यते । एकमात्रत्वेन समानत्वमेतेषाम् ॥

नैतेषु सूत्रेषु सन्धिरनुसन्धेयोऽविवक्षितत्वात् ।
"विवक्षितस्तु संधिर्भवतीति नियमात् ॥ "

ननु अइउऋऌ इत्यादिषु सूत्रेषु संधिः कथं न कृतस्तत्राह । नैतेष्विति ॥ एतेषु उक्तवक्ष्यमाणेषु सूत्रेषु संधिर्नानुसन्धेयःन कर्तव्यः।कस्मात् अविवक्षितत्वात् । वक्तुमिष्टो विवक्षितः।यद्वा वक्तुमिच्छा विवक्षा विवक्षा जाता अस्येति विवक्षितः न विवक्षितः अविवक्षितः तस्य भावोऽविवक्षितत्वं तस्मादविवक्षितत्वात् वक्तुमवांछितत्वात् । हेत्वन्तरमाह । विवक्षितस्तु । तु पुनः विवक्षित एव संधिर्भवति न अविवक्षित इति नियमात् । गुर्वाम्नायनिश्चयात् । यत्र संधौ कृते कार्यभ्रंशो भवति सोऽविवक्षितः संधिर्यथा । अइउऋऌ इत्यस्य य्व्र्ल् इति स्यात् । यत्र च संधौ कृते कार्यसिद्धिर्भवति स विवक्षितः संधिः । यथा-ईच ऊच एच य्वे । इत्यादिषु न निषेधः ॥

लौकिकप्रयोगनिष्पत्तये समयमात्रत्वाच्च ॥

हेतुमाह । लौकिक इति । लोक्यन्ते विलोक्यन्ते शब्दाऽपशब्दा अनेनेति लोको व्याकरणम् । लोके भवा लौकिकाः अनादिसिद्धास्ते च ते प्रयोगाश्च लौकिकप्रयोगास्तेषां निष्पत्तिः सिद्धिः लौकिकप्रयोगनिष्पत्तिस्तस्यै लौकिकप्रयोगनिष्पत्तये । समयमात्रत्वात् सूचनामात्रकृतत्वात् विभक्त्यादिसंकेतरूपत्वाच्छास्त्रस्येति संधिर्न कृतः । च-शब्दो हेत्वंतरसूचकः । अत्र केप्याहुः । लोके भवाः लौकिका बालास्तेषां प्रयोगनिष्पत्तिस्तस्यै सूचनमेवोक्तमत्रास्तीति भावः । अस्य व्याकरणस्य संकेतरूपत्वात् । विभक्त्यनुपलंभेपि यथानुसारेण सांकेतिकं पदं व्यवहर्त्तव्यम् । कृते हि संधिकार्य्ये अय्व्र्ल् इति पदं भवति, तत्पाठे मन्दबुद्ध्यो जनाः मायासाः संजायन्ते यकारादीनां च स्वरसंज्ञामसक्तिर्भवति अतोत्र संधिर्न कृतः ॥

**ह्रस्वदीर्घप्लुतभेदाः सवर्णाः ॥**

**एतेषां ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा भण्यन्ते ॥**

अथैतानेव भिन्नतया विवृण्वन्नाह । ह्रस्वेति । ह्रसति हीयते दीर्घापेक्षया इति ह्रस्वः । दिहृणाति विदारयत्युच्चार्यमाणो मुखमिति दीर्घः । प्लवते लंवते ह्रस्वदीर्घाविति प्लुतः । ततो ह्रस्वाश्च दीर्घाश्च प्लुताश्च ह्रस्वदीर्घप्लुतास्ते च ते भेदाश्च ह्रस्वदीर्घप्लुतभेदाः १–३ सदृशाः वर्णाः सवर्णाः । ( स्रोर्वि० । सवर्णे० ) एतेषां समानानां ह्रस्वदीर्घप्लुतभेदाः परस्परमन्योन्यं स्वजातीयेन सवर्णाः भण्यन्ते कथ्यन्ते । यथा–अ १ ह्रस्वः । आ २ दीर्घः । आ ३ प्लुतः । इ १ ह्रस्वः । ई २ दीर्घः। ई ३ प्लुतः । उ १ ह्रस्वः । ऊ २ दीर्घः । ऊ ३ प्लुतः । ऋ १ ह्रस्वः । ॠ २ दीर्घः । ॠ ३ प्लुतः। ऌ १ ह्रस्वः। ॡ ३ प्लतः । एतेषां समानामेव सवर्णत्वं न तु सन्ध्यक्षराणाम् । तेन हरे अग्रे–ए इत्यत्र ( सवर्णे० ) इति न भवति ॥

**लोकाच्छेषस्य सिद्धिः ॥ इति वक्ष्यति ॥**

ननु सरस्वतीदत्तसूत्रेष्वनुक्तं ह्रस्वादीनां लक्षणं कुतो ज्ञायते इत्यत आह । सूत्रम्। (लोकाच्छेषस्य सिद्धिः ) त्रिपदमिदं सूत्रम् । लोकात् ५–१, शेषस्य ६–१ सिद्धिः १–१ ॥ शेषस्य इह व्याकरणेऽनुक्तस्य सिद्धिर्निष्पत्तिर्लोकादन्यव्याकरणात् ज्ञेया । लोकाद्गुरुपारंपर्याद्वा अवगन्तव्येति शेषः । अस्य ग्रन्थस्यान्ते इति पदं वक्ष्यति कथयिष्याति ॥

**ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्या ॥ एकमात्रो ह्रस्वः द्विमात्रो दीर्घः त्रिमात्रः प्लुतः व्यञ्जनं चार्द्धमात्रकम् ॥**

ततस्तस्मात्कारणाल्लोकतोऽन्यव्याकरणादेव ह्रस्वादिसंज्ञा ज्ञातव्या । तथाहि तदेव लोकोक्तमेव ह्रस्वादीनां लक्षणमाह । एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः । एकमात्रेति। एकमात्रा उच्चारणकालो यस्य स एकमात्रो ह्रस्व उच्यते । "मात्रा कालविशेषः स्यात्" । अक्षिस्पन्दनप्रमाणः कालो मात्रा । द्वे मात्रे उच्चारणकालो यस्य स द्विमात्रो दीर्घः । तिस्रो मात्रा उच्चारणकालो यस्य स त्रिमात्रः प्लुतः । अर्द्धमात्राया भवम् अर्द्धमात्रक व्यंजनमुच्यते । केचित्तु व्यञ्जनं चार्द्धमात्रकमिति नोच्चरंति । व्यंजनस्य मात्राऽनधिकारित्वात् ॥ यतः–"चाषो वदत्येकमात्रं द्विमात्रं वायसो वदेत् ॥ त्रिमात्रं च शिखी ब्रूयान्नकुलश्चार्द्धमात्रकमिति ॥"

**एषामन्येऽप्युदात्तादिभेदाः सन्ति । उच्चैरुपलभ्यमान उदात्तः । नीचैरनुदात्तः । समवृत्त्या स्वरितः । साऽनुनासिको निरनुनासिकश्च ॥**

किमेतावन्त एव भेदा इत्याशंक्याह ।एषामित्यादि॥एषां समानानां ह्रस्वादिभेदाः

भिन्नानामप्यन्येऽपि लोकगम्या उदात्तादिभेदाः । उदात्तः १,अनुदात्तः २, स्वरितः३ इति त्रयो भेदास्सन्ति । उदात्तादीनां लक्षणमाह । उच्चैरित्यादि ॥ वेदपाठकरणन्यासे उच्चैः स्थाने उपलभ्यमानः प्राप्यमाण उच्चार्यमाणो वा उदात्तः प्रोच्यते । नीचैः स्थाने उच्चार्यमाणोऽनुदात्तः । नोच्चैर्न नीचैरिति समवृत्त्या स्वरेण उच्चार्यमाणो वर्णः स्वरितः । उदात्तादीनां तु प्रयोजनं वेदेष्वेव । अत्र तु प्रसङ्गवशादुक्तम् । मुखनासिकाभ्यां कृत्वा उच्चार्यमाणो वर्णः सानुनासिकः।तद्विपरीतो निरनुनासिकः। निर्गता नासिका उच्चारणकाले यस्मात्स निरनुनासिकः । किन्तु केवलं मुखनैवोच्चार्यमाणो वर्ण इत्यर्थः । सानुनासिको निरनुनासिकश्चेति पदं क्वचिन्न दृश्यतेऽपि । अनयोरत्र लक्षणस्यानुक्तत्वात् । अथ समाहृत्याह । यथा । पंच समानाः । ह्रस्वदीर्घप्लुतभेदात् पञ्चदश १५ । तेष्युदात्तानुदात्तस्वारितभेदात् पंचचत्वारिंशत् ४५ भवंति । ते च सानुनासिकानिरनुनासिकभेदान्नवति ९० भेदाः समानानाम् ॥

**एऐओऔ संध्यक्षराणि॥एषां ह्रस्वा न सन्ति ॥ उभये स्वराः॥**
**अकारादयः पंच चत्वार एकारादयश्च उभये स्वरा उच्यन्ते ॥**

सूत्रम् ( एऐओऔ सन्ध्यक्षराणि ) द्विपदमिदं सूत्रम् । एऐओऔ १-३ सांकेतिकत्वात् जसूलोपः । यद्वा ए १-१ ऐ १-१ ओ १-१ औ १-१ सांकेतिकानि चत्वारि पदानि । एवं पंचपदम् । संधावक्षराणि सन्ध्यक्षराणि । यथा समानानामेव संधिना कृत्वा एषां निष्पत्तिः । यथा-आकारेकारयोगे एकारः । अकारैकारयोगे ऐकारः । अकारोकारयोगे ओकारः । अकरौकारयोगे औकारः । यद्वा समानानां व्यञ्जनानां संधौ मध्ये वर्त्तत इति संध्यक्षराणि । इति संध्यक्षरसिद्धिः । संध्यक्षर १-३ ( जस्शसोः शिः ) इ ( नुमयमः ) इकारात्पूर्व नुमागमः ( नोपधायाः ) रस्थाने रा ( षुर्नो णो० ) स्वर० । ए,ऐ,ओ,औ, एतानि चत्वार्य्यक्षराणि संध्यक्षरसंज्ञकानि भवंति । ततश्च एषां संध्यक्षराणां ह्रस्वभेदा न भवंति एकमात्रकाभावात् । दीर्घप्लुता भवंति । परसवर्णत्वं न । एतेषां सन्ध्यक्षराणामष्टचत्वारिंशद्भेदा भवंति । यथा-चतुर्णा संध्यक्षराणां दीर्घप्लुतभेदात् अष्ट । तेषां चाष्टानां प्रत्येकम् उदात्ता १-ऽनुदात्त २ स्वरित ३ भेदाच्चतुर्विंशतिः २४ । तेषां च सानुनासिकनिरनुनासिकभेदादष्टचत्वारिंशदिति ४८ ॥

अथ समानसंध्यक्षराणामिति मिलितानां संज्ञामाह । सूत्रम् । ( उभये स्वराः ) द्विपदमिदं सूत्रम् । उभौ प्रकारौ अवयवौ येषां ते उभये । उभय १-३ ( जसी । अ इ ए ) स्वराः स्वयमनाश्रितत्वेन राजन्ते शोभन्ते इति स्वराः १-३ ( सवर्णे० । सोर्वि० ) अकारादयः पञ्च अ इ उ ऋ लृ । चत्वार एकारादयश्च ए ऐ ओ औ । एते उभये मिलिताः नवसंख्याः स्वरा उच्यन्ते कथ्यन्ते । चकारात् समानानां ह्रस्वदीर्घभेदमिलनेन चतुर्दश स्वरा भवन्ति । यथा-अआ इई उऊ ऋॠ लृॡ

एऐ ओऔ । केचित्तु अकारादयः पंच । उभये उभयप्रकाराः ह्रस्वदीर्घा इति, चत्वार् एकारादयश्च स्वरा उच्यन्ते इति व्याकुर्वंति । परं तत्सूत्राऽनुसारतः । यदा उभये इत्यनेन अकारादय एव उभयप्रकारा गृह्यन्ते तदा चत्वार एकारादय इति सूत्रे कुतः प्राप्यते ॥

**अवर्ज्जा नामिनः ॥ अवर्णवर्ज्जाः स्वरा नामिन उच्यन्ते ॥**

अथैष्वेव विशेषमाह । सूत्रम्(अवर्जा०) द्विपदं सूत्रम् । अम् अवर्णं वर्ज्जयन्तीत्यवर्ज्जाः १–३ ( सवर्णे० । स्तो० ) नामिन् १–३ स्वर० (स्तोर्विं०) अवर्णवर्ज्जाः अकाराकाररहिताः स्वराः इई उऊ ऋॠ ऌॡ एऐ ओऔ एते नामिन उच्यन्ते । नमनं नामः सोस्त्येष्विति नामिनः । अवर्णो नामी नोच्यते । लिपिन्यासे तस्य सरलत्वात्॥

**अनुक्रान्तास्तावत्स्वराः ।अथ प्रत्याहारजिग्राहयिषया व्यञ्जनान्यनुक्रामति ॥**

अथ स्वरोपसंहारमाह । अनुक्रान्ता इत्यादि ॥ तावदादौ स्वरा अनुक्रान्ताः अनुक्रमेण कथिताः ॥ अथ व्यञ्जनान्याह । व्यञ्ज्यन्ते प्रकटीक्रियन्ते अर्थाः प्रत्याहारा वा एभिरिति व्यंजनानि । कया । ग्राहयितुमिच्छा जिग्राहयिषा प्रति कार्य्यकार्य्यमाह्रियन्ते आनीयन्ते इति प्रत्याहाराः अबादयस्तेषां प्रत्याहाराणां जिग्राहयिषा प्रत्याहारजिग्राहयिषा तया प्रत्याहारजिग्राहयिषया कृत्वा व्यञ्जनान्यनुक्रामति अनुक्रमेण कथयति ॥

**हयवरल ॥ ञणनङम ॥झढधघभ॥ जडदगब ॥ खफछठथ ॥ चटतकप ॥ शषस ॥ आद्यंताभ्याम् ॥ प्रत्याहारं जिघृक्षता आद्यन्ताभ्यामेते वर्णा ग्राह्याः । आदिवर्णोन्त्येन सह गृह्यमाणस्तन्नामा प्रत्याहारः । तथाहि । अकारो बकारेण सह गृह्यमाणोऽबप्रत्याहारः ॥**

कानि तानि व्यञ्जनानि । सूत्रम् । हश्च यश्च वश्च यावत्सश्च इति द्वंद्वः १–३ सांकेतिकम् । ह य यावदाद्यंताभ्यां द्विपदम् । आदिश्च अन्तश्च अद्यंतौ ताभ्याम् ३–२ ( अद्धि ) अथवा ५–२ । यद्वा हयवरलेति त्रयस्त्रिंशदपि प्रथमैकवचनान्तानि सांकेतिकानि पदानि । आद्यन्ताभ्यां तृतीयाद्विवचनान्तम् । एवं चतुस्त्रिंशत्पदं सूत्रम् । केचित्तु आद्यन्ताभ्यामित्येकपद सूत्रं पृथक् मन्यन्ते । क ख ग घ ङ इति क्रमं विहाय हयवरलेति क्रमः प्रत्याहारग्रहणार्थं कृतः । प्रतिकार्यमाह्रियते इति प्रत्याहारस्तं प्रत्याहारं जिघृक्षता ग्रहीतुमिच्छता छात्रेण पुरुषेण वा आद्यन्ताभ्यां कृत्वा आद्यन्तवर्णाभ्यां सह एते हकारादयः सकारपर्य्यन्ता वर्णास्त्रयस्त्रिंशद्रसा ग्राह्याः ॥ प्रत्याहारं व्यञ्जयन्नाह । आदिवर्णः आदौ वर्णः आदिवर्णः सोऽयमन्तःस्थेन वर्णेन अक्षरेण

सह गृह्यमाणः उच्चार्यमाणो वा अबप्रत्याहारादिस्तन्नामा प्रत्याहार उच्यते । तदेव आद्यंतकं वर्णात्मकमेव नाम यस्य स तन्नामा अकार इत्यादि सुगमं न वरम् ॥

स च अइउऋऌएऐओऔहयवरलञणनङमझढधघभजडदगब इत्येतावत्संख्याकः संपद्यते । चटतकप इति चपप्रत्याहारः । जडदगब इति जबप्रत्याहारः । झढधघभ इति झभप्रत्याहारः ॥

स च अबप्रत्याहारः । इत्येतावत्संख्याक इति । इत्यमुना प्रकारेण एतावता एकोनत्रिंशद्वर्णप्रमाणा संख्या यावत्संपद्यते भवति । आकारादिसवर्णग्रहणात्तु चतुस्त्रिंशद्वर्णप्रमाणसंख्या यस्य सः । एवं चटतकप इति पञ्चभिरक्षरैः चपप्रत्याहारो भवति । आद्यन्तयोश्चकारपकारग्रहणेन चपः । एवं जडदगब इत्यत्र जकारबकारयोर्ग्रहणेन जबः । एवं झढधघभ इत्याद्यन्तयोर्झकारभकारयोर्ग्रहणेन झभः ॥

एवं यत्रयत्र येनयेन प्रत्याहारेण कार्यं सस तत्रतत्र ग्राह्यः ॥ [संख्यानियमस्तु नास्ति ] ॥

एवममुना प्रकारेण यत्रयत्रोदाहरणे येनयेन प्रत्याहारेण सह कृत्यं कार्य्यं भवति सस प्रत्याहारस्तत्रतत्रोदाहरणे ग्राह्यः॥संख्यानियमस्तु नास्ति। प्रत्याहाराणां संख्यानियमो नास्ति। यतः इयंत एव प्रत्याहाराः सन्तीति केप्याहुः । अनियमं व्यावर्त्तयितुमाह । संख्येति । अयमर्थः । न नियमः अनियमः संख्याया अनियमः संख्यानियमः।प्रत्याहाराणां संख्यायाःअनियमो नास्ति । किं तर्हि नियम एव । कथम् । आह–यतः । "हसो १ झवो २ जत्र ३ श्चैव यप ४ श्चाव ५ इल ६ श्चपः ७॥ ञमो ८ झभः ९ खसः १० प्रोक्तो झसं ११ श्च छत १२ ईरितः ॥१॥ यमो १३ हवः १४ खप १५ श्चोक्तो डवश्च १६ ढभ १७ इष्यते ॥ रसो १८ वसः १९ शसः २० ख्यातो झप २१ श्चाव २२ उदाहृतः ॥ २ ॥ ऊ २३ उच्यते ततः प्राज्ञैः प्रत्याहारा उदीरिताः ॥ सौत्रा एते स्फुटं ज्ञेयास्तथा चान्ये यथामति ॥३॥"यदि वा "भ व ल त ऐकैकस्माद्वाभ्यां मः स्यात्पवौ चतुर्भ्यः स्तः ॥ सः षड्भ्यः स्यादित्थं प्रत्याहारास्तु विंशतिर्ज्ञेयाः" ॥ झभ १ अव २ इल ३ छत ४ यम ५ ञम ६ यप ७ झप ८ खप ९ चप १० अव ११ हव १२ जव १३ झव १४ हस १५ वस १६ रस १७ झस १८ खस १९ शस २० एवमेते विंशतिः प्रत्याहाराः ॥

**हसा व्यञ्जनानि॥** हकारादयस्सकारान्ता वर्णा हसा व्यञ्जनानि भवन्ति । स्वरहीनं व्यञ्जनम् । तेष्वकारः सुखोच्चारणार्थत्वादित्संज्ञकः ॥

अथ हसानां संज्ञामाह । सूत्रम् ( हसा व्यञ्जनानि ) हस १–३ ( सवर्णे०।स्रोः०) व्यंज्यन्ते प्रकटीक्रियन्ते अर्था यैस्तानि व्यञ्जनानि । अथवा। विगतमञ्जनं स्वरलक्षणं येभ्यस्तानि १–३ जस् ( जस्शसोः शिः । नुमयमः । नोपधायाः ) स्वर० । हकार-मकाराभ्यां सकार यावत्त्रयस्त्रिंशदक्षराणि हसाः हससंज्ञानि प्रोच्यंते । द्वितीयनाम्नि व्यञ्जनानि प्रोच्यन्ते । व्यंजनलक्षणमाह । स्वरहीनं व्यंजनं यत्स्वरहीनं तद्व्यंजनं यत्स्वरेभ्यो हीनं रहितम् । यद्वा स्वरेभ्यो हीनं व्यतिरिक्तम् । यद्वा । स्वरत्वहीनमपरं यदक्षरं तत् व्यञ्जनसंज्ञं कथ्यते । ननु हकारादयः सस्वराः वर्णाः कथं व्यञ्जनसंज्ञाः इत्याह । तेषु व्यञ्जनेषु अकारः सुखोच्चारणार्थत्वात्, सुखेनोच्चारणमेव अर्थः प्रयोजनं यस्य सः सुखोच्चारणार्थस्तस्य भावः सुखोच्चारणार्थत्वं तस्मात् इत्संज्ञकः ॥

**कार्यायेत् ॥ प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्य्यायोच्चार्य्यमाणो वर्ण इत्संज्ञो भवति ॥ यस्येत्संज्ञा तस्य लोपः । वर्णादर्शनं लोपः । वर्णविरोधो लोपश् ॥**

इल्लक्षणमाह । (कार्यायेत्) द्विपदं सूत्रम् । कार्याय ४–१ ( ङे अक् । ए अय् । सवर्णे० ) स्वर० । इत् एति गच्छति इत् १–१ ( हसेपः० ) पदद्वयेन संधिः ( अ इ ए )॥प्रत्ययादीति॥आदिशब्दात्प्रत्ययागमोपदेशादेशेभ्यः अतिरिक्तोऽधिकः, प्रत्ययादतिरिक्तः अप्प्रत्ययादिः, आगमातिरिक्तो नुडागमादिः, उपदेशः शिष्याख्यारूपः हयवरलेत्यादिः, आदेशः 'पुंसोऽसुङ्' इत्यादिरूपः, एषु कस्मैचित्कार्यायोच्चार्यमाणो वर्ण इत्संज्ञकोऽनुबंधसंज्ञो भवति इति ॥ कृत्यमाह । यस्येत्संज्ञा तस्य लोपः क्रियते । उच्चरितप्रध्वंसिनो ह्यनुबंधा इति ॥ लोपलक्षणमाह । वर्णानामक्षराणामदर्शनमविलोकनं प्रध्वंसाभावो लोप उच्यते । वर्णानां विरोधः संधिकार्यवर्ज्जनं यस्मिन्स लोप एव लोपश् कथ्यते । एकं वर्णं विनाशयति अन्यस्योत्पत्तिं प्रतिबध्नातीति लोपश् । तत्कार्यम् लोपशि पुनर्न संधिः । यथा । ते आगता इत्यादि ॥

**मित्रवदागमः । शत्रुवदादेशः ॥ स्वरानन्तरिता हसाः संयोगः॥ कुचुटुतुपु वर्गाः ॥ उकारः पञ्चवर्णपरिग्रहणार्थः ॥**

आगच्छतीति आगमः । आगमो मित्रवत् । यथा मित्रं मित्रस्य समीपे आगत्योपविशति तथागमोऽप्यायाति । यथा 'नः सक् छते' सगादिः ॥ आदेशः शत्रुवत् । यथा शत्रुः शत्रुं विनाश्य तत्स्थाने तिष्ठति तथा आदेशोपि आदेशिनं विनाश्य तस्य स्थाने भवति । शसः । सकारस्य नकारादेशवत् ॥ अथ संयोगसंज्ञामाह । 'स्वरानन्तरिताः' इति ॥ 'स्वरानंत०' त्रिपदमिदं सूत्रम् । अन्तरं जातं येषां ते अन्तरिताः न अन्तरिताः अनन्तरिताः स्वरैरनंतरिताः स्वरानन्तरिताः ईदृशा हसा व्यञ्जनवर्णाः संयोगसंज्ञा उच्यंते । अत्र बहुवचन जात्यभि-

प्रायेण । तेन द्वयोरपि हसयोः संयोगः संयोगसंज्ञा स्यात् । यद्वा हसौ च हसाश्च हसा एकशेषः समासः । संयोगकार्यं तु ( संयोगान्तस्य लोपः ) इत्यादि ॥ वर्गसंज्ञामाह । कुचुटुतुपु इति ' कुचु० ' द्विपदमिदं सूत्रम् । कुश्च चुश्च टुश्च तुश्च पुश्च कुचुटुतुपु १-३ सांकेतिकम् । वर्गाः १-३ ( सवर्णे० । स्रोर्वि० ) एते पञ्च वर्गसंज्ञका भवन्ति । तत्कार्यम् ( स्तोः श्चुभिः श्चुः । ष्टुभिः ष्टुः । कुप्वोः ᳲक ᳲ पौ वा ) इत्यादि॥ उकारे हेतुमाह । उकार इति ॥ स्वरेषु पञ्चमी मात्रा उकारः तेन 'कु' इत्युक्त कखगघङ । ' चु' इत्युक्ते चछजझञ । 'टु' इत्युक्ते टठडढण । 'तु' इत्युक्ते तथदधन । 'पु' इत्युक्ते पफबभम । इत्येतानि पञ्चपञ्चाक्षराणि गृह्यन्ते ॥

**अरेदो नामिनो गुणः** ॥ नामिनः स्थानिका अर् एत् ओत् एते गुणसंज्ञका भवन्ति ॥ **आरैऔ वृद्धिः** ॥ आ आर् ऐ औ एते वृद्धिसंज्ञका भवन्ति ॥

अथ गुणसंज्ञामाह । अरेदो० इत्यादि॥अर् च एच्च ओश्च एषां समाहारः अरेदो १-३ साङ्केतिकम् । अत्र तपरकरणमसंदेहार्थम् । नामिनः ६-१ स्वर० ( स्रो० । हवे । उ ओ ) गुणः १-१ ( स्रो० ) यथा अर् १-१ एत् १-१ ओ १-१ नामिनः ६-१ गुणः १-१ इति पञ्चपदं वा सूत्रम् । नामिस्थानिका नामिनां स्थाने जाताः ऋकारस्य ॠकारस्य च अर् । इकारस्य ईकारस्य च ए । उकारस्य ऊकारस्य च ओ । एते च त्रयो गुणसंज्ञका भवन्ति । ऌकारस्तु सावर्ण्याद्ग्राह्यः, तेन ऌकारस्य अल् गुणः । तत्कार्याणि ( गुणः। उपधाया लघोः ) इत्यादीनि ॥ अथ वृद्धिसंज्ञामाह । ( आरैऔ० ) इति ॥ आश्च आर् च ऐश्च औश्च एषां समाहारः आरैऔ १-३ साङ्केतिकत्वाद्विभक्तिलोपः । वृद्धिः १-१ ( स्रोर्वि० ) अथवा । आ १-१ आर् १-१ ऐ १-१ औ १-१ वृद्धिः १-१ एवं पञ्चपदं सूत्रम् । अकारस्य आ वृद्धिः । ऋवर्णस्य आर् वृद्धिः । इवर्णस्य एकारस्य च ऐ वृद्धिः । उवर्णस्य ओकारस्य च औ वृद्धिः । एते चत्वारो वृद्धिसंज्ञका उच्यन्ते । ऋकारऌकारयोः सावर्ण्यादेव ऌकारस्याल् वृद्धिः । तत्कार्याणि ( आदिस्वरस्य ञ्णिति वृद्धिः । धातोर्नामिनः । अत उपधायाः ) इत्यादीनि ॥

**अन्त्यस्वरादिष्टिः** ॥ अन्त्यो यः स्वरस्तदादिर्वर्णष्टिसंज्ञको भवति ॥ **अन्त्यात्पूर्व उपधा** ॥ अन्त्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञको भवति ॥

अथ टिसंज्ञामाह । अन्त्यस्वरादिः १-१ टिः १-१ द्विपदम् । अन्ते भवः अन्त्यः अन्त्यो योऽसौ स्वरः अन्त्यस्वरः स आदौ यस्य सोन्त्यस्वरादिः १-१ ( स्रो० ) टि- १-१ ( स्रो० ) मध्ये ( विसर्जनीयस्य सः । ष्टुभिः ष्टुः ) स्वर० । अन्त्यो यः स्वरस्तदादिवर्णः स अन्त्यस्वर एव आदौ यस्य सोऽन्त्यस्वरादिस्तेन सहैव अन्त्यस्वराः

दारभ्य वर्णष्टिसंज्ञो भवति । अथवा । अन्त्यः स्वरस्तदादिवर्णश्च सोन्त्यस्वर एव आदौ यस्य सोऽपि वर्णष्टिसंज्ञको भवति । स्वरान्तशब्दस्य अन्तिमः स्वर एव टिसंज्ञः । हसान्तशब्दस्य अन्त्यो हसस्तत्पाश्चात्त्यः स्वरश्च द्वावपि टिसंज्ञकौ इत्यर्थः । तत्कार्यं तु ( डिति टेः ) इत्यादि । यथा अचिंत्यमहिमा हरौ सखा । अथोपधासंज्ञमाह । सूत्रम् । अन्त्य ५-१ ( ङसिरत् । सवर्णे० ) पूर्वं १-१ ( स्रोाव० ) उपधा १-१ ( आपः ) त्रिपदम् । अन्त्याद्वर्णमात्रात् केवलादन्त्यादक्षरात्पूर्वो यो वर्णः स उपधासंज्ञको भवति । तत्कार्याणि । ( नोपधायाः । अत उपधायाः ) इत्यादीनि राजन्शब्दवत् ॥

**असंयोगादिपरो ह्रस्वो लघुः । विसर्गाऽनुस्वारसंयोगपरो दीर्घश्चगुरुः ॥**

अथ लघुसंज्ञामाह । असंयोगादीति । असंयोगादयः संयोगविसर्गाऽनुस्वाराः परे अग्रस्था यस्मात्स संयोगादिपरः न संयोगादिपरः असंयोगादिपरः एवंभूतो ह्रस्वो वर्णो लघुरुच्यते । तथा चोक्तं प्राकृतच्छन्दोग्रंथे-"पिछुडी लहु अंकुडउ, केवल वन्न उ जोय । ए तीनउ लघु जानिये, अवर सबे गुरु होय" ॥ १ ॥ यथा । क कि कु तथा अ इ उ ऋ ऌ एतेषामग्रे विसर्गानुस्वारसंयोगा न भवन्ति तदा एतेषां लघुसंज्ञा । अथ गुरुसंज्ञामाह । विसर्गानुस्वार इति । विसर्गानुस्वारसंयोगाः परे अग्रे वर्तमाना यस्मात्स विसर्गाऽनुस्वारसंयोगपरः । विसर्गपरो यथा अः । अनुस्वारपरः अम् । संयोगपरो यथा अस्य । एवंभूतो ह्रस्वोऽपि गुरुः पुनर्दीर्घश्च । आ ई ऊ का क्री कू रूपः स्वभावादेव गुरुरुच्यते ॥

**वर्णग्रहणे सवर्णग्रहणं कारग्रहणे केवलग्रहणम् । तपरकरणं तावन्मात्रार्थम् ॥ मुखनासिकावचनोऽनुनासिकः ॥ मुखनासिकाभ्यामुच्चार्यमाणो वर्णोऽनुनासिकः ॥**

**इति संज्ञाप्रक्रिया ।**

मुखनासिकाभ्यामिति रूढिपदम् अन्यथा द्विवचनान्तं न संभवति । यथोक्तं प्रक्रियाकौमुद्याम् । द्वंद्वश्च प्राणितूर्य्यसेनांगानाम् । एषां द्वंद्व एकवत्साध्यः । एकवचनांतो भवतीत्यर्थः । प्राण्यङ्गे दन्तौष्ठम्, मुखनासिकम् । तूर्यांगे मार्दङ्गिकपाणविकम् । सेनाङ्गे-रथिकाश्वारोहम् इति वचनात् मुखनासिकाभ्यां द्वाभ्यामुच्चार्यमाणो वर्णोऽनुनासिकसंज्ञ उच्यते । ञणनङम अनुनासिका इति।मुखादनु पश्चात् नासिकां स्पृशन्तीत्यनुनासिकाः चतुर्दश स्वराः १४, त्रयस्त्रिंशद्व्यञ्जनानि ३३, अनुस्वारः १, विसर्गः १, जिह्वामूलीयः १, उपध्मानीयः १, प्लुतश्च १ एवं द्विपञ्चाशदक्षराणि ५२ । एतेषामष्टौ स्थानानि संति तान्याह।अकुहविसर्जनीयानां कण्ठः१। इचुयशानां तालु २ । ऋटुरषाणां मूर्द्धा ३ । ऌतुलसानां दन्ताः ४ । उपूपध्मानीयानामोष्ठौ ५ । जिह्वामूलीयस्य

जिह्वामूलम् ६ । अनुस्वारस्य नासिका ७ । एदैतोः कण्ठतालु ८ । ओऔतोः कण्ठोष्ठम् ९ । वकारस्य दन्तोष्ठम् १० । आ ई ऊ ॠ ॡ प्लुताश्च एते एतेषां सवर्णग्रहणेनैव गृह्यन्ते । यवरलैर्ञणनङमैश्च संयुक्तस्य हस्योरः स्थानम् । यतः– "अष्टौस्थानानि वर्णानामुरः १ कण्ठः २ शिर ३ स्तथा ॥ जिह्वामूलं च ४ दन्ताश्च ५ नासिको ६ ष्ठौ ७ च तालु ८ च" ॥ इति संज्ञाप्रक्रिया संज्ञाधिकारः ॥ "प्रक्रिया त्वधिकारोऽथ" इति हेमसूरिः।अथवा–"प्रक्रियानुत्पादने स्यादधिकारप्रकारयोः"॥

## अथ स्वरसन्धिः २.

अधुना स्वरसन्धिरभिधीयते ।

अधुनेति संज्ञाकथनानन्तरं स्वरसंधिरभिधीयते कथ्यते । अक्षराणामन्योन्यं संधानं मेलनं संधिः । तत्राप्यादौ स्वरसंधिः स्वराणां सन्धिः स्वरसंधिः । ननु सति अकारे इकारसंधिः आदावेव कथं प्रतिपादितः । तत्रोच्यते । इकारः सावित्रीरूपः शक्तिरूपः । सा च सर्वजगत्सृष्टिकर्त्री तस्मात्पूर्वं प्रतिपादितः ॥

**इ यं स्वरे ॥ इवर्णो यत्वमापद्यते स्वरे परे ॥ दधि आनय इति स्थिते । दध् य् आनय इति तावद्भवति ॥**

सूत्रम् । ( इ यं० ) इ १–१सांकेतिकम् यं २–१ (अम्शसो० । मोनु०) स्वरे ७–१ ( अ इ ए ) सिद्धम् । यद्वा इश्च ईश्च इ १–१ ( नपुंसकस्य ) इति ह्रस्वः ( नपुंसकात्स्यमोर्लुक् ) वर्णग्रहणे सवर्णग्रहणमिति वचनात् इवर्ण इकार-ईकाररूपो यत्वं यकारमापद्यते प्राप्नोति स्वरे परे । ह्रस्वदीर्घप्लुतभेदा इति अकारस्य स्वरत्वे आकारस्यापि स्वरत्वं सिद्धमेव । दधि अग्रे आनय ( इ यं स्वरे ) अनेन सूत्रेण इकारस्य यकारः । दध्य् आनय इति जातम् । ननु दधि आनयेत्यत्र ( नामिनः स्वरे ) इति नुमागमः कथं न क्रियते तत्राह । ( नामिनः स्वरे ) इति तु स्यादिविभक्तिसप्तकस्वरे परे भवति न त्वन्यत्र । तर्हि ( यस्य लोपः ) कथं न क्रियते तत्राह ( यस्य लोपः ) इति तु ईपि तद्धिते कृते स्वरे यकारे च परे सति भवति न त्वन्यत्र । दध् य् आनयेत्यत्र ( संयोगान्तस्य लोपः ) इत्यस्य प्राप्तौ ( असिद्धं बहिरंगमन्तरंगे ) इति यलोपनिषेधः । यद्वा ( संयोगान्तस्य लोपः ) इति स्वाभाविकसंयोगान्तविषयः । प्रक्रियायां तु ( संयोगान्तस्य० ) इति लोपे प्राप्ते ( यणः प्रतिषेधो वाच्यः ) ॥

**हसेऽर्हः हसः ॥ स्वरात्परो रेफहकारवर्जितो हसो हसे परे द्विर्भवति ॥ इति धकारस्य द्वित्वम् ।**

कृत्यान्तरमाह । सूत्रम् ( हसे० ) त्रिपदम् । हसे ७–१ ( अ इ ए ) र् च ह् च र्ह् न र्ह् यत्र स अर्ह् १–१ ( हसेपः० ) हस १–१ स् ( स्रो० ) हसे अर्हे ( एदो-

तोतः ) अकारलोपः । स्वरहीनं० । सिद्धम् ॥ स्वरात् ह्रस्वस्वरात्परोऽग्रे वर्तमानो रेफहकारवर्जितोऽन्यो हसो हसप्रत्याहारसंबंधी वर्णो हसे परे सति द्विर्भवति । द्वयोर्भावो द्वित्वम् । एकस्य द्वौ भवत इत्यर्थः । इति धकारस्य द्वित्वम् । द्वित्वे कृते पुनर्द्वित्वं न भवति अनवस्थादोषप्रसगात् । द्वित्वविधानाद्द्वावेव शिष्येते इति दध्, ध्य् आनय इति जातम् ॥

**झबे जबाः॥ झसानां झब परे जबा भवन्ति ॥ इति पूर्वधकारस्य दकारः ॥ वर्ग्यो वर्ग्येण सवर्ण इति वचनात् [ यथासंख्यं वा वक्तव्यम् ] ( स्वरहीनं परेण संयोज्यम् ) दध्ध्यानय इति सिद्धम् ॥**

सूत्रम् ( झबे० ) ७-१ ( अ इ ए ) जबाः १-३ ( सवर्णे० । स्रोविं० ) वृत्तिः सुगमा ॥ अत्र सूत्रे झसानामिति पदम् ( खसे चपा झसानाम् ) इति सूत्रादनुवर्त्तते । अन्यत्राप्यनुवृत्तिः सरस्वतीदत्तसूत्रपाठक्रमादवगन्तव्या ।अत्र तु मया न कथयिष्यते । अनेन सूत्रेण पूर्वधकारस्य दकारः । ननु झसास्त्रयोविंशतिः जबाः पञ्चैव तेन यथासंख्यमिति धकारस्य दकार एव कथं क्रियते तत्राह । सवर्णत्वात् धकारस्य दकारो भवति । ननु धकारदकारयोः सावर्ण्य कथमित्याह । वर्ग्यो वर्ग्येण सवर्ण इति । वर्गे भवो वर्ग्यो वर्णः वर्ग्येण स्ववर्गान्तर्वर्त्तिना अक्षरेण सह सवर्णो भवति इति सवर्णत्वात् धस्य दः । यद्वा यथासंख्य झढध जडदेत्यनेनापि धस्य दः । अत्र तु सवर्णत्वात् यथासंख्यमित्युभयत्रापि धस्य दकारो भवति । परम् अग्निमथ् भ्यामित्यत्र. सवर्णत्वादेव थकारस्य दकारो भवति न तु यथासंख्यम् । स्वरेण हीनं- रहितं यदक्षरं तत्परेण अग्रस्थितेन स्वरेण वर्णेन सह संयोज्यम् । दध्ध्यानय इति सिद्धम् । एवं स्वस्ति अस्तु-स्वस्त्यस्तु । हरि अनुभवः-हर्य्यनुभवः ॥

**गौरी अत्र गौर्य्यत्र । अर्ह्-इतिविशेषणान्न रेफस्य द्वित्वं किंतु । रहाद्यपो द्विः ॥ स्वरपूर्वाद्रेफाद्धकाराच्च परो यपो द्विर्भवति ॥ ( जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् ) स्वर इत्यनुवर्त्तते ॥**

इकारोदाहरणमाख्याय ईकारोदाहरणमाह । गौरी अग्रे अत्र ( इ यं स्वरे ) गौर्य् अत्र इति जातम् । ततः अर्ह् इति सूत्रोक्तविशेषणात् रेफहकारयोर्द्वित्ववर्जनादत्र रेफस्य द्वित्व न भवति । ततः किं कर्त्तव्यमित्याह । सूत्रम् ( रहाद्य० ) रश्च हश्च अनयोः समाहारः रह तस्मात् रह ५-१ ( टसिरत् । सवर्णे० ) यप१-१ स् ( स्रो० )द्विविभ्यां सुच् । स्रो० ) द्विस् १-१ ( अव्ययाद्विभक्तेर्लुक् ) इति लोपः ( चपा अबे जबाः ) साधिः । यपः अग्रे द्विः । अत्र ( हवे । उ ओ ) सिद्धम् । स्वरः पूर्वं आदौ यस्य स स्वरपूर्वः तस्मात् स्वरात्परस्माद्रेफात् हकाराच्च परोऽग्रस्थो यपो द्विर्भवति । इति यकारस्य द्वित्वम् । ( जलतु० ) यथा तुम्बी० जलस्योपरि

तिष्ठति तथा रेफोपि वर्णस्योपरि गच्छति नत्वधः । स्वर० । गौर्य्यत्र इति सिद्धम् । केचित्तु (न दीर्घादाचार्याणाम्) इति दीर्घस्वरस्थाद्रेफात्परस्य यस्य द्वित्वं नेच्छन्ति तन्मते गौर्यत्र इति सिध्यति । एवं नदी एषा नद्येषा । इतोऽग्रे स्वरसंधिं यावत्सर्वेष्वपि सूत्रेषु 'स्वरे' इति पदमनुवर्त्तते अन्वागच्छति । अनुक्तमपि ज्ञेयमित्यर्थः । यथा ( इ यं स्वरे ) इत्यत्र स्वरे इति पदं तथा ( उ वम् ) इत्यादिष्वपि प्राग्वत् ज्ञेयम् ॥

एवमन्यत्रापि यत्र न सूत्राक्षरैः कार्यसिद्धिस्तत्र सर्वत्र सूत्रांतरात्पदांतरानुवृत्तिर्ज्ञातव्या । ग्रंथभूयस्त्वभयान्नास्माभिर्लिख्यते ॥

एवमसुना प्रकारेण अन्यप्रयोगेष्वपि यत्र केवलसूत्राक्षरैः कार्यसिद्धिर्न भवति तत्र प्रयोगे सूत्रांतरादन्यसूत्रात्पदांतरस्य अन्यपदस्यानुवृत्तिर्ज्ञेया । ग्रंथस्य शास्त्रस्य भूयस्त्वभयात् भूयसो भावो भूयस्त्वं ग्रंथस्य भूयस्त्वं तदेव भयं ग्रंथभूयस्त्वभयं तस्मात् ग्रंथभूयस्त्वभयात् प्राचुर्य्यभयात् सूत्रेसूत्रे तत्तत्पदमस्माभिर्न लिख्यते । केचित्तु आभिः सरस्वतीभिर्न लिख्यते स्म इति व्याकुर्वंति । शेषं सुगमम् ॥

उ वम् ॥ उवर्णो वत्वमापद्यते स्वरे परे । ( हसेऽर्हे हसः । झभे जबाः ) मधु अत्र मद्ध्वत्र ॥

सूत्रम् । ( उ० ) उ १–१ । सांके० । यद्वा । उश्च ऊश्च उ १–१ । ( नपुंसकस्य० ) इति ह्रस्वः ( नपुंसका० ) वम् २–१ ( अम्शसो० ) तपरकरणं विना कारग्रहणं च विना वर्ण एव गृह्यते तेन उ इत्युक्ते उवर्णः उकारो ( ऊ ) काररूपो वत्वं वकारं प्राप्नोति स्वरे परे । मधु अग्रे अत्र । अत्र ( उ वम् ) इति उकारस्य ऊकारस्य च वकारः ( हसेऽर्हे हसः ) इति धकारस्य द्वित्वम् । ( झभे जबाः ) इति पूर्वधकारस्य दकारः । स्वर० । मद्ध्वत्र इति सिद्धम् । मधु क्षौद्रमत्र वर्त्तते । एवं वधू आसनम् वद्ध्वासनम् ॥

ऋ रम् ॥ ऋवर्णो रत्वमापद्यते स्वरे परे । पितृ अर्थः पित्रर्थः ।

ऌ लम् ॥ ऌवर्णो लत्वमापद्यते स्वरे परे । ऌ अनुबंधः लनुबन्धः ।

ए अय् ॥ एकारोऽ( अ ) य् भवति स्वरे परे । ने अनम् नयनम् ।

ओ अव् ॥ ओकारोऽ ( अ ) व् भवति स्वरे परे । भो अति भवति ॥

सूत्रम् । ऋ १–१ स् सांकेतिकत्वात् सलोपः । रम् २–१ (अम्शसो०) ऋवर्णस्य रकारो भवति स्वरे परे । पितृ अग्रे अर्थः ( ऋ रम् । हसेर्हे हसः ) स्वर० । पित्रर्थः । सूत्रम् । ऌ १–१ सांकेतिकम् । लम् २–१ ( अम्शसो० ) ऌवर्णस्य लकारो भवति स्वरे परे । ऌ अग्रे अनुबंधः ( ऌ लम् ) स्वर० । लनुबंधः । ऌ ऌकारो-

ऽनुबंधः इत्संज्ञो यस्य धातोः स लनुबंध उच्यते । एवम् लृ अग्रे आकृतिः लाकृतिः । लृ इत् लित् । सूत्रम् । ए १-१ । सांके० । अय १-१ ( हसेपः० ) एकारस्य अय् भवति स्वरे परे । णीञ् प्रापणे । णी ( आदेः ष्णः स्नः ) नी ( भावे युट् । युवोरनाकौ ) इति युस्थाने अनः । गुणः । ने अन ( ए अय् ) अनेन एकारस्य अय् भवति । स्वर० । ( अतोऽम् । अम्श० ) नयनम् इति सिद्धम् । सूत्रम् । ओ १-१ । सांके० । अव् १-१ ( हसेपः० ) व्याख्या सुगमा । भो अग्रे अति ( ओ अव् ) स्वर० । भवति । इति सिद्धम् ॥

[ गवादेरवर्णागमोऽक्षादौ वक्तव्यः ] गो अक्षः गवाक्षः । गो इंद्रः गवेंद्रः । गो अजिनम् गवाजिनम् । प्र ऊढः प्रौढः । प्र ऊढिः प्रौढिः । स्व ईरम् स्वैरम् । स्व ईरिणी स्वैरिणी । अक्ष ऊहिनी अक्षौहिणी सेना ॥

गो आदिर्यस्य स गवादिस्तस्य गवादेः ६-१ ( ङिति । ङस्य । सोर्विसर्गः ) गवादेः अवर्णस्य आगमः अवर्णागमः १-१ ( सो० ) अक्ष आदिर्यस्य सः अक्षादिस्तस्मिन् अक्षादौ ७-१ ( ङेरौ डित् ) डित्वाट्टिलोपः । स्वर० । वक्तव्यः १-१ ( सो० ) सिद्धम् । अत्र अकारागमे एव रूपसिद्धिः । वर्णग्रहणं तु चिंत्यम् । यद्वा । अश्चासौ वर्णश्च अवर्णः । अकारवर्ण एव इत्यर्थः । गो अक्षः । अवर्णागमः ( ओ अव् ) स्वर० ( सवर्णे० ) गवाक्षः । गो इंद्रः । अवर्णागमः ( ओ ) स्वर० ( अ इ ए ) गोः पृथ्व्या इन्द्रः गवेन्द्रः । गो अजिनम् ( गवादेरवर्णागमः० ) ( ओ अव् ) स्वर० ( सवर्णे० ) गवाजिनं गोचर्म । प्र अग्रे ऊढः । अवर्णागमस्य वैयर्थ्यात् न ( सवर्णे दीर्घः सह ) इति । किंतु ( उ ओ ) ( ओ औ औ ) प्रौढः । एवं प्र ऊढिः प्रौढिः । स्व अग्रे ईरम् । अवर्णागमः ( अ इ ए । ए ऐ ऐ ) स्वैरम् । एवं स्व ईरिणी स्वैरिणी । अक्ष अग्रे ऊहिनी अवर्णागमः ( उ ओ । ओ औ औ ) अक्षौहिणी । सेनाविशेषः । "सा सेनाक्षौहिणी नाम खागाष्टैकाद्विकैः २१८७० गजैः । रथैः २१८७० श्च भिर्हयैस्त्रिघ्नैः ६५६१० पंचघ्नैश्च पदातिभिः ३२८०५०" इति ॥

[ क्वचित्स्वरवद्यकारः ] यथाऽध्वपरिमाणे । गो यूतिः गव्यूतिः । अन्यत्र गवां मिश्रीभावे गोयूतिः ॥

सूत्रम् । क्वचित्प्रयोगान्तरे यकारः स्वरवद्वक्तव्यः । स्वरेण तुल्यः स्वरवत् । स्वरे परे सति यत्कार्यं भवति तद् यकारे परेऽपि भवतीत्यर्थः । यथा अध्वपरिमाणे मार्गप्रमाणे

---

१ गूतिः इति पाठः । २ "अंगुल न नागनिगुणा [illegible] दशाश्वाजिनः । पदाति- [illegible] "[illegible] ते [illegible]" इति [illegible] दृश्यते ॥

वाच्ये सति गो अग्रे यूतिः अत्र यकारस्य स्वरवत्त्वात् ( ओ अव् ) स्वर० । गव्यूतिः क्रोशद्वयम् । अन्यत्र तु मार्गप्रमाणाभावे गवां मिश्रीभावः एकीभावः समूहीभवनम् । गोयूतिरित्येव तिष्ठति । सिद्धम् । एवं पितृ अग्रे यम् पित्र्यमित्यपि ज्ञेयम् ॥

ऐ आय् ॥ ऐकार आय् भवति स्वरे परे । नै अकः नायकः ॥

औ आव् ॥ औकार आव् भवति स्वरे परे । तौ इह ताविह ॥

सूत्रम् । ऐ १–१। सांके० । आय् १–१ । ( हसेपः० ) ऐकारः आय् भवति स्वरे परे । नै अग्रे अकः । ( ऐ आय् ) स्वर० । नायकः । सूत्रम् । औ १–१ । सांके० । आव् १–१ ( हसे० ) औकारः आव् भवति स्वरे परे । तौ अग्रे इह । ( औ आव् ) स्वर० । ताविहेति सिद्धम् ॥

य्वोर्लोपश् वा पदांते ॥ पदांते स्थितानामयादीनां यकारवकारयोर्लोपश् वा भवति । ते आगताः त आगताः तयागताः । तस्मै एतत् तस्मा एतत् तस्मायेतत् । पटो इह पट इह पटविह ॥ तौ इमौ ता इमौ ताविमौ ।

( य्वोर्लोपश् वा पदांते ) इति सूत्रम् । य् च व् च य्वौ तयोः य्वोः ६–२ । स्वर० । ( स्रो० ) लोपश् १–१ । ( हसेपः० ) वा ३–१ ( अव्यया० ) पदांते ७–१ ( अ इ ए ) सिद्धम् । पदांते । आदिशब्दात् ( ए अय् । ऐ आय् । ओ अव् । औ आव् ) एभिः सूत्रैर्जातानामयादीनां सम्बन्धिनोर्यकारवकारयोर्वा लोपश् भवति । ते अग्रे आगताः । उभयत्रापि ( ए अय् ) एकत्र यकारलोपः । अन्यत्र । स्वर० ते आगताः तयागताः त आगताः । पटो इह पटविह पट इह । ( ओ अव् ) शेषं प्राग्वत् । एवं तस्मै आसनम् तस्मायासनं तस्मा आसनम् । तस्मै इदम् तस्मायिदम् तस्मा इदम् । असौ इंदुः असाविंदुः असा इंदुः । तौ इमौ ताविमौ ता इमौ ॥

लोपशि पुनर्न संधिः। छंदसि तु भवति । हेसखे इति हेसख इति हेसखेति॥

ननु त आगताः अत्र ( सवर्णे० ) । तथा पटइहेत्यत्र ( अ इ ए ) इति संधिः कथं न क्रियते तत्राह । लोपशीति । लोपशि कृते पुनः पूर्वापरवर्णयोर्मिथोघटनस्वरूपः संधिः कार्यांतरसंधानं च न भवति । यथा त आगताः । राजभ्याम् अत्र ( अद्धि ) इति आ न भवति । नह्युक्तमनित्यमिति क्वापि लोपशि कृतेपि संधिर्भवति । यद्वा । छंदसि तु भवतीति तुशब्दात् कुत्रचित् लौकिकोदाहरणेपि लोपशि कृते संधिर्भवति । यथा दामोदरः राजाश्वः पंचाग्निः दंडिषु इत्यादिषु कार्यान्तरसं-

१ 'गव्यूतिः स्त्री क्रोशयुगम्' इत्यमरः । २ बटो इह बट इह बटविह इ० पा० ॥

धानरूपश्च संधिर्भवति । पुनर्विशेषमाह । छंदसि वेदे लोपशि कृतेपि संधिर्भवति । यथा हे सखे अग्ने इति । ( ए अय् । य्वोर्लोप० ) इति यकारलोपः । छांदसिकत्वात् न सन्धिनिषेधः । तेन ( अ इ ए ) ।

**एदोतोतः ॥ पदांते स्थितादेकारादोकाराच्च परस्याकारस्य लोपो भवति ॥ ते अत्र तेऽत्र । पटो अत्र पटोऽत्र ॥ सवर्णे दीर्घः सह ॥ सवर्णस्य सवर्णे परे सह दीर्घो भवति । श्रद्धा अत्र श्रद्धात्र । दधि इह दधीह । भानु उदयः भानूदयः । पितृ ऋणम् पितॄणम् ॥**

सूत्रम्-( एदोतोतः ) एच्च ओच्च एदोतः । ५-१ । स्वर० । ( स्रो० ) एदोतः अग्रे अतः । मध्ये । ( अतोत्युः । उ ओ । एदोतोतः ) इत्यकारलोपः । अत् ६-१ । स्वर० । ( स्रो० । एदोतोतः ) तपरकरणमसंदेहोच्चारणार्थम् । अत इत्यत्र तपरकरणं तावन्मात्रग्रहणार्थम् । पदांते स्थितात् एकारात् ओकारात् परस्याकारस्य लोपो भवति । ते अग्रे अत्र । पदांते स्थितौ यावेकारौकारौ ताभ्यां परस्याकारस्य लोपो भवति । चंपकपटवासन्यायादखंडाकारस्तिष्ठति । तेऽत्र । एव पटोऽत्र प्रवर्त्तते इति सिद्धम् । ( ए अय् । ओ अव् ) इति तु पदमध्ये भवति । अत्र 'सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्' इति न्यायोऽङ्गीकर्तव्यस्तेन ( ए अय् । ओ अव् ) इति न भवति ॥ सूत्रम् ( सवर्णे दीर्घः० ) सवर्ण ७-१ । ( अ इ ए ) सदृशो वर्णः सवर्णः । दीर्घः १-१ ( स्रो० ) सह १-१ । सु ( अव्य० ) पूर्वापरयोः सदृशस्वरयोर्मिलनेनाद्यो दीर्घो भवति । श्रद्धा अत्र श्रद्धात्र । यदुक्तम्-"क्रमेण वैपरीत्येन गुरूणां गुरुभिः सह ॥ लघूनां लघुभिः सार्द्धं चतुर्द्धेति सवर्णता ॥ १ ॥"

"अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता ।
पूर्वदीर्घस्वरं दृष्ट्वा परलोपो विधीयते ॥ १ ॥
सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् ।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥ २ ॥"

अदीर्घइत्यादि । दधि अग्रे इह, दधीह । भानु अग्रे उदयः, भानूदयः । पितृ अग्रे ऋणम्, पितॄणम् । दंड अग्रे अग्रम् दंडाग्रम् ॥ ननु दधि इह, अत्र कथं ( इ यं स्वरे ) इति न यत्वं भवतीत्याह । सामान्य-इति । नूनं निश्चितं सामान्यशास्त्रतः सामान्यसूत्रात् विशेषो विशेषशास्त्रं विशेषसूत्रं बलवान्भवेत् । तत्र बहुव्यापकं सामान्यम् । अल्पव्यापको विशेषः । दधि इह इत्यत्र ( इ यं स्वरे ) इति सामान्यसूत्रं स्वराणां बहुत्वात् । ( सवर्णे दीर्घः० )

---

१ पूर्वोत्तरयोः इति पाठः ॥

इति विशेषसूत्रं तस्य सवर्णस्यैकत्वात् । पक्षांतरमाह । परेणेत्यादि वा । अथवा इह व्याकरणे प्रायशो बाहुल्येन बहुषु स्थानेषु परेण अग्रेतनसूत्रेण पूर्वसूत्रस्य बाधो निषेधो दृश्यताम् । यथा ( इ यं स्वरे ) इति सूत्रं प्राक् प्रतिपादितं तस्य हि ( सवर्णे दीर्घः० ) इति सूत्रेण बाधः । तदेवाह । प्रायशो बाहुल्येनेह व्याकरणे एवं दृश्यताम् । इत्यनेनोत्सर्गापवादावुक्तौ ॥ ततः उत्सर्गापवादयोरपवादविधिर्बलवानिति न्यायो दर्शितः । एकस्मिन्नेवोदाहरणे सूत्रद्वयसंभवे सामान्यविशेषयोर्यद्विशेषसूत्रं तल्लगति । पूर्वोक्तपरोक्तयोः सूत्रयोर्यत्परोक्तं सूत्रं तत्प्राप्नोति न तु पूर्वोक्तमिति भावः । एवं भानु उदयः । अत्र ( उ वम् ) इति सामान्यम् । ( सवर्णे दीर्घः सह ) इति विशेषः । एवमन्यत्रापि श्लोकार्थोऽयम् ॥[1]

अ इ ए ॥ अवर्णे इवर्णे परे सह ए भवति । तव इदम् तवेदम् ॥ [ हलादेरीषादौ टेर्लोपो वक्तव्यः ] हल ईषा हलीषा । मनस् ईषा मनीषा । लांगल ईषा लांगलीषा । शक अंधुः शकंधुः । कर्क अंधुः कर्कंधुः । कुल अटा कुलटा । सीमन् अंतः सीमंतः । सार अंगः सारंगः । पतत् अंजलिः पतंजलिः । अद्य ओम् अद्योम् ॥ उ ओ ॥ अवर्णे उवर्णे परे सह ओ भवति । गंगा उदकम् गंगोदकम् । तीर्थ उदकम् तीर्थोदकम् ॥ ऋ अर् ॥ अवर्णे ऋवर्णे परे सह अर् भवति । तव ऋद्धिः तवर्द्धिः ॥

सूत्रम् । अ १–१ । सांके० । इ ७–१ । सांके० । ए १–१ । सांके० । तव अग्रे इदम् । ( अ इ ए ) अवर्णे इवर्णे परे सह उभयोर्योगेन ए भवति । तव इदं तवेदम् । इत्युदाहरणम् । गंगा इयं गंगेयम् । अत्रापि विशेषमाह । हल आदिर्यस्य स हलादिः । तस्य हलादेः ६–१ । ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० ) ईषा आदिर्यस्य स ईषादिः तस्मिन् ईषादौ ७–१ । ङि ( ङेरौ ङित् ) औ ङित्त्वाट्टिलोपः । स्वर० । टि ६–१ । अस् ( ङिति । ङस्य । स्रो० । नामिनो रः । रहाद्यपो द्विः ) लोपः १–१ । ( स्रोः० ) वक्तव्यः १–१ ( स्रो० ) हलादेः शब्दगणस्य ईषादौ गणे परे टेः ( अंत्यस्वरादिष्टिः ) इति टेर्लोपो वक्तव्यः । हल अग्रे ईषा । अनेन टेर्लोपः । स्वर० । हलीषा । आदिशब्दान्मनस् ईषा मनीषा ॥

---

१ वेदान्तादिष्वयमेव भूतसृष्ट्यादिक्रमे श्लोकार्थो विनियुज्यते । यथा–भूतसृष्टौ प्रथमभूतं बाधित्वा पर महाभूत समुत्पद्यते । प्रमाणं चात्र "तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधिभ्योऽन्नम् । अन्नाद्रेतः । रेतसः प्रजाः । इत्येष भूतसर्गः" इत्यादिषु पूर्वपूर्वं बाधित्वोत्तरोत्तरं प्रवर्तते । एवोत्तरं पूर्वस्माद्बलवत् ॥

लांगल ईषा लांगलीषा । अद्य अग्रे ओम् अद्योम् । शक अंधुः शकंधुः । कुल अटा कुलटा । सीमन् अंतः सीमंतः । पतत् अंजलिः पतंजलिः । सार अंगः सारंगः । इत्यादयोपि तथैव ज्ञेयाः । सूत्रम् ( उ ओ ) उ १-१ सांके० । ओ ७-१ सांके० । वृत्तिः कंठ्या । तव उदकम् तवोदकम् । गंगा उदकम् गंगोदकम् । सूत्रम् ( ऋ अर् ) ऋ ७-१ । सांके० । अर् १-१ । ( हसेपः० ) अर्थो वृत्तितो ज्ञेयः । तव अग्रे ऋद्धिः ( ऋ अर् ) [ जलतुंबिकान्यायेन रेफस्योर्ध्वगमनम् ] तवर्द्धिः इति सिद्धम् ॥

[ क्वचिदार् ] अवर्ण ऋवर्णे परे सह क्वचिदार् भवति । ऋण ऋणम् । ऋणार्णम् । प्र ऋणम् प्रार्णम् । वसन ऋणम् । वसनार्णम् । वत्स ऋणम् वत्सार्णम् । वत्सतर ऋणम् वत्सतरार्णम् । कंबल ऋणम् कंबलार्णम् । दश ऋणम् दशार्णम् ॥ [ ऋते च तृतीया समासेऽपि ] शीतेन ऋतः शीतार्त्तः । दुःखेन ऋतः दुःखार्त्तः । तृतीयेति किम् । परम ऋतः परमर्त्तः ॥

क्वचित् ७-१ ( अव्यया० ) आर् १-१ ( हसेपः० । चपा अवे० ) वृत्तेरर्थो ज्ञेयः । क्वचित् प्रयोगांतरे अवर्ण ऋवर्ण परे सति सह उभयोर्योगेन आर् भवति । ऋण ऋणम् ( क्वचिदार् । रहाद्यपो द्विः ) स्वर० । जलतुंबिका० । ऋणार्णम् । एवं ऋतशब्दे परे तृतीयासमासेऽपि आर् स्यात् । शीतार्तः । दुःखार्तः । वसनार्णम् कंबलार्णम् । दशार्णम् । वत्सतरार्णम् । प्रार्णम् ॥

ऌ अल् ॥ अवर्ण ऌवर्णे परे सह अल् भवति । तव ऌकारः । तवल्कारः ॥ [ ऋऌवर्णयोर्मिथः सावर्ण्यं वा वक्तव्यम् । ] [ रलयोः सावर्ण्यं वा वक्तव्यम् ।] होतृ ऌकारः होतॄकारः होतॢकारः । परि अंकः पर्य्यंकः पल्यंकः ॥

( ऌ अल् ) ऌ ७-१ । सांके० । अल् १-१ ( हसेपः० ) वृत्तेरर्थो ज्ञेयः । तव अग्रे ऌकारः । (ऌ अल् । रहाद्य०) । स्वर०।तवल्कारः । नन्वत्र लकारोस्ति रकारो नास्ति (रहाद्यपो द्विः) इति कथं लगति तत्राह । रलयोरिति । रकारलकारयोः सावर्ण्यं सदृशत्वं वक्तव्यम् । तेन (रहाद्यपो द्विः) इति ककारस्य द्वित्वे तवल्क्कार इति सिद्धम् । रकारलकारयोः उपचारात् वाग्रहणाद्वा । वेदे ऋकारऌकारयोरपि सावर्ण्यं वक्तव्यम् ।

१ वृत्तौ इ० पाठः । २ वृत्तौ इ० पा० । ३ वा ज्ञेयम् इ० पा० ॥

होत्लृकारः । ( सवर्णे० ) होतृ्कारः । अत्र ऋलृवर्णयोरसवर्णत्वेनापि रलयोरित्यनेन सावर्ण्यम् । "ऋलृवर्णस्थानिनोः प्रायः सावर्ण्यं रलयोर्भवेत् । तथा वेदे सवर्णत्वं स्यादृकारलृकारयोः" ॥ परि अग्रे अकः पर्य्यंकः । एवम् पलि अग्रे अंकः पल्यंकः । उभयत्रापि ( इ यं स्वरे । रहाद्यपो द्विः ) स्वर० । सिद्धम् ॥

ए ऐ ऐ॥अवर्ण एकारे ऐकारे च परे सह ऐकारो भवति । तव एषा तवैषा । तव ऐश्वर्य्यम् तवैश्वर्य्यम् ॥ ओ औ औ ॥ अवर्ण ओकारे औकारे च परे सह औकारो भवति । तव ओदनम् तवौदनम् । तव औन्नत्यम् तवौन्नत्यम् ॥

सूत्रम् ! ( ए ऐ ऐ ) ए ७–१ । सांके० । ऐ ७–१ । सांके०।ऐ १–१ । सांके०। वृत्तिः कंठ्या । उदाहरणम् । तव अग्रे एषा । ( ए ऐ ऐ ) तवैषा । तव अग्रे ऐश्वर्य्यम् ( ए ऐ ऐ ) तवैश्वर्य्यम् । इति सिद्धम् । सूत्रम् । ओ ७–१ । सांके० । औ ७–१ । औ १–१ सांके० । वृत्तिः कंठ्या । उदारणम् । तव ओदनम् ( ओ औ औ ) तवौदनम् । तव अग्रे औन्नत्यम् तवौन्नत्यम् । गंगा अग्रे ओघः गंगौघः ॥

[ ओष्ठोत्वोर्वा समासे ]अवर्णस्य ओष्ठोत्वोः परयोर्वा सह ओ भवति समासे सति । बिंब ओष्ठः बिंबोष्ठः बिंबौष्ठः । स्थूल ओतुः स्थूलोतुः स्थूलौतुः । समासे इति किम् । तवौष्ठः ॥

इति स्वरसंधिः ।

ओष्ठश्च ओतुश्च ओष्ठोतू तयोः ओष्ठोत्वोः ७–२ ( उवम् ) स्वर० । वा ३–१ ( अव्य० ) ओ १–१ । सांके० ( ओ औ औ ) समासे ७–१ । अवर्णस्य ओष्ठोत्वोः शब्दयोः परयोः ओष्ठोत्वोः ओकारेण सह वा अकारस्य ओकारो भवति समासे सति । पक्षे ( ओ औ औ ) यद्वा ( ओष्ठोत्वोर्वा ) इति तत्र ओष्ठोत्वोः परयोः अवर्णस्य वा लोपो भवतीति व्याख्या । बिंब अग्रे ओष्ठः । बिंबाकारावोष्ठौ यस्य स बिंबोष्ठः बिंबोष्ठः । स्त्री चेत् बिंबोष्ठी बिंबौष्ठी वा । अनेन एकत्र अकारलोपः । स्वर० । द्वितीये ( ओ औ औ ) तथैव स्थूलश्चासावोतुश्च स्थूलोतुः स्थूलौतुर्वा । स्थूलमार्जार इत्यर्थः । समास इति किम् । हे छात्र ओष्ठ पश्य छात्रौष्ठं पश्येत्येकमेव रूपम् । एवं तवौष्ठः ॥

इति स्वरसंधिः ।

---

१ पक्षे होतृकारः होतृलृकारः वर्णविश्लेषं कृत्वा होत्ऋलृकार इति जातम् ( ऋलोर्मिथः सावर्ण्यं वा वक्तव्यम् ) ऋस्थाने लृः ( तोर्लिलः ) तस्य स्थाने लः । ऋलोर्मिथः सावर्ण्यं वाच्यम् । लृस्थाने ऋ ( सव० ) स्वरहीनं० । होल्लृकारः । इति सिद्धम् ॥ "रलयोर्डलयोश्चैव सषयोर्बवयोस्तथा । वदन्त्येषां च सावर्ण्यमलंकारविदो जनाः ॥"

# अथ प्रकृतिभावः ३.

अथ प्रकृतिभाव उच्यते । नामी ॥ आदसोऽमी शब्दः संधिं न प्राप्नोति । अमी आदित्याः । अमी अश्वाः । अदस इति किम् । अमी रोगस्तद्वान् अमी असौ अम्यसौ ॥

अथ स्वरसंधिकथनादनंतरं प्रकृतिभाव उच्यते । प्रकृतेर्भावः भवनं सत्ता इति, प्रकृतिर्यथावस्थितस्वरूपस्य भावो अवस्थितिर्वा प्रकृतिभावः । संधियोग्या अपि स्वराः केचित्प्रकृतिस्था एव तिष्ठति तस्मात्प्रकृतिभाव उच्यते । संधिसंभवेपि प्रकृतिस्था एव ये तिष्ठंति ते प्रगृह्या उच्यंते । तत्रादिमं सूत्रम् ( नामी ) न १-१ ( अव्य० ) अदस् १-३ ( त्यदादेः० ) सकारलापः ( जसी । दस्य मः । अ इ ए । एरी वहुत्वे ) एकारस्य इकारः । अमी १-१ । सांके० । ( सवर्णे० ) नामीति सिद्धम् । अदस्शब्दस्य जसि योऽमीशब्दो निष्पन्नः सः संधिं न प्राप्नोति । अमीशब्देन रोगवानपि उच्यते तन्निरासार्थमदस् इति पद प्रयुक्तम् । तत्र संधिः। अमी आदित्याः ( इ यं स्वरे ) इति सूत्रप्राप्तावपि संधिप्रतिषेधः । एवम् अमी ओष्ठाः । सन्धिप्रतिषेधः । एवममी एडकाः सिद्धा एव गृह्यंते । पर द्विवचने द्विवचनम् । अमी अश्वाः । अदस इति किम् । अमी असौ अम्यसौ ॥

य्वे द्वित्वे ॥ ई च ऊ च ए च य्वे । ईकारांत ऊकारांत एकारांतश्च शब्दो द्वित्वे वर्त्तमानः संधिं न प्राप्नोति । [ मणीवादिवर्ज्जम् ] अग्नी अत्र । पटू अत्र । माले आनय । मणीवादौ तु संधिर्भवति । मणी इव मणीव । दंपती इव दंपतीव । जंपती इव जंपतीव । रोदसी इव रोदसीव ॥

सूत्रम् । (य्वे० )ई च ऊ च ए च य्वे १-१। सांके०। द्वित्वे ७-१ (अ इ ए) इति ( य्वे द्वित्वे ) सिद्धम् । ईकार ऊकार एकाराः त्रयः सिद्धा एव गृह्यंते । परं द्विवचने द्विवचनांतः सन् ईकारांत-ऊकारान्त-एकारान्तश्च शब्दः संधिं न प्राप्नोति इत्यर्थः । मणीवादयो न निषिद्धाः । मणी इव इत्यादीन् शब्दान् वर्जयित्वा । मण्यादीनां तु द्विवचने ईकारांतत्वेपि संधिर्भवति । अग्नी १-२ । ( औ यू ।सवर्णे०) अग्नी अत्र। द्वित्वात्तु ( इ यं स्वरे ) इति यत्वनिषेधः । एवं पटू अत्र वत्वनिषेधः । माला २-२ ( औरी ) इति ईकारः ( अ इ ए ) माले अग्रे आनय।अत्र(ए अय्)

---

१ तत्र अस्मिञ्शब्दे अमी इति रूपे ( इ य स्वरे ) इत्यनेन साधेरित्यर्थः । २ व्याकरणान्तरे मणी इव इत्यादिरूपा स्थितिरेव नास्ति । किन्तु इवशब्दसदृशरूपार्थको वशब्दस्तत्रतत्र बोध्यः । तेन मणीव इत्येव स्थितिः । अस्या स्थितौ च संधेः प्राप्तिरेव नास्ति । ततः मणीवादिवर्जम् । इति वार्तिकं त्वनावश्यकम् ॥

निषेधः । एवं हरी एतौ । विष्णू इमौ । गंगे अमू । कुले अमू इत्यादि । मणीवादिवर्जमिति किम् । मणी इव, दंपती इव, रोदसी इव, इति सर्वत्र सवर्णे द्वित्वेऽपि मणीवादिनिषिद्धत्वात्संधिः कार्यः ॥

**औ निपातः ॥ आकार—ओकारनिपातः एकस्वरश्च संधिं न प्राप्नोति ॥**

सूत्रम् ( औ निपातः ) आ १–१ । सांके० ( अव्य० ) ओ १–१ । सांके० ( अव्य० ) निपात्यते सिद्ध एव इति निपातः १–१ । ( स्त्री० ) ननु एकस्वरश्चेति पदं सूत्रे नास्ति वृत्तौ कुतो लभ्यते तदर्थमाकारादारभ्य ओकारं यावत् औ इति प्रत्याहारमंगीकुर्वंतीति केचित् । औ १–१ । सांके० । आकार—ओकार—एकस्वरा अत्र निपाता एव गृह्यते, आङ्—उपसर्गवर्जिताः । वाक्ये स्मरणे च यो निपातरूप आ इत्यक्षरं स संधिं न प्राप्नोति ॥

"ओत्तमैरेक्ष्यसे न त्वमामृतादेन्द्रतोखिलैः ।
आ एवं सर्ववेदार्थो आ एवं सद्वचो हरेः ॥ १ ॥
ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ २ ॥"

**आ एवं किल मन्यसे।नो अत्र स्थातव्यम्।अ अपेहि।इ इंद्रं पश्य । उ उत्तिष्ठ॥**

तथा । ओकारः "आहो अहो उताहो च नो हो हंहो अथो अमी । भोभोयुक्ताश्च ओदंता निपाताश्चाष्टधा स्मृताः" ॥ भोभो इत्यादिषु निपातरूपः ओकारः सोपि संधिं न प्राप्नोति । नो अत्र । अहो ईशाः । अथो एवम् । हे हे इत्येतयोरपि प्रगृह्यत्वमिति केचित् । हे अंब । हे ईश । तथा एकस्वरः एक एव स्वरः एकस्वरः । यद्वा केवलः स्वरमात्र एव न तु हसयुक्तो यथा मादात् इत्यादिवत् । यद्वा एकस्वरः । सदृशस्वरः अकार—इकार—उकाराणां निपातरूपाणां यः कश्चिदादौ भवति तादृश एव स्वरः अग्रेपि भवति तदा संधिं न प्राप्नोति । यथा । अ अपेहि । इ इंद्रं पश्य । उ उत्तिष्ठ । अ इति निर्भर्त्सने । अपेहि दूरीकुरु । इ इति संबोधने विस्मये वा । इ इंद्रं पश्य । उ इति संबोधने रोषोक्तौ वा । उ उत्तिष्ठ । आग्रहणादाङ्—उपसर्गेण सह संधिर्भवति । उदाहरणं कंठ्यम् ।"अत्राकारनिपातस्तु ङिदङिद्भेदतो द्विधा । तत्र यः स्याद् ङित्स एव संधिं प्राप्नोति न त्वङित्" ॥ "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" ॥ आ ईषत् उत्तमाः ओत्तमाः तैः इतीषदर्थे आङा सह संधिः । आ ईक्ष्यसे एक्ष्यसे । आ इहि एहीत्यादौ क्रियायोगे आङा सह संधिः । आ अमृतात् आमृतात् अमृतं मोक्षं मर्यादीकृत्य इति मर्यादायाम् । आ इंद्रतः ऐंद्रतः । इंद्रमभिव्याप्य इति अभिविधौ च अङा सह संधिः । मर्यादा सीमा,अभिविधिः अभिव्याप्तिः,मर्यादा च अभिविधिश्च मर्यादाभिविधिः तस्मिन्सर्वोपि द्वंद्वो विभाषयैकवचनांतः स्यात् । (एकत्वे

द्विगुद्वंद्वौ । इति नपुंसकत्वम् । अनित्यमागमानुशासनम् । इति ( नामिनः स्वरे ) इति नुमागमो न । किंतु ( ङेरौ ङित् ) तथा आ इति आक्षेपे । आ एवं किल मन्यसे । आ इति वाक्ये । आ एवमीश्वरवचनमिति स्मरणे । स्मरणीयमित्यर्थः । अनाङ् आकारः संधिं न प्राप्नोति ॥

प्लुतः ॥ प्लुतः संधिं न प्राप्नोति । देवदत्त ३ एहि । दूरादाह्वाने टेः प्लुतः ॥ दूरादाह्वाने गाने रोदने विचारे च गम्यमाने टेः प्लुतो भवति ॥

इति प्रकृतिभावः ।

सूत्रम् ( प्लुतः ) १-१ ( स्रो० ) यत्र प्लुतस्तत्र संधिर्न भवति । भो देवदत्त ३ एहि "का[1] एषा प्रस्तुतांगी प्रचलितनयना हंसलीला व्रजन्ती द्वौ पादौ कुंकुमार्द्रौ कनकविरचितौ नूपुरौ शब्दयन्ती । इत्थं मार्गे गता सा बहुकुसुमलताबद्धवेणी स्वनंती तांबूलं वामहस्ते मदननिवसिता गुह्यशालां विवेश ॥ १ ॥" अत्र विचारे टेः प्लुतत्वं तेन संधिर्न । क्वचित्तु संधिः । क्वचित्तु ( प्लुतोनितौ ) इति सूत्रं पठंति तेन प्लुतोपि इति शब्दे परे संधिं न प्राप्नोति । यथा हा तात इति हा तातेति । देवदत्ते-त्यादौ संधिर्भवति । प्लुतलक्षणमाह । सूत्रम् । ( दूरादाह्वाने० ) दूरात् ५-१ ( ङसिरत् । प्रवर्णे० ) आह्वाने ७-१ ( अ इ ए ) टि ६-१ ( ङिति । ङस्य ) इत्यकारलापः । ( स्रो० ) प्लुतः १-१ ( स्रो० ) वृत्तिः कंठचा । प्लुतस्तु उच्चारणमात्र एव नतु लिखनरूपः । इति प्लुतलक्षणम् ।

इति प्रकृतिभावः ॥

## अथ व्यञ्जनसंधिः ४.

अथ व्यञ्जनकार्यमुच्यते । चपा अबे जबाः ॥ पदांते वर्त्त-मानाश्चपा जबा भवंत्यबे परे । पट् अत्र षडत्र ।वाक् यथा वाग्यथा । अच् अंताः अजंताः । तत् एतत् तदेतत् । ककुप् ऐंद्री ककुबैंद्री ॥

अथ प्रकृतिभावकथनानंतरं व्यंजनकार्यमुच्यते व्यंजनानां संधिः कथ्यते इत्यर्थः । सूत्रम् ( चपा अबे जबाः ) चकारपकाराभ्यां गृह्यमाणाः वर्णाश्चपाः । चप १-३ ( सवर्ण० । स्रो० ) अकारबकाराभ्यां गृह्यमाणः प्रत्याहारः अबस्तस्मिन् अबे ७-१( अ इ ए ) जकारबकाराभ्यां गृह्यमाणा वर्णा जबाः । जब १-३ ( स्रो० । सवर्णे० ) सिद्धम् । चपा जबा अबे, इति वक्तव्ये चपा अबे जबा इत्युक्तं तेन क्वचित्पदांतं विनापि जबा भवंति यथा सद्गुरुर्भवदीयः इत्यादि । तथा क्वचिन्न भवति । यथा वैवस्वतः । सरस्वान् । मरुत्व न् । तडित्वान् । वाचालः वाचाटः । इत्यादौ न । अथवा असमासे साक्षादेव पदांते समासादौ त्वंतर्वर्तिनीं विभ-

१ प्लुतश्च इति पाठः । २ का एषा इत्यत्र कपाति संधिप्राप्तौ प्लुतत्वान्न संधिरित्यर्थः ॥

त्तिमाश्रित्य पदांते इति वाच्यम्। पदांते स्थिताः चपा जवा भवंति। चटतकपानां क्रमेण ज १ ड २ द ३ ग ४ वा ५ भवंति अवे परे। षट् अग्रे अत्र। वाक् अग्रे यथा। उभयत्रापि। ( चपा अवे जवाः ) इत्यनेन डकारगकारौ भवतः। यथा। टस्य डः। कस्य गः। स्वर०। षडत्र। वाग्यथा। एवम् अच् अंताः अजताः। हरित् अश्वः हरिदश्वः। ककुप् एषा ककुबेषा। इति सिद्धम्। दिश् अंबरः। दिश् अंतः। अत्र पदांतताश्रयणात् ( दिशाम् ) इति कः। पश्चात् ( चपा अवे जवाः ) दिगंबरः। दिगंतः। वाच् ईशः। अत्रापि पदांतताश्रयणात् ( चोः कुः ) पश्चात् ( चपा अवे जवाः ) वागीशः। अवे परे इति किम्। वाक्पूतः। षट्कुर्वंति॥

ञमे ञमा वा॥ पदांते वर्तमानाश्चपा ञमे परे ञमा वा भवंति। वाक् मात्रम् वाङ्मात्रम् वाग्मात्रम्। षट् मम षण्मम षड्मम। [ मयटि नित्यं वाच्यम् ] चित् मयम् चिन्मयम्। वाक् मयम् वाङ्मयम्। चपाच्छः शः॥चपादुत्तरस्य शकारस्य छो वा भवति अवे परे। वाक् शूरः वाक्छूरः। वाक्शूरः॥

सूत्रम्। ( ञमे ञमा वा ) ञकारमकाराभ्यां गृह्यमाणः प्रत्याहारो ञमस्तस्मिन् ञमे ७—१ ( अ इ ए ) ञकारमकाराभ्यां गृह्यमाणा वर्णाः ञमाः। ञम १—३ ( सवर्णे०। स्रो० ) वा ३—१ ( अव्य० ) ( आदवे लोपश्च चपानां ञमप्रत्याहारे परे वा विकल्पेन ञमा भवंति। च १ ट २ त ३ क ४ पा ५ नां क्रमेण ञ १ ण २ न ३ ङ ४ मा ५ भवंति। वाग्रहणात्पक्षे जवा अपि भवंति। वाङ्मात्रम् वाग्मात्रम्। एकत्र ङः। अन्यत्र गः। स्वर०। षट् अग्रे मम। एकत्र णः। अन्यत्र डः। षण्मम षड्मम। स्वर०। तत् नयनम् तन्नयनम् तद्नयनम्। अप् मयः अम्मयः मयटि प्रत्यये परे तु नित्यमेव ञमाः स्युः। यथा चिन्मयम्, वाङ्मयम्। अत्र न विकल्पः। तथा च वाग्रहणादेव क्वचिज्जवस्यापि ञमाः स्युः। यथा मृद्मयः। मृन्मयः। सूत्रम् ( चपाच्छः शः ) चप ५—१ (ङसिरत्। सवर्णे०) चपात् अग्रे छः ( स्तोः श्चुभिः श्चुः ) इति तकारस्य चः। स्वर०। छ १—१। ( स्रो०। विसर्जनीयस्य सः। स्तोः श्चुभिः श्चुः ) स्वर०। श ६—१। स्वर० ( स्रो० ) सिद्धम्। चपादुत्तरस्य शकारस्य छः छकारो भवति वा विकल्पेन। वाक् अग्रे शूरः। अनेन शकारस्य छकारः। स्वर०। वाक्छूरः पक्षे वाक्शूरः। इति सिद्धम्। छः शः इति विपरीतग्रहणात् वाक् श्च्योततीत्यादौ छत्वं न स्यात्॥

हो झभाः॥चपादुत्तरस्य हकारस्य झभा वा भवति।यद्वर्गगश्चपस्तद्वर्गगश्चतुर्थो भवति।वाक् हारिः वाग्घरिः वाग्हरिः।तत् हविः तद्धविः तद्हविः॥

सूत्रम् । ( हो झभाः ) ह ६-१ । स्वर० ( स्रो० ) झभ १-३ ( सवर्णे० । स्रो० ) यस्य वर्गस्य संबंधी चपो हकारात्पूर्वं भवति तस्य वर्गस्य चतुर्थाक्षरं हकारस्थाने भवति । यथा ककारात्परस्य हस्य घः । चकारात्परस्य हस्य झः । टकारात्परस्य हस्य ढः । तकारात्परस्य हस्य धः । पकारात्परस्य हस्य भः "यद्वर्गस्य चपः पूर्वं हकारात्किल दृश्यते । हस्य स्थाने भवेद्वर्णस्तद्वर्गस्य चतुर्थकः" ॥ १ ॥ वर्गचतुर्थो हस्य सवर्ण इति । वाग्रहणात्क्वचिन्न चपादनुत्तरस्यापि हस्य झभा भवंति । यथा समिध् होमः समिद्धोमः । हकारस्य धः ( झबे जबाः ) इति सिद्धम् । यद्वा क्वचिदनवसानेऽप्यवसानता ग्राह्या । तेन ( वावसाने ) इति धकारस्य तकारः । पश्चात् ( हो झभाः ) इत्यादि । एवं तत् हितः तद्धितः । तत् अग्रे हविः । ( हो झभाः ) इति हकारस्य धकारः । पश्चात् ( चपा अबे जबाः ) तस्य दः ( स्वर० ) तद्धविः । तत् घृतम् इत्यर्थः । वाक् अग्रे हरिः । हस्य घः पूर्ववत् ( चपा अबे जबाः ) इति कस्य गः । वाग्घरिः । वाचा कृत्वा हरिः सिद्धः इति सिद्धम् । अच् अग्रे हलौ अज्झलौ । षट् अग्रे हलानि षड्ढलानि । ककुप् अग्रे हासः ककुब्भासः ॥

**स्तोः श्चुभिः श्चुः ॥** स्तोः सकारस्य तवर्गस्य च शकारेण चवर्गेण च योगे शकारचवर्गौ यथासंख्येन भवतः । सकारस्य शकारः तवर्गस्य चवर्गः । कस् चरति कश्चरति । कस् शूरः कश्शूरः । तत् चित्रम् तच्चित्रम् । तत् शास्त्रम् तच्छास्त्रम् ॥

सूत्रम् । ( स्तोः श्चुभिः श्चुः ) स च तुश्च स्तुः तस्य स्तोः ६-१ । ( ङिति । ङस्य ) इत्यकारलोपः । ( स्रो० ) श् च चवश्च श्चवस्तैः श्चुभिः ३-३ । ( स्रो० ) श् च चुश्च श्चुः १-१ ( स्रो० ) अत्र ( एकत्वे द्विगुद्वंद्वौ ) इति नपुंसकलिंगं युज्यते । परं छंदोवत् सूत्राणीति छांदसत्वात् पुँल्लिंगत्वम् । श्चुभिरित्यत्र बहुवचनमयथासंख्येन योगज्ञापकं तेन सकारस्य शकारचवर्गयोगे पूर्वतः परतः उभयत्रापि संबंधे सति शकारः स्यात् । तवर्गस्य शकारचवर्गयोगे चवर्गः स्यात् । कस् चरति । कस् अग्रे शूरः । उभयत्रापि शकारः । स्वर० । कश्चरति । कश्शूरः । तत् चित्रम् । तस्य चः । स्वर० । तच्चित्रम् । तत् श्रवणम् । तत् शास्त्रम् । उभयत्रापि[1] तस्य चः । ( चपाच्छः शः ) कस् छादयति कश्छादयति । अत्र सकारस्य शकारः । स्वर० । सत् अग्रे झंझा ( स्तोः श्चुभिः श्चुः ) इति तस्य चः ( चपा अबे जबाः ) चस्य जः । स्वर० । सज्झंझा ॥

**न शात् ॥** शकाराडुत्तरस्य तवर्गस्य चुत्वं न भवति । प्रश् नः प्रश्नः । विश् नः विश्नः ॥ **ष्टुभिः ष्टुः ॥** स्तोः सकारतवर्गयोः षकारटवर्गाभ्यां

---

१ उभययापीत्यपि पाठः ॥

योगे ष्टुर्भवति । सकारस्य षकारः तवर्गस्य टवर्गः । कस् षष्ठः कष्षष्ठः ॥ कस् टीकते कष्टीकते । तत् टीकते तट्टीकते ॥

सूत्रम् । ( न शात् ) न १–१ । ( अव्य० ) श ५–१ ङसिरत् ( सवर्णे० ) शकारादुत्तरस्य तवर्गस्य चुत्वं चवर्गो न भवति । प्रश् अग्रे नः । विश अग्रे नः । रूपद्वयेपि चवर्गस्य निषेधः । किंतु । स्वर० । प्रश्नः । पृच्छनं प्रश्नः । विश्नः विशतीति विश्नः । विच्छ गतौ विच्छनं विश्नः । सूत्रम् ( ष्टुभिः ष्टुः ) षू च टुश्च ष्टवस्तैः ष्टुभिः ३–३ । षु च टुश्च ष्टुः १–१ ( स्तो० ) ष्टुभिरित्यत्रापि बहुवचनमयथासंख्ययोगसूचकम् । स्तोः सकारतवर्गयोः षकारटवर्गयोगे षकारटवर्गौ यथासंख्यं भवत इत्यर्थः । सकारस्य षकारः । तवर्गस्य टवर्गः । कस् अग्रे षष्ठः, कस् अग्रे टीकते, उभयत्रापि सस्य षः । स्वर० । कष्षष्ठः । कष्टीकते । कः समर्थो भवतीत्यर्थः । टीकृ गतौ सामर्थ्ये च । तत् अग्रे टीकते अनेन तस्य टः । स्वर० । तट्टीकते । विद् अग्रे ठलः । पूर्वं ( खसे चपा० ) ततः ( ष्टुभिः० ) विट्ठलः ॥

तोर्लि लः ॥ तवर्गस्य लकारे परे लकारो भवति । तत् लुनाति तल्लुनाति । भवान् लिखति भवाँल्लिखति ॥ [ अन्तस्था द्विप्रभेदाः ] रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च । तत्र सानुनासिक एव नकारस्य लकारो भवति ॥

सूत्रम् । ( तोर्लि लः ) तु ६–१ ( ङिति ) तु इत्यस्य तो ( ङस्य । स्तो० ) तोः अग्रे ल ७–१ । स्वर० । ( नामिनो रः ) जलतुम्बि० । लि । ल १–१ ( स्तो० ) तवर्गस्य उदाहरणम् । तत् अग्रे लुनाति । अनेन तस्य लकारः । स्वर० । तल्लुनाति । भवान् अग्रे लिखति । ( तोर्लि लः ) । इति नस्य लत्वे कृते । अन्तस्था द्विप्रभेदाः । उच्चारणकाले जिह्वाया अन्ते तिष्ठंतीति अन्तस्थाः । अथवा वर्णानामंते तिष्ठंतीति अन्तस्थाः । ते के यरलवाः ते च द्विप्रकाराः । कथंभूताः । रेफेण रकारेण वर्जिताः शेषा यवला इत्यर्थः । कथं द्विप्रभेदा इत्याह । सानुनासिका निरनुनासिकाश्च । तत्र तथदधानां स्थाने लकारो निरनुनासिको भवति नकारस्य सानुनासिकत्वान्नकारस्थाने लकारोपि सानुनासिक एव भवति । तेन पूर्ववकारस्योपरि अर्द्धानुस्वारो भवति । स्वर० । भवाँल्लिखतीति सिद्धम् ॥

न षि ॥ षकारे परे तवर्गस्य टुत्वं न भवति । भवान् षष्ठः भवान्षष्ठः ॥ टोरंत्यात् ॥ पदांते वर्त्तमानाट्टवर्गात्परस्य स्तोष्टुर्न भवति ॥ षट् नरः षड्नरः षण्नरः । षट् सीदंति षट्सीदंति ॥

सूत्रम् । ( न षि ) न १-१ ( अव्य० ) । ष् ७-१ । स्वर० । षकारे परे तवर्गस्य टवर्गो न भवति । भवान् षष्ठः । अत्रानेन ( ष्टुभिः ष्टुः ) इति प्राप्तस्य टवर्गस्य निषेधः । किन्तु स्वर० । प्रकृतिभाव एव । सूत्रम् ( टोरंत्यात् ) टु ५-१ ( ङिति ) टु इत्यस्य टो । ( ङस्य ) इत्यकारलोपः ( स्तो० ) टोः अग्रे अंत्य ( नामिनो रः ) स्वर० । अन्त्य ५-१ ( ङसिरत् । सवर्णे दीर्घः० ) पदांते वर्तमानो यः टवर्गस्तस्मादुत्तरयोः परयोः सकारतवर्गयोः षकारटवर्गौ न भवतः । परम् । नाम्नवतिनगरीवर्ज्जम् । उदाहरणम् । षट् अग्रे नरः । अत्र टुत्वनिषेधः । ततः ( ञमे ञमा वा ) च-ट ञ-ण । स्वर० । षण्नरः । पक्षे षड्नरः । ना नरौ नरः इति बहुवचनम् । षट् अग्रे सीदंति । अत्र षत्वनिषेधः । नाम्नवतिनगरीवर्जनात् । षण्णाम् । षण्णवतिः । षण्णगर्यः । अत्र ( टोरंत्यात् ) इति सूत्रं न लगति । किन्तु ( ष्टुभिः ष्टुः ) इति भवति । स्वर० ॥

**नः सक् छते ॥** नांतस्य पदस्य छते परे सगागमो भवति । [टित्किताबाद्यन्तयोर्वक्तव्यौ ] टित्त्वादादौ किच्वादंते । राजन् चित्रम् राजंश्चित्रम् । भवान् तनोति भवांस्तनोति ॥

सूत्रम् । न् ६-१ । स्वर० । ( स्तो० ) सक् १-१ । ( हसेपः० ) छत ७-१ । ( अ इ ए ) त्रिपदम् । नांतस्य नकारांतस्य पदस्य छते छठथचटतत्वलक्षणे प्रत्याहारे सक् इत्यागमो भवति । ककारः स्थाननियमार्थः । तमेवाह ( टित्कितौ० ) । ट् इत् यस्यासौ टित् क् इत् यस्यासौ कित् टिच्च किच्च टित्कितौ टित्किताबागमौ क्रमेण आद्यंतयोर्विषये भवतः । टित् आदौ कित् अंते इत्यर्थः । अत्र किच्वात् अन्ते । राजन् अग्रे चित्रम् । भवान् अग्रे तनोति । उभयत्रापि सगागमः । अकार उच्चारणार्थः । एकत्र ( स्तोः श्चुभिः० ) इति सस्य शः । उभयत्रापि । स्वर० । 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेनैव गृह्यंते' इति आगमांतं पदमित्यपदांतत्वान्नकारस्य ( नश्चापदांते झसे ) इत्यनुस्वारः ॥

**शे चक् वा ॥** नांतस्य पदस्य शे परे वा चगागमो भवति । भवाञ्शूरः भवाञ्छूरः भवाञ्च्शूरः भवाञ्शूरः ॥ **ङ्णनो ह्रस्वाद्विः स्वरे ॥** ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवन्ति स्वरे परे पदांते । प्रत्यङ् इदम् प्रत्यङ्ङिदम् । सुगण् इह सुगण्णिह । राजन् इह राजन्निह ॥

सूत्रम् । ( शे चग्वा ) श ७-१ । ( अ इ ए ) चक् १-१ । ( हसे० ) वा १-१ । अव्य० । नांतस्य इति । नकारांतस्य पदस्य शे शकारे परे वा विकल्पेन चक्-आगमः स्यात् । भवान् अग्रे शूरः ३ । अत्र ( चपाच्छः शः ) इति सूत्रस्य

विकल्पेन प्राप्त्यर्थं रूपद्वये चगागमः । च पदत्रयेऽपि ( स्तोः श्चुभिः श्चुः ) नस्य ञः । प्रथमरूपे ( चपाच्छः शः ) शस्य छः सर्वत्र । स्वर० । भवाञ्च्छूरः—भवाञ्च्शूरः—भवाञ्शूरः । तृतीयरूपे चगागमाभावे भवाञ्शूरः । सूत्रम् ( ङ्णनो ह्र० ) ङ् च ण् च न् च ङ्णन् १–३ । स्वर० ( स्रो० ) अग्रे ह्रस्वात् ५–१ । पूर्वम् ( हवे । उ ओ ) द्विः १–१ । ( अव्य० । चपा अवे जबाः ) स्वर० । ७-१ ( अ इ ए ) सिद्धम् । ह्रस्वादुत्तराः परा ये ङकारणकारनकारास्ते द्विर्भावमापद्यंत द्वौ भवत इत्यर्थः स्वरे परे पदांते विषये । अत्र पुनः स्वरग्रहणं विभक्तिस्वरनिषेधार्थम् । प्रत्यङ् अग्रे इदम् । गण संख्याने सुपूर्वः । सुष्ठु गणयतीति सुगण् क्विबन्तः । सुगण् अग्रे इह । राजन् अग्रे इह । सर्वत्रापि द्वित्वम् । स्वर० । प्रत्यङ्ङिदम् । सुगण्णिह । राजन्निह ॥

**छः ॥ ह्रस्वादुत्तरश्छकारो द्विर्भवति ॥ खसे चपा झसानाम् ॥ झसानां खसे परे चपा भवंति । तव छत्रम् तवच्छत्रम् । [ क्वचिद्दीर्घादपि वक्तव्यः ] ह्री छः ह्रीच्छः । म्ले छः म्लेच्छः ॥**

सूत्रम् । छ १–१ ( स्रो० ) एकपदम् । वृत्तिः कंठ्या । उदाहरणम् । तव अग्रे छत्रम् । अनेन छस्य द्वित्वम् । तव छ छत्रमिति स्थिते । सूत्रम् ( खसे चपा झसानाम् ) खस ७–१ ( अ इ ए ) चप १–३ ( सवर्णे० । स्रो० ) झस ६–३ ( नुडामः । नामि ) इति दीर्घः स्वरः । सिद्धम् । झसानां चपाः भवंति खसे परे । अत्र यथासंख्यगणनात् छस्य तकारः संभवति । परं वर्ग्यो वर्ग्येण सवर्ण इति वचनात् चकार एव क्रियते । स्वर० । तव च्छत्रमिति सिद्धम् । पक्षांतरमाह । दीर्घादित्यादि । क्वचित् कस्मिंश्चित्स्थाने दीर्घादुत्तरोऽपि छकारो द्विर्भवति । यथा म्ले अग्रे छः । ह्री अग्रे छः । रूपद्वयेऽप्यनेन द्वित्वे विहिते प्राग्वत् । ( खसे च० ) स्वर० । म्लेच्छः । म्लेच्छ अव्यक्ते शब्दे । म्लेच्छयतीति म्लेच्छः । अथवा म्लै गात्रविनामे । म्लायते इति म्लेच्छः । ह्रीच्छः । ह्रीच्छ लज्जायाम् । ह्रीच्छतीति ह्रीच्छः । एवम् आच्छादयति । ह्रीच्छति । ऐच्छत् । माच्छिदत् । स्वच्छाया । इत्यादौ दीर्घात्परस्य छस्य द्वित्वम् ॥

**मोऽनुस्वारः ॥ मकारस्यानुस्वारो भवति हसे परे पदांते । तम् हसति तं हसति । पटुम् वृथा पटुं वृथा ॥**

सूत्रम् ( मोऽनु० ) म् ६–१ । स्वर० । ( स्रो० ) मः । अग्रे अनुस्वारः १–१ । ( स्रो० ) मध्ये ( अतोऽत्युः । उ ओ । एदोतोऽतः ) मकारस्य हसे परे पदांते सत्यनुस्वारो भवति । उदाहरणम् । तम् अग्रे हसति । पटुम् अग्रे वृथा । उभयत्राप्यनुस्वारः । तं हसति । पटुं वृथा । पदांते इति किम् । गम्यते इत्यादौ अनुस्वारो न ॥

**नश्चापदांते झसे ॥ नकारस्य मकारस्य चापदांते वर्तमानस्यानुस्वारो भवति झसे परे । यशान् सि यशांसि । पुम् भ्याम् पुंभ्याम् ॥**

सूत्रम् । ( नश्चापदां० ) न ६-१ । स्वर० । ( स्रो० ) अग्रे । च १-१ । ( अव्य० । विसर्जनीय० । स्तोः श्चु० ) सस्य शः । स्वर० । अग्रे अपदांते ७-१ ( अ इ ए । सवर्णे० ) झस ७-१ । ( अ इ ए ) सिद्धम् । चकारः पूर्वोक्तस्य ( मोऽनुस्वारः ) इत्यतो म इत्यस्यानुकर्षणार्थः । तेन उभयोरप्यपदांते पदमध्ये वर्तमानयोर्नकारमकारयोर्झसे परे अनुस्वारो भवति । यशम् १-३ ( जश्शसोः शिः । नुमयमः ) मिदंत्यात्स्वरात्परो० । ( न्सेम्महतो० ) ततो यशान् अग्रे सि । पुम् अग्रे भ्याम् । उभयत्राप्यनुस्वारः । यशांसि । पुंभ्याम् । एवं पयान् अग्रे सि पयांसि ॥

यँमा यपेऽस्य ॥ अपदान्ते वर्त्तमानस्याऽनुस्वारस्य यमा भवंति यपे परे । अस्य यपस्य सवर्णाः । अं कितः अङ्कितः । अं जनम् अञ्जनम् । मंडनम् मण्डनम् ॥ वा॑ ॥ पदान्ते वर्तमानस्याऽनुस्वारस्य ञमा वा भवन्ति यपेपरे । तं करोति तङ्करोति । तं तनोति तन्ननोति [ यवलपरे यवला वा ] अनुस्वारस्य यवलपरे तु सानुनासिका एव यवला वा भवंति । सं यन्ता सय्यँन्ता । यं लोकं यँल्लोकम् । सं वत्सरः सव्ँवत्सरः ॥ "स्वरे मः ॥ अनुस्वारस्य मकारादेशो भवति स्वरे परे । अस्माकं इह अस्माकमिह । शं अस्ति शमस्ति । सुखं एति सुखमेति ।" [ ᳲ छंदसि । ] छंदस्यनुस्वारो ᳲकारमापद्यते शषसहरेफेषु परतः । हं सः हᳲसः ॥

इति व्यंजनसंधिः ।

सूत्रम् ( यमा यपे० ) यम १-३ ( सवर्णे० । स० ) यमाः । अग्रे यपे ७-१ ( अ इ ए ) प्राक् ( आदत्रे० ) विसर्गलोपः । अग्रे इदम् ६-१ ( त्यद दे॑ष्टरः स्यादौ । दस्य मः । ङस्स्य । स्भ्यः ) इदमः स्थाने अ ( एदोतोतः ) अपदांते अनुस्वारस्य यमा भवंति यपप्रत्याहारे परे । सूत्रम् ( वा ) ३-१ ( अव्य० ) पदान्ते अनुस्वारस्य यमा भवंति यपप्रत्याहारे परे । कथमित्याह । अस्य अग्रे वर्तमानस्य यपस्य सवर्णा एव यमा भवंति । अनुस्वारस्य सानुनासिक्यात् ये सानुनासिका यमाः स एव भवंति । वर्ग्यो वर्ग्येण सवर्ण इति वचनात् । वर्ग्ये अक्षरे परे तद्वर्गस्य पंचमाक्षरं भवति । अन्यत्र यादृशो यपोऽग्रे भवति तादृश एव,

---

१ ( नोपधायाः० )—इति पाठः पुस्तकान्तरे दृश्यते—परं मात्र 'यशान् स इ' इत्यस्मिन्नुदाहरणे दीर्घे निधातुमप्राप्तेस्तस्य सूत्रस्याप्रायोजनिक एव 'यशान् स्' इत्यस्य सकारान्तत्वाद्युक्तोऽयमत्र 'न्सम्महतो धौ दीर्घः शौ च' इति पाठ इति सुधियो विदाकुर्वन्तु । २ पदान्तविषयमिदं भिन्नं सूत्रम् । ३ अपदान्तविषयमिदमेतावन्मात्रं सूत्रम् ।

क्रियते । यथा कवर्गे परे ङकारः । चवर्गे परे ञः । टवर्गे परे णः । तवर्गे परे नः । पवर्गे परे मः । यवलेषु परेषु यवला एव स्युः । उदाहरणानि । अंकितः अङ्कितः । इत्यादि । तं अग्रे करोति । तं अग्रे तनोति । ककारे परे अनुस्वारस्य ङः । तकारे परे अनुस्वारस्य नः । स्वर० । तङ्करोति। तन्तनोति । सं अग्रे यंता । अत्रानुस्वारस्य यः अग्रे च ( अंतस्था द्विप्रभेदाः ) इति सानुनासिकत्वात् सस्य उपरि अर्द्धचन्द्राकारो बिंदुः।सय्यँता।एवं सं वत्सरः सँव्वत्सरः। पुं लिंगः।पुँल्लिंगः। अत्र केचित् ( स्वरे मः ) अनुस्वारस्य मकारो भवति स्वरे परे । इति सूत्रं पठन्ति । परं स्वरे परे पूर्वम् ( मोऽनुस्वारः ) एव न भवति । किंतु स्वरहीनमेव स्यात् । कृष्णो माम् अवतु कृष्णो मामवतु । जिनम् ईडे जिनमीडे । शम् अस्ति शमस्ति । अस्माकम् इह अस्माकमिह । ( ङ्णोः कक् टक् वा ) ङकारणकारयोः शषसेषु परेषु क्रमेण कक् टक् आगमौ वा स्तः । प्राङ् षष्ठः । प्राङ्क्षष्ठः । लिङ् क्षु लिङ्क्षु । सुगण् षष्ठः सुगण्ट्षष्ठः ( ४ छंदसि ) अनुस्वारः ४कारमापद्यते शषसहरेफेषु परतः छंदसि वेदे । ह सः ह४सः । सुचीं षत् सुची ४ षत् । वय साम वय ४ साम । सं हिता स ४ हिता । तं रविः त ४ रविः । इति चतुर्थसंध्यनुसारेण व्यंजनसंधिरेवावचूरिलेशतो लिखितः ॥

इति व्यंजनसंधिः ॥

---

## अथ विसर्गसन्धिः ।

अथ विसर्गसंधिर्निगद्यते । विसर्जनीयस्य सः ॥ विसर्जनीयस्य सकारो भवति खसे परे । कः तनोति कस्तनोति ॥ [ शसे वा ] विसर्जनीयस्य शसे परे शषसा वा भवंति । कः शेते कश्शेते । कः षंडः कष्षंडः । कः साधुः कस्साधुः ॥

अथेति । व्यंजनकार्यकथनानंतरं विसर्गाणां संधिर्निगद्यते कथ्यते । द्वौ बिंदू विसर्गः । सूत्रम् ( विसर्जनीयस्य सः ) विसर्जनीय ६-१ । ( ङस्य ) अग्रे । स १-१ । ( स्रो० ) सिद्धम् । विसर्जनीयस्य सकाररकारोत्पन्नस्य कृष्णसर्पचक्षुराकारबिंदुद्वयरूपस्य खसे परे सकारो भवति । श्लोको यथा—"शृंगवद्बालवत्सस्य कुमारीस्तनयुग्मवत् । नेत्रवत्कृष्णसर्पस्य स विसर्ग इति स्मृतः" ॥ उदाहरणम् ।

---

१ कस्मिंश्चित्पुस्तके 'यरलवेषु' इति पाठः । २ कस्मिंश्चित्पुस्तके 'पुँल्लिंगः' इत्यस्योत्तरं संस्मते सँस्मते' इति पाठो दृश्यते । परतु रेफे परेऽनुनासिकविधानं वैदिकप्रयोगेष्वेव बाहुल्येन दृश्यते नतु लौकिकेषु । अतएव अग्रे ( ४ छंदसि ) इति सूत्रस्य तं रविः त ४ रविः । इत्युदाहरणं संगच्छेत । ३ पुस्तकान्तरे तु बाहुलकभेदव्याख्यानानंतरं वैदिकप्रयोगव्याख्यानावसरे ( शषसहरेफेषु छन्दसि अनुस्वारस्य ४कारो वा वक्तव्यः ) इति वार्तिकमुक्त्वा ह ४ सः हसः इत्युदाहरणद्वयमुपन्यस्तं दृश्यते । ४ अत्र शषप्रत्याहारस्य ग्रहणं सम्मतम् ।

कः अग्रे तनोति । अनेन विसर्गस्य सकारः । स्वर० । कस्तनोति [ शसे वा ] द्विपदमिदम् । विसर्जनीयस्य शसेषु परेषु शषसा एव वा भवंति । पक्षे विसर्जनीय एव तिष्ठति । कः शेते कश्शेते । कः षंढः कष्षढः । कः साधुः कस्साधुः ॥

कुप्वोः ᳲ क ᳲ पौ वा ॥ विसर्जनीयस्य कवर्गपवर्गसंबंधिनि खसे परे ᳲ कᳲपौ वा भवतः । कपावुच्चारणार्थौ । कः करोति क ᳲ करोति । कः खनति कᳲखनति । कः पचति कᳲ पचति । कः फलति कᳲ फलति ॥ [ वाचस्पत्यादयः संज्ञाशब्दा निपातात्साधवः । ] वाचस्पतिः । बृहस्पतिः । कारस्करः । पारस्करः । राजंस्तुदम् । हरिः चन्द्रः हरिश्चंद्रः । [ तद्बृहतोः करपत्योश्चौरदेवतयोः सुट्तलोपश्च । ] तत् करः तस्करः । बृहत् पतिः बृहस्पतिः ॥

पुनर्विशेषमाह । सूत्रम् । ( कुप्वोः ᳲकᳲपौ वा ) कुश्च पुश्च कुपू तयोः कुप्वोः ६—२ । ( उ वम् ) स्वर० । ( स्तो० ) अग्रे ᳲकश्चᳲ पश्चᳲ कᳲ पौ १—२ ( ओ औं औ ) वा ३—१ ( अव्य० ) विर्जनीयस्य कवर्गपवर्गसंबंधिनि करवपफरूपे खसे परे ᳲ कᳲ पौ जिह्वामूलीयोपध्मानीयसंज्ञौ यथासंख्यं वा भवतः । पक्षे विसर्जनीय एव तिष्ठति । अयमर्थः । कखयोः परयोः ᳲकः । पफयोः परयोः ᳲ पः । कपौ ककारपकारावुच्चारणार्थौ अन्यथोच्चरितुमशक्यत्वात् । अतो वज्राकारगजकुंभाकारौ तिष्ठतः । कः अग्रे करोति । अत्र विसर्गः । कᳲ करोति । कः अग्रे पचति कᳲ पचति । एवं कᳲ खनति । कᳲ फलति । वाचस्पत्यादयः संज्ञाशब्दाः संज्ञावाचकाः कस्यापि नामप्रतिपादकाः शब्दाः तेऽपि निपातनात्साधवः निपातसिद्धा एव ज्ञेयाः । यथा । वाचस्पतिः । अत्र ( कुप्वोः ᳲकᳲ पौ वा ) इत्यस्य प्राप्तावपि विसर्जनीयस्य सकार एव निपात्यते । एवं भास्करः । श्रेयस्करः । श्रेयस्कामः । अयस्कांतः । अयस्कुंभः । अयस्पात्रम् । तमस्कांडः । दिवस्पतिः । नमस्कारः । अहस्कारः । बृहस्पतिः । तस्करः । शास्त्रांतरे त्वित्थं दृश्यते प्रक्रियाकौमुद्याम् । तद्बृहतोः करपत्योश्चौरदेवतयोः सुडागमस्तलोपश्च । तत् अग्रे करः । अनेन सुडागमः । तलोपः । तस्करः । बृहत् अग्रे पतिः । सकारागमः । तलोपः । बृहस्पतिः । चकारात् हरिश्चंद्रः । मस्करः । मस्करी । परिव्राजकवेण्वोः । कांस्कान् । कस्कः । कस्कादयः । एवमश्वत्थकपित्थदधित्थादिषु स्याधातोः सस्य तः । इत्यादयः साधवः सिद्धा एव ज्ञेयाः । यल्लक्षणेनोपपन्नं तत्सर्वं निपातात्सिद्धमेवेति लक्षणसूत्रमंतरेण लोकप्रसिद्धरूपोच्चारणं निपातनम् ॥

**रोऽरात्रिषु ॥** अह्नो विसर्जनीयस्य पदांते रो भवति रात्र्यादि-वर्जितेषु परतः । अहः पतिः अहर्पतिः । अहः गणः अहर्गणः । अरात्रिष्विति विशेषणात् । अहः रात्रः अहोरात्रः । अहः रूपम् अहोरूपम् । अहः रथंतरम् अहोरथंतरम् ॥

सूत्रम् । ( रोऽरात्रिषु ) र १-१ ( स्रो० ) मध्ये । ( हवे । उ ओ । स्रो० ) र अग्रे अरात्रि । ( अतोऽत्युः । उ ओ । एदोऽतोतः ) न रात्रयः अरात्रयस्तेषु अरात्रिषु ७-३ । ( क्लिलात्षः सः० ) अहन्शब्दसंबंधिनो विसर्जनीयस्य पदांते रो भवति रात्र्यादिवर्जितेषु रात्र्यादिभिन्नेषु शब्देषु परेषु सत्सु । रकारादिरात्रिरूपरथंतराद्विर्जितेष्वित्यर्थः । उदाहरणम् । अहन् अग्रे पतिः । अहन् अग्रे गणः ( अह्नः ) इति सूत्रेण उभयत्रापि नस्य सः । ( स्रो० ) अनेन सूत्रेण विसर्गस्य रः । ( रहाद्यपो द्विः ) जलतुम्बि० । अह्नो दिवसस्य पतिः अहर्पतिः । अह्नां गणः अहर्गणः । अत्रांतर्वर्तिनीं विभक्तिमाश्रित्य पदांतत्वं ग्राह्यम् । अरात्रिष्विति विशेषणात् । रात्र्यादिवर्जनात्किम् । अहन् अग्रे रात्रः ( अह्नः ) इति नस्य सः । अरात्रिष्विति कथनान्न रनिषेधः । ततो ( हवे । उ ओ ) अहोरात्रः । एवम् । अहोरूपम् । प्रशस्तम् अहः अहोरूपम् । "अहोरथंतरं साम श्रेष्ठं साम रथंतरम्" । अहोरथंतरम् । पदांते इति किम् । अहोभ्याम् ॥

**अतोऽत्युः ॥** अकारात्परस्य विसर्जनीयस्य उकारो भवत्यति परतः । कः अर्थः कोऽर्थः ॥ **हवे ॥** अकारात परस्य विसर्जनीयस्य उकारो भवति हवे परे । कः गतः को गतः । देवः याति देवो याति । मनः रथः मनोरथः ॥

सूत्रम् ( अतोऽत्युः ) अत् ५-१ । स्वर० ( स्रो० ) अतः । अग्रे अत् ७-१ स्वर० । मध्ये ( अतोऽत्युः । उ ओ । एदोतोऽतः ) अग्रे उ १-१ ( स्रो० ) पश्चात् ( इ यं स्वरे ) स्वर० । सिद्धिः । वृत्तिः कण्ठ्या । अति परतः अकार एव परे इत्यर्थः । तपरकरणं तावन्मात्रग्रहणार्थमुभयत्रापि सवर्णनिषेधार्थम् । उदाहरणम् । कः अग्रे अर्थः । अनेन उकारः । ( उ ओ । एदोतोऽतः ) कोऽर्थः । सूत्रम् ( हवे ) ७-१ ( अ इ ए ) वृत्तिः सुगमा । उदाहरणम् । कः गतः । अत्र अकारात्परस्य विसर्जनीयस्य हवे परे उकारः । ततः ( उ ओ ) को गतः । देवः याति ( हवे । उ ओ ) देवो याति । मनः रथः ( हवे । उ ओ ) मनोरथः ॥

१ अह्न इति सूत्रादत्र 'अह्नः' इत्यस्याऽनुवृत्तिः क्रियते ।

२ प्रसिद्धा इति पाठोऽन्यत्र पुस्तके

**आदवे लोपश् ॥** अवर्णात्परस्य विसर्जनीयस्य लोपश् भवत्यवे परे। देवाः अत्र देवा अत्र। वाताः वाताः वाता वाताः ॥

सूत्रम् ( आदवे० ) अ ५-१ ( ङसिरत् । सवर्णे० ) आत्। अव ७-१( अ इ ए ) मध्ये ( चपा अबे जबाः ) लोपश् १-१ ( हसे० ) यदि वा अश्च आ च आ ५-१ ङसि ( नपुंसकस्य ) इति ह्रस्वः ( ङसिरत् ) अवर्णात् अकार-आकाररूपादुत्तरस्य विसर्जनीयस्य लोपश् भवति अवे परे। उदा० । देवाः अग्रे अत्र। वाताः अग्रे वाताः । उभयत्रापि विसर्गलोपः । देवा अत्र। वाता वाताः । एवं कः इह । क इह ॥

**स्वरे यत्वं वा ॥** अवर्णात्परस्य विसर्जनीयस्य स्वरे परे यत्वं वा भवति। देवाः अत्र देवायत्र देवा अत्र ॥

पुनर्विशेषमाह। सूत्रम् ( स्वरे यत्वं वा ) स्वरे ७-१ ( अ इ ए ) यत्वं १-१। ( अतोऽम् । अम्शसो० । मोनु० ) वा ३-१ ( अव्य० ) वृत्तिः कंठ्या । वाग्रहणात्पक्षे ( आदवे लोपश् ) देवाः अग्रे अत्र। एकत्र यत्वम् । स्वर० । देवायत्र। अन्यत्र लोपश् । देवा अत्र ॥

**भोसः ॥** भोस् भगोस् अघोस् इत्येतस्य विसर्जनीयस्य लोपश् भवत्यवे परे। भोः एहि भो एहि। भगोः नमस्ते भगो नमस्ते। अघोः याहि अघो याहि ॥

सूत्रम् ( भोसः ) भोस् ६-१ । स्वर० ( स्रो० )जातीयग्रहणेन तज्जातीयग्रहणम्। षष्ठी भोस् इत्यत्र आद्यंतग्रहणेन प्रत्याहारः सूचितस्तेन भोः भगोः अघो इत्येतत्पदत्रयसंबंधिनः विसर्जनीयस्यावे परे लोपश् भवति। उदा० । भोः अग्रे एहि-आगच्छ। भगोः अग्रे नमस्ते-हे भगवन् ते तुभ्यं नमः । अघोः अग्रे याहि-हे अघोः हे पाप याहि गच्छ। सर्वत्र ( भोसः ) इति सूत्रेण विसर्गलोपश यो वा स्वरे। भो एहि। भोयेहि ॥

**नामिनो रः ॥** नामिनः परस्य विसर्जनीयस्य रेफो भवत्यवे परे। अग्निः अत्र अग्निरत्र। वटुः यजते वटुर्यजते। [ रेफप्रकृतिकस्य खपे वा ॥ ] रेफाज्जातस्य विसर्जनीयस्य रेफो वा भवति खपे परे। गीः पतिः गीर्पतिः गीᳵपतिः। धूः पतिः धूर्पतिः धूᳵपतिः ॥

सूत्रम् ( नामिनो रः ) नामिन् ५-१। स्वर० । ( स्रो० ) अग्रे १-१ ( स्रो०।

---

१ वाताः वाति वाता वांति इत्यन्यस्मिन्पुस्तके । २ भोस इति षष्ठी न तु पञ्चमी ततः परस्य विसर्गस्याऽभावात्। ३ यदि वेत्यपि पाठः । ४ पटुः यजते पटुर्यजते। इत्यपि पाठः ॥

हवे । उ ओ ।) नामिनः अवर्णवर्ज्जस्वरात् परस्य विसर्जनीयस्य अवे परे रेफो भवति । उदा० । अग्निः अग्रे अत्र । अनेन सूत्रेण रेफः । स्वर० । अग्निरत्र । वटुः अग्रे यजते ( नामिनो रः ) इति रेफः ( रहाद्यपो द्विः ) जलतुं० । वटुर्यजते । वटुर्ब्राह्मणो यजते यज्ञं करोति । एवं वटुरत्र वर्तते । सूत्रम् ( रेफ० ) रेफप्रकृत्या उत्पन्नो वा रेफ एव प्रकृतिर्मूलकारणं यस्य रेफप्रकृतिकस्तस्य ६—१ ( ङस्स्य ) खप ७—१ ( अ इ ए ) वा ३—१ । ( अव्य० ) रेफप्रकृतिकस्य विसर्जनीयस्य वा रेफो भवति खपे परे। उदा० । गिर् अग्रे पतिः ( य्वोर्वि हसे ) गि इत्यस्य गी । ( स्रो० ) गीः ( रेफप्र० ) अनेन एकत्र रेफः ( रहाद्य० ) जल० । अन्यत्र (कुप्वोः ≍ क≍ पौ वा ) गीर्प्पतिः गी≍ पतिः गीः पतिः । एवं रूपत्रयम् । एवं धूर्पतिः धू≍ पतिः धूः पतिः । इत्यादि ॥

रः ॥ रेफसंबंधिनो विसर्जनीयस्य रेफो भवत्यवे परे । प्रातः अत्र प्रातरत्र । अंतः गतः अंतर्गतः ॥ रि लोपो दीर्घश्च ॥ रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः । पुनः रमते पुना रमते । शुक्तिः रूप्यात्मना भाति शुक्ती रूप्यात्मना भाति ॥

सूत्रम् ( रः ) र ६—१ । स्वर० ( स्रो० ) रेफसंबंधिनो रेफाज्जातस्य[1] विसर्जनीयस्य रेफो भवति अवप्रत्याहारे परे । उदा० । प्रातर् अग्रे अत्र । अंतर् अग्रे गतः । उभयत्रापि ( स्रो० ) ततः ( रः ) इत्यनेन पुनरपि रेफः । स्वर० । प्रातरत्रागंतव्यम् । अंतर्गतः । एवं स्वः गतः स्वर्गतः । पुनः आगतः पुनरागतः । सूत्रम् ( रि० ) र् ७—१ । स्वर० । लोपः १—१ । ( स्रो० ) अग्रे दीर्घः । पूर्व ( हवे । उ ओ ) दीर्घ १—१ ( स्रो० ) दीर्घः । अग्रे च १—१ ( अव्य० ) प्राक् ( विसर्जनीयस्य सः । स्तोः श्चुभिः श्चुः ) सिद्धम् । सूत्रं चतुष्पदम् । रेफेति वृत्तिः सुगमा । पुनः अग्रे रमते ( रः ) इति रेफः ( रि लोपो० ) इति र्लोपः । पूर्वस्य च दीर्घः । न इत्यस्य ना । शुक्तिः अग्रे रूप्यात्मना भाति । ( नामिनो रः । रि लोपो० ) पूर्वस्य च दीर्घः । शुक्ती रूप्यात्मना भाति । शुक्तिः रजताकारेण भासते इत्यर्थः । एवं हरी राजते । शंभू रमते ॥

सैषाद्धसे ॥ सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपश् भवति हसे परे । सः चरति स चरति । एषः हसति एष हसति ॥

सूत्रम् ( सैषा० ) स च एष च सैषं तस्मात्सैषात् ५—१ । ( ङसिरत् । सवर्णे० ) हसे ७—१ । ( अ इ ए ) मध्ये ( हो झभाः । चपा अवे० ) अत्र समासे कृते तदेतदोर्हसे इति संभवेऽपि ( सैषाद्धसे ) इति यत् सूत्रं कृतं ततः तैः एतैः सकः एषकः । न सः असः इत्यादौ हसे परे विसर्गलोपश्प्राप्तिनिवारणार्थमित्यर्थः । केचित्पुनराहुः ।

[1] रेफाजातस्येत्यन्यत्र पाठः ।

स इति पृथक्पदं पंचम्येकवचनांतं सांकेतिकम्। एषात्पंचम्येकवचनम्। हसे सप्तम्यंतम्॥ स एषात् इत्यत्र ( आदवे लोपश् ) इति विसर्गलोपशं विधाय पश्चात् ( ए ऐ ऐ )॥

सैषादिति संहिता—

सैष दाशरथी रामः सैष राजा युधिष्ठिरः ॥
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥ १ ॥
इत्यादौ पादपूरणे संध्यर्था ज्ञेया ।
यदुक्तं लौकिकायेह तद्वेदे बहुलं भवेत् ॥
सेमां भूम्याददे सोषामित्यादीनामदुष्टता ॥ २ ॥

नन्वत्र लोपशि कृते पुनः संधिः कथं कृतः इत्यग्रे वक्ष्यति । सैषादिति संहितेत्यादिना । तद् एतद् उभयत्रापि । १-१ ( त्यदादेष्टेरः स्यादौ ) इति दलोपः । ( तः ) इत्युभयत्रापि तस्य सः। एस इत्यत्र ( क्लिलात्षः स:० । स्रो० ) तदेतदोर्निष्पन्नाभ्यां स-एषशब्दाभ्याम् इत्यर्थः। शेषं कंठ्यम् । उदा० । सः अग्रे चरति। एषः अग्रे हसति। उभयत्रापि ( सैषाद्धसे ) इति विसर्गलोपश् ( सैषाद्धसे ) इति सूत्रे ऋजुतया कर्त्तव्ये सैषादिति सूत्रमध्ये या अघटमाना अकारैकारयोः ( ए ऐ ऐ ) इति संहिता संविदर्शिता सा स-एषशब्दयोः 'सैष दाशरथी रामः' इत्यादि अष्टाक्षरात्मकपादपूरणार्थम्। लोपशि कृतेपि यः ( ए ऐ ऐ ) इति संधिर्भवति तज्ज्ञापनार्थमित्यर्थः। श्लोकः। 'सैष०' । स अग्रे एषः ( आदवे लोपश् । ए ऐ ऐ ) इति संधिर्भवति । एवमग्रेषादत्रयेऽपि । स एषः दाशरथिः। दशरथस्यापत्यं दाशरथिः दशरथपुत्रो रामो वर्त्तते । स एष युधिष्ठिरो राजा युधि संग्रामे स्थिरः युधिष्ठिरः ( क्लिलात्षः सः कृतस्य ) इति षत्वम् ( ष्टुभिः ष्टुः ) स एष कर्णः राजा महात्यागी महादानी वर्त्तते। स एष भीमो भीमपांडवः महावली अतिवलिष्ठो वर्त्तते इत्यादि । अर्थः सुगमः॥ ॥ १ ॥ इत्यादौ पादपूरणे संध्यर्था । पादपूरणे यः संधिः स एव अर्थः प्रयोजनं यस्याः सा । पुनः वैदिकप्रयोगविशेषमाह । यदुक्तम्० । यत्सूत्रमिहास्मिन् शास्त्रे लौकिकाय प्रयोगाय व्याकरणप्रसिद्धोदाहरणसाधनायोक्तं सूत्रादि तद्वेदे छंदसि बहुलमन्यथा भवति अनिश्चितं विभजनतया भवेत्। क्वचिद्भवति क्वचिन्न भवतीत्यर्थः। उदाहरणम् । सः अग्रे इमाम् । ( आदवे लोपश् । अ इ ए ) भूमिः अग्रे आददे छांदसत्वात्कंचिन्नामिनोप्यवे विसर्गलोपश्[1]। ततः ( इ यं स्वरे ) भूम्याददे। सः अग्रे उषाम् ( आदवे लोपश् । उ ओ ) इत्यादीनामार्षप्रयोगाणां वैदिकप्रयोगाणामदुष्टता न दोष इत्यर्थः । स इमां भूमिमपुनात् भूमेश्च रसमाददे ततः स उषां गामानयामास ॥ २ ॥

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ॥

---

१ ( नामिनो लोपः) नामिनः परस्य विसर्जनीयस्य लोपो भवति क्वचिद्वे परे। भूमिः आददे बीजम् भूम्याददे बीजम् उ० पा० ।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति ॥ ३ ॥

बाहुलकं कतिधेत्याह । क्वचिदिति । क्वचित्प्रयोगे अनुक्तस्यापि प्रवृत्तिः अप्राप्तस्य असंभवतः सूत्रस्य प्रापणं प्रवृत्तिः प्राप्तिः । यथा लोपशि पुनर्न संधिरिति निषिद्धत्वेपि ( अ इ ए ) इति संधेः प्राप्तिः । क्वचित्प्रयोगान्तरे उक्तस्याप्यप्रवृत्तिः । कथितस्यापि सूत्रस्य निषेधः । यथा भूमिः अग्रे–आददे इत्यत्र ( नामिनो रः ) इत्यस्य अप्राप्तिः । क्वचिद्विभाषा विकल्पः । यथा वेदे । देवैः देवेभिः । गवेशः–गवीशः । क्वचित् अन्यदेवोक्तम् अन्यदेव भवति । एवममुना प्रकारेण विधेर्व्याकरणसूत्रस्य विधानं करणं वहुधा वहुप्रकारं समीक्ष्य दृष्ट्वा बाहुलकं वैदिकप्रयोगं चतुर्विधं वदंति कथयंति । बुधा इत्यध्याहारः । वैदिकं चतुर्धोक्तम् ॥ ३ ॥

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम् ॥ ४ ॥

अथ लौकिकप्रयोगः कतिधा भवतीत्याह । 'वर्णा०' । एको वर्णागमः । च पुनर्वर्णविपर्ययः । पूर्वोच्चारितस्य स्थाने परवर्णोच्चारणम् परवर्णस्य स्थाने पूर्ववर्णोच्चारणं वर्णविपर्ययः । पुनर्द्वावपरौ भेदौ, कौ तौ वर्णविकारवर्णनाशौ पूर्वावस्थापरित्यागेन अवस्थांतरापादनं विकारः । सर्वथा लोपो नाशः । वर्णानामक्षराणां विकारनाशौ वर्णविकारनाशौ । पंचमश्च भेदः धातोः ताभ्यां वर्णविकारवर्णनाशाभ्यां कृत्वा पुनर्धातोरर्थातिशयेन च कृत्वा धातोर्योऽर्थातिशयः अधिकृता कश्चिद्विशेषो यः अर्थातिशयस्तेन च यो भवति स योग इति नाम्ना पञ्चमो भेदः । तत्तस्मान्निरुक्तं निश्चयेन उक्तोऽर्थो यस्य तन्निरुक्तं व्याकरणोदाहरणम् ॥ ४ ॥

वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः ।
षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥ ५ ॥

पंचविधमुच्यते तानेव पंच व्यंजयति । अथ लौकिकः प्रयोगः कतिधा भवतीत्याह । 'वर्णा०' । गवेन्द्रादौ वर्णागमः । गवादेरवर्णागमोऽक्षादाविति । एवं हन् हिंसागत्योः । हन् अ प्रत्ययः सकारागमः । हिंस इति सिंहे वर्णविपर्ययो भवति । यथा हिंसि हिंसायाम् । ( भुक्तौ घनः ) इति अप्रत्ययः । हिंस इति स्थिते हिनस्तीति विग्रहे ततः हिंस इति शब्दे हस्य स्थाने सः सस्य स्थाने हः एवं वर्णविपर्ययः । सिंह इति सिद्धम् । षोडशादौ यथा । षट् च दश च इति विग्रहे षष् दश अत्र ( षष उदौ डः ) षस्य उः दस्य ड इति वर्णविकारः । ततः ( उ ओ ) षोडश इति विकारोदाहरणम् । गूढः अग्रे आत्मा । वंधुजनः अग्रे आजुहाव । कुरवः अग्रे आत्महितम् इत्यादिषु वर्णविकारम् आकारस्य अकारं विधाय ( अतोत्युः । उ ओ । एदोतोऽतः) गूढोऽऽत्मा। वंधुजनोऽऽजुहाव कुरवोऽऽत्महितम् )। पृषोदरे वर्णनाशः । यथा पृषत् अग्रे–उदरः । तकारस्य नाशो लोपः ( उ ओ )

१ कथ–इति पुस्तकान्तरे ।

पृषोदरः। पृषंति बिंदवः उदरे यस्य स पृषोदरः मृगः । अथवा पृषन्मृगस्तस्योदरमिव उदरं यस्य स पृषोदरः ॥ ५ ॥

**वर्णनाशविकाराभ्यां धातोरतिशयेन यः ॥ योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु ॥ ६ ॥ इति विसर्गसंधिः समाप्तः ॥**

'वर्णनाशेति ।' वर्णस्य अक्षरस्य नाशविकाराभ्यां कृत्वा धातोः अतिशयेन अर्थविशेषण कृत्वा यः उत्पद्यते सः प्राज्ञैः पंडितैर्योग इत्युच्यते । क मयूरभ्रमरादिषु । मयूरः भ्रमरः इत्याद्युदाहरणेष्वित्यर्थः । यथा 'रु शब्दे' रुरु एकत्र महीपूर्वः अन्यत्र भ्रमन्पूर्वः । मह्यामतिशयेन रौति जल्पतीति मयूरः । भ्रमन् सन् अतिशयेन रौतीति भ्रमरः । ( नाम्नि च ) इति डः प्रत्ययः । डित्त्वाट्टिलोपः । स्वर० । एकत्र विकारः हीस्थाने यू । अन्यत्र वर्णनाशः नकारस्य नाशः लोपः । मयूरः । भ्रमरः । इति सिद्धम् । अन्येषां मते तु एते पंचापि पृषोदरादिभेदा एव ॥ ६ ॥

इति विसर्गसंधिः ।

## अथ स्वरान्ताः पुँल्लिंगाः ६ ।

**अथ विभक्तिर्विभाव्यते । सा द्विधा स्यादिस्त्यादिश्च । विभक्त्यंतं पदम् ॥ तत्र स्यादिर्विभक्तिर्नाम्नो योज्यते ॥ अविभक्ति नाम ॥ विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते । कृतद्धितसमासाश्च प्रातिपदिकसंज्ञका इति केचित ॥**

अथेति पंचसंधिकथनानंतरं विभक्ति र्विभाव्यते कथ्यते । विभज्यंते पृथक् क्रियंते कर्तृकर्म्मादयो यया सा विभक्तिः । सा विभक्तिर्द्विधा द्विप्रकारा । एका स्यादिः सि औ जस् इत्यादिका । अपरा त्यादिः । तिप् तस् अंति इत्यादिका । विभक्तेः प्रयोजनमाह । सूत्रम् ( विभक्त्यंतं पदम् ) विभक्तिरंते यस्य तत् विभक्त्यंतम् । यस्यान्ते विभक्तिस्तत्पदमुच्यते । तत्र विभक्तिद्वयमध्ये स्यादिर्विभक्तिर्नाम्नोऽग्रे योज्यते स्थाप्यते दीयते । त्यादिर्विभक्तिर्धातोरग्रे योज्यते स्थाप्यते । नामलक्षणमाह । सूत्रम् ( अविभक्ति नाम ) नास्ति विभक्तिर्यस्य तत् अविभक्ति १-१ । (नपुंसका० ) सेर्लोपः । नामन्न १-१ । ( नपुंसका० । नाम्नो नो० ) नस्य लोपः सिद्धम् । द्विपदम् विभक्त्या रहितं धातोः भ्वादेः पृथग्भूतम् अर्थयुक्तं शब्दरूपमकारादिवर्णरूपं तन्नाम उच्यते । शब्दरूपं नामेत्युक्ते पदस्यापि नामसंज्ञा स्यात्तन्निवारणार्थम् अविभक्ति इति । तथा सति धातावतिव्याप्तिस्तन्निवारणार्थ धातुवर्जमिति । तथा सति निरर्थकस्य टप इत्यादिध्वनेर्नामत्वं तन्निवारणार्थम् अर्थवदिति । ईदृग्लक्षणं नामोच्यते । च पुनः कृत्तद्धितसमासाः सविभक्तिका अपि नामसंज्ञकाः स्युः । केचिदित्याहुः । कृतः

१ अर्थी-इति पाठः । २ एका इति पाठः पुस्तकान्तरे ।

तृतीयवृत्तिप्रत्ययाः । तदंताः शब्दाः धातवः तद्धितांताः समासाश्च नामसंज्ञका भवंति इति । केचिदिति पाणिन्याचार्या इति वदंति । एते सर्वेऽपि प्रातिपदिसंज्ञकाः नामसंज्ञका उच्यंते तन्मते प्रातिपदिकम् इति नामपर्यायः ॥

तस्मात् ॥ सि औ जस् । अम् औ शस् । टा भ्यां भिस् । ङे भ्यां भ्यस् । ङसि भ्यां भ्यस् । ङस् ओस् आम् । ङि ओस् सुप् ॥ तस्मान्नाम्नः पराः स्यादयः सप्त विभक्तयो भवंति ॥ तत्रा-र्थमात्रैकत्वविवक्षायां प्रथमैकवचनम् । सि । देव सि इति स्थिते । इकार उच्चारणार्थः । स्रोर्विसर्गः ॥ सकाररेफयोर्विसर्जनीयादेशो भवत्यधातो रसे पदांते च । देवः। द्वित्वविवक्षायांम् औ (ओ औ औ) देवौ । बहुत्वविवक्षायां प्रथमाबहुवचने जस् । जकारस्येत्संज्ञा । इत्संज्ञायां तस्य लोपः । प्रयोजनं च जसीति विशेषणार्थः । देव

रसे परे चकारात्पदांते तु धातुनाम्नोः उभयोरपि नाम्नः सकाररेफयो रसे परे पदांते च विसर्गादेशः। चकारात्पदांते धातोरपि सकाररेफयोर्विसर्गादेशः।यथा अचकाःअविभः। रसे परे धातोर्न । यथा आस्ते बिभर्ति इत्यादौ । अनेन विसर्गः । देवः इति सिद्धम्। द्वित्वविवक्षायाम् । औ । द्वयोर्वक्तुमिच्छा यत्र क्रियते तत्र द्विवचनम् । यथा देवश्च देवश्चेत्येकशेषे । सरूपाणामेकशेष एकविभक्तौ । इति देव औ इति स्थिते । ( ओ औ औ ) देवौ । एवं देवश्च देवश्च देवश्चेति बहूनामुक्तौ प्रथमाबहुवचनम् १-३ । जस् । जकारो जसीति सूत्रविशेषणार्थः । अन्यथा असीत्युच्यमाने शस् ङस्संबंधिनोऽप्यस इकारः स्यात् । जकारः इत्संज्ञकः । देव अस् ( सवर्णे० । स्रो०)देवाः ॥

[ अकाराज्जसोऽसुक्कचिद्वक्तव्यः ] देवासः । ब्राह्मणासः ॥ द्वितीयैकवचने देव अम् इति स्थिते । **अम्शसोरस्य**॥ समानादुत्तरयोरम्शसोरकारस्य लोपो भवति अधातोः । देवम् । देवौ । बहुवचने देव शस् इति स्थिते । शकारः शसीति विशेषणार्थः ॥

विशेषमाह ( अकाराज्जसोऽसुक् कचिद्वक्तव्यः ) कचित्प्रयोगांतरे अकारात्परस्य जसः असुक् आगमो भवति छंदसि वेदविषये । देव जस् । अनेन असुक् आगमः । किस्वादंते । स्वर० ( स्रो० । सवर्णे० ) देवासः । कर्मैकत्वविवक्षायां द्वितीयैकवचने देव अम् । सूत्रम् ।(अम्श०)अम् च शस्च अम्शसौ तयोः अम्शसोःअम्शस् ६-२। स्वर० ( स्रो० ) अ६-१ (ङस्स्य । नामिनो रः )सिद्धम् । द्विपदम् । समानात्परस्य अम्शस्संबंधिनः अकारस्य लोपो भवति अधातोः अक्विबंतात् शब्दादित्यर्थः[1] अनेन अकारलोपः।देवम् ।देवौ पूर्ववत् । द्वितीयाबहुवचने शस् शकारः शसीति विशेषणार्थः इत्संज्ञकः उच्चारणमात्रः अस् लिख्यते । अम्शसोरित्यकारलोपः ॥

**सो नः पुंसः** ॥ पुँल्लिंगात्समानादुत्तरस्य शसः सकारस्य नकारादेशो भवति ॥ **शसि**॥ शसि परे पूर्वस्य स्वरस्य दीर्घो भवति।यदादेशस्तद्वद्भवति नतु वर्णमात्रविधौ । देवान् । तृतीयैकवचने देव टा इति स्थिते । टकारोनुबंधष्टेनेति विशेषणार्थः ॥

सूत्रम् (सो०) स ६-१।स्वर०(स्रो०)न१-१।(स्रो०)पुंस् ५-१स्व०(स्रो०)पुँल्लिंगे वर्त्तमानात्समानादुत्तरस्याग्रतः शसः सकारस्य नकारादेशो भवति । सूत्रम् ।

---

१ शब्दयो.-इ० पा० । २ यद्वा इ० पा० । ३ कार्यार्थं.-इत्यन्यस्मिन्पुस्तके पाठः ॥

( शसि ) शस् ७-१ स्वर० । सिद्धमेकपदम् । पूर्वह्रस्वस्य दीर्घो भवति शसि परे । यदादेशस्तद्वद्भवति । नतु वर्णमात्रविधाविति न्यायात् । पूर्वस्य दीर्घः । देवान् । कर्तृकरणयोः एकत्वविवक्षायां तृतीयैकवचने देव टा इति स्थिते सति टकारोऽनुबंधः। उच्चरितप्रध्वंसिनो ह्यनुबंधा इति टकारस्य लोपः । टेन इति सूत्रार्थश्च । आ इति स्थिते ॥

टेन ॥ अकारात्परष्टा इन भवति । देवेन ॥ अद्भि ॥ अकारस्य आकारादेशो भवति भकारे परे । देवाभ्याम् । देव भिस् इति स्थिते। भ्यः ॥ अकारात्परस्य भिसो भकारस्य अकारादेशो भवति ( अ इ ए ) देव एस् इति स्थिते ( ए ऐ ऐ ) वृद्धिविसर्ज्जनीयौ । देवैः। [ अकारः भिसि छंदस्येकारो वा वक्तव्यः ] देवेभिः । कर्णेभिः ॥

सूत्रम् ( टेन ) टा १-१ । सांके० । इन १-१ । सांके० । अकारांतशब्दात्परतः टाविभक्तेः इनादेशो भवति सस्वर एव भवतीति ( अ इ ए ) देवेन । देव भ्याम् । सूत्रम् ( अद्भि ) अत् १-१ ( हसेपः० ) भ् ७-१ स्वर० । ( चपा अबे जबाः । वाऽऽसु ) इति सूत्रादाकारस्यानुवृत्तिः । केचित्तु ( आद्भि ) इति पठंति तन्मते आ अत् भि इति त्रीणि पदानि । अकारस्य स्यादिविभक्तिसंबंधिभकारे परे आकारो भवति । देवाभ्यामिति सिद्धम्। तृतीयाबहुवचने देव भिस् इति स्थिते। सूत्रम् ( भ्यः ) अथवा ( भ्भ्यः ) भ् भि अः । त्रिपदम् । भ् ६-१ । सांके०। भि ६-१ । सांके० । अः १-१ ( स्नो० । झबे जबाः ) इति । भस्य वः ( इ यं स्वे ) स्वर० । इति सूत्रसाधना । वृत्तिः कंठ्या । देशैकग्रहणेन देशिग्रहणम् । तेन भि इत्युक्ते भिसो ग्रहणं पूर्वं भकारेकारौ विश्लेष्य वियोज्य इकारात्पूर्वं भकारं विधाय पश्चात् भस्य अः (अ इ ए । ए ऐ ऐ । स्नो० ) देवैरिति सिद्धम् । अत्र तु भिस् एस् इत्येवं सूत्रकरणं युक्तम् । अकारस्य भिसि परे छंदसि वैदिकोदाहरणविषये एकारो वा वक्तव्यः । देवेभिः कर्णेभिरिति वैदिकप्रयोगः ॥

चतुर्थ्येकवचने देव ङे इति स्थिते । ङकारो ङित्कार्यार्थः सर्वत्र । ङे अक्[1]॥ अकारात्परस्य ङे इत्येतस्य अगागमो भवति । किस्वादंते ( ए अय् ) दीर्घः । देवाय । देवाभ्याम् पूर्ववत् । चतुर्थीबहुवचने देव भ्यस् इति स्थिते । ए स्भि बहुत्वे ॥ अकारस्य एत्वं भवति सकारे

---

१ 'ङे अक्' इत्याकारकमेव सूत्रं समतम्।

भकारे च परे बहुत्वे सति । देवेभ्यः । पंचम्येकवचने देव ङसि इति स्थिते ॥ ङसिरत् ॥ अकारात्परो ङसिरद्भवति दीर्घः । देवात् । देवाभ्याम् । देवेभ्यः । षष्ठ्येकवचने देव ङस् इति स्थिते । ङस् स्य ॥ अकारात्परो ङस् स्यो भवति । देवस्य ॥

संप्रदानैकत्वविवक्षायां चतुर्थ्येकवचने देव ङे इति स्थिते । ङकारो ङित्कार्यार्थ इत्संज्ञकश्च । सर्वत्र ङेङसिङस्ङिषु इत्यर्थः । सूत्रम् ( ङे अक् ) ङे ६–१ सांकेतिकम् । (ङस्य) इत्यकारलोपः । ( स्रो० ) अक् १–१ ( हसेपः० ) सिद्धम् । अकारात्परस्य ङे इत्येतस्य अगागमो भवति । कित्त्वादंते । ( ए अय् । सवर्णे० ) स्वर० । देवाय । ४–२ ( अद्भि ) देवाभ्याम् । ४–३ देव भ्यस् इति स्थिते । सूत्रम् । ( ए स्भि बहुत्वे ) ए १–१ । सांके० स् च भ् च स्भ् तस्मिन् स्भि ७–१ । स्वर० । बहुत्वे ७–१ ( अ इ ए ) अकारस्य एत्वम् एकारो भवति बहुवचने सति सकारभकारादौ विभक्तावित्यर्थः देवेभ्यः । अपादानैकत्वविवक्षायां पंचम्येकवचने देव अस् इति स्थिते । सूत्रम् ( ङसिरत् ) ङसि १ –१ । ( स्रो० ) अत् १–१ । (हसेपः० । नामिनो० ) सिद्धम् । अकारात् उत्तरो यो ङसिः सः अत् भवति ( सवर्णे० ) देवात् । पंचमीद्विवचने ( अद्भि ) देवाभ्याम् । बहुवचने देवेभ्यः ( ए स्भि बहुत्वे । स्रो० ) संबंधैकत्वविवक्षायाम् ६–१ देव अस् । सूत्रम् (ङस्स्य ) ङस् १–१ ( हसे० ) स्य १–१ । सां० । अकारादित्यादिवृत्तिः कंठ्या । देवस्य । ६–२ देव ओस् इति सति ॥

ओसि ॥ अकारस्य ओसि परे एत्वं भवति ( ए अय् ) देवयोः । नुडामः ॥ समानात्परस्यामो नुडागमो भवति । टित्त्वादादौ । उकार उच्चारणार्थः ॥ नामि ॥ नामि परे पूर्वस्य दीर्घो भवति । देवानाम् । सप्तम्येकवचने देव ङि इति स्थिते ( अ इ ए ) देवे । ( ओसि ) देवयोः पूर्ववत् । सप्तमीबहुवचने देव सुप् इति स्थिते पकारस्येत्संज्ञायां लोपः ( ए स्भि बहुत्वे ) इत्येकारः । ( किलात्पः सः कृतस्य ) कवर्गादिलाच्च प्रत्याहारादुत्तरस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारादेशो भवति । देवेषु ॥

सूत्रम् ( ओसि ) ओस् ७–१ । स्वर० । अकारस्य ओसि परे एत्वम् एकारो भवति । ( ए अय् ) स्वर० । ( सां० ) देवयोः । ६–३ देव आम् । सूत्रम् । ( नुडा० ) नुट् १–१ ( हसेपः० ) आम् ६–१ । स्वर० ( स्रो० । चपा अबे० ) सिद्धम् । पुंसि समानात् ह्रस्वात्

समानात् दीर्घात्तु आवतष्टु ईकारांतेषु नित्यस्त्रीलिंगे वर्त्तमानेष्विति व्याख्येयम् । समानात् परस्य आमः षष्ठीबहुवचनस्येति व्याख्येयम् । अन्यथा ( आम्ङेः ) इत्याम् ( स्त्रियां स्त्रोः) इत्याम् (आमौ) इत्यप्याम् (किमोव्ययात्०) इत्याम् (कासादिप्रत्ययांतात्० ) इत्याम् वर्तते तत्रातिव्याप्तिः स्यात्तेन षष्ठीबहुवचनस्यामो नुडागमो भवति । अधातोरेवेत्यनुवर्तितव्यम् । तेन अधातोः अकिर्वंत्राच्छब्दात् । टित्वादादौ । उकार उच्चारणार्थः । इति न् इत्यागमः । आमो नुट् इति कर्त्तव्ये नुडाम इति विपरीतकरणं नुटो नित्यत्वसूचकम् । तेन स्त्रीणां वारीणामित्यत्र ( नुडामः ) इत्येव स्यात् ( नामिनः स्वरे ) इति न भवति । सूत्रम् ( नामि ) नुट्सहितः आम् नाम् तस्मिन् नामि ७–१ । स्वर० । सिद्धम् । नुडागमसहिते आमि परे पूर्वस्य दीर्घो भवति इति दीर्घः । स्वर० । देवानाम् । आधारैकत्वविवक्षायाम् ७–१ देव ङि ( अ इ ए ) देवे । ७–२ षष्ठीद्विवचनवत् । देवे देव देवेत्येकशेषे[2] ७–३ देव सु इति स्थिते ए स्भि बहुत्वे ) ततः । सूत्रम् ( किलात्षः सः कृतस्य ) कुश्च इलश्च किलं[3] तस्मात् (५–१ ( ङसिरत् । सवर्णे० ) ष १–१ स ( स्तो० ) स् ६–१ । स्वर० ( स्तो० ) कृत ६–१ ( ङस् स्य ) चतुष्पदं सूत्रं सिद्धम् । वृत्तिः कंठ्या । न वरम् । केनचित्सूत्रेण कृतस्यैव सकारस्य षकारो भवति न त्वकृतस्य स्वाभाविकस्य अंते स्थितस्यापि सस्य षत्वं न भवति । यथा हरिस्तत्रेत्यादौ न षत्वम् । तथा नुम्विसर्गांतरेपि षत्वम् यथा हवींषि । हविःषु । इत्यादि । पूर्वं हविस्–शब्दोस्ति इत्यर्थः । अत्र सः षः इति कर्त्तव्ये यत्षः सः इति विपरीतत्वेन कृतं तत् क्वचित् किलं विनापि सस्य षत्वज्ञापनार्थम् । यथा अवष्टंभः । अंबष्ठः । अभ्यषुगोत् इत्यादि । देवेष्विति सिद्धम् ॥

आमंत्रणे सिर्धिः ॥ आमंत्रणमाभिमुखीकरणं तस्मिन्नर्थे विहितः सिर्धिसंज्ञो भवति ॥

संबोधनमाह । ( आमंत्रणे० ) आमंत्र्यते आहूयते पुरुषोऽनेनेत्यामंत्रणं तस्मिन् ७–१ ( अ इ ए ) सि १–१ । ( स्तो० ) धि १–१ । (स्तो०)। ( रहाद्यपो द्विः ) पूर्वम् ( नामिनो रः ) जलतुंडि० । त्रिपदं सूत्रमिदं सिद्धम् । आमत्रणमिति कोऽर्थः । आभिमुखीकरणम् । अनभिमुखः आसमन्तात्प्रकारेण अभिमुखः क्रियते अनेनेति आभिमुखीकरणम् । तस्मिन्नर्थे विहितः कृतो यः सिः प्रथमैकवचनरूपः स धिसंज्ञो भवति । उदाहरणम् । देव १–१ स् ॥

---

१ ग्रहणम् इति पुस्तकान्तरे पाठो दृश्यते। २ देवे च देवे च देवे च–इत्येकत्वेत्याद्यन्यस्मिन्पुस्तके । ३ किलः इत्यपि पाठः ।

**समानाद्धेर्लोपोऽधातोः ॥ समानादुत्तरस्य धेर्लोपो भवत्यधातोः ॥**

धिसंज्ञायां किं कार्यं तदाह । सूत्रम् ( समाना० ) समान ५-१ । ( ङसिरत् । सवर्णे० ) धि ६-१ ( ङिति । ङस्य ) इत्यकारलोपः ( झबे जबाः ) तस्य दः । स्वर० । लोपः १-१ ( स्रो० । नामिनो रः ) जलतुं० । अधातोः न धातुरधातु स्तस्मात् । अधातु ५-१ । ङिति । ङस्य ) इत्यकारलोपः । ( अतोऽत्युः । उ ओ । एदोतोऽतः ) चतुष्पदं सिद्धम् । समानादुत्तरस्य धेर्लोपो भवति । अत्र समानादिति ह्रस्वसमानात्परस्येति व्याख्येयम् । अन्यथा । हे हाहाः । हे हूहूः । हे वातप्रमीः । इत्यादौ विरुध्यति । अधातोः अक्विबंतात् शब्दात् । अक्विबंतोऽधातुरुच्यते क्विबंतश्च शब्दो धातुरित्यभिप्रायः । अनेन धिलोपः ॥

**[ आभिमुख्याभिव्यक्तये हे शब्दस्य प्राक् प्रयोगः ] हे देव । हे देवौ । हे देवाः । एवं घटपटस्तंभकुंभादयोऽप्यकारांताः पुँल्लिङ्गाः ॥**

पूर्वं हेशब्दः एतद्धेतुः । अभिमुखस्य भावः आभिमुख्यं संमुखत्वं तस्याभिव्यक्तये प्रकटीकरणाय हेशब्दः प्राक् आदौ प्रयुज्यते इत्यर्थः । हे देव । द्विवचने ( ओ औ औ) हे देवौ । बहुवचने देव अग्रे जस् इति स्थिते जकारस्येत्संज्ञायां लोपः । देव अस । ( सवर्णे० । स्रो० ) हे देवाः । अन्यानपि शब्दानाह ( एवं घटपटादयः ) एवं कंठ्यम् । अत्र काव्येन विभक्त्यर्थं दर्शयति । "वृक्षास्तिष्ठति कानने कुसुमिते वृक्षं लता संश्रिता वृक्षेणाभिहतो गजो निपातितो वृक्षाय देयं जलम् । वृक्षादानय मंजरीं कुसुमितां वृक्षस्य शाखोन्नता वृक्षे नीडमिदं कृतं शकुनिना हे वृक्ष किं पश्यसि ॥ १ ॥ वीरः सर्वसुरासुरेंद्रमहितो वीरं बुधाः संश्रिता वीरेणाभिहतः स्वकर्मनिचयो वीराय नित्यं नमः । वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो वीरे श्रीधृतिकीर्तिकांतिनिचयः श्रीवीर भद्रं दिश ॥ २ ॥ शिष्यः कुरुते पृच्छां बहुना विनयेन तत्त्वबोधाय । आगत्य निजस्थानाद्धर्माचार्यस्य पादांते" ॥ ३ ॥ इत्यादि ॥

**अकारांतानामपि सर्वादीनां तु विशेषः । सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम कतर कतम सम**

---

१ एवम् "रामो राजमणिः सदा विजयते रामं रमेशं भजे रामेणाभिहता निशाचरचमू रामाय तस्मै नमः । रामान्नास्ति परायणं परतर रामस्य दासोऽस्म्यहं रामे चित्तलयः सदा भवतु मे भो राम मां पालय" ॥ १ ॥ इत्यादयः श्लोका बहवः सर्वविभक्तिसूचकाः संति ।

सिम नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अंतर त्यद् तद् यद् एतद् इदम् अदस् द्वि किम् त्वत भवतु युष्मद् अस्मद् । एते सर्वादयस्त्रिलिंगाः ॥

पुनर्विशेषमाह । अकारान्तानामिति । यद्यपि सर्वादयोऽकारांतास्तथापि सर्वादीनां विशेषो देवशब्दात्कश्चिद्भेदोस्ति के ते सर्वादय इत्याह । सर्व विश्व यावदस्मद्। विश्वशब्दस्य सकलार्थवाचकत्वे सर्वादित्वं, न तु जगद्वाचकत्वे । जगद्वाचकत्वे तु कुलशब्दवत् । समः अतुल्यार्थः किंतु सर्वार्थवाचकः । तुल्यार्थत्वे तु राज्ञः समाय इत्यत्र न सर्वादित्वम् । सिमः समग्रार्थवाचकः । नेमः खंडवाचकः । पूर्वादीनां तु व्यवस्थायामेव सर्वादित्वम् । स्वाभिधेयापेक्षावधिनियमो व्यवस्थेति विकल्पः । स्वस्याभिधेयो र्थो दिग्देशकालस्वभावस्तमपेक्षते तेनैवापेक्ष्यते इति स्वाभिधेयापेक्षः ईदृशो योऽवधेर्मर्यादाया नियमोऽवश्यंभावोऽवधिभावादभ्रंशो व्यवस्था उच्यते । दक्षिणशब्दस्य प्रावीण्ये शृंगारनायकवाचकत्वेन सर्वादिकार्यम् । अन्यत्र दक्षिणदिग्देशवाच्यत्वे सर्वादित्वम् । उत्तरशब्दस्य उत्तरदिग्देशवाच्यत्वे सर्वादित्वं प्रतिवाक्ये तु न सर्वादिकार्यम् । अधरस्य हीनार्थत्वे सर्वादित्वं न त्वोष्ठवाचकत्वे । स्वशब्दस्य ज्ञातिधनान्यवाचित्वे ज्ञातिधनार्थवर्जम् । किंतु आत्माऽऽत्मीयार्थे वाच्ये सर्वादित्वम्। "ज्ञाताव्रात्मनि चात्मीये धने स्वाख्या प्रवर्त्तते" इति स्वा ज्ञातयः स्वानि द्रव्याणि इत्यत्र सर्वादित्वं न अन्यत्र तु स्वस्मै रोचते स्वे पुत्राः स्वस्मै पुत्राय देहि। अत्र सर्वशब्दवत्। अंतरशब्दस्य वहिर्योगे उपसंव्याने च सर्वादित्वं नान्यत्र यतः "मध्ये छिद्रे विशेषे च व्यवधाने वहिर्युजि । उपसंव्यानने प्राज्ञाः षडर्थमंतरं विदुः"॥ १ ॥ अंतरस्मै गृह या। नगरवाह्याय चांडालादिगृहायेत्यथः । पुरि तु न भवति । अंतरायै पुरे कुप्यति। चांडालादिवाह्यपुर्यै इत्यर्थः । वस्त्रांतरेणापिहितं वस्त्रमुपसंव्यानम् । " अंतरीयं निवसनमुपसंव्यानमित्यपि" तत्रार्थे अंतरे अंतरा वा शाटकाः अंतरस्मै शाटकाय वस्त्रांतरेण वृताय शाटकायेत्यर्थः । यतः । "सर्वादिः सर्वनामाख्यो न चेद्गौणोऽथवाभिधा । पूर्वादिश्च व्यवस्थायां समोऽतुल्येंऽतरोऽपुरि ॥ परिधाने वहिर्योगे स्वोऽर्थज्ञात्यन्यवाच्यपि" ॥ उभशब्दस्य त्वच्छब्दस्य भवच्छब्दस्य द्विशब्दस्य च तृतीयासमासे तथा हेत्वर्थे सर्वादेः सर्वा विभक्तयो भवंति । तदर्थम् ( अव्ययात्सर्वनाम्नष्टेः प्रागकच् ) इति अकच्प्रत्ययार्थ च सर्वादिमध्ये ग्रहणम् ।यथा उभौ हेतू । उभाभ्यां हेतुभ्याम् ।उभयोः हेत्वोः। त्वत् हेतुः । त्वतं हेतुम् । त्वता हेतुना । त्वते हेतवे । द्वौ हेतू । द्वाभ्यां हेतुभ्याम् । द्वयोर्हेत्वोः । भवान् हेतुः ।भवंतं हेतुम् । भवता हेतुना । इत्यादि । तथा अज्ञातौ उभौ उभकौ । एवं द्वकौ । भवकन् । भवकन्तौ । भवकन्तः । त्वकत् इत्यादि । त्यच्छब्दः

प्रायश्छंदस्येव । एते सर्वादय उच्यंते कथ्यंते । त्रिलिंगाः लिंगत्रयधारिणः पुँल्लिंगस्त्रीलिंगनपुंसकलिंगाः ॥

तत्र पुँल्लिंगत्वे रूपं नेयम् । सर्वः । सर्वौ । सर्व जस् इति स्थिते । जसी॥ सर्वादेरकारांतात्परो जस् ईर्भवति । ( अ इ ए ) सर्वे । सर्वम् । सर्वौ । सर्वान् । ( अम्शसोरस्य । सो नः पुंसः । शसि ) पूर्वस्य दीर्घः । तृतीयैकवचने सर्व इन इति स्थिते । षुर्नो णोऽनंते॥ षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति अंते स्थितस्य न भवति सर्वानित्यादौ । अवकुप्वंतरेऽपि ॥ अवप्रत्याहारेण कवर्गेण पवर्गेण च मध्ये व्यवधानेऽपि भवति नान्येन । सर्वेण । सर्वाभ्याम् । ( अद्भि ) इत्यात्वम् । सर्वैः ॥

तत्र पुँल्लिंगे रूपमाह । सर्व । सृ गतौ । वप्रत्ययः । सरति प्रसरतीति सर्व १-१ ( स्तो० ) सर्वः । सर्व १-२ । ( ओ औ औ ) सर्वौ । बहुत्वे विशेषकृत्यमाह । सूत्रम् ( जसी ) जस १-१ । सांके० । ई १-१ । सां० । वृत्तिः सुबोधा । ( गुरुः शित्सर्वस्य ) इति गुरुत्वात् सर्वस्य जसः ईः भवति । प्रक्रियायां तु ( जसः शी ) शित्वात्सर्वस्य । न वरम् । अकारांतग्रहणं भवच्छब्दनिषेधसूचकम् । अनेन ई ( अ इ ए ) सर्वे । द्वितीयायां देववत् । तृतीयैकवचने सर्व आ ( टेन ) इति इनादेशे कृते ( अ इ ए ) ततः । सूत्रम् ( षुर्नो णोऽनंते ) षू च र् च ऋश्च ष्रृ तस्मात् ष्रृः ५-१। ( ऋतो ङ उः ) स च डित डित्त्वाट्टिलोपः । स्वर० । न् १-१ ( स्तो० । नामिनो रः ) जल० । ण १-१ ( स्तो० । इवे । उ ओ ) अनंतः न अंतो अनंतस्तस्मिन् अनंते ७-१ ( अ इ ए । अतोऽत्युः । उ ओ । एदो० ) सिद्धम् । पाठसिद्धा वृत्तिः । अंते पदांते स्थितस्य व्यंजनस्य नकारस्य णकारो न भवतीत्यर्थः । नन्वत्र रेफस्याग्रे नकारो नास्ति किंतु मध्ये वकारेकारौ स्तः तत्कथं नकारस्य णकारः स्यादित्याह । सूत्रम् । (अवकुप्वंत० ) अवश्च कुश्च पुश्च अवकुपवः तैरंतरमवकुप्वन्तरं तस्मिन् ७-१ ( अ इ ए ) अपि १-१ ( अव्य० । एदो० ) सिद्धम् । अवप्रत्याहारस्यांतरे कवर्गस्यांतरे पवर्गस्यांतरे अपिशब्दात् जिह्वामूलीयोपध्मानीयानुस्वारनुम्विसर्गाणामपि व्यवधाने अंतरे णत्वं वक्तव्यम् । सर्वेण । सर्वाभ्याम् ( अद्भि ) सर्वैः ( भ्यः । अ इ ए । ए ऐ ऐ । स्तो० )॥

चतुर्थ्येकवचने सर्व ए इति स्थिते । सर्वादेः स्मट् ॥ सर्वादेरकारांतात्परस्य चतुर्थ्येकवचनस्य स्मडागमो भवति । टकारः

---

१ ऽेयम्-इति पाठः ।

स्थाननियमार्थः ( ए ऐ ऐ ) सर्वस्मै । सर्वाभ्याम् । सर्वेभ्यः । पञ्चम्येकवचने सर्व अत् इति स्थिते । अतः ॥ सर्वादेरकारान्तात्परस्यातः स्मडागमो भवति । सर्वस्मात् । सर्वाभ्याम् । सर्वेभ्यः । षष्ठ्येकवचने सर्व अस् इति स्थिते ( ङस् स्य ) सर्वस्य । सव ओस् इति स्थिते ( ओसि । ए अय् ) सर्वयोः । षष्ठीबहुवचने सर्व आम् इति स्थिते । सुर्डामः॥सर्वादेरवर्णान्तात् परस्यामः सुडागमो भवति (ए स्भि बहुत्वे ) अकारस्य एत्वं भवति । ( किलात्षः सः कृतस्य ) सस्य षत्वम् । सर्वेषाम् । सप्तम्येकवचने सर्व ङि इति स्थिते । ङि स्मिन् ॥ सर्वादेरकारांतात्परो ङि स्मिन्भवति । सर्वस्मिन् । ( ओसि ) अकारस्य एत्वम् ( ए अय् ) सर्वयोः । सप्तमीबहुवचने सर्व सु इति स्थिते । ( ए स्भि बहुत्वे ) अकारस्य एत्वम् । ( किलात्षः सः कृतस्य ) इति षत्वम् । सर्वेषु । ( आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः ) हे सर्व । हे सर्वौ । हे सर्वे ॥

चतुर्थ्येकवचने सर्व अग्रे ए । सूत्रम् ( सर्वादेः० ) सर्वः आदिर्यस्य सः सर्वादिस्तस्मात्सर्वादेः पंचम्येकवचनम् ५–१ ( ङिति । ङस्य ) अग्रे स्मट् १–१ । ( हसे० ) सिद्धम् । अनेन स्मट्–आगमः सस्वर एव । टित्वादादौ । ( ए ऐ ऐ ) सर्वस्मै । सर्वाभ्याम् । सर्वेभ्यः । सर्व ५–१ । सर्व अस् ( ङसिरत् ) ततः सर्व अत् इति स्थिते । सूत्रम् । अत् ६–१ । स्वर० । ( स्रो० ) अकारांतात्सर्वादेः शब्दात्परस्य ङसिस्थाने जातस्य अत् इत्यस्य स्मडागमो भवति । इत्यनेन स्मडागमः ( सवर्णे० ) सर्वस्मात् । द्वित्वे बहुत्वे च देववत् । ६ -१ ( ङस्स्य ) सर्वस्य । ६–२ सर्व ओस् ( ओसि । ए अय् ) स्व० । ( स्रो० ) सर्वयोः । ६–३ सर्व आम् इति स्थिते । सूत्रम् । ( सुडामः ) सुट् १–१ । ( हसे० ) आम् ६–१ । स्वर० ( स्रो० । चपा अवे० ) सर्वादेः परस्यामः सुडागमो भवति । इति सुट् । टित्वादादौ । उकार उच्चारणार्थः । ततः ( ए स्भि० । किलात्षः सः० ) स्वर० । ( मोनुस्वारः ) सर्वेषाम् । ७–१ सर्व ङि इति स्थिते । सूत्रम् ( ङि स्मिन् ) ङि १–१ । सांके० स्मिन् १–१ । ( हसे० ) सर्वादेरिति अनेन ङि स्मिन्–आदेशः । सर्व [illegible] इति सिद्धम् । ७–२ ( ओसि । ए अय् ) स्वर० । ( स्रो० )

( ए स्मि० । किला० ) सर्वेषु । पदद्वयप्रक्रिया देववत् । सम्बोधने ( समानोद्ध-लोपोऽधातोः ) हे सर्व । हे सर्वौ । हे सर्वे । प्रथमावत् ॥

एवं विश्वादीनामेकशब्दपर्यंतानां रूपं ज्ञेयम् । डतरडतमौ प्रत्ययौ ततस्तदंताः शब्दा ग्राह्याः । पूर्वः । पूर्वौ । पूर्व जस् इति स्थिते [ पूर्वादीनां तु नवानां जस ईकारो वा वक्तव्यः ] पूर्वे—पूर्वाः । इत्यादि । [ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ ] पूर्वस्मात्—पूर्वात् । पूर्वाभ्याम् । पूर्वेभ्यः । ( ङस्स्य ) पूर्वस्य( ओसि ) पूर्वयोः ( सुडामः ) पूर्वेषाम् ( ङि स्मिन् ) पूर्वस्मिन्—पूर्वे । पूर्वयोः । पूर्वेषु । हे पूर्व । हे पूर्वौ । हे पूर्वाः—हे पूर्वे । परः । परौ ( जसी ) परे—पराः । परम् । परौ । परान् । परेण । पराभ्याम् । परैः । परस्मै—पराय । पराभ्याम् । परेभ्यः । परस्मात्—परात् । पराभ्याम् । परेभ्यः । परस्य । परयोः । परेषाम् । परस्मिन्-परे । परयोः । परेषु । हे पर । हे परौ । हे परे—हे पराः ॥

एवं सर्वशब्दरीत्या विश्वादीनामेकशब्दपर्यंतानां शब्दानां रूपमवसेयम् । डरडतमौ, यतः प्रत्ययौ तद्धितोद्भवौ अतस्तदंताः कतरकतमादिशब्दा ग्राह्याः । अन्तरस्य पृथग्ग्रहणेन अन्यतमस्य प्रतिषेधः । अन्यत्सर्ववत् । विशेषमाह । तु पु पूर्वादीनां नवानां शब्दानां जस ईकारो वा वक्तव्यः । वा सर्ववज्जसीत्यर्थः । अन्य पक्षे देववत् । पूर्वे—पूर्वाः । परे—पराः । इत्यादि । पुनः पूर्वादीनां नवानां ङसि ङिश्च ङसिङी तयोः ङसिङ्योर्विषये स्मात्स्मिनौ आदेशौ वा वक्तव्यौ । पंचम्य एकवचने एकत्र सर्ववत् एकत्र देववत् । पूर्वस्मात्—पूर्वात् । पूर्वस्मिन्—पूर्वे । अन्य सर्ववत् । पूर्वः । पूर्वौ । पूर्वे—पूर्वाः । पूर्वम् । पूर्वौ । पूर्वान् । पूर्वेण । पूर्वाभ्याम् । पूर्वैः पूर्वस्मै—पूर्वाय । पूर्वाभ्याम् । पूर्वेभ्यः । पूर्वस्मात्— पूर्वात् । पूर्वाभ्याम् । पूर्वेभ्यः पूर्वस्य । पूर्वयोः । पूर्वेषाम् । पूर्वस्मिन्—पूर्वे । पूर्वयोः । पूर्वेषु । हे पूर्व । हे पूर्वौ हे पूर्वे—हे पूर्वाः । एवं परादयो बोध्याः ॥

प्रथमः । प्रथमौ । प्रथम जस् इति स्थिते [ [१]प्रथमचरमतयड-

---

१ ( प्रथमचरमतयाल्पार्धकतिपयनेमाना जसीकारो वा वक्तव्यः ) इत्यन्यत्रान्यथापाठो दृश्यते ।

यडल्पार्द्धकतिपयनेमानां जसी वा ] प्रथमे—प्रथमाः । चरमे—चरमाः । शेषं देववत् । नेमे—नेमाः । शेषं सर्ववत् । तयायडौ प्रत्ययौ ततस्तदंताः शब्दा ग्राह्याः [ तीयस्य सर्ववद्रूपं ङित्सु वा वक्तव्यम् ] द्वितीयस्मै—द्वितीयाय । द्वितीयाभ्याम् । द्वितीयेभ्यः । द्वितीयस्मात्—द्वितीयात् । द्वितीयस्मिन्—द्वितीये । द्वितीययोः । द्वितीयेषु । हे द्वितीय । हे द्वितीयौ । हे द्वितीयाः । एवं तृतीयः ॥

प्रथमचरमेति सुकरम् । प्रथमचरमाल्पार्द्धकतिपयानां केवलं जसि विकल्पः । शेषं देववत् । तयट्अयट्प्रत्ययान्तानां द्वयद्वितयादीनां जसि रूपद्वयम् । शेषं देववत् । नेमशब्दस्य जसि विकल्पः । शेषं सर्ववत् । नेमानामिति रूपं यत् दृश्यते तत् 'द्वंद्वे सर्वादित्वं वा' इति न्यायात् सिध्यति । जसि प्रथमे—प्रथमाः । चरमे—चरमाः । शेषं देववत् । तयायडौ प्रत्ययौ ततस्तदंताः शब्दा ग्राह्याः । द्वितये—द्वितयाः । द्वये—द्वयाः । शेषं देवशब्दवत् । उभयशब्दस्य अयट्प्रत्ययांतत्वेपि सर्वादिपाठाज्जसि न विकल्पः । किंतु सर्ववत् तीयस्येति तीयप्रत्ययांतस्य द्वितीयतृतीयशब्दयुग्मस्य असर्वादित्वेपि ङित्सु वचनेषु विकल्पेन सर्ववद्रूपम् । ङित्सु ङेङसिङिषु वा सर्ववत्त्वमित्यर्थः । द्वितीयस्मै—द्वितीयाय । द्वितीयस्मात्—द्वितीयात् । द्वितीयस्मिन्—द्वितीये । शेषं देववत् । एव तृतीयः ॥

उभशब्दो नित्यं द्विवचनांतः । उभौ । उभौ । उभाभ्याम् । उभाभ्याम् । उभाभ्याम् । उभयोः । उभयोः । हे उभौ ॥ उभयशब्दस्य द्विवचनाभावादेकवचनबहुवचने भवतः । उभयः । उभये । उभयम् । उभयान् । उभयेन । उभयैः । उभयस्मै । उभयेभ्यः । इत्यादि ॥

उभशब्दो द्विसंख्यावाचकत्वान्नित्यं द्विवचनांतः । १–२ । २–२ ( ओ औ औं ) ३–२ । ४–२ । ५–२ ( अद्वि ) ६–२ । ७–२ ( ओसि । ए अय् ) स्वर० । ( स्तो० ) सिद्धम् । उभयशब्दस्य द्विवचनाभावः । द्विवचनांतप्रयोगदर्शनाभावात् इति केचित् । "सर्वादिः सर्वनामाख्यो न चेद्गौणोऽथसंज्ञाभिधा । पूर्वादिश्च व्यवस्थायां समोऽतुल्योन्तरोऽपुरि ॥ परिधाने वहिर्योगे स्वोऽर्थज्ञात्यन्यवाच्यपि" । यथा—उभयः । उभये । इत्यादि । इति सर्वादयः ॥

---

१ उभयशब्दस्य द्विवचनं नास्तीति कैयटः । अस्तीति हरदत्तः । इति भट्टोजिदीक्षितविरचितसिद्धान्तकौमुद्याम् ।

अकारांतः पुँल्लिंगो मासशब्दः [ मासस्याल्लोपो वा ] मासशब्दस्याकारस्य लोपो वा भवति सर्वासु विभक्तिषु परतः॥ माः-मासः । मासौ-मासौ । मासः-मासाः । मासम्-मासम् । मासौ-मासौ । मासः-मासान् । मासा-मासेन । माभ्याम्-मासाभ्याम् । माभिः-मासैः । मासे-मासाय । माभ्याम्-मासाभ्याम् । माभ्यः-मासेभ्यः । मासः-मासात् । माभ्याम्-मासाभ्याम् । माभ्यः-मासेभ्यः । मासः-मासस्य । मासोः-मासयोः । मासाम्-मासानाम् । मासि-मासे । मासोः-मासयोः । मास्सु-मासेषु ॥

मासशब्दे विशेषमाह । ( मास० ) मास ६-१ ( ङस्स्य ) अतः अकारस्य लोपः । अल्लोपः १-१ ( स्रो० । सवर्णे० ) वा ३-१ । ( अव्य० । इवे । उ ओं ) त्रिपदम् । मासशब्दस्याकारस्य लोपो भवति वा विकल्पेन शसादौ स्वरे परे । सर्वविभक्तिषु परत इत्येके । एतदेव संमतम् । यतः अदूषितं परमतं स्वमतमेवेति । अनेन सप्तस्वपि विभक्तिष्वकारलोपः । सौ चालोपे कृते ( हसे० । स्रो० ) स्वरादौ तु । स्वर० । भकारादौ ( स्रो० । आदवे लोपश् ) ७-३ सुपि ( स्रो० । विसर्ज० ) स्वर० । एवं हसान्तसाधनम् । स्वरान्तप्रक्रिया देवशब्दवत् । माः । मासौ । मासः । मासम् । मासौ । मासः । मासा । माभ्याम् । माभिः । मासे । माभ्याम् । माभ्यः । मासः । माभ्याम् । माभ्यः । मासः । मासोः । मासाम् । मासि । मासोः । मास्सु । हे माः । हे मासौ । हे मासः । ऌतुलसानां दंता इति स्थानसवर्णत्वात् ( झबे जबाः ) इति सकारस्य दकारः स्यात् । माद्भ्याम् । माद्भिः । माद्सु । इत्यपि केचित् । एवमकारलोपपक्षे साधनम् । पक्षे देवशब्दवत् । मासः । मासौ । मासाः । इत्यादि । निर्जरशब्दस्य स्वरादौ विकल्पेन जरस् आदेशः । निर्जरः । निर्जरसौ-निर्जरौ । निर्जरसः-निर्जराः । निर्जरसम्-निर्जरम् । इत्यादि । एवम्-अकारांतप्रक्रिया ॥

आकारांतः पुल्लिंगः सोमपाशब्दः । सोमपाः । सोमपौ । सोमपाः । अधातोरिति विशेषणाद्धेर्लोपो नास्ति । हे सोमपाः हे । सोमपौ । हे सोमपाः । सोमपाम् । सोमपौ । सोमपा शस् इति स्थिते । आतो धातोर्लोपः ॥ धातुसंबंधिन आकारस्य लोपो भवति शसादौ स्वरे । सोमपः । सोमपा । सोमपाभ्याम् । सोमपाभिः । सोमपे । सोमपा-

१ मासशब्दस्य इत्यन्यत्र पाठः ।

भ्याम् । सोमपाभ्यः । सोमपः । सोमपाभ्याम् । सोमपाभ्यः । सोमपः । सोमपोः । सोमपाम् । सोमपि । सोमपोः । सोमपासु । एवं कीलालपाशंखध्माप्रभृतयः ॥

अथ आकारांतप्रक्रियामाह । तत्र आकारांतः पुँल्लिगः पुमेव पुमानेव लिंगं विवक्षितं यस्य सः पुँल्लिगः सोमपाशब्दः । पा पाने । पा सोमपूर्वः ( क्विप् ) इति क्विप् प्रत्ययः। क्विपः सर्वापहारी लोपः । नामत्वात्स्यादयः । क्विबंतत्वाद्धातुत्वं न जहाति शब्दत्वं च प्रतिपद्यते १–१ ।( स्रो० ) १–२ । ( ओ औ औ ) १–३ । ( सवर्ण० । स्रो० ) सोमपाः । धौ धातुत्वाद्धेर्लोपो न । किंतु ( स्रो० ) हे सोमपाः । हे सोमपौ।हे सोमपाः। २–१ । ( सवर्णे दीर्घः सह ) सोमपाम् । २–२ (ओ औ औ ) सोमपौ । द्वितीयाबहुवचने । सोमपा अस् इति स्थिते । सूत्रम्(आतो०)आत् ६–१।स्वर०(स्रो०) धातु ६–१ ( ङिति । ङस्य । स्रो० । ह्वे० । ङ ओ ) लोपः १–१ । ( स्रो० । नामिनो रः ) जल० । सूत्रं सिद्धम् । वृत्तिः सुकरा । अनेन शसादौ स्वरादौ अकारलोपः । ( स्रो० ) सकारस्य विसर्गः। सोमपः । आमि । स्वर० ( मोनु० ) हसादावविशेषः। सोमपासु । अत्र क्विलभावात् ( क्विलात्पः सः० ) इति न भवति । एवं कीलालपाशंखध्मा–विश्वपा–प्रभृतयो ज्ञेयाः।कीलालं रुधिरं पिबतीति कीलालपाः राक्षसः।आकारांतो हाहाशब्दस्तस्य च अक्विबंतत्वाद्धातुसंज्ञा न अतस्तस्य साधना भिन्नैव। हाहाः। १–१ (स्रो०) हाहौ१–२। ( ओ औ औ ) हाहाः १–३ ।२–१(अम्श०)हाहौ २–२। हाहान्२–३ । आकारांतत्वाच्छसो नत्वाभावः इत्येके । हाहाः।हाहा ३–१(सवर्णे०)। हाहाभ्याम् ३–२ । हाहाभिः ३–३ । हाहै ४–१ ( ए ऐ ऐ ) । हाहाभ्याम् ४–२ । हाहाभ्यः ४–३ । हाहाः५–१( सवर्णे० । स्रो० )। हाहाभ्याम् ५–२ । हाहाभ्यः ५–३। हाहाः ६–१ । हाहौः ६–२ । ( ओ औ औ । स्रो० ) । हाहाम् ६–३ पुँल्लिगस्य दीर्घसमानत्वान्नुडागमो न किंतु ( सवर्णे० ) ७–१ ( अ इ ए ) हाहे । हाहौः ७–२ । हाहासु ७–३ । संबोधनं प्रथमावत् ॥

इकरांतः पुँल्लिगो हरिशब्दः । प्रथमैकवचने हरिः ।औ यू।।इकारांतादुकारांताच्चार औकारो यू आपद्यते ईऊ भवतः। हरी । ए ओ जसि।।इकारांतस्य उकारांतस्य च जसि परे एकार ओकारश्च भवति। हरयः । धौ ॥ इकारान्तस्योकारांतस्य च धिविषये एकार ओकारश्च भवति॥ (समानाद्धेर्लोपोऽधातोः) हे हरे । हे हरी । हे हरयः। हरिम् । हरी । हरीन् ॥

---

१ क्विबन्ताश्च विजन्ताश्च विडन्ताश्च तथैव ये । ते धातुत्वं न जहति नामत्वं प्राप्नुवंति च ॥

इकारांतसाधनमाह । इकारांतो हरिशब्दः दशार्थवाचकः । यतः । "अर्कमर्कटमंडूकविष्णुवासववायवः।तुरंगसिंहशीतांशुयमाश्च हरयो दश॥"हृञ् हरणे हृ(इखवि)इति इप्रत्ययः । ( गुणः ) स्वर० । १-१ हरि सू ( स्रो० ) । सूत्रम् ( औ यू ) औ१-१ सांके० । यू इश्च उश्च यू २-२ । सांके० । इकारांतात्परस्य औ इत्यस्य ई उकारांतात्परस्य च ऊ इत्यर्थः । अनेन औस्थाने ई । ( सवर्णे० ) सूत्रम् ( ए ओ जसि ) ए १-१ । सांके० । ओ १-१ । सांके० । जस् ७-१ । स्वर० । सिद्धम् । इकारस्य जसि परे एकारः उकारस्य च ओकारः । अनेन ए ( ए अय् ) स्वर० । ( स्रो० ) संबोधने । सूत्रम् ( धौ ) धि ७-१ ( ङेरौ ङित् ) ङित्त्वाट्टिलोपः । एकपदम् । धौ धिविषये इकारस्य एकारः उकारस्य ओकारः ( समानाद्धेर्लोपोऽधातोः ) इति धेर्लोपे कृते धौ इति एकारः "सर्प्पे नष्टे सर्पघृष्टिर्न याति" इति न्यायाद्धिलोपेऽपि धिविषयो न याति । हे हरे । हे हरी । ( औ यू )हे हरयः ( ए ओ जसि । ए अय् ) स्वर० । ( स्रो० ) २-१ ( अम्शसो०) अकारस्य लोपः । २-२ ( औ यू । सवर्णे० ) २-३ ( अम्शसो० । सो नः पुंसः । शसि ) इति दीर्घः । हरीन् ॥

**टा नाऽस्त्रियाम्** ॥इकारांतादुकारांताच्च परष्टा ना भवति अस्त्रियाम् । हरिणा । हरिभ्याम् । हरिभिः । हरि ङे इति स्थिते।**ङिति**॥ इकारोकारांतस्य च ङिति परे एकार ओकारश्च भवति । हरये । हरिभ्याम् । हरिभ्यः । हरि ङसि इति स्थिते । **ङस्य**[1] ॥ एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति । हरेः । हरिभ्याम् । हरिभ्यः । हरेः। हर्योः।हरीणाम् । हरि ङि इति स्थिते।**ङेरौ ङित्**॥ इदुद्भ्यामुत्तरस्य ङेरौ भवति स च ङित्।**ङिति टेः**॥ ङिति परे टेर्लोपो भवति।हरौ।हर्योः।हरिषु।एवमग्निगिरिरविकविप्रभृतयः पुँल्लिंगाः॥

३-१ सूत्रम् ( टानाऽस्त्रियाम् ) टा १-१सांके० । ना १-१ । सांके० । न स्त्री अस्त्री तस्याम् ७-१ । ( स्त्रियां योः ) इति ङेः आम् ( स्त्रीभ्रुवोः ) स्वर० । (सवर्णे०) सिद्धं त्रिपदम् । इकारांतात् उकारांताच्च शब्दात्परो यष्टा इति विभक्तिवचन-

---

१ ङसिङसोरस्य इति क्वाचित्कः पाठो दृश्यते । परतु स पाठ एतट्टीकाकारेण चन्द्रकीर्तिना केचिन्मताभिप्रायेणाभिमतः । सर्वत्र सूत्रस्य पंचम्यन्तषष्ठ्यन्तेकारान्तोकारान्तशब्दानां च साधनार्थं 'ङस्य' इति पाठस्यैव उपन्यासः कृतो दृश्यते । क्वचित्पुस्तकान्तरे 'ङसिङसोरस्य' इति सूत्रोपन्यासो दृश्यते स केचिन्मताभिप्रायेणेति बोद्धव्यम् । प्रसादटीकाकारभट्टवासुदेवस्यापि ' ङस्य ' इत्येव सूत्रपाठोऽभिप्रेतः इति ज्ञेयम् ।

रूपस्तस्य स्थाने ना इति भवति पुँल्लिंगे नपुंसकलिंगे च । स्त्रीलिंगे तु न भवति । अनेन टा इत्यस्य ना ( ष्रुर्नो० ) हसादावविशेषः । सूत्रम् ( ङिति ) ङ् इत् अनुबन्धो यस्य स ङित् तस्मिन् ङिति ७-१ । स्वर० । एकपदम् । इकारांतस्य ङेङसिङस्ङिष्वेकारः उकारस्य ओकारः अनेन ४-१ रि इत्यस्य रे । ( ए अय् )स्वर० । हरये । ५-१ । ६-१ ( ङिति ) इत्यनेन एकारे कृते । सूत्रम् । ( ङस्य ) ङकारेण उपलक्षितः अः ङः तस्य केचित्तु ( ङसिङसोरस्य ) एवं सूत्रं पठंति तच्चिन्त्यम् । एकारौकाराभ्यां परस्य पंचमीषष्ठ्येकवचनसंबंधिनोऽकारस्य लोपो भवति । अनेन अकारलोपः ( स्रो० ) ६-२ ( इ यं स्वरे । रहाद्यपो० ) जल० । स्वर० । ६-३ ( नुडामः । नामि । ष्रुर्नो० ) स्वर० । ७-१सूत्रम् ( ङेरौ ङित् ) ङि ६-१ (ङिति । ङस्य । स्रो० ) औ १-१ । सांके० । ( नामिनो रः ) ङित् १-१ ( हसे० ) सिद्धं त्रिपदम् । इकारोकाराभ्यां परस्य सप्तम्येकवचनस्य ङि इत्यस्य औ भवति स च ङित्संज्ञकः । ङित्प्रयोजनमाह । सूत्रम् । ( ङिति टेः ) ङ् इत् यस्य स ङित् । तस्मिन् ७-१ । स्वर० । टि ६-१ ( ङिति । ङस्य । स्रो० ) वृत्तिः कंठ्या । ङकार इत् याति यस्य तस्मिन् आदेशे तस्यां विभक्तौ प्रत्यये च परे टेर्लोपो भवति । इति ङित्वाट्टिलोपः । स्वर० । केचित् ( ङिति ) इत्येकारे कृते यदादेशस्तद्वद्भवतीति न्यायात् ङेरौकारमिच्छंति । हरौ । इति सिद्धम् । द्विवचने पूर्ववत् । ७-३ ( क्लिा० ) एवं हरिशब्दवत् अग्न्यादयोपि शब्दा ज्ञेयाः । अग्नि-रवि-कवि-कपि-गिरि-मुनि-सूरि-कलि-आधि-निधि-संधि-विधि-ग्रंथि-अंजलि-ध्वनि-दुंदुभि-प्रभृतयः ॥

उकारांताश्च विष्णुवायुभानुप्रभृतयः पुँल्लिंगा एतैरेव सूत्रैः सिद्ध्यंति । उकारांतः पुँल्लिंगो भानुशब्दः तस्य हरिवत्प्रक्रिया । भानुः । भानू । भानवः । भानुम् । भानू । भानून् । भानुना । भानुभ्याम् । भानुभिः । भानवे । भानुभ्याम् । भानुभ्यः । भानोः । भानुभ्याम् । भानुभ्यः । भानोः । भान्वोः । भानूनाम् । भानौ । भान्वोः । भानुषु । हे भानो । हे भानू । हे भानवः ॥

उकारान्ताश्च वेणुविष्णुवायुभान्वादयोप्येतैरेव सूत्रैः सिध्यंति । भानुशब्दस्य ( औ यू ) इत्यनेन औ इत्यस्य ऊ ( सवर्णे० ) भानू । भानु जस् ( ए ओ जसि । ओ अव् ) भानवः । धौ च ( समानाद्धेर्लोपो० ) इति उकारस्य ओकारः । २-१ ( टा नाऽस्त्रियाम् ) ङित्सु ४-१ ( ङिति ) इति उकारस्यौकारः ( ओ अव् ) । ५-१ । ६-१ ( ङिति )इत्येकारे कृते ( ङस्य ) इत्यकारलोपः । ७-१ ङौ ( ङेरौ ङित् ) ओसि ( उ वम् ) सुपि ( क्लिा० ) उकारांतः पुँल्लिंगः तितउशब्दः चालनीवाचकः ।

तितउः । तितऊ । तितवः । ( ए ओ जसि । ओ अव् । ) तितउम् । तितऊ । तितऊन् । तितउना । तितउभ्याम् । तितउभिः । तितवे । तितउभ्याम् । तितउभ्यः । तितोः । तितउभ्याम् । तितउभ्यः । तितोः । तितवोः । तितऊनाम् । तितौ । तितवोः तितउषु । हे तिता । हे तितऊ । हे तितवः ॥

सखिशब्दस्य भेदः । सेर्डाऽधेः ॥ सखिशब्दात्परस्य सेरधेर्डा भवति स च डित् । डित्वाट्टिलोपः । सखा । अधेरिति विशेषणादेकारो धिविषये । हे सखे । हे सखायौ । हे सखायः । ऐ सख्युः ॥ सखिशब्दस्यैकारादेशो भवति पंचसु परेषु । षष्ठीनिर्दिष्टस्यादेशस्तदंतस्य ज्ञेयः । आयादेशः । सखायौ । [ द्विवचनस्यावा वा छंदसि ] सखाया । सखायः । सखायम् । सखायौ । सखीन् ॥

इकारांतस्यापि सखिशब्दस्य हरिशब्दापेक्षया भेदो विशेषोस्ति तमाह । षण दाने । सनोति ददातीति सखा सनेर्डखिप्रत्ययः। डित्वाट्टिलोपः । सखि इति जातम् । अग्रे सि । सूत्रम् ( सेर्डाधेः ) सि ६-१ ( ङिति । ङस्य । स्त्रो० ) डा १-१ सांके० ( नामिनो रः ) जल० । न धिः अधिस्तस्य अधेः ६-१ ( ङिति । ङस्य । स्त्रो० । सवर्णे० )त्रिपदम्। सखिशब्दसंबंधिना धिवर्जितस्य सेर्डा भवति । अनेन सेः आ डित्वाट्टिलोपः । (डिति टेः) स्वरे० । सेर्डाधेरिति सूत्रमध्ये अधेरिति पदग्रहणात् धिविषये डा आदेशो न भवति ऐकारादेशश्च न भवति किंतु ( समानाद्धेर्लोपोऽधातोः ) इति धिलोपं विधाय पश्चात् ( धौ ) इति सूत्रेण एकार एव भवति । हे सखे इति सिद्धम् । १-२ सूत्रम् ( ऐ सख्युः ) पे १-१ सांके० । सखि ६-१ ( ऋङ्ङे । इ यं स्वरे ) स्वर० । ( ऋतो ङ उः ) टिलोपः । स्वर० ( स्त्रो० ) द्विपदम् ( सेर्डाधेः ) इति सूत्रादधेरिति पदम् ( ऐ सख्युः ) इत्यत्राप्याकर्षणीयम् । तेन सखिशब्दस्य धिवर्जितेषु पंचसु स्यादिषु वचनेषु परेषु एकारादेशो भवति । शत्रुवदादेश इति वचनात् सर्वस्यापि न कथमैकारः । तत्रोच्यते । ( षष्ठी० ) षष्ठ्या विभक्त्या निर्दिष्टः कथित उच्चरितः सूत्रमध्ये यः शब्दस्तस्य प्राप्त आदेशः तस्य शब्दस्यांतस्य भवति । न तु सर्वस्य । यथा ( ऐ सख्युः ) इत्यत्र सखिशब्दस्य षष्ठीनिर्दिष्टत्वात्सखिशब्दस्य प्राप्त ऐकारादेशः सखिशब्दस्यांतो यः इकारस्तस्य भवति । ननु पंचस्विति ग्रहणात् सौ परेप्येकारादेशः कथं न क्रियते तत्राह । सौ परे तु ऐकरादेशे कृतेऽप्यकृतेऽपि डादेशस्य नित्यत्वात् डा-आदेश एव स्यात् न त्वैकारः ॥ अथवा ( ऐ सख्युः ) इति सूत्रे विपरीतकरणात्सौ परे ऐकारो न क्वचित् औकारादिषु चतुर्षु परेषु इत्येवास्ति । स्थानत्वाच्छून्यत्वात्पञ्चस्विति पदम् । आदे-

१ षष्ट्यानिर्दिष्टस्य-इत्यप्यन्यत्र पाठः । २ षष्ट्या० इति-क्वचित्पाठः ।

शस्तु चतुर्ष्वेव । अनेन इकारस्य ऐकारः । ( ऐ आय् ) स्वर० । एवम् । १-३ । २-१ । २-२ । एतेष्वपि ज्ञेयम् । ( द्विवचनस्य औ आ वा छंदसि ) द्विवचनस्य प्रथमाद्विवचनस्य औ इत्यस्य छन्दसि वेदे वा आ भवति । सखाया । सखायः । सखायम् । सखायौ । सखीन् ॥

सखि टा इति स्थिते । सखिपत्योरीक् ॥ सखिपतिशब्दयोरीगागमो भवति टाङेङिषु परतः । दीर्घत्वान्ना न भवति । सख्या । आगमजमनित्यमिति न्यायात् । सखिना । पतिना । सखिभ्याम् । सखिभिः । सख्ये । सखिभ्याम् । सखिभ्यः । सखि ङसि इति स्थिते । ऋङ् ङे ॥ सखिपतिशब्दयोर्ऋगागमो भवति ङसिङसोरकारे परे । सख्यृ अस् इति स्थिते । ऋतो ङ उः ॥ ऋकारांतात्परस्य ङसिङसोरकारस्य उकारो भवति स च डित् । ( डिति टेः ) ॥ सख्युः । सखिभ्याम् । सखिभ्यः । सख्युः । सख्योः । सखीनाम् । सप्तम्येकवचने ( ङेरौ डित् ) इत्योकारे कृते ( सखिपत्योरीक् ) इति ईगागमः । सख्यौ । सख्योः । ( किलात्षः सः कृतस्य ) इति षत्वम् । सखिषु ॥

तृतीयादौ विशेषमाह । सूत्रम् ( सखिपत्योरीक् ) सखिश्च पतिश्च सखिपती तयोः सखिपत्योः ६-२ ( इ यं स्वरे ) स्वर० ( स्रो० ) ईक् १-१ ( हसे० । नामिनो० ) द्विपदम् । सखिपतिशब्दयोः टाङाङिषु ईगागमो भवति । कित्त्वादंते । दीर्घत्वान्ना न भवति । ततो दीर्घः । ईकारांतत्वात् ( टा नाऽस्त्रियाम् ) इति सूत्रेण टास्थाने ना न भवति किंतु ( सवर्णे० । इ यं० ) सख्या पत्या इति सिद्धम् । पुनरागमजमनित्यम् । आगमाज्जातम् आगमजं कार्यमनित्यं क्वचिन्न भवतीति न्यायात् क्वचिदीकारागमो न भवति तेन छन्दसि सखिना पतिना इति रूपं भवति । तत्र ( टानाऽस्त्रियाम् ) ४-१ ईगागमः ( सवर्णे० । इ यं० ) स्वर० । सख्ये । ५-१ । ६-१ । विशेषमाह । सूत्रम् ( ऋङ्ङे ) ऋक् १-१ ( हसे० ) ङकारेण उपलक्षितो अः ङः तस्मिन् ङे ७-१ ( अ इ ए ) अथवा ( ञमे ञमा वा ) ( ऋङ्ङे ) सिद्धम् सखिपतिशब्दयोर्ऋगागमो भवति ङसिङसोर्ङकारे परे ( इ यं० ) सख्यृ अस् इति स्थिते सति सूत्रम् ( ऋतो ङ उः ) ऋतः ५-१ । स्वर० ( स्रो० ) ङकारेण उप-

---

१ सखिना वानरेन्द्रेण दग्धा लंका महापुरी । प्रमदा शीलसंपन्ना वृद्धेन पतिना यथा ॥ इत्यादिषु छान्दसप्रयोगेषु ईगागमाभावो बोद्धव्यः ।

लक्षितो अः ङः तस्य ६-१ । सांके० । उः १-१ ( स्रो० ) त्रिपदं सूत्रं सिद्धम् । ऋकारां० । वृत्तिः कंठ्या । अनेनोभयत्राप्यकारस्योकारः स च उकारो ङित्संज्ञकः कल्प्यः । ङित्वाट्टिलोपः ( ङितिटेः ) स्व० ( स्रो० ) ६-२ ( इयं स्व० । स्रो० ) ६-३ नुडागमः ( नामि ) स्व० । ७-१ ( ङेरौ ङित् ) इत्यौकारे कृते ङित्वाट्टिलोपे च कृते यदादेशस्तद्वद्भवतीति न्यायात् एकदेशविकृतमनन्यवद्भवतीति न्यायाच्च॥( सखिपत्योरीक् ) इति ईगागमः ( इ यं० ) शेषं हरिवत् । एवं सखिशब्दसाधनम् ॥

पतिशब्दस्य प्रथमाद्वितीययोः हरिशब्दवत्प्रक्रिया । तृतीयादौ तु सखिशब्दवत्प्रक्रिया । पतिः ( औयू ) पती । ( ए ओ जसि ) पतयः । पतिम् । पती । पतीन् ( सो नः पुंसः ) ( सखिपत्योरीक्) पत्या । पतिभ्याम् । पतिभिः । पत्ये । पतिभ्याम् । पतिभ्यः । ( ऋङ् ङे । ऋतो ङ उः ) स च ङित् । पत्युः । पतिभ्याम् । पतिभ्यः । [ पतिरसमास एव सखिशब्दवद्वक्तव्यः ] ततः समासांतस्य नादयो भवंति । प्रजापतिना । प्रजापतये इत्यादि ॥

पतिशब्दस्य साधनमाह । पा रक्षणे । ( पातेः कित् ) इति डतिः ( आतोनपि) पातीति पतिः । पतिशब्दस्य प्रथमाद्वितीययोः प्रक्रिया साधना हरिशब्दवत् । तृतीयादौ तु सामान्येन सखिशब्दवत् । पत्या । पत्ये । पत्युः । पत्यौ । तत्रापि विशेषमाह । असमासः समासरहित एव पतिः शब्दः सखिशब्दवत् साध्यः टादौ स्वरे । समासांतस्य च पतिशब्दस्य नादयो भवति ( टा नाऽस्त्रियाम् । ( ङिति । ङस्य । ङेरौ ङित् ) इत्यादिसूत्राणि भवंति । यथा प्रजानां पतिः प्रजापतिः इति तत्पुरुषसमासे कृते द्वितीयां यावदविशेषः । तृतीयादौ तु ( टा नाऽस्त्रियाम् ) इत्यादिसूत्रसमुच्चयेन हरिशब्दवत्साधनेत्यर्थः । प्रजापतिना । प्रजापतिभ्याम् । प्रजापतिभिः । प्रजापतये । प्रजापतेः । प्रजापतेः । प्रजापतौ इति । धौ । हे प्रजापते ( समानाद्धेर्लोपोऽधातोः ) हे प्रजापती ( औ यू ) हे प्रजापतयः ( ए ओ जसि ) सिद्धम् ॥

द्विशब्दो नित्यं द्विवचनांतः । द्वि औ इति स्थिते । त्यदादेष्टेरः स्यादौ[1] ॥त्यदादेष्टेरकारो भवति स्यादौ परे । द्वौ । द्वौ । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः । त्यदादीनां धेरभावः ॥

द्विशब्दो द्विसंख्यावाचकत्वात् नित्यं द्विवचनांत एव । द्विवचनम् अंते यस्य स

१ स्यादिति पाठोऽन्यत्र ।

द्विवचनांतः । द्वि–१–२ । २–२ । ३–२।४–२ । ५–२ । ६–२ । ७–२।सूत्रम् ( त्यदादेष्टेरः० ) त्यद् आदिर्यस्य स त्यदादिस्तस्य त्यदादेः ६–१।(ङिति।ङस्य। स्रो० ) टि६–१ मागवत् ( विसर्जनी० । ष्टुभिः ष्टुः ) स्वर० । अ १–१(स्रो० । नामिनो० ) स्व० । स्यादि ७–१ ( ङेरौ ङित् ) ङित्त्वाट्टिलोपः । स्वर० । चतुष्पदम्। त्यद् तद् यद् एतद् अदस् इदम् द्वि किम् युष्मद् अस्मद्–एते त्यदादयः । त्यदादेः शब्दस्य टेः ( अंत्यस्वरादिष्टिः ) इति संज्ञाप्रक्रियोक्तलक्षणायाः टेः स्यादौ विभक्तौ परतः अकारो भवति । अनेन द्वि इत्यस्य द्व सर्वत्र, रूपद्वये १–२ । २–२ ( ओ औ औ ) ततो रूपत्रये ३–२ । ४–२ । ५–२ । ( आद्वि ) ६–२ । ७–२ ओसि ( ए अय् ) स्वर० । ( स्रो० ) त्यदादीनां संबोधनाभावः । सिद्धोऽयं द्विशब्दः ॥

त्रिशब्दो नित्यं बहुवचनांतः । त्रि जस् इति स्थिते ( ए ओ जसि ) इत्येकारे कृते अयादेशः । त्रयः ( सो नः पुंसः ) त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः । त्रि आम् इति स्थिते । त्रेरयम् ॥ त्रिशब्दस्य अयङ् आदेशो भवति नामि परे [ ङिदंतस्य वक्तव्यः ] त्रयाणाम् । ( क्विलात्षः सः कृतस्य ) इति षत्वम् । त्रिषु ॥

इकारान्तः त्रिशब्दस्त्रिसंख्यावाचकत्वान्नित्यं बहुवचनान्तः । बहुवचनमेव अंते यस्य सः । १–३ त्रि अस् इति स्थिते ( ए ओ जसि । ए अय् ) स्वर० ( स्रो० ) त्रयः इति सिद्धम् । शसि ( अस्शसो० । सो नः पुंसः ) त्रीन् । त्रिभिः । त्रिभ्यः।आमि विशेषः । पूर्वम् ( नुडामः ) ततः । सूत्रम् ( त्रेर० ) त्रि ६–१ ( ङिति । ङस्य । स्रो० ) अयङ् १–१( हसेपः० । नामिनो रः ).सिद्धम् । बहुवचनान्तस्यैकवचनस्थापनार्थम् । त्रिशब्दस्येति । त्रिशब्दस्य अयङ् इत्यादेशो भवति । नुड्रहिते आमि परे ङित् ङकारेत् आदेशः अंतस्य भवतीति वचनात् । इकारस्येत्यर्थः । नन्वत्र षष्ठ्या निर्दिष्टस्येत्यनेन नांतस्यादेशमाप्तौ पुनर्ङिदंतस्येति किमर्थमुक्तं तत्राह । ( गुरुः शिञ्च सर्वस्य ) इत्यनेन षष्ठीनिर्दिष्टस्येत्यस्य बाधः । अयङ् इति । बह्वक्षरत्वेन गुरुरादेशस्तेन सर्वस्यैव भवति तन्निवारणार्थं ङिदंतस्येति। ङित् ङकारेत् यः आदेशः सः गुरुरपि अंतस्यैव भवति । इकारस्य अय् इत्यादेशः(नामि )इति दीर्घः (पुरुषो णो०) स्वर० । त्रिशब्दस्य बहुवचनांतत्वेपि त्रेरित्येकवचनं शब्दनिर्देशात् । अथवा त्रेरित्येकवचननिर्देशात् असमासांतत्व एव अयम् आदेशः । समासांतत्वे तु न । यथा प्रियास्त्रयो येषां ते प्रियत्रयः । तेषां प्रियत्रीणाम् । एवम् । अतिक्रांतास्त्रीनिति अतिक्रान्तास्त्रयो यैस्ते इति वा अतित्रयस्तेषाम् अतित्रीणाम् इत्यादौ न अयङ्–आदेशः । ७–३ ( क्विलात्षः सः० ) हे त्रयः ॥

---

१ अयङादेः–इति पाठः ।

कति शब्दो नित्यं बहुवचनांतस्त्रिषु लिङ्गेषु सरूपः । कति जस् इति स्थिते ।डतेः॥ संख्यार्थडत्यन्तान्नाम्नः परयोर्जश्शसोर्लुक् भवति । कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः।कतीनाम् । कतिषु ॥

का संख्या येषां ते कति । किम्शब्दात् डतिप्रत्ययः । ( शेषा निपात्याः कत्यादयः इति सिद्धस्य कतिशब्दस्य बहुवचनांतस्यापि जश्शसोर्विशेषमाह । सूत्रम् ( डते : ) ५–१ संख्यावाचकात् डत्यन्तान्नाम्नः परयोर्जश्शसोर्लुक् भवति । अनेन जश्शसोर्लोपः कर्त्तव्यः । ( लुकि न तन्निमित्तम् ) इति लुकि कृते सति यस्य लुक् क्रियते स एव निमित्तं कारणं यस्य ईदृशं यत्कार्यं तन्न भवति । तेन ( ए ओ जसि । शसि ) इति दीर्घत्वं न भवति । शेषं सुगमम् । कतिशब्दस्य संबोधनाभावः । एवं कतिसाहचर्यात् यतिततिशब्दाभ्यां परयोर्जश्शसोर्लुग्वक्तव्यः 'यति ते नाग शीर्षाणि तति ते नाग वेदनाः' । इत्युदाहरणम् । कतिशब्दस्य त्रिष्वपि लिंगेषु सदृशरूपाणि । इकारांता उक्ताः ॥

ईकारांतः पुँल्लिंगः सुश्रीशब्दः।सुश्रीः।सुश्री औ इति स्थिते।य्वोर्धातोरियुवौ स्वरे॥धातोरीकारोकारयोरियुवौ भवतः स्वरे परे ।सुश्रियौ। सुश्रियः । हे सुश्रीः।हे सुश्रियौ । हे सुश्रियः । सुश्रियम् ।सुश्रियौ । सुश्रियः । सुश्रिया । सुश्रीभ्याम् । सुश्रीभिः । सुश्रीये।सुश्रीभ्याम्। सुश्रीभ्यः । सुश्रियः । सुश्रीभ्याम् । सुश्रीभ्यः । सुश्रियः ।सुश्रियाः। सुश्रियाम् । सुश्रियि । सुश्रियोः । सुश्रीषु ॥

ईकारांतानाह । ईकारांतः पुँल्लिंगः सुश्रीशब्दः । श्रिञ् सेवायाम् । सुपूर्वः । क्विप्प्रत्ययः । ( प्रच्छादेर्दीर्घता ) इति दीर्घः । क्विपः सर्वापहारी लोपः । सुष्ठु श्रयत्येनमिति सुश्रीः । क्विबंतत्वाद्धातुत्वं न जहाति शब्दत्वं च प्रतिपद्यत इति स्यादयः । १–१ । ( स्नो० ) द्विवचने । सूत्रम् ( य्वोर्धातोः० ) इति । ई च ऊ च य्वौ तयोः। ६–२ । ( इ यं० । उ वम्० ) स्वर० ( स्नोर्वि ) । धातु ६–१ ( ङिति । ङस्या।स्नो०। इयुव् १–२ । स्वर० ( नामिनो रः ) स्वर ७–१ ( अ इ ए )चतुष्टयम् । धातोरीकारस्य स्वरे परे इय् ऊकारस्य स्वरे परे उव् ( इ यं स्वरे) इति सूत्रात् स्वरे इत्यनुवृत्तौ सत्यां पुनः स्वरग्रहणं स्वरकार्यांतरव्यावृत्त्यर्थम् । ( अम्शसोरस्य । नुडामः)इति निषेधार्थं विभक्तिवर्जितस्वरनिषधार्थं च । ततोत्र विभक्तिस्वर एव ग्राह्यः । तेन श्री अर्थम् श्र्यर्थमित्यादौ न इय् किंतु ( इ यं स्वरे ) इति यत्वम् । अनेन स्वरादौ इय् । स्वर० । हसादावविशेषः । सुपि ( क्विलात्षः० ) संबोधने धातुत्वाद्धिलोपो न किंतु । ( स्नो० ) हे सुश्रीः । हे सुश्रियौ । हे सुश्रियः ॥

तथैव सुधीशब्दः । सुष्ठु ध्यायतीति सुधीः । ( य्वोर्धातोरियुवौ स्वरे ) सुधियौ । सुधियः । हे सुधीः। सुधियम् ।सुधियौ । सुधियः। सुधिया । सुधीभ्याम् । सुधीभिः । सुधिये । सुधीभ्याम् । सुधीभ्यः । सुधियः । सुधीभ्याम् । सुधीभ्यः । सुधियः । सुधियोः । सुधियाम् । सुधियि । सुधियोः । सुधीषु ॥ एवमूकारांतः पुँल्लिंगः स्वयंभूशब्दः । स्वयं भवतीति स्वयंभूः । स्वयंभुवौ । स्वयंभुवः । हे स्वयंभूः । स्वयंभुवम् । स्वयंभुवौ । स्वयंभुवः । स्वयंभुवा । स्वयंभूभ्याम् । स्वयंभूभिः । स्वयंभुवे । स्वयंभूभ्याम् । स्वयंभूभ्यः । स्वयंभुवः । स्वयंभूभ्याम् । स्वयंभूभ्यः । स्वयंभुवः । स्वयंभुवोः । स्वयंभुवाम् । स्वयंभुवि । स्वयंभुवोः । स्वयंभूषु ॥

एवं सुधीशब्दः।ऊकारांतः स्वयंभूशब्दोऽप्येवमेव ।एवमूकारांतो लूशब्दः। लूञ् छेदने इत्यस्माद्धातोः । लूः । लुवौ । लुवः इत्यादि ॥

सेनानीशब्दस्याविशेषो हसादौ स्वरादौ तु विशेषः। सेनां नयति इति सेनानीः । सेनानी औ इति स्थिते । य्वौ वा॥ धातोरवयवसंयोगः पूर्वो यस्मादीकारादूकाराच्च नास्ति तदंतस्यानेकस्वरस्येकारस्योकारस्य च यकारवकारौ भवतः स्वरे परे । वर्षाभूपुनर्भून्यतिरिक्तभूशब्दसुधीशब्दौ वर्ज्जयित्वा । वाग्रहणादियं विवक्षा । सेनान्यौ । सेनान्यः । हे सेनानीः । हे सेनान्यौ । हे सेनान्यः । सेनान्यम् । सेनान्यौ । सेनान्यः । इत्यादि [सेनान्यादीनां वाम्रो नुड् वक्तव्यः]. सेनानीनाम्—सेनान्याम् । सेनानी ङि इति स्थिते । आम्ङेः ॥ नीशब्दादुत्तरस्य ङेरामादेशो भवति । सेनान्याम् । सेनान्योः । सेनानीषु । एवं ग्रामणीप्रभृतयः ऊकारांताश्च यवलूप्रभृतयः ॥

णीञ् प्रापणे ( आदेः ष्णः स्नः ) नी सेनापूर्वः । सेनां नयति इति सेनानीः क्विप्प्रत्ययांतः । सेनानीशब्दस्येकारांतधातोरपि हसादौ अविशेषः । स्वरादौ तु

विशेषस्तमेव सूत्रद्वारेण व्याख्याति ( य्वोर्धातोरियुवौ स्वरे ) अनेन ( इ यं स्वरे । उ वम् ) इत्येतयोर्बाधो जातः । सेनानीशब्दस्येकारांतत्वे ( य्वोर्धातोः० ) इत्यस्य बाधनार्थं ( य्वौ वा ) इति सूत्रं पठ्यते । य् च व् च य्वौ १-२ । वा ३-१ ( अव्य० ) यस्मात् ईकारात् ऊकाराच्च पूर्वः आदौ वर्त्तमानो धातोः अवयवसंयोगः सुश्रीयवक्रीवत् द्व्यक्षरादिसंयोगो नास्ति तदंतस्य स एव धात्ववयवसंयोगपूर्वकत्वरहितः ईकार ऊकारो वा अंते यस्य स तदंतस्तस्य पुनः अनेकस्वरस्य द्वित्रिस्वरसहितस्य शब्दस्य संबंधिनः ईकारस्य यकारः ऊकारस्य च वकारः । ननु णीञ् प्रापणे अयं धातुः एकस्वरः कथमनेकस्वरत्वम् । उच्यते । कारकपूर्वस्यापि क्विंतग्रहणेन ग्रहणादनेकस्वरत्वम् । अत्र वाशब्दो व्यवस्थावाचको न तु विकल्पार्थस्तेन वर्षाभूपुनर्भूदृन्भूदृग्भूकारभूकाराभूकरभूएभ्योऽतिरिक्तो अन्यो यो भूशब्दः स्वयंभूकमलभूनाभिभूअंगभूशरभूआत्मभूमनोभूप्रतिभूप्रभृतिकस्तस्य संभवे सत्यपि ( य्वौ वा ) इति न भवति । किंतु ( य्वोर्धातोरियुवौ स्वरे ) इति भवति । यथा सुधीशब्दस्यापि संभवे सत्यपि ( य्वौ वा ) इति न भवति किं तु ( य्वोर्धातोरियुवौ स्वरे ) इत्येव भवति । अत एतौ वर्जयित्वा अपर ईकारोकारयोः पूर्वोक्तलक्षणयोर्यकारवकारौ भवतः । वाग्रहणादियं विवक्षा ज्ञेया । कुतः । निपातानामनेकार्थत्वात् । धातोः संयोगपूर्वकत्वे सुश्रियौ यवक्रियौ कटप्रुवौ इत्यादौ न यकारवकारौ किंतु इयुवावेव । एकस्वरे तु नीः । नियौ । धीः । धियौ । लूः । लुवौ । भूः । भुवौ । भुवः । इत्यादौ न यकारवकारौ । बहुव्रीहिसमासे अनेकस्वरस्यापि इयुवौ भवतः । यथा । सुधीः । सुधियौ । सुधियः । कुधीः । कुधियौ । परमधियौ इत्यादि । धात्ववयवसंयोगपूर्वकत्वे एव यकारवकारौ न भवतः । तेन उन्नीः उन्न्यौ । उन्न्यः । इत्यादौ स्वभाविकधात्ववयवसंयोगपूर्वकत्वाभावात् यत्वं भवति । वर्षाभूपुनर्भूदृन्भूदृग्भूकारभूकाराभूकरभूइत्यत्र भूशब्दस्य च वत्वम् । अन्यत्र उवेव वाशब्दस्य व्यवस्थावाचकत्वात् इयं विवक्षा लभ्यते । अनेन स्वरादौ सर्वत्र यकारः । स्वर० । आमि विशेषः । सेनान्यादीनां शब्दानामामः षष्ठीबहुवचनस्य वा नुडागमो वक्तव्यः । अनेन एकत्र ( नुडागमः ) स्वर० । अन्यत्र ( य्वौ वा ) इति यकारः । स्वर० । ७-१ सूत्रम् । ( आम्ङेः ) आम् १-१ ( ह्रसे०) ङि ६-१ ( ङिति । ङस्य । स्रो० ) केचित्तु आम्ङेर्नियश्चेत्यं सूत्रं पठंति तन्मतमसाधीयः । नीशब्दाच्चोत्तरस्य ङेः सप्तम्येकवचनस्यामु भवति अनेनामि कृते ( य्वौ वा ) इति यकारः ( स्वर० ) धातुत्वाड्डेर्लोपो न । शेषं सुकरम् ॥

एवं ग्रामणी-अग्रणी-मधी-शब्दप्रभृतयोऽपीकारांता धातुशब्दाः ज्ञेयाः ।

---

१ सूत्रेणेत्येकत्र । सूत्रद्वारेत्यन्यत्र ।

ऊकारांताश्च यवलूखलपूदृन्भूदृग्भूकाराभूकारभूकरभूवर्षाभूपुनर्भूप्रभृतयोऽप्येवम् । परं सप्तम्येकवचने नीशब्दाभावात् ङेराम् न भवति तेन यवल्वि पुनर्भ्वि वर्षाभ्वि इति रूपम् ।वर्षासु भवतीति वर्षाभूः मण्डूकः । यवान् लुनातीति यवलूः । खलं पुनातीति खलपूः । पुनर्भवतीति पुनर्भूः ब्रह्मा । दृक् स्त्री । दृशा भवतीति दृग्भूः सर्प्पः । वज्रा । दृशः भवतीति दृग्भूः मयूरः । दृन् हिंसन् भवतीति दृन्भूः कीटः । कारायां भवतीति काराभूः । कारे कारेण वा भवतीति कारभूः—राजदेयो भागः । एते क्विप्-प्रत्ययांताः । ईकारान्तो वातप्रमीशब्दः—मृगविशेषः । वातप्रमी १–१ ( सो० ) वातप्रमीः । वातप्रम्यौ । धातुत्वाभावात् ( य्वौ वा ) इति न । किंतु ( इ यं स्वरे ) वातप्रम्यः । वातप्रमीम् । वातप्रम्यौ । वातप्रमीन् । वातप्रम्या । वातप्रमीभ्याम् । वातप्रमीभिः । वातप्रम्ये । वातप्रम्यः । वातप्रम्यः । वातप्रम्याम् । ७–१(सवर्णे० ) वातप्रमी । वातप्रम्योः । वातप्रमीषु । हे वातप्रमीः । "अमि वातप्रमीं रूपं शसि वातप्रमीनिति । ङौ तु वातप्रमी रूपमेवं देवयजीरपि" ॥ १ ॥ एवम् अतिलक्ष्मीः । पीयः पपीः । एवम् ऊकारान्तो हूहूशब्दः । हूहूः । हूह्वौ । हूह्वः । स्वरे परे सर्वत्र ( उ वम् ) । अमि—हूहूम् । हूह्वौ । शसि—हूहून् । आमि—हूह्वाम् । ङौ । हूह्वि ॥

ऋकारांतः पुँल्लिंगः पितृशब्दः । सेरा ॥ ऋकारांतात्परस्य सेरा भवति स च डित् । डित्वाट्टिलोपः । पिता । पंचसु ॥ ऋकारोऽर् भवति पंचसु स्यादिषु परेषु । पितरौ । पितरः । धेरर् ॥ ऋकारांतात्परस्य धेरर् भवति । स च डित् । डित्वाट्टिलोपः । हे पितः । हे पितरौ । हे पितरः । पितरम् । पितरौ । पितॄन् । पित्रा । पितृभ्याम् । पितृभिः । पित्रे । पितृभ्याम् । पितृभ्यः । ( ऋतो ङ उः ) पितुः । पितृभ्याम् । पितृभ्यः । पितुः । पित्रोः । पितॄणाम् । ङौ ॥ ऋकारस्यार् भवति ङौ परे । पितरि । पित्रोः । पितृषु । एवं जामातृभ्रात्रादयः ॥

ऋकारांतानाह । ऋकारांतः पितृशब्दः । पा रक्षणे । उणादिकः प्रत्ययः । अकारस्य चेकारः । पाति रक्षतीति पिता । पितृशब्दो निपातासिद्धो न तृप्रत्ययांतः । यतः । "पिता माता ननांदा ना सव्येष्ठभ्रातृयातरः । जामाता दुहिता देवृनप्तृनेवा

---

१ दृता—इति पाठः एकत्र । धृती—इति चान्यत्र । दृति—इति परत्र । अत्र आद्यो शायते । २ पयः पपीः—इति पाठः । ३ अत्र ( ऋ अर् ) इति पूर्वसूत्रात् ( अर् ) इत्यनुवर्तते—सूत्रत्रिदमेकपदमेव ।

इमे दश" ॥ १ ॥ पितृ १-१ । सूत्रम् ( सेरा ) सेः ६-१ ( ङिति । ङस्य । स्रो० ) आ १-१ । सांके० ( नामिनो रः ) ऋकारान्ता इति । ऋकारान्तात्परस्य सेः आ इत्यादेशः स च आ ङित्संज्ञकः । ङित्त्वाट्टिलोपः । स्वर० । पिता । सूत्रम् (पंचसु)। पंचन् ७-३ (नाम्नो नो०) एकपदम् । स्यादिषु पंचसु वचनेषु परेषु ऋकारोऽर् भवति । स्थानशून्यार्थं सेरपि ग्रहणम् । सिविषये तु ( सेरा ) इत्याकारप्राप्तौ ( पंचसु ) इत्यर्प्राप्तौ च विशेषत्वान्नित्यत्वाच्च (सेरा ) एव भवति। केचित्तु प्रथमम् ( पंचसु ) इत्यरं विधाय ततो यदादेशस्तद्वद्भवति इति न्यायात् ( सेरा ) इति सेः आ कुर्वंति ततष्टिलोपः । स्वर० । पिता । पितृ १-२ । १-३ अनेन अर् । स्वर० ( स्रो० ) शेषं सुकरम् । धौ कृत्यमाह । सूत्रम् । ( धेरर् ) धि ६-१ ( ङिति । ङस्य । स्रो० ) अर् १-१ ( हमेपः० ) मध्ये ( नामिनो रः ) ऋकारां० इति धेः अर् आदेशो भवति । स च ङित् । ङित्त्वाट्टिलोपः । स्वर० । शेषं सुगमम् । हे पितः । २-३ ( अम्श० । सो नः पुंसः । शसि ) तृतीयायां चतुर्थ्यां चैकत्वे ( ऋ रम् ) ( हसेर्हसः ) स्वर० । हसादावविशेषः ५-१ । ६-१ ( ऋतो ङ उः । ङिति टेः ) इति टेर्लोपः । स्व० ( स्रो० ) ६-२ । ७-२ ( ऋ रम् ) स्वर० । ६-३ ( नुडामः । नामि । ष्रनों० ) ७-१ । सूत्रम् (ङौ)ङि ७-१ ( ङेरौ० ) टिलोपः । स्वर० । एकपदम् । तेनं अर् । ( स्वर० ) ७-३ ( क्लिा० ) एवं जामातृभ्रात्रादयः शब्दाः साध्याः । जामाता । जामातरौ । जामातरः । भ्राता । भ्रातरौ । भ्रातरः । देवा । देवरौ । देवरः । इत्यादि । सव्येष्ठा । सव्येष्ठरौ । सव्येष्ठरः । "सव्येष्ठा सूतसारथी" ॥

एवं नृशब्दः । ( सेरा ) ना । नरौ । नरः । हे नः । हे नरौ । हे नरः । नरम् । नरौ । नॄन् । न्रा । नृभ्याम् । नृभिः । न्रे । नृभ्याम् । नृभ्यः । नुः । नृभ्याम् । नृभ्यः । नुः । न्रोः । [नुर्वा नामि दीर्घः] नृशब्दस्य नामि वा दीर्घो भवति। नृणाम्-नॄणाम्। नरि। न्रोः । नृषु । कर्तृशब्दस्य पंचसु विशेषः । स्तुरार् ॥ सकारतृप्रत्ययसम्बंधिन ऋकारस्या[१]र् भवति पञ्चसु परेषु । कर्तार् सि इति स्थिते ( यदादेशस्तद्वद्भवति ) (सेरा) ङित्त्वाट्टिलोपः कर्त्ता । कर्त्तारौ । कर्त्तारः । हे कर्त्तः । कर्त्तारम् । कर्त्तारौ । कर्त्तॄन् । पूर्ववत्प्रक्रिया । एवं नप्तृहोतृप्रशास्तृपोतृउद्गातृप्रभृतयः ॥

नृशब्दोपि पितृशब्दवत् । ना । नरौ । नरः हे नः । हे नरौ । हे नरः । नरम् । नरौ । नॄन् । न्रा । नृभ्याम् । नृभिः । न्रे । नृभ्याम् । नृभ्यः । नुः । नृभ्याम् ।

१ अनेन-र० पा० ।

नृभ्यः । नुः । न्रोः । आमि विशेषमाह । ( नुर्वा० ) इति । नृ ६-१ ( ऋतो ङ उः ) वा ३-१ ( अव्यया० ) मध्ये ( नामिनो रः ) नाम् ७-१ स्वर० । दीर्घ १-१ ( स्तो० ) सिद्धम् । नृशब्दस्य नामि परे दीर्घो वा भवति । नृणाम्–नॄणाम् । नरि । न्रोः । नृषु । इति सिद्धम् । माता ननांदा याता दुहिता स्त्रीलिंगे ज्ञेयाः । डुकृञ् करणे ( तृवुणौ ) इति तृप्रत्यये गुणः । ( रहाद्य० ) स्वर० । कर्तृ । करोतीति कर्ता । कर्तृशब्दस्य पंचसु विशेषस्तमेवाह । सूत्रम् ( स्तुरार् ) स् च तृश्च स्तृ तस्य स्तुः ६-१ ( ऋतो ङ उः ) टिलोपः (स्तो०) आर् १-१(हसे० । नामिनो रः ) सिद्धम् । सकारसंबंधिनः सिसहितस्य ऋकारस्य सकारोपलक्षितस्य ऋकारस्येत्यर्थः । तृप्रत्ययसंबंधिनः इति ( तृवुणौ ) इत्यादिकृत्सूत्रोत्पन्नतृप्रत्ययस्य च ऋकारस्य स्यादिषु पंचसु परेषु आर् भवति । सकारसंबंधी ऋकारः । स्वसृशब्दोऽप्येवम् । तेन प्रियतिसृशब्दादौ आर् न स्यात् । प्रियतिसा । प्रियतिस्रौ प्रियतिस्रः । इत्यादि । अनेन द्वितीयाद्विवचनान्तं यावत् आर् । तत्र प्रथमैकवचने कर्त्तार् स् इति स्थिते । ऋकारासंभवे कथं सेराकारस्तत्राह ( यदा० ) यो यस्यादेशः स तद्वदेव भवतीत्यर्थः । ऋकारस्य आर् आदेशः स ऋकारवत् ज्ञेयः । ततः ( सेरा ) टेर्लोपः सर्वत्र । ( स्वर० ) संबोधने ( स्तुरार् ) ततः ( धेरर् ) टिलोपः । स्वर० । ( स्तो० ) हे कर्त्तः । शेषं सुकरम् । शसि ( अम्शसोरस्य । सो नः पुंसः ) शसि ( तृतीयादौ पितृशब्दवत् ) यथा ३-१ ( ऋ रम् ) स्वर० । कर्त्रा । कर्तृभ्याम् । कर्तृभिः । ४-१ (ऋ रम् ) स्वर० । कर्त्रे । कर्तृभ्याम् । कर्तृभ्यः । ५-१ ( ऋतो ङ उः ) स च डित् डित्वाट्टिलोपः । स्वर० । कर्तुः । कर्तृभ्याम् । कर्तृभ्यः । कर्तुः । कर्त्रोः ( ऋ रम् ) स्वर० । कर्तॄणाम् ( नुडामः । नामि ) ७-१ ( ङौ ) । स्वर० । कर्तरि । कर्त्रोः ( ऋ रम् ) कर्तृषु ( क्लिा० ) एवं नप्तृनेष्टृत्वष्टृक्षत्तृहोतृप्रशास्तृपोतृप्रभृतयोपि तथा अन्येपि तृप्रत्ययान्ता अवसेयाः । तृप्रत्ययस्यार्थवतो ग्रहणेन नप्त्रादीनामव्युत्पन्नानां संज्ञाशब्दानां ग्रहणं न भवत्यतस्तेषां पृथगुपादानम् । अर्थवतो ग्रहणेनानर्थकस्येति ज्ञापकात् । व्युत्पत्तिपक्षे तु तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम् । सिद्धे सत्यारंभो नियमायेति ॥

उकारांतस्यापि क्रोष्टुशब्दस्य विशेषः । [ उकारांतस्यापि क्रोष्टुशब्दस्य पंचस्वधिषु तृप्रत्ययांतस्येव रूपं वक्तव्यम् ] क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । अधिष्विति विशेषणात् । हे क्रोष्टो । हे क्रोष्टारौ । हे क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । शसि परे तृप्रत्ययान्तवद्भावाभावात् । क्रोष्टून् । [ तृतीयादौ स्वरादौ तृप्रत्ययांतता वा वक्तव्या ] क्रोष्ट्रा-क्रोष्टुना । क्रोष्टुभ्याम् । क्रोष्टुभिः । क्रोष्ट्रे–क्रोष्टवे । क्रोष्टुभ्याम् ।

क्रोष्टुभ्यः । क्रोष्टुः-क्रोष्टोः। क्रोष्टुभ्याम् । क्रोष्टुभ्यः । क्रोष्टुः-क्रोष्टोः । क्रोष्टोः- क्रोष्टोः । [ कृताकृतप्रसंगी यो विधिः स नित्यः ] [ नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान् ] इति प्रथमं नुडागमे कृते हसादित्वात्तृवद्भावो नास्ति । क्रोष्टूनाम् । क्रोष्टरि-क्रोष्टौ । क्रोष्ट्वोः- क्रोष्ट्वोः । क्रोष्टुषु ॥

क्रुश् आह्वाने । तुम्प्रत्ययः गुणः(छशषराजादेः षः।ष्टुभिः ष्टुः) क्रोष्टु इति जातम्। उक्ता० । यद्यपि क्रोष्टुशब्द उकारांतस्तथापि तस्य अधिषु धिवर्ज्जितेषु पंचसु वचनेषु तृप्रत्ययांतस्येव रूपं तृप्रत्ययांतत्वं वर्तव्यम् । ततः (स्तुरार्) इति आरादिकामित्यर्थः। ततः पंचसु कर्तृवत् । सौ ( स्तुरार् । सेरा ) धौ तु भानुवत् । द्वित्वबहुत्वयोः कर्तृवत् ( स्तुरार् ) स्वर०।शसि विषये तृप्रत्ययः विद्यतेऽस्येति स तृप्रत्ययवान् तस्य भावः। यद्वा । तृप्रत्ययेन तुल्यं तृप्रत्ययवत् तस्य भावः तृप्रत्ययवद्भावस्तस्य अभावस्तृप्रत्ययवद्भावाभावस्तस्मात् । क्रोष्टून् । इति भानुवत्साध्यः । तृतीया आदिर्यस्य स तृतीयादिः तस्मिस्तृतीयादौ किंविशिष्टे तृतीयादौ स्वरादौ तृप्रत्ययांतो वा विकल्पेन-भवति । एकत्र पक्षे कर्तृवत् । द्वितीये पक्षे भानुवत् साध्यः । तु तृतीयादौ हसादौ त्वविशेषः । स्वरादौ च तृप्रत्ययांतता । उकारस्य वा ऋकार इत्यर्थः । ऋत्वे कर्तृवत् । उत्वे भानुवत् आमि तु विशेषः । क्रोष्टु आम् इत्यत्र ( नुडामः ) इति नुडागमप्राप्तौ ( तृतीयादौ स्वरादौ वा ) इति तृप्रत्ययांतवद्भावस्य च प्राप्तौ नुडागम एव स्यादित्याह । आमि तु नुडागमे कृते हसादित्वात्तृवद्भावस्तृप्रत्ययांतत्वं नास्ति न भवति । अत्राह परः । ननु यथा उकारांतत्वे क्रोष्टूनामिति रूपस्य सिद्धिर्भवति तथा पूर्वं तृप्रत्ययभावं विधाय पश्चान्नुडागमः क्रियताम् । तत्रोच्यते ( कृता० ) कार्यान्तरे कृतेपि अकृतेपि प्रसंगः प्रयोगप्राप्तिरस्यातीति कृताकृतप्रसंगी एवंभूतो यो विधिः स नित्यः । नित्यानित्ययोर्नित्यो विधिः बलवानिति । एवमभिप्रायः तृप्रत्ययाभावे कृतेप्यकृतेपि नुडागमो नित्यः स्यादेव तदागमे च हसादित्वं सिद्धमेव । अतः स्वरांतत्वाभावाद्वा तृप्रत्ययांतत्वं न, किंतु क्रोष्टूनामित्येकमेव रूपम् ( नुडामः । नामि ) सप्तम्येकवचने ( तृतीयादौ स्वरादौ वा ) इत्येकत्र तृप्रत्यये कृते ( ङौ ) इत्यर् । ( स्वर० ) क्रोष्टरि । द्वितीयपक्षे उकारांतत्वात् । ( ङेरौ ङित् ) टिलोपः । स्वर० । क्रोष्टौ । शेषं सुकरम् । संबोधने अधिष्विति विशेषणात् । ( समानाद्धेर्लोपो० ) धौ हे क्रोष्टो । हे क्रोष्टारौ । हे क्रोष्टारः ॥

१ नित्यश्च अनित्यश्च नित्यानित्यौ तयोः नित्यानित्ययोर्मध्ये यो नित्यो विधिः स बलवान् । कृताकृतप्रसंगी विधिः कृतेपि भवति अकृतेपि भवति स नित्यः अतः कारणात् क्रोष्टूनां भवति । २ वक्तव्यम्-इति पाठः ।

ऋकारान्ता लृवर्णाता एकारांताश्चाप्रसिद्धाः । ऐकारान्तः पुँल्लिंगः सुरैशब्दः । रै स्भि ॥ रैशब्दस्याकारादेशो भवति सकारभकारादौ विभक्तौ परतः । सुराः । स्वरादौ सर्वत्रायादेशः । सुरायौ । सुरायः । हे सुराः । हे सुरायौ । हे सुरायः । सुरायम् । सुरायौ । सुरायः । सुराया । सुराभ्याम् । सुराभिः इत्यादि । एवं रै शब्दः ॥

ऋकारांतानुक्त्वा अन्यानाह । ऋकारांता लृवर्णाता एकारांताश्च शब्दा अप्रसिद्धा अप्रतीताः क्वचित् प्रयोगे न दृश्यन्ते क्वचित्प्रयोगे दृश्यन्ते(ङे अक्) इत्यादौ। ऐकारांतः सुरैशब्दः। सूत्रम् (रै स्भि) रै ६-१ । सांके० । स् च भ् च स्भ् तस्मिन् स्भि । ७-१ । स्वर० । रैशब्दस्य विभक्तिसंबंधिनि सकारे भकारे च परे आकारो भवति। षष्ठीनिर्दिष्टस्येति अंतस्य ।१-१(श्लो०)सुष्ठु शोभनो राः द्रव्यं यस्येति सुराः। स्वरादौ तु ( ऐ आय् ) स्वर०। समानाभावात् ( अम्शसोरस्य । सो नः पुंसः ) नुडागमश्च भवति ॥

ओकारांतः पुँल्लिंगो गोशब्दः । ओरौ ॥ ओकारस्यौकारादेशो भवति पंचसु परेषु । गौः । गावौ । गावः । हे गौः । हे गावौ । हे गावः । आम्शसि ॥ ओकारस्यात्वं भवति अमि शसि च परे । गाम् । गावौ । गाः । गवा । गोभ्याम् । गोभिः । गवे गोभ्याम्। गोभ्यः । (ङस्य) इत्यकारलोपः । गोः। गोभ्याम् । गोभ्यः । गोः । गवोः । गवाम् ।[ श्रुतौ गोरामः ] श्रुतौ गोशब्दात्परस्यामो नुडागमो भवति । गोनाम् । गवि । गवोः । गोषु । एवं सुद्योशब्दः । औकारांतः पुँल्लिंगो ग्लौशब्दस्यस्य हसादावविशेषः स्वरादावादेशः । ग्लौः । ग्लावौ । ग्लावः । ग्लावम् । ग्लावौ । ग्लावः । ग्लावा । ग्लौभ्यामित्यादि ॥ ॥ इति स्वरान्ताः पुँल्लिंगाः ॥

ओकारांतः पुँल्लिंगो गोशब्दः दशार्थवाचकः । यतः "दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशधा मतः" ॥ १ ॥ दशस्वर्थेषु गोशब्दः पुंस्त्रीलिंगे ज्ञेय इति हेमाचार्या आहुः। व्याडिरप्येवमेवाह । गौडस्तु "स्वर्गे रश्मौ च वज्रे च बलीवर्दे च गौः पुमान् । स्त्री सौरभेय्यां दिग्बाणदृग्वाग्भूम्यप्सु भूम्नि

१ ( गोर्नुड्वा छन्दसि ) इति केषांचिन्मते सूत्रम् ।

च ॥" इति विशेषमाह । गम्लृ गतौ । गम् । गच्छतीति गौः वृषभः । गमेर्डो-प्रत्ययः। डित्त्वाट्टिलोपः। स्वर०।गो इति जातम्। गोशब्दस्य पंचसु विशेषः।सूत्रम्। (ओरौ) ओ ६-१ (ङस्य) इत्यकारलोपः (स्रो०) औ १-१ । सांके० । (नामिनो रः) ओकारांतशब्दसंबंधिनि ओकारस्य औकारादेशो भवति पंचसु परेषु । अम् विषये तु ( आम्शसि ) इति विशेषकथनात् अम्वर्जितेषु पंचसु द्वितीयाद्वित्वं याव-दौकारः १-१ ( स्रो० )१-२(औ आव्) स्वर० । अमि तु विशेषः।सूत्रम्(आम्श०) आ १-१ । सांके० । अम् च शस् च अम्शस् तस्मिन् ७-१ स्वर०। ( सवर्णे० ) ओकारस्यामि शसि च परे आकारो भवति (सवर्णे० ) द्वित्वे ( औ आव् ) वहुत्वे आकारे कृते । (सवर्णे० । स्रो०) यदादेशस्तद्वद्भवतीति ओकारस्यासमानत्वान्न ( सो नः पुंसः ) इति शसो नकारः । टादौ स्वरादौ ( ओ अव् ) हसादावविशेषः । पंच-मीषष्ठ्येकवचने ( ङस्य ) इति सूत्रेण अकारलोपः (स्रो०) केचित्तु आमि( ऋगन्ते गोराम् ) इति सूत्रान्तरेण नुडागममप्याहुः । छंदसि । गोनाम् । गवाम् । शेषं सुग-मम् । एवं द्योशब्दः। स्त्रीलिंगे तु गौणत्वे सुद्योशब्दः। सुष्ठु शोभना द्यौः स्वर्गो यस्य स सुद्यौः इन्द्रः ( ओरौ ) सुद्यौः । सुद्यावौ । सुद्यावः । सुद्याम् । सुद्यावौ। सुद्याः । सुद्यवा । सुद्युभ्याम् । सुद्युभिरित्यादि । हे सुद्यौः । इत्यादि । औकारांतः पुंल्लिंगो ग्लौशब्दः चंद्रार्थः । ग्लै हर्षक्षये । ग्लायति कृष्णपक्षे इति ग्लौः । औणादिको डौ प्रत्ययः ( डिति टेः ) स्वर० । ग्लौ इति जातम् । तस्य हसादौ अविशेषः । स्वरादौ तु सर्वत्र ( औ आव् ) ग्लौः । ग्लावौ । ग्लावः ॥

इति स्वरांतपुंल्लिंगसाधनम् ॥

---

## अथ स्वरान्ताः स्त्रीलिंगाः ७.

अथ स्वरांताः स्त्रीलिंगाः प्रदर्श्यन्ते । तत्र आकारांतो गंगाशब्दः । आव्रतः स्त्रियाम् ॥अकारान्तात्स्त्रियां वर्तमानादाप्प्रत्ययो भवति। तस्य नामसंज्ञायां स्यादयः । प्रथमैकवचने सि । आपः ॥ आवं-तात्परस्य सेर्लोपो भवति । गंगा ।औरी ॥ आवन्तात्पर औ ईकार-मापद्यते । गंगे । गंगाः । धिरी॥आवंतात्परोधिरीर्भवति । हे गंगे। हे गंगे । हे गंगाः । [ अंबादीनां धौ ह्रस्वः ] आवंतानां अंबा-दीनां धौ परे ह्रस्वो भवति । हे अंब । हे अक्क । हे अल्ल ॥[असंयुक्ता-नां डलकवतीनां प्रतिषेधो वाच्यः ] हे अंबाले । हे अंबाडे ।

---

१ द्वितीयाद्विवचनम्-इति पाठः । २ तत्रावन्त इति पाठः । अत्रैवाग्रे "आवतः स्त्रियाम्" इति सूत्र वार्तिकं कृता दृश्यते । ३ ईकारो भवति इति पाठः ।

हे अंबिके । इत्यादौ ह्रस्वो न भवति । गंगाम् । गंगे । गंगाः ।
पुंस इति विशेषणात्स्त्रियां शसि सकारस्य नकारो न भवति ।
**टौसोरे ॥** आबंतस्य टौसोः परयोरेत्वं भवति । अयादेशः ।
गंगया । गंगाभ्याम् । गंगाभिः । **ङितां यट् ॥** आबंतात्परेषां ङे ङ-
सि ङस् ङि इत्येतेषां यडागमो भवति । टकारः स्थाननियमार्थः ।
गंगायै । गंगाभ्याम् । गंगाभ्यः । गंगायाः । गंगाभ्याम् । गंगाभ्यः ।
गंगायाः । गंगयोः । [आबन्तादीबन्तादामो नुड्वक्तव्यः] गंगानाम् ।
**आम्ङेः ॥** आबन्तात्परस्य ङेरामादेशो भवति । इत्याम् ।
गंगायाम् । गंगयोः । गंगासु । एवं श्रद्धाखट्वामेधामालामहि-
लाशालादोलाप्रभृतयः ॥

अथ स्वरांतस्त्रीलिंगसाधनमुच्यते ॥ अकारांतः शब्दः स्त्रीलिंगे नास्ति । तत्राऽऽ-
बंतो गंगाशब्दः । १–१ सूत्रम् । ( आपः ) आप् ५–१ । स्वर० (सो०) (आबतः
स्त्रियाम् ) इति सूत्रेण यः आप्प्रत्ययः कृतस्तदंतच्छब्दात्परस्य सेर्लोपो भवति ।
अनेन सिलोपः द्वित्वे । सूत्रम् । (औरी) औ१–१।ई१–१सांकेतिकम् । आवंतादिति
वृत्तिः कण्ठ्या न वरम् । औकार ईत्वम् आपद्यते प्राप्नोति । अनेन औस्थाने ई
( अ इ ए ) बहुत्वे ( सवर्णे० । सो० ) धौ तु । सूत्रम् ( धिरी ) धि १–१ ( सो० )
ई १–१ ( सो० । नामिनो० ) ( धिरी ) इति दीर्घमीकारं पठंति तत्समीचीनम् ।
यतः ( औ ) इत्यस्मिन्सूत्रे दीर्घेकारानुवृत्तिं गृह्णंति । तता जरसीति रूपं साधयंति ।
आवंता० । अनेन धिस्थाने इः ( अ इ ए ) अंबादीनां धिविषये विशेषमाह ।
अंबादीनां धौ ह्रस्वो भवति । ततः(समानाद्धेर्लो०) हे अंब । हे अंबे । हे अंबाः ।एवम् ।
हे अक्क । हे अल्ल । हे अत्त । एते त्रयः एकार्थाः । गृहमध्यस्थवृद्धस्त्रीवाचकाः ।
अंबादीनां शब्दानां द्विस्वराणामेव धौ ह्रस्वता । अत एव ( असंयुक्तानां डलकव-
तीनां प्रतिषेधो वाच्यः ) इति वार्तिकम् । तेन हे अंबाडे । हे अंबाले । हे अंबिके ।
इत्यादौ न ह्रस्वः । द्वितीयैकवचने ( अम्श० ) द्वित्वे प्रथमावत् । शसि ( अम्श० ।
सो० ) पुँल्लिंगाभावात् । ( सो नः पुंसः ) इति न भवति । ३–१ सूत्रम् । (टौसोरे)
टा च ओस् च टौसौ तयोः टौसोः ७–२ । स्व० ( सो० ) ए १–१ । सांके०
( नमिनो० ) मिद्धं द्विपदं सूत्रम् । आप्प्रत्ययांतस्य टा इति तृतीयैकवचने ओस्
इति षष्ठीसप्तमी द्विवचने परे ए भवति । षष्ठीनिर्दिष्टस्योति अंतस्य । अनेन ( ए अय्)
स्वर० । हसादौ तु अविशेषः ४–१ सूत्रम् ( ङितां य० ) ङ् इत् येषां ते ङितः
तेषां ङिताम् ६–३ । स्वर० ( मोनु० ) यट् १–१ । (हमे० ) द्विपदम् । आवं०

आप्प्रत्ययांताच्छब्दात् परेषाम् अग्रे वर्तमानानां ङितां ङे ङसि ङस् ङि इत्येतेषां वचनानां यट् आगमो भवति सस्वर एव । टित्वादादौ । अनेन यडागमः सस्वर एवेति । टित्वात् यट् आदौ ( ए ऐ ऐ ) पंचमीषष्ठ्येकवचने यडागमे कृते ( सवर्णो० । स्रो० ) ६-२ ( टौसोरे । ए अय् ) स्वर० ( स्रो० ) बहुत्वे नुडागमः (स्वर० ) ७-१ ( आम्ङेः ) ततो यदादेशस्तद्वद्भवतीति न्यायात् यडागमः । स्व० । शेषं सुकरम् । एवं श्रद्धादयोपि ज्ञेयाः ॥

आबन्तः सर्वाशब्दः । सर्वा । सर्वे । सर्वाः । हे सर्वे । हे सर्वे । हे सर्वाः । सर्वाम् । सर्वे । सर्वाः । सर्वया । सर्वाभ्याम् । सर्वाभिः । सर्वादीनां तु ङित्सु विशेषः । **यटोऽच्च** ॥ आबंतात्सर्वादेः परस्य यटः सुडागमो भवति पूर्वस्य चापोऽकारो भवति । सर्वस्यै । सर्वाभ्याम् । सर्वाभ्यः । सर्वस्याः । सर्वाभ्याम् । सर्वाभ्यः । सर्वस्याः । सर्वयोः । सर्वासाम् । सर्वस्याम् । सर्वयोः । सर्वासु ॥

आबंतः सर्वाशब्दः । तस्य तृतीयां यावत् गंगाशब्दवत् । सर्वा । सर्वे । सर्वाः । सर्वाम् । सर्वे । सर्वाः । सर्वया । सर्वाभ्याम् । सर्वाभिः । ङित्सु द्विचनेषु विशेषः ( ङितां यट् ) इति यडागमे कृते । सूत्रम् । ( यटो० ) यट् ६-१ । स्वर० ( स्रो० ) अत् १-१ ( हसे० । अतोऽत्युः । उ ओ । एदोतोऽतः ) च १-१ ( अव्य० । स्तोः श्चु० ) त्रिपदम् । आबंतात् अनेन यटः सुडागमः । टित्वादादौ । पूर्वस्य चापः आप्प्रत्ययाकारस्य अकारो भवति ।४-१ । स्वर० ( ए ऐ ऐ ) सर्वस्यै ।५-१ । ६-१ ( ङितां० ) ( यटोच्च ) आकारस्य अकारः । स्वर० ( सवर्णो० । स्रो० ) ७-१ ( आम्ङेः ) आमि कृते ( ङितां यट् । यटोच्च ) स्वर० ( सवर्णो० ) ६-२ । ७-२ ओसि ( टौसोरे । ए अय् ) स्वर० । ( स्रो० ) ६-३ ( सुडामः ) स्वर० । संबोधने तु गंगावत् । एवमाबंताः सर्वादयोऽन्येपि विश्वादयः । विश्वा अन्या अन्यतरा इतरा कतरा कतमा समा सिमा नेमा एका पूर्वा परा दक्षिणा उत्तरा अपरा अधरा स्वा अंतरा । उभयशब्दस्य तु ईप्रत्ययः । उभयी । उभय्यौ । उभय्यः । नदीशब्दवत् । द्वितीयातृतीयाशब्दयोर्ङित्सु वा सर्वादित्वम् ४-१ । द्वितीयस्यै-द्वितीयायै । ५-१ । ६-१ द्वितीयस्याः-द्वितीयायाः । ७-१ द्वितीयस्याम्-द्वितीयायाम् । द्विशब्दस्य तु त्यदादेष्टेरित्यकारे कृते ( आबतः स्त्रियाम् ) ततो गंगाशब्दद्विवचनवत्साध्यः । द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः । एवम् । उभे । उभे ॥

आकारांतो जराशब्दः । [ जरायाः स्वरादौ जरस् वा वक्तव्यः ]

जरा । जरसौ-जरे । जरसः-जराः। हे जरे। हे जरसौ-हे जरे। हे जरसः-हे जराः। जरसम्-जराम्। जरसौ—जरे । जरसः- जराः । जरसा—जरया जराभ्याम् । जराभिः । जरसे-जरायै । जराभ्याम् । जराभ्यः । जरसः-जरायाः। जराभ्याम्। जराभ्यः । जरसः-जरायाः। जरसोः-जरयोः। जरसाम्-जराणाम्। जरसि-जरायाम्। जरसोः-जरयोः। जरासु ॥

आबंतस्यापि जराशब्दस्य विशेषः । [ जरायाः० ] इति । जराशब्दस्य स्वरादौ विभक्तौ जरस् वा वक्तव्यः। स्वरे परे विकल्पेन जरस् आदेशः कर्तव्यः। (गुरुः शिक्ष सर्वस्य वक्तव्यः ) साधनम् । स्वरादौ एकस्मिन्पक्षे गंगावत्। द्वितियपक्षे जरस्आदेशे कृते । स्वर० । शेषं सुगमम् । जरा । जरसौ-जरे । जरसः—जराः । इत्यादि । सोमपाक्षीरपादयस्तु आप्प्रत्ययांता न किंतु आकारांताः क्विबंताः। अतस्तेषां साधना रूपाणि च पुँल्लिगवत् ॥

इकारान्तस्य स्त्रीलिंगस्य बुद्धिशब्दस्य प्रथमाद्वितीययोर्हरिवत्प्रक्रिया । बुद्धिः । बुद्धी । बुद्धयः । हे बुद्धे । हे बुद्धी। हे बुद्धयः। बुद्धिम्। बुद्धी। बुद्धीः। स्त्रीत्वाच्छसो नत्वाभावः। बुद्ध्या। बुद्धिभ्याम्। बुद्धिभिः। इदुद्भ्याम्॥ स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वा अडागमो भवति। बुद्ध्यै—बुद्धये। बुद्धिभ्याम्। बुद्धिभ्यः । बुद्ध्याः। बुद्धेः । बुद्धिभ्याम् । बुद्धिभ्यः । बुद्ध्याः-बुद्धेः। बुद्ध्योः। बुद्धीनाम् । स्त्रियां योः ॥ इश्च उश्च युः-तस्मादिवर्णांतादुवर्णांताच्च स्त्रियां वर्त्तमानात्परस्य ङेराम् भवति । बुद्ध्याम् । अडागमाभावे आमोऽप्यभावः । बुद्धौ। बुद्ध्योः । बुद्धिषु । एवं मतिभूतिधृतिरुचिकृतिसिद्धिशांतिभ्रांतिआलिशक्ति—प्रभृतयः ॥

इकारांतो बुद्धिशब्दस्तस्य द्वितियाद्विवचनं यावत् हरिशब्दवत्प्रक्रिया ( औ यू । ए ओ जसि ) इत्यादि । शशि ( अम्श० । शसि ) इति दीर्घः । ( स्रो० ) स्त्रीलिंगत्वान्नत्वाभावः ( सो नः पुंसः ) इति सूत्रेण नकारो न । तृतीयैकवचने आस्त्रियामिति कथनात् ( टा नाऽस्त्रियाम् )इत्यस्य प्रतिपेधः । किन्तु ( इ यं स्वरे ) स्वर० ।

---

१ वचनादिति पाठः ।

ङित्सु रूपद्वयम् । एकत्र हरिवत् ( ङिति । ङस्य । ङेरौ ङित् ) इत्यादिसूत्राणि । अन्यत्र सूत्रम् ( इदुद्भ्याम् ) इच्च उच्च इदुतौ ताभ्याम् इदुद्भ्याम् ५-२ । सिद्धमेकपदम् । स्त्रियाम् । अत्र नित्यं स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यामिति व्याख्येयम् । तेन शुचिशब्दोऽनियतलिंगोऽतो हरिवत् ज्ञेयः न तु विकल्पः । अनेन ४-१ । ५-१ । ६-१ । ७-१ । वा अडागमः । टित्वादादौ ( इ यं० ) ४-१ ( ए ऐ ऐ ) ५-१ । ६-१ । ( इ यं० ) स्वर० (सवर्णे०) (स्रो०) पक्षे हरिवत् । ७-१ सूत्रम् । ( स्त्रियां योः ) स्त्री ७-१ ( स्त्रियां योः । स्त्रीभ्रुवोः ) स्वर० । इश्च उश्च युस्तस्मात् योः ५-१(ङिति । ङस्य । स्रोः० ) द्विपदम् । स्त्रीलिंगे[1] वर्तमानात् इवर्णांतात् उवर्णांताच्च शब्दात्परस्य ङेः आम् आदेशो भवति। वाग्रहणान्नदीवधूजंब्वादीनामपि ङेराम् । अट्साहचर्य्यात् यस्मिन्पक्षे अडागमस्तत्रैव ङेः आम् भवति । अत एवाग्रे वक्ष्यति अडागमाभावे आमोऽप्यभावः इति । अनेन ङेः आम् ( इदुद्भ्याम्) इति वा अडागमः ( इ यं० ) स्वर० ( सवर्णे० ) ७-३ ( क्विला० ) शेषं सुगमम् । संबोधने हरिवत् ( समानाद्धेर्लोपोऽधातोः । धौ ) एवं मतिभूतिधृतिरुचिऋद्धिवृद्धिसिद्धिकांतिशांतिक्षांतिनाभिप्रभृतयोऽपि इकारांताः शब्दा एतैरेव सूत्रैः सिध्यति ॥

एवं धेनुरज्जुप्रभृतयोऽप्युकारांता एतैरेव सूत्रैः सिध्यंति । धेनुः । धेनू । धेनवः । हे धेनो । धेनुम् । धेनू । धेनूः । धेन्वा । धेनुभ्याम् । धेनुभि । धेन्वै-धेनवे । धेनुभ्याम्।धेनुभ्यः । धेन्वाः-धेनोः । धेनुभ्याम् । धेनुभ्यः । धेन्वाः-धेनोः । धेन्वोः । धेनूनाम् । धेन्वाम्-धेनौ । धेन्वोः । धेनुषु ॥

एवमुकारांता धेनुरज्जुतनुचंचुप्रभृतयोऽपि ज्ञेयाः ॥

ईकारांतः स्त्रीलिंगो नदीशब्दः । हसेपः सेर्लोपः॥हसांतादीबंताच्च परस्य सेर्लोपो भवति । नदी । नद्यौ । नद्यः । धौ ह्रस्वः ॥ ईवर्णोवर्णयोरधातोः स्त्रियां धौ परे ह्रस्वो भवति । हे नदि । हे नद्यौ । हे नद्यः । नदीम् । नद्यौ । नदीः । नद्या । नदीभ्याम् । नदीभिः । ङितामट् ॥स्त्रियामीकारांतादूकारांताच्च ङितां वचनानामडागमो भवति । नद्यै । नदीभ्याम् । नदीभ्यः । नद्याः ।

[1] स्त्रीलिंग वर्तमानादित्यन्यत्र पाठ. ।

नदीभ्याम् । नदीभ्यः । नद्याः। नद्योः । नदीनाम् । नद्याम् ।नद्योः।
नदीषु । एवं गौरीसरस्वतीब्रह्माणीकुमारीकिशोरीकलभीप्रभृतयः ॥

ईकारांतो नदीशब्दः। सूत्रम् । (हसेपः०) हसश्च ईप् च हसेप् तस्मात् हसेपः५–१। स्वर० । (स्रो०) सि ६–१ (ङिति । ङस्य । स्रो०) लोपः १–१ (स्रो० । नामिनो०) जलतुं० । त्रिपदम् । हसांतात् व्यंजनांताच्छब्दात्परस्य ईप्प्रत्ययांताच्च शब्दात्परस्य सेर्लोपो भवति । हसांतात्तु अग्रे हसांतपुँल्लिंगे भविष्यति । अत्र तु ईवंतात् । नदी १–१ ( सि ) अनेन सिलोपः । द्वित्वबहुत्वयोः ( इ यं स्वरे ) स्वर० । धौ तु । सूत्रम् । (धौ ह्र०) धि ७–१ । (ङेरौ ङित्) टेर्लोपः । स्वर० । ह्रस्वः १–१ (स्रो०) द्विपदम् । इवर्णोवर्णयोः । अधातोरिति धातुवर्ज्जशब्दस्य आक्विबन्तस्येत्यर्थः । अत्र अनियुवंताः ईकारोकारांता नित्यस्त्रीलिंगाः शब्दाः स्त्रीशब्दश्च एतत्संबंधिनोरेव इवर्णोवर्णयोरिति व्याख्येयम् । आनयुवता । इति किम् । हे श्रीः । हे भ्रूः । हे भूः ।शेषं कंठ्यम् । अत्र वर्णग्रहण ह्रस्वे कृते ( धौ ) इति सूत्रस्य प्राप्तिनिषेधार्थम् । अनेन ह्रस्वः ( समानाद्धेर्लोपः० ) हे नदि । हे नद्यौ । हे नद्यः । २–१ आमि (अम्शसो०) नदीम् । २–२ ( इ यं० ) स्वर० ।नद्यौ । २–३ शसि ( अम्श० । स्रो० ) नदीः। ३–१ टा ( इ यं० ) स्वर० । ४–१ सूत्रम् ( ङितामट् ) ङ इत् येषां ते ङितस्तेषां ङिताम् । ६–३ ।स्वर० । अट् । १–१ (हसं०) द्विपदम् । स्त्रियामिति नित्यं स्त्रीलिंगे वर्तमानाभ्याम् ईकारोकाराभ्यां परेषां ङितां ङे ङसि ङस् ङि इत्येतेषाम् अडागमो भवति । अनेन अडागमः (इ यं स्वरे। ए ऐ ऐ) ५–१। ६–१ । अडागमः (इ यं स्वरे) स्वर० । ( सवर्णे० । स्रो० ) ६–२ । ७–२ ( इ यं स्वरे) स्वर०। ६–३ (नुडामः । ) स्वर० । ६–१ ( स्त्रियां योः । ङितामट् । इ यं० ) ७–३ ( क्विलात्पः सः० ) एवं नदीशब्दवत् गौरीसरस्वतीब्रह्माणीकुमारीनारीसारङ्गीभृंगीप्रभृतयः एतैरेव सूत्रैः साध्याः ॥

लक्ष्मीशब्दस्य ईवंतत्वाभावात्सेर्लोपो नास्ति । लक्ष्मीः । लक्ष्म्यौ । लक्ष्म्यः । हे लक्ष्मि । शेषं नदीवत् । स्त्रीशब्दस्य ईवंतत्वात्सिलोपो-ऽस्ति । स्त्री । स्त्रीभ्रुवोः ॥ स्त्रीशब्दस्य भ्रूशब्दस्य च स्वरे परे इयुवौ भवतः । स्त्रियौ । स्त्रियः । हे स्त्रि । वाऽम्शसि ॥ स्त्रीशब्दस्य अमि शसि च परे वा इय् भवति । स्त्रियम्—स्त्रीम् । स्त्रियौ । स्त्रियः—स्त्रीः । स्त्रिया । स्त्रीभ्याम् । स्त्रीभिः । स्त्रियै । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्रीयाः । स्त्रीभ्याम् । स्त्रीभ्यः। स्त्रियाः । स्त्रियोः। स्त्रीणाम्। स्त्रियाम् । स्त्रियोः । स्त्रीषु ॥[1]

---

१ हसान्ता अग्रे—हसांतपुँल्लिंगे भविष्यति—इत्यपि क्वचित्पाठः ।

ईकारांतो लक्ष्मीशब्दस्तस्य ईवंतत्वाभावात् ईप्प्रत्ययांतत्वाभावात् (हसेपः सेर्लोपः) इति सेर्लोपो नास्ति न भवति । यतः ( लक्षेरी मुट् च ) इति सूत्रेण ईकारांतत्वात् । ततः १-१ ( स्रो० ) लक्ष्मीः । लक्ष्म्यौ । लक्ष्म्यः । ( इ यं स्वरे) स्वर०(स्रोर्वि० )। संबोधने हे लक्ष्मि । ( धौ ह्रस्वः । समानाद्धे०) चतुर्थ्यादौ ( ङितामट् ) सप्तम्याम् । ( स्त्रियां योः ) इत्यादि । शेषं नदीतुल्यम् । यतः । " अवीलक्ष्मीतरीतंत्रीतंद्रीधीह्रीश्रियां पुरः । भीशब्दाच्च न सेर्लोपः स्त्रीलिंगे स्यात्कदाचन " ॥ अवीः ऋतुमती स्त्री। लक्ष्मीः प्रसिद्धा । तरीर्नौः । तंत्रीः वीणा । तंद्रीः निद्रा । धीः बुद्धिः । ह्रीः लज्जा। श्रीः लक्ष्मीः । भीर्भयम् । स्त्रीशब्दस्य ईवंतत्वात् ईप्प्रत्ययांतत्वात् सेर्लोपोऽस्ति हसेपः सेर्लोपो भवति । ष्टै धातुः स्त्यै धातुश्च शब्दसंघातयोः ( स्त्यायतेः स्त्रीत्वे ड्रट् ) इति रप्रत्ययः । डित्त्वाट्टिलोपः ( संयोगांतस्य ) इति यकारलोपः । स्वर० । ततः टित्त्वात् ( ष्ट्रितः ) इतीप् १-१( हसेपः०) द्वित्वे । स्त्रीशब्दस्य भ्रूशब्दस्य च अक्विबंतत्वेन अधातुत्वात् (य्वोर्धातोः०) इति इय् न स्यात् । तेन सूत्रांतरमाह (स्त्रीभ्रुवोः) स्त्री च भ्रूश्च स्त्रीभ्रुवौ तयोः स्त्रीभ्रुवोः ६-२ । स्वर० । स्त्रीशब्दस्य भ्रूशब्दस्य च स्वरे परे इयुवौ भवतः । स्त्रीशब्दस्य इय् भ्रूशब्दस्य उव् । अनेन इय् । षष्ठीनिर्दिष्टस्येत्यंतस्य इय् । स्वर० । बहुत्वेऽप्येवम् २-१ । सूत्रम् ( वाम्शसि ) वा ३-१ ( अव्य०) अम् च शस् च अम्शस् तस्मिन् अम्शसि ७-१ । स्वर० ( सवर्णे० ) द्विपदम् । आमि शसि च परे वा विकल्पेन इयुवौ भवतः । अत्र स्त्रीशब्द एव संभाव्यते भ्रूशब्दस्य भ्रू इति रूपस्यादृश्यमानत्वात् । उवूग्रहणं तु संबंधैक्यात् । अनेन एकत्र इय् । स्वर० । अन्यत्र ( अम्शसोरस्य ) स्त्रियम्-स्त्रीम् । द्वित्वे प्रथमाद्वित्ववत् । स्त्रियौ । शसि परे ( वाम्शसि ) स्वर० ।( स्रो० ) अन्यत्र (अम्शसो०) स्त्रियः-स्त्रीः । ३-१ ( स्त्रीभ्रुवोः ) स्वर० । स्त्रिया । स्त्रीभ्याम् । स्त्रीभिः। शेषं चतुर्थ्यादौ नदीवत् । अस्यायमर्थः । ङेङसिङस्ङिषु ङितामट् कृत्वा इय् कर्तव्य इत्यर्थः । स्त्री ४-१ ङे (ङितामट् । स्त्रीभ्रुवोः ) स्वर० ( ए ऐ ऐ ) स्त्रियै । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्री ५-१ ङसि ( ङितामट् । स्त्रीभ्रुवोः ) स्वर० ( सवर्णे० । स्रो० ) स्त्रियाः । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्री ६-१ ङस् ( ङितामट् स्त्रीभ्रुवोः ) स्वर० (सवर्णे० । स्रो०)स्त्रियाः । स्त्री ६-२ ओस् ( स्त्रीभ्रुवोः ) स्वर० (स्रो०) स्त्रियोः । स्त्री ६-३ आम् ( नुडामः । ष्रुन्नो०) स्वर० । स्त्रीणाम् । स्त्रीणाम् अत्र (स्त्रीभ्रुवोः । नुडामः) इत्युभयोः प्राप्तौ विशेषत्वात् ( नुडामः ) इति नुडागम एव भवति । स्त्री ७-१ ङि ( ङितामट् । स्त्रियां योः ) इत्याम् ( स्त्रीभ्रुवोः ) स्वर० ( सवर्णे० ) स्त्रियाम् । स्त्री ७-२ । ओस् ( स्त्रीभ्रुवोः ) स्वर० ( स्त्रियां योः ) स्त्रियोः । स्त्री ७-३ सुप् ( किलात्षः० ) स्त्रीषु । हे स्त्रि । ( धौ ह्रस्वः । समानाद्धे० ) हे स्त्रियौ । हे स्त्रियः ॥

श्रीशब्दस्य भेदः । ईकारान्तः श्रीशब्दः।श्रयन्ते जना यामिति श्रीः।

श्रीः।श्रियौ।श्रियः।श्रियम् । श्रियौ । श्रियः।श्रिया । श्रीभ्याम् । श्रीभिः।

वेयुवः ॥ इयुवंतात् स्त्रियां वर्तमानाद्वा ङितां वचनानामडागमो भवति । स्त्रियास्तु नित्यम् । श्रियै—श्रिये । श्रीभ्याम् । श्रीभ्यः । श्रियाः—श्रियः । श्रीभ्याम् । श्रीभ्यः । श्रियाः—श्रियः । श्रियोः । [ श्र्यादीनां वामो नुड् वक्तव्यः ] श्रियाम्—श्रीणाम् । श्रियाम्—श्रियि । ङौ परे अडागमाभावे आमोऽप्यभावः । श्रियोः । श्रीषु । एवं ह्रीधीप्रभृतयोऽप्यनीवंताः । एवं भूशब्दो भ्रूशब्दश्च । वधूकरभोरूकुरूकच्छूकंडूजंब्वादीनां तु नदीशब्दवद्रूपं ज्ञेयम् । वधूः । वध्वौ । वध्वः । हे वधु । इत्यादि ॥

अथ श्रीशब्दः । श्री १०१ सु ( स्रो० ) श्रीः । श्री १–२ औ ( य्वोर्धातोः० ) स्वर० । श्रियौ । श्रियः । २–१ अम् ( य्वोर्धातोः० ) स्वर० । श्रियम् । श्रियौ । श्रियः । श्रिया । श्रीभ्याम् । श्रीभिः । चतुर्थ्यादौ श्रीशब्दस्य विशेषमाह । सूत्रम् । ( वेयुवः ) वा ३–१ ( अव्य० ) इय् च उव् च इयुव् तस्मात् इयुवः ५–१ । स्वर० । मध्ये ( अ इ ए ) नित्यं स्त्रियां वर्त्तमानात् इयंतात् उवन्ताच्च शब्दात्परेषां ङितां वचनानां विकल्पेन अडागमः स्यात् न तु स्त्रीशब्दस्य । यतः कालापके स्त्री नदीवत् । तथा च हैमे ( वेयुवोः अस्त्रियाम् ) इति पूर्वम् ( य्वोर्धातोः० । वेयुवः ) इति अनेन एकत्र अडागमः ( य्वोर्धातोः० ) स्वर० ( ए ऐ ऐ ) अन्यत्र ( य्वोर्धातोः० ) स्वर० । ५–१ । ६–१ पूर्वम् ( य्वोर्धातोः० ) एकत्र ( वेयुवः ) इति अडागमः ( य्वोर्धातोः० ) स्वर० ( सवर्णे० । स्रो० ) पक्षे । ५–१ । ६–१ ( य्वोर्धातोः० ) स्वर० ( स्रो० ) ६–२ । ७–२ । ( य्वोर्धातोः० ) इत्यनेन इय् । स्वर० ( स्रो० ) श्र्यादीनां श्रीधीभीप्रभृतीनामामः षष्ठीबहुवचनस्य वा नुड् वक्तव्यः । अनेन नुट् आगमः ( ऋवर्णा० ) स्वर० । श्रीणाम् । अन्यत्र इय् । स्वर० । श्रियाम् । ७–१ रूपद्वयम् । एकत्र ( स्त्रियां योः ) इति ङेः आम् ( य्वोर्धातोः० ) इति इय् । यदादेशस्तद्वद्भवतीति ( वेयुवः ) इत्यडागमः । स्वर० ( सवर्णे० ) अन्यत्र ( य्वोर्धातोः० ) स्वर० । श्रियाम्—श्रियि । ननु अडागमस्य अभावेपि ङेः आम् कथं न भवतीत्याह । अडागमाभावे आमोऽप्यभावः । यत्र प्रयोगे अडागमो न भवति तत्र आमपि न भवति ङेः आम् न भवतीत्यर्थः । शेषं सुगमम् । धौ । धातुत्वाद्धेर्लोपो न ह्रस्वता च न । किंतु ( स्रो० ) हे श्रीः । द्वित्वे बहुत्वे ( य्वोर्धातोः० ) इति इय् । हे श्रियौ । हे श्रियः । एवं धीह्रीभीप्रभृतयोऽपि स्त्रीलिंगाः अनीवंताः

१ कव्यम् इ०पा० ।

ईप्प्रत्ययरहिताः शब्दाः साध्याः । सुधीसुश्रीसेनानीग्रामण्यादयः पुँल्लिंगवत् । ( वेयुवः ) इत्यत्र नित्यं स्त्रियामित्युक्तत्वात् । स्त्रीवाचकत्वेपि सुश्रियै सुधियै इत्यादौ न विकल्पः । एवमकारांतो भूशब्दः । भूः । १-१ ( स्रो० ) १-२ ( य्वोर्धातोः० ) भुवौ । भुवः । २-१ ( य्वोर्धातोः० ) भुवम् । भुवौ । भुवः । भुवा । भूभ्याम् । भूभिः । भुवै-भुवे।भूभ्याम्। भूभ्यः। भुवाः-भुवः। भ्रूशब्दस्य तु भ्रमचलन औणादिको डूप्रत्ययः । डकारष्टिलोपार्थः।भ्रमति चलतीति भ्रूः इति (अक्विवंतत्वात् अधातुत्वाच्च ( य्वोर्धातोरियुवौ स्वरे ) इति न भवति । किंतु( स्त्रीभ्रुवोः ) इति सूत्रेण उवादेशः । भ्रूः। भ्रुवौ । भ्रुवः । भ्रुवम् । भ्रुवौ । भ्रुवः । भ्रुवा । भ्रूभ्याम् । भ्रूभिः । ( वेयुवः । स्त्रीभ्रुवोः ) भ्रुवै-भ्रुवे । भ्रूभ्याम् । भ्रूभ्यः । भ्रुवाः-भ्रुवः । भ्रूभ्याम् । भ्रूभ्यः । भ्रुवाः-भ्रुवः । भ्रुवोः । भ्रुवाम्-भ्रूणाम् । सप्तम्येकवचने भ्रुवाम् । इति रूपसिद्धौ ( स्त्रीभ्रुवोः । वेयुवः । स्त्रियां योः ) भ्रुवि इति सिद्धम् । भ्रुवोः । भ्रूषु । इयुवंतत्वाद्धौ न ह्रस्वता । हे भ्रूः । यद्वा । धौ परे तु सुभ्रूशब्दः स्त्रीवदिति केचित् । तेन ह्रस्वः । हे सुभ्रूः। सुभ्रूशब्दस्य धौ वा ह्रस्वता तेन हे सुभ्रु इत्यपि । वधूजंबूश्वश्रूशब्दादीनां नदीशब्दवत्प्रक्रिया । परं सिविषये ( स्रो० ) वधूः । वध्वौ ( उ वम् ) वध्वः। वधूम् ( अम्शसोः० ) वध्वौ । वधूः। वध्वा। वधूभ्याम् । वधूभिः ( ङितामट् । वध्वै । वध्वाः ( स्त्रियां योः । ङितामट् । उ वम् ) वध्वाम् । हे वधु । एवं चमूतनूजंबूकंडूकच्छूयवागूदिधिषूकद्रूचंचूकर्कधूकरभोरूप्रभृतयः । स्वयंभूप्रमुखास्तु पुंवत् ॥

ऋकारान्तस्य मातृशब्दस्य पितृशब्दवत्प्रक्रिया । मातृ सि इति स्थिते ( सेरा ) आत्वम् ( डिति टेः ) माता । मातृ औ इति स्थिते ( पंचसु ) मातरौ । मातरः ।(धेरर्) हे मातः । हे मातरौ । हे मातरः। मातरम् । मातरौ । शसि (शसि) इति दीर्घत्वम् । मातॄः । मात्रा । मातृभ्याम् । मातृभिः। मात्रे । मातृभ्याम्। मातृभ्यः (ऋतो ङ उः ) इति उकारः । मातुः । मातृभ्याम् । मातृभ्यः । मातुः। मात्रोः । मातॄणाम् ( ङौ ) अर् । मातरि । मात्रोः । मातृषु । स्वसृशब्दस्तु कर्तृशब्दवत् । स्त्रीलिंगत्वान्नत्वाभावो विशेषः ॥

ऋकारांते स्त्रीलिंगे मातृशब्दस्य पितृशब्दवत्प्रक्रिया (सेरा। पंचसु)इत्यर् नवरम्। शसि दीर्घ एव भवति। परं स्त्रीलिंगत्वात् ( सो नः पुंसः ) इति नत्वं न भवति।

---

१ रूपद्वयम्-इ० पा० ।

(धौ) (धेरर) एवं पितृष्वसृमातृष्वसृदुहितृयातृननान्दृशब्दाः । स्वसृशब्दस्तु कर्तृशब्दवत् । (स्तुरार् । सेरा) शसि स्त्रीलिङ्गत्वान्नत्वाभावः (सो नः पुंनः) इति न भवति । इति विशेषः । स्वसॄः । तृतीयादौ स्वरादौ (ऋ रम्) स्वर० । ङसिङसोर्विषये (ऋतो ङ उः) ङिविषये (ङौ) इत्यर् । हे स्वसः (धेरर्) एवं ननांदृशब्दः ॥

ऐकारांतः स्त्रीलिंगो रैशब्दः । तस्य सुरैशब्दवत्प्रक्रिया । रै सि इति स्थिते (रै स्भि ।) इत्यात्वम् । राः । रै औ इति स्थिते । स्वरादौ सर्वत्रायादेशः । रायौ । रायः । इत्यादि । गोशब्दः पूर्ववत् । नौशब्दस्य ग्लौशब्दवत् प्रक्रिया ॥ ॥ इति स्वरांताः स्त्रीलिंगाः ॥

रैशब्दः सुरैशब्दवत् । राः । (रै स्भि) रायौ । रायः । इत्यादि । रैशब्दः पुंस्त्रीलिंगे वर्त्तते । तथामरकोशे " अर्थरैविभवा अपि " इति पुँल्लिंगे एव उक्तः । अत्र तु स्त्रीलिंगे एव उक्तस्तच्चिन्त्यम् । गोशब्दः पुंवत् । (ओ रौ) गौः। गावौ । गावः। (आम्शसि) गाम् । गावौ । गाः। गवा । गोभ्याम् । गोभिः । इत्यादि । अत्रापि गोशब्दो दशार्थवाची। एवं द्योशब्दोपि। नौशब्दो ग्लौशब्दवत्। नौः । नावौ। नावः ॥

इति स्वरांतस्त्रीलिंगसाधनम् ।

---

## अथ स्वरांता नपुंसकलिंगाः ८.

अथ स्वरांता नपुंसकलिंगाः प्रदर्श्यंते। तत्राऽकारांतो नपुंसकलिंगः कुलशब्दः । तस्य प्रथमाद्वितीयैकवचने । अतोऽम् ॥ अकारांतान्नपुंसकलिंगात्परयोः स्यमोरम् भवत्यधौ । अमोमग्रहणं लुग्ब्धावृत्त्यर्थम् । (अम्शसोरस्य) इत्यकारलोपः । कुलम् २ । हे कुल । ईमौ ॥ नपुंसकलिंगात्परं औ ईकारमापद्यते (अ इ ए) कुले २ । जश्शसोः शिः ॥ नपुंसकलिंगात्परयोर्जश्शसोः शिर्भवति । शकारः सर्वादेशार्थः [ गुरुः शिच्च सर्वस्य वक्तव्यः ] षष्ठ्या निर्दिष्टस्येत्यस्यापवादः ॥

अथ स्वरांतनपुंसकलिंगसाधनम्। तत्र अकारांतः कुलशब्दः । तस्य प्रथमाद्वितीयैकवचने । सूत्रम् । (अतोम्) अत् ५-१ । स्वर० (स्त्रो०) तसूप्रत्ययांतं वा । अम् १-१ (हसे०) मध्ये (अतोऽत्युः। उ ओ। एदो०) द्विपदम् । अकारांतात् नपुंसकलिंगात्परयोः स्यमोः सि अम् इत्येतयोरम् भवति । अधौ धेरम् न भवतीत्यर्थः । ननु स्यमोर्म् क्रियताम्, किं अम् इत्यकारग्रहणेन। सत्य

दिसाधनार्थम् । अमोऽमूकरणे हेतुमाह । अमोऽमुग्रहण लुग्व्यावृत्त्यर्थम् । अम् इति अमस्थाने पुनर्यत् अमूकरणं तत् (नपुंसकात्स्यमोर्लुक्) इति सूत्रनिषेधार्थम् । अय-मर्थः । अकारात्परयोः स्यमोर्लुग् भवतीति भावः। अनेन स्यमोरम् । (अम्शसोरस्य) १-२ । २-२ सूत्रम् ( ईमौ ) ईम्-२-१।( अम्श० ) औ १-१ सांके०। स्वर० । द्विपदम् । नपुंसकलिंगात्पर औ ईकारमापद्यते प्राप्नोति । दीर्घ ईकारस्तु वारिणी दधिनी इत्यादिरूपसिद्ध्यर्थः । अनेन औस्थाने ईकारः ( अ इ ए ) १-३ । २-३ सूत्रम् ( जश्शसोः शिः ) जस् च शस् च जश्शसौ तयोर्जश्शसोः ६-२ स्वर० ( स्रो० ) शि १-१ ( स्रो० ) द्विपदम् । नपुंसकलिगात्परयोः जश्शसोः शिर्भवति । शिरिति शकारः सर्वादेशार्थः । तेन सर्वस्य जसः शसश्च इर्भवति न त्वंतस्य। तमेवाह गुरुः शिच्चेति । शकार इत् यस्य स शिदादेशः [ गुरुः शिच्च सर्वस्य वक्तव्यः ] गुरुः आदेशः च पुनः शित् शकारेत् आदेशः सर्वस्यैव भवति । गुरुर्नैकाक्षरः ( त्रेरयङ् ) इत्यादिकः । तथा शित् शकारेच्च यः आदेशः स सर्वस्य आदेशिनः स्थाने भवति न त्वंतस्य । अनेन ( जश्शसोः शिः ) इति शि आदेशः सर्वस्य जसः स्थाने भवति ॥

नुमयमः ॥ नपुंसकलिंगस्य नुमागमो भवति शौ परे । यमप्रत्याहारांतस्य न भवति[मिदंत्यात्स्वरात्परो वक्तव्यः]उकार उच्चारणार्थः। मकारः स्थाननियमार्थः। नोपधायाः[1] ॥ नांतस्योपधाया दीर्घो भवति शौ परे धिवर्जितेषु पंचसु परेषु नामि च । कुलानि [2] । कुलेन । शेषं पुंल्लिंगवत् । एवं मूलफलपत्रपुष्पकुण्डकुटुम्बादयः ॥

सूत्रम् ( नुमयमः ) नुम् १-१ ( हसे० ) न यम् अयम् तस्य अयमः ६-१ । स्वर० ( स्रो० ) द्विपदम् । नपुंसकस्य नुमागमो भवति शौ परे । यमप्रत्याहारोऽन्ते यस्य शब्दस्य तस्य नुमागमो न भवति । यथा । अहानि चत्वारि इत्यादौ । मित् मकारेत् प्रत्ययः आगमश्च अंत्यात्स्वरात्परो वक्तव्यः । उकार उच्चारणार्थः । अनेन नुमागमः । न् । सूत्रम् ( नोपधायाः ) नस्योपधा नोपधा तस्याः नोपधायाः ६-१ ( ङितां यट् । सवर्णे० । स्रो० ) नांतस्य शब्दस्य उपधायाः 'अंत्यात्पूर्व उपधा' इति संज्ञासंधिकथितलक्षणाया दीर्घो भवति नपुंसके शौ परे पुंल्लिंगे धिवर्जि-तेषु पंचसु वचनेषु नामि च नुट्सहिते आमि परे च । यथा । पञ्चानाम् । अनेन उपधाया दीर्घः । कुलानि । धौ ( समानाद्धेर्लोपोऽधातोः ) हे कुल । द्विवचने ( ईमौ । अ इ ए ) हे कुले । बहुवचने । (जश्शसोः शिः । नुमयमः । नोपधायाः)

१ (नोपधाया.) इत्यत्र छंदसि तु भवतीति नियमात्सुधि. । छंदोवत्सूत्राणि भवंतीति वचनात् । इति पाठः पूर्वम् । ततः कुलानि । इति । २ देवनत्-इ० पा० ।

हे कुलानि । शेषं देवशब्दवत् । एवं कुलशब्दवत् मूलफलजलपत्रपुष्पकुंडकुटुंबज्ञा-नयनरत्नादयः शब्दाः साध्याः ॥

सर्वादीनामकारांतानामन्यादिपंचशब्दव्यतिरिक्तानां प्रथमाद्वितीययोः कुलशब्दवत्प्रक्रिया । सर्वम् ।सर्वे । सर्वाणि २ । शेषं तु पूर्ववद्रूपम् । तत्रापि अन्यादेर्विशेषमाह । श्त्वन्यादेः ॥ अन्यादेर्गणात्परयोः स्यमोः श्तुर्भवति ॥

सर्वादयोपि नपुंसकलिंगे प्रथमायां द्वितीयायां च कुलशब्दवत् । सर्वम्।सर्वे।सर्वाणि । पुनरपि । सर्वम् । सर्वे । सर्वाणि । तृतीयादौ तु पुंल्लिंगवत् । परम् अन्यादीनां प्रथमाद्वितीयैकवचने विशेषमाह । सूत्रम् ( श्त्वन्यादेः ) श्तु १-१ । सांके० । अन्य आदिर्यस्यासौ अन्यादिस्तस्मात् ५-१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० । उ चस् ) स्वर०।द्विपदम् । अन्यादेः।अन्य । अन्यतर । इतर । कतर । कतम। इत्यन्यादेर्गणान्नपुंसकलिंगे वर्तमानात्परयोः स्यमोः श्तु इत्यादेशो भवति ॥

शकारः सर्वादेशार्थः । उकार उच्चारणार्थः । (वावसाने । इति पक्षे दत्वमपि भवति । अन्यत्-अन्यद् । अन्ये । अन्यानि । पुनस्तथैव च । अन्यतरत्-अन्यतरद् । अन्यतरे । अन्यतराणि ।इतरत्-इतरद्। कतरत्-करतद् । कतमत्-कतमद् शब्दाः ।शेषं सर्ववत्।एते चान्यादयः ॥

शकारः सर्वादेशार्थः ( गुरुः शिच्च सर्वस्य वक्तव्यः ) इति न्यायात् । उकार उच्चारणार्थः ।अनेन सेः स्थाने अम्स्थाने च त् इत्यादेशः । द्वित्वबहुत्वयोः कुलशब्दवत् । हे अन्यत् । तृतीयादौ सर्वादिवत् । एवम् अन्यतरत् । इतरत् । कतरत् ।कतमत् । एतेऽपि शब्दाः साध्याः । ( जरायाः जरस् वा ) इति वा जरस् । नास्ति जरा यस्य तत् अजरसम्-अजरम् । अजरसी-अजरे । अजरांसि-अजराणि । शेषं पुंवत् । अत्र यद्यपि क्रमेण पूर्वम् आकारांतः सोमपाशब्दः[1] । तदग्रे इकारांता अस्थि दधि सक्थि अक्षि वारिशब्दास्तद्वदेव तदग्रे ईकारांता ग्रामण्यादयस्तद्वदेव उकारांता मध्वादयस्तदग्रे ऊकारान्ता यवल्वादयस्तदग्रे ऋकारांताः कर्तृप्रमुखास्तदग्रे ऐकारांतः अति-

---

१ प्रथमादयः कुलवत् । प्रथमम् । प्रथमे । प्रथमानि । अकारांतो नपुंसकलिंगः सोमपाशब्दः । सोमपा सि इति स्थिते ( नपुंसकस्य ) नपुंसकस्य ह्रस्वो भवति सर्वासु विभक्तिषु परतः । (अतोऽम्) सोमपम् । सोमपे । सोमपानि । हे सोमप । शेष कुलवत् । इति पाठः ।

शब्दः तदग्रे ओकारांत उपगोशब्दः तदग्रे औकारांतः अतिनौशब्दः । इति क्रमो युज्यते । परमत्र केषुचित्पुस्तकेषु क्रमवैपरीत्येन लिखितानि संति ॥

इकारांतोऽस्थिशब्दः। नपुंसकात्स्यमोर्लुक्॥ नपुंसकलिंगात्परयोः स्यमोर्लुग्भवति।अस्थि[य्वृणां[1] नपुंसके धौ वा गुणो वक्तव्यः] इश्च उश्च ऋश्च य्वृरस्तेषाम् इ उ ऋ इत्येतेषां नपुंसके धौ वा गुणो भवति। हे अस्थे-हे अस्थि। हे अस्थिनी।उक्तं हि।"संबोधने तूशनसस्त्रिरूपं सान्तं तथा नांतमथाप्यदंतम्।माध्यंदिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठः"॥ इति । नामिनः स्वरे ॥ नाम्यन्तस्य नपुंसकलिंगस्य नुमागमो भवति विभक्तिस्वरे परे ( ईमौ ) अस्थिनी । अस्थीनि । अस्थि । अस्थिनी। अस्थीनि । अच्चास्थ्नां[2] शसादौ॥ अस्थ्यादीनां नुमागमो भवति इकारस्य चाकारो भवति शसादौ स्वरे परे।अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ ॥ नांतस्योपधाया अकारस्य लोपो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च मकारवकारांतसंयोगादुत्तरस्य न भवति । अस्थ्ना । अस्थिभ्याम् । अस्थिभिः। अस्थ्ने। अस्थिभ्याम् । अस्थिभ्यः । अस्थ्नः । अस्थिभ्याम् । अस्थिभ्यः । अस्थ्नः । अस्थ्नोः । अस्थ्नाम् वेङ्च्योः ॥ नांतस्य नाम्नः ईङ्च्योः परयोर्वा अकारस्य लोपो भवति । अस्थ्नि-अस्थनि । अस्थ्नोः । अस्थिषु । एवं दधिसक्थ्यक्षिशब्दाः।इकारान्तो नपुंसकलिंगो वारिशब्दः । वारि । वारिणी । वारीणि । इत्यादि ॥

इकारांतो नपुंसकलिंगः अस्थिशब्दः । स्यमोर्विषये । सूत्रम् । ( नपुं० ) नपुं

---

१ य्वृ-इति पाठोऽस्ति परंतु-तेषामिति बहुवचनानुसारेण सोऽशुद्ध एव-य्वरः इति य्वृ इत्यत्र बहुवचनं समीचीनमस्ति । यद्वा । य्वृ इति अनुकरण बोद्धव्यम् । २ अत्र हि भट्टवासुदेवकृतप्रसादटीकासमन्विते पुस्तकेऽपि" अचास्थ्नाम् " इति सूत्र पठित्वा । शसादौ अस्थ्यादीनां नुमागमो भवति इकारस्य चाकारो भवति शसादौ स्वरे परे इति वृत्तिः कृता दृश्यते । प्रसादटीकायां च तद्व्याख्यावसरे । शस्आदिर्येषामित्यतद्गुणसंविज्ञानबहुव्रीह्याश्रयणात् शस विहाय टादावित्यर्थः । तदुपादानं च 'वशोऽवे उः' इत्यादावनुवृत्त्यर्थम् । इत्युक्तम् ॥

सक ५-१ ( ङसिरत् । सवर्णे० ) सिश्च अम् च स्यमौ तयोः स्यमोः ६-२ । स्वर० ( स्तो० ) लुक् १-१ ( हसेपः० । नामिनो रः ) त्रिपदम् । अवर्णांतवर्ज्जान्नपुंसकलिंगात्परयोः स्यमोर्लुक् भवति । अनेन स्यमोर्लुक् । धौ विशेषमाह । ( य्वृणाम् ) इश्च उश्च ऋश्च य्वरः तेषां य्वृणाम् । इकार-उकार-ऋकाराणां स्थाने नपुंसकलिंगविषये धौ वा गुणो वक्तव्यः । ( नपुंसकात् स्यमोर्लुक् ) इति धिलोपे विहिते इकारस्य एकारो गुणः । हे शब्दस्य प्राक्प्रयोगः । अत्र शिष्टसंमतिमाह । उक्तं च वृद्धैः । संबोधने० इति । तु इत्यवधारणे । माध्यंदिनिराचार्यः उशनसः उशनस्शब्दस्य संबोधने आमंत्रणे सिविषये त्रिरूपं रूपत्रयं वष्टि अभिलषति वाञ्छति वा कथयति । किं तत् त्रिरूपम् । सांतं सकारांतम् यथा-उशनस् ( हसेपः० । स्तो० ) हे उशनः । तथा नांतं नकारांतम्-उशनन् । तथा अदंतम् अकारांतम्-हे उशन इति । तु पुनः । इगंते इकारोकारऋकारांते नपुंसके धिविषये विकल्पेन गुणं वष्टि कथयति । यतः प्रक्रियाकौमुद्याम् । इउण् ऋलक् एते इक्संज्ञाः । यथा-हे अस्थे-हे अस्थि । हे वारे-हे वारि । हे मधो-हे मधु । हे कर्त्तः-हे कर्त्तृ । कथंभूतो माध्यंदिनिः । व्याघ्रपदां व्याघ्रपदगोत्रीयविप्राणां मध्ये वरिष्ठो गरिष्ठः श्रेष्ठः ।१-२।२-२ ( ईमौ ) इति औस्थाने ई । सूत्रम् । (नामिनः०) नामिनः ६-१ । स्वर० (स्तो०) स्वर० ७-१ ( अ इ ए ) द्विपदम् । नाम्यंतस्य नपुंसकलिंगस्य नुमागमो भवति स्वरे परे । अत्र विभक्तिसंबंध्येव स्वरो ग्राह्यः । तेन दधि आनयेत्यत्र न नुम् । अनेन नुमागमः । स्वर० । बहुत्वे कुलवत् ( जश्शसोः शिः । नुमयमः । नोप० ) दीर्घत्वे इकारस्य ईकारः । तृतीयादौ हसादौ अविशेषः । स्वरादौ । सूत्रम् ( अच्चास्थ्नां शसादौ ) अत् १-१ ( हसे० ) च १-१ । अव्य० ( स्तोः श्चु० ) स्वर० । अस्थि ६-३ ( अच्चास्थ्नां० ) इति नुमागमः इकारस्य अकारः ( अल्लोपः स्वरे० ) स्वर० । मध्ये ( सवर्णे० ) त्रिपदम् । शस् आदिर्यस्यासौ शसादिः तस्मिन् ७-१ ( ङेरौ डित् ) टिलोपः । स्वर० । क्वचित्तु 'टादौ' इति पाठः । तत्र टा आदिर्यस्य स टादिः । शसोऽग्रतः अर्थात् टादिः । यद्वा । गौणत्वे प्रियास्थ्नः शुनकान्, प्रियदध्नश्च पुरुषान् । इत्यादिप्रयोगसिद्ध्यर्थं शसो ग्रहणं युक्तम् । अस्थ्यादीनाम् अस्थि-दधि-सक्थि-अक्षिशब्दानां शसादौ स्वरे परे नुमागमो भवति इकारस्य च अकारः । अनेन स्वरादौ सर्वत्र नुम् इकारस्य च अकारः ( नामिनः स्वरे ) इत्यनेन एव चेन्नुम् क्रियते तदा इकाराभावे जाते निमित्ताभावे नैमित्तिकस्याप्यभावः इति नुम्लोपः स्यादतः ( अच्चास्थ्नाम् ) इति नुम्करणं पुनरुक्तये न । सूत्रम् ( अल्लोपः स्वरे० ) अतः अकारस्य लोपः अल्लोपः १-१ ( स्तो० ) स्वर० ७-१ (अ इ ए) अम्वयुक्तः म् च वश्च म्वौ ताभ्यां युक्तः संयोगः म्वयुक्तः न म्वयुक्तः अम्वयुक्तः तस्मात् ५-१ ( ङसिरत् । सवर्णे० ) पश्चात् ( एदोतोऽतः )

शस् आदिर्यस्य स शसादिः तस्मिन् ७-१ ( ङेरौ ङित् ) टिलोपः ( चपाच्छः शः ) सूत्रं सिद्धं चतुष्पदम् । अत्र तु टादौ स्वरे परे एव अकारस्य लोपो भवति । शस्ग्रहणं तु प्रियास्थ्नः शुनकान् पश्य, तथा राज्ञ इत्यादिप्रयोगसिद्ध्यर्थं नांतस्य नकारांतस्योपधायाः उपधाभूतस्य अकारस्य लोपो भवति शसादौ स्वरे । मकारवकारसंयोगादुत्तरस्याकारस्य लोपो न भवति । यथा आत्मनः । आत्मना । यथा च । यज्वनः । यज्वना । अनेन स्वरादौ अकारस्य लोपः । स्वर० । अस्थ्ना । अस्थिभ्याम् । अस्थिभिः । अस्थ्ने । ङौ अल्लोपविशेषमाह । ( वेङ्योः ) वा२ -१ ( अव्यया० ) ईश्च ङिश्च ईङी तयोः ७-२ । ( इ यं स्वरे ) स्वर० ( स्तो० ) पश्चात् (अ इ ए) द्विपदं सूत्रम् । नांतस्य नकारांतस्य शब्दस्य ईति औस्थाने जाते ईकारे परे ङौ च सप्तम्येकवचने परे च वा अकारस्य लोपो भवति । ईकारे परे तु । अह्नी–अहनी । इत्यादौ ज्ञेयम् । ङौ परे अनेन वा अल्लोपः । अस्थ्नि–अस्थनि । एवं दधि–सक्थि–अक्षिशब्दाः । दधि । दधिनी । दधीनि । पुनरपि । दधि । दधिनी । दधीनि । दध्ना । दधिभ्याम् । दधिभिः । दध्नि–दधनि । एवं सक्थिशब्दः ऊरुवाची । सक्थि, सक्थिनी, सक्थीनि २ । अक्षिशब्दो नेत्रवाची । अक्षि, अक्षिणी, अक्षीणि २ । अक्ष्णा । अक्षिभ्याम् । अक्षिभिः । इत्यादि ॥

**नपुंसकस्य** ॥ नपुंसकस्य ह्रस्वो भवति ( नपुंसकात्स्यमोर्लुक् ) ग्रामणि कुलम् । स्वरादौ ( नामिनः स्वरे ) इति नुमागमः । (ईमौ) ग्रामणिनी । ग्रामणीनि २ । ( नामिनः स्वरे ) हे ग्रामणे· हे ग्रामणि ।

**टादावुक्तपुंस्कं पुंवद्वा** ॥ उक्तपुँस्कं नाम्यंतं नपुंसकलिंगं टादौ स्वरे परे पुंवद्वा भवति ॥ " एक एव हि यः शब्दस्त्रिषु लिंगेषु वर्तते । एकमेवार्थमाख्याति ह्युक्तपुंस्कं तदुच्यते" ॥ १ ॥ ततः । ग्रामण्या-ग्रामणिना । ग्रामणिभ्याम् । ग्रामणिभिः । ग्रामण्ये· ग्रामणिने । ग्रामणिभ्याम् । ग्रामणिभ्यः । ग्रामण्यः-ग्रामणिनः । ग्रामणिभ्याम् । ग्रामणिभ्यः । ग्रामण्यः-ग्रामणिनः । ग्रामण्योः-ग्रामणिनोः । [ नुमंतस्यामि दीर्घः ] ग्रामणीनाम् । ग्रामण्याम्-ग्रामणिनि । ग्रामण्योः-ग्रामणिनोः । ग्रामाणिषु । सोमपम् । कुलम् । सोमपे । सोमपानि । पुनरपि । सोमपम् । सोमपे । सोमपानि । सोमपेन । सोमपाभ्याम् । सोमपैः । इत्यादि पूर्ववत् ॥

---

१ अल्लोपः स्वरे इति सूत्रप्राप्तनित्याकारलोपे विकल्पविशेषमाहेत्यर्थः ।

ईकारांतो ग्रामणीशब्दः । सूत्रम् ( नपुंसकस्य ) नपुंसक ६–१ ( ङस्य ) ह्रस्व १–१ ( स्त्रो० ) नपुंसकलिंगे वर्त्तमानस्य दीर्घस्वरांतस्य शब्दस्य सर्वविभक्तिषु ह्रस्वो भवति । ग्रामणी १–१ । २–१ अनेन सर्वत्र ह्रस्वः । ई इत्यस्य इ ( नपुंसकात्स्यमोर्लुक् ) १–२ । २–२ । ह्रस्वः ( ईमौ । नामिनः स्वरे ) स्वर० । १–३ २–३ ह्रस्वः ( नामिनः स्वरे । नोपधायाः ) तृतीयादौ ह्रस्वत्वे कृते हसादौ अविशेषः स्वरादौ तु विशेषः । श्लोकः । 'एक० ।' यः कश्चित् एक एव शब्दः आप्प्रत्ययादिरहितः सन् त्रिषु लिंगेषु पुंस्त्रीनपुंसकेषु वर्त्तते । एकमेव अर्थम् आख्याति वक्ति एकार्थवाचक एव भवति तद्भाषितपुंस्कम्—उक्तपुंस्कमुच्यते । ततः किं कर्त्तव्यमित्याह ( टादावुक्तपुंस्कं पुंवद्वा ) टादौ ७–१ ( ङेरौ ङित् ) उक्तपुंस्कम् १–१ । पुंवत् ४–१ । वा ३–१ ( अव्यया० ) उक्तः पुमान् पुँल्लिंगो येन तदुक्तपुंस्कम् । अर्थरूपाभ्यां तुल्याकारो यः शब्दः पुंसि नपुंसके च वर्त्तमानः सः उक्तपुंस्कः । तथावस्थितं निर्दिष्टपुँल्लिंगम् एवंभूतं नाम्यंतं नपुंसकं टादौ स्वरादौ विभक्तौ परतः पुंवद्वा भवति । नपुंसकलिंगेऽपि वा पुँल्लिंगवत् स्यात् । विकल्पेन पुँल्लिंगवद्रूपाणि स्युः । अनेन तृतीयादौ स्वरादौ वा ह्रस्वः । पक्षे पुँल्लिंगवत्त्वात् ह्रस्वाभावे सेनानीशब्दवत् ( य्वौ वा ) इति यकारः । ह्रस्वत्वे ( नामिनः स्वरे ) इति नुमागमः । ग्रामण्या—ग्रामणिना । ग्रामणिभ्याम् । ग्रामणिभिः । ग्रामण्ये—ग्रामणिने । ग्रामणिभ्याम् । ग्रामणिभ्यः । ग्रामण्यः । पुंवद्भावो न ( य्वौ वा ) ग्रामणिनः । आमि कृते ( नामिनः स्वरे ) विकल्पे पुँल्लिंगवद्रूपाणि स्युः । आमि पुंवद्भावे एकस्मिन्पक्षे ( य्वौ वा ) ग्रामण्य म् । द्वितीयपक्षे ( सेनान्यादीनां वामो नुट्० ) इति नुटि कृते ( नामि ) इति दीर्घत्वम् । ग्रामणीनाम् । नपुंसकपक्षे ( नामिनः स्वरे ) इति नुमि कृते ( नुडागमः ) इति सूत्रेण नुटोऽभावे कृते ( नामि ) इति दीर्घत्वं न संभवति तेन नुमंतस्यामि दीर्घः । पक्षद्वयेऽपि ग्रामणीनाम्, इत्येव रूपसिद्धिः । परम् ( नुडानः ) इति नुटो नित्यत्वात् ( नामिनः स्वरे ) इति न भवति । ततो नुमंतस्यामि दीर्घ इत्यपि व्यर्थमेव पुनश्चित्यम् । उक्तं च हैमव्याकरणे । ( अनाम्स्वरे नोंतः ) नाम्यंतस्य नपुंसकस्य संबंधिनि आमवर्जिते स्यादौ स्वरे परे नोंतो भवति । अनामिति किम् । वारीणाम् । कर्तॄणाम् । त्रपूणाम् । एषु नुमागमाभावे नामि सति ( दीर्घो नाम्यतिसृचतसृ ) इत्यादिना दीर्घः सिद्धः । ग्रामण्या ( आम्ङेः । य्वौ वा ) ग्रामणिनि । ग्रामण्योः—ग्रामणिनोः । ग्रामणिषु । एवं सुश्रि कुलम् । तेन सुश्रिणा—सुश्रिया । सुश्रिणे—सुश्रिये । एवं पटुने—पट्वे । इत्यादि । एवं सेनानिसुधियवद्धखलपुप्रमुखाः । आकारांतः सोमपाशब्दस्तस्य ( नपुंसकस्य ) इति सूत्रेण ह्रस्वे कृते । प्रथमाद्वितीययोः कुलशब्दवत् । ( अतोम् ) सोमपम् १–१ । १–२ सोमपे ( ईमौ ) १–३ ( जश्शसोः शिः । नुमयमः । नोपधायाः ) सोमपानि । पुनरपि

द्वितीयायाम् । सोमपम् । सोमपे । सोमपानि । टादौ ( नपुंसकस्य ) इति ह्रस्वे कृते ( टेन । अ इ ए ) सोमपेन । सोमपाभ्याम् ( अद्भि ) सोमपैः ( भ्यः ) । सोमपाय । सोमपाभ्याम् । सोमपेभ्यः । सोमपात् । सोमपाभ्याम् । सोमपेभ्यः । सोमपस्य । सोमपयोः । सोमपानाम् । सोमपे । सोमपयोः । सोमपेषु । संबोधने ( नपुंसकस्य ) इति ह्रस्वे कृते कुलशब्दवत् साधना । ( समानाद्धेर्लोपोऽधातोः ) सोमपाशब्दस्य उक्तपुंस्कत्वेपि नाम्यन्तत्वाऽभावात् तृतीयादौ स्वरादौ वा पुंवत् रूपाणि न भवंति । इकारांतो वारिशब्दः। प्रथमाद्वितीययोः अस्थिशब्दवत् । वारि, वारिणी, वारीणि २ । तृतीयादौ ( नामिनः स्वरे ) इति नुमागमः । ( ष्रुन्नों० ) स्वर० । वारिणा । वारिभ्याम् । वारिभिः ३ । वारिणे । वारिभ्याम् । वारिभ्यः ४ । वारिणः । वारिभ्याम् । वारिभ्यः ५ । वारिणः । वारिणोः । आमि ( नुडामः ) इति नुट् ( नामि ) इति दीर्घः । वारीणाम् ६ । वारिणि । वारिणोः । वारिषु ७ । संबोधने ( स्वॄर्णा नपुंसके धौ वा गुणः ) हे वारि-हे वारे । इत्यादि । शेषं सुगमम् । ऐकारांतः सुरैशब्दः अतिरैशब्दश्च ( नपुंसकस्य ) इति ह्रस्वे कृते वारिशब्दवत् । [ ह्रस्वादेशे संध्यक्षराणामिकारोकारौ च वक्तव्यौ ] सुष्ठु रा धनम् यस्य तत् सुरि । सुरि, सुरिणी, सुरीणि २ । सुरिणा-सुराया । सुरिभ्याम् । सुरिभिः । इत्यादि । एवं सुष्ठु नौर्यस्य तत् । सुनु, सुनुनी, सुनूनि २ । सुनुना-सुनावा । सुनुने-सुनावे । इत्यादि ॥

उकारांतो मधुशब्दः । मधु, मधुनी, मधूनि २ । इत्यादि । तस्यापि स्वरे नुमागमः ॥

उकारांतो मधुशब्दः । स च चैत्रमासवाची वसंतवाची मधुदैत्यवाची वा पुंलिंगे भवति । क्षौद्रमद्यमकरंदवाची तु नपुंसकलिंगे भवति । अत एवार्थभेदादुक्तपुंस्कं न । किंतु तस्य वारिशब्दवत् साधना । "पीलुर्वृक्षः फलं पीलु पीलुने न तु पीलवे ॥ वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः" ॥ एवम् उकारांतो वस्तुशब्दः । वस्तु, वस्तुनी, वस्तूनि २ । एवं वास्तु, वास्तुनी, वास्तूनि २ । अंबु, अंबुनी, अंबूनि २ । सानु, सानुनी, सानूनि २ । जानु, जानुनी, जानूनि २ । ऊकारांतः खलपूशब्दः। (नपुंसकस्य) इति ह्रस्वः । खलपु, खलपुनी, खलपूनि २ । इत्यादि मधुशब्दवत् ॥

ऋकारांतः कर्तृशब्दः ।(नपुंसकात्स्यमोर्लुक्) कर्तृ (ईमौ । ष्रुन्नों०) कर्तृणी, कर्तॄणि २ । कर्तृणा । ( ऋ रम् ) कर्त्रा । कर्तृभ्याम् । कर्तृभिः । कर्तृणे-कर्त्रे । कर्तृभ्याम् । कर्तृभ्यः । ( ऋतो ङ उः ) स च ङित् ( ङिति टेः ) कर्तुः-कर्तृणः । कर्तृभ्याम् । कर्तृभ्यः । कर्तुः-कर्तृणः । कर्त्रोः-कर्तृणोः । कर्तॄणाम् । कर्तरि-कर्तृणि । कर्त्रोः-कर्तृणोः । कर्तृषु । हे कर्त्तः-हे कर्तृ । हे कर्तृणी । हे कर्तॄणि ।

ऐकारान्तः । अतिरैशब्दः । रायमतिक्रांतं कुलमिति विग्रहे।( संध्यक्षराणामिदुतौ ह्रस्वादेशः ) इति ह्रस्वत्वं च । अतिरि, अतिरिणी, अतिरीणि२। शेषं वारिशब्दवत् । ओकारांतो नपुंसकलिंगः उपगोशब्दः । उपगता गावो यस्य तत् । उपगु । उपगुनी । उपगूनि । शेषं मधुशब्दवत् । औकारांतः अतिनौशब्दः । नावमतिक्रांतं यज्जलं तत् । अतिनु, अतिनुनी, अतिनूनि २ । शेषं पूर्ववत् ॥ इति स्वरांताः नपुंसकलिंगाः ॥ इति स्वरांताः समाप्ताः ॥

कर्तृशब्दस्य प्रथमाद्वितीययोः अस्थिशब्दवत् साधना । कर्तृ, कर्तृणी, कर्तॄणि२ । तृतीयादौ स्वरादौ उक्तपुंस्कत्वात् रूपद्वयम् । तत्र एकत्र पुंवत् । तत्र (ऋ रम्)अन्यत्र ( नामिनः स्वरे ) इति नुमागमः । कर्त्रा–कर्तृणा ३–१ । कर्त्रे–कर्तृणे ४–१ । कर्तुः-कर्तृणः ५–१ । कर्तुः–कर्तृणः ६–१ । आमि ( नुडामः ) इति नुट् ( नामि ) इति दीर्घः । कर्तॄणाम् । कर्तरि–कर्तृणि ७–१ । धौ वा । गुणः अर् । हे कर्तः –हेकर्तृ । शेषं कंठ्यम् । ऐकारांतः अतिरैशब्दः । ( नपुंसकस्य ) इति ह्रस्वे कृते इकारे वारिशब्दवत् । ओकारांतः उपगोशब्दः । उपगोर्ह्रस्वत्वे । उपगु, उपगुनी, उपगूनि २ । पुँल्लिंगपक्षे उपगवा इत्यादि । औकारांतः अतिनौशब्दः । अतिनु।अतिनुनी। अतिनूनि २ । इत्यादि स्वयमूह्यम् ॥

इति स्वरांतनपुंसकलिंगसाधनम् ॥

---

## अथ हसांताः पुँल्लिंगाः ९.

अथ हसांताः पुँल्लिंगाः प्रदर्श्यन्ते । तत्र हकारांतोऽनडुहशब्दः । नामसंज्ञायां स्यादयः [ पंचस्वनडुह आमागमो वक्तव्यः ] सावनडुहः ॥ अनडुह्शब्दस्य सौ परे नुमागमो भवति । संयोगांतस्य लोपः॥संयोगांतस्य रसे पदांते च लोपो भवति सभिन्नस्य रान्न। ( हसेपः सेर्लोपः । उ वम् ) इति वत्वम् । लोपविधिसामर्थ्यान्न दत्वम् । अनड्वान् । अनड्वाहौ । अनड्वाहः । धावम् ॥ अनडुह्शब्दस्य धौ परे अमागमो भवति । हे अनड्वन् । हे अनड्वाहौ । हे अनड्वाहः । अनड्वाहम् । अनड्वाहौ । अनडुहः ।

अनडुहा । वसां रसे ॥ वसु स्रंस् ध्वंस् भ्रंस् अनडुह् इत्येतेषां दो भवति रसे पदांते च । अनडुद्भ्याम् । अनडुद्भिः । अनडुहे । अनडुद्भ्याम् । अनडुद्भ्यः । अनडुहः । अनडुद्भ्याम् । अनडुद्भ्यः। अनडुहः ।अनडुहोः । अनडुहाम् । अनडुहि । अनडुहोः । ( खसे चपा झसानाम् ) अनडुत्सु ॥

अथ हसांतपुंल्लिंगसाधनं किंचिदुच्यते। तत्र प्रथमं हांतान् दर्शयति । अत्र हकारांतः अनडुह्शब्दः । तस्य नामसंज्ञायां सत्यां स्यादयो विभक्तयो दीयंते । ततः ( पंचस्वनडुह आमागमो वक्तव्यः ) अनडुह्शब्दस्य स्यादिषु पंचसु वचनेषु परेषु शौ च आम् आगमो भवति । केचित्तु ( अनडुहश्च ) इति सूत्रेण (चतुरनडुहोराम्शौ च) इति च सूत्रेण आमागममिच्छंति स्त्रीलिंगे च विकल्पेनामागममिच्छंति । अनड्वाही-अनडुही । इति । अनेन पंचसु आम् ( मिदंत्यात्स्वरात्परो वक्तव्यः ) इति डु अग्रे आ ( उ वम् ) स्वर०। अनड्वाह् सि इति स्थिते। सूत्रम् (सावनडुहः) सि ७-१ ( डेरौडित् ) टिलोपः । स्वर० । अनडुहः ६-१ । स्वर० । ( स्रो० ) पश्चात् ( औ आव् ) सिद्धम् । वृत्तिः कंठ्या । अनेन सौ परे नुमागमः । हस्य पूर्वम् ( हसेपः० ) सूत्रम् ( संयोगांतस्य लोपः ) संयोगस्य अंतः संयोगांतस्तस्य संयोगांतस्य ६-१ ( ङस्य ) लोपः १-१ ( स्रो० ) संयोगाक्षरस्य योऽतः संयुक्तानामक्षराणां योऽत्यो वर्णस्तस्य लोपो भवति रसे पदांते च ।चकाराद्रकारात् अग्रे संयोगांतस्य लोपो न भवति। यथा ऊर्क्-ऊर्ग् । ऊर्जा । ऊर्ज्जः । अनेन सौ परे हकारस्य लोपः । अनड्वान् इति सिद्धम् । अत्र नुमविधानसामर्थ्यादेव (वसां रसे) इति दत्वं न भवति । यद्वा कृतेपि दकारे संयोगांतस्य लोपान्न रूपभेदः । अनः शकटं वहतीति अनड्वान् वृषभः। (वहेः क्विवनसो डश्च ) इति ( यजां यवराणाम् ) इति संप्रसारणं वस्य उः । स्वरादौ । स्वर० । धौ तु । सूत्रम् ( धावम् ) धि ७-१ ( डेरौ डित् ) टिलोपः । स्वरहीनं० । अम् १--१ ( हसे० ) पश्चात् ( औ ) ( आव् ) स्वर० । अनडुह्शब्दस्य धौ परे अमागमो भवति । थामोपवादः अनेन अम [ मिदंत्या० ] ( सावनडुहः ) इति नुम् ( हसे० । संयोगांतस्य लोपः ) द्वित्वबहुत्वयोरामागमः ( उ वम् ) स्वर० । द्वितीयादौ स्वरादौ । स्वर० । हसादौ । सूत्रम् ( वसां रसे ) वस् ६-३ । स्वर० । रस ७-१ ( अ इ ए ) सिद्धम् । वसामिति बहुवचननिर्देशात् वसादयः वस् इति क्सु प्रत्ययस्य वस ( विदेर्वसुः ) इत्यपि वस । स्रंसु, ध्वंसु, अधः पतने । अनडुहशब्दो गोवृषभवाची । एतेषां रसे पदांते च दत्वं भवति ।

[ षष्ठीनिर्दिष्टस्यादेशोंऽतस्य भवति ] अनेन हस्य दः । भकारादौ । स्वर० । सुपि ( खसे चपा० ) दस्य तः । स्वर० । अनडुत्सु । सिद्धोऽनडुह्शब्दः । संमूध्वंसोस्तु सकारांतावसरे । उषास्रत् । उषास्रसौ । उषास्रसः । उषास्रद्भ्याम् । एवं पर्णध्वत् । पर्णध्वसौ ॥

गोदुह्शब्दस्य भेदः ॥ **दादेर्घः** । दादेर्धातोर्हकारस्य घत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदांते च । गोदुह् सि इति स्थिते । **आदिजबानां झभांतस्य झभाः स्ध्वोः** ॥ धातोर्झभांतस्यादौ वर्तमानानां जबानां झभा भवंति शकारे ध्वशब्दे च परे नाम्नश्च रसे पदांते च। **वावसाने** ॥ अवसाने वर्तमानानां झसानां जबा भवंति चपा वा । गोधुक्—गोधुग् । गोदुहौ । गोदुहः । हे गोधुक् हे गोधुग् । हे गोदुहौ । हे गोदुहः । गोदुहम् । गोदुहौ । गोदुहः । गोदुहा । भकारादौ ( दादेर्घः )इति घत्वे आदिजबस्य दकारस्य झभे धकारे च कृते ( झबे जबाः ) गोधुग्भ्याम् । गोधुग्भिः । गोदुहे । गोधुग्भ्याम् । गोधुग्भ्यः । गोदुहः । गोधुग्भ्याम् । गोधुग्भ्यः । गोदुहः। गोदुहोः । गोदुहाम् । गोदुहि । गोदुहोः।गोधुक् सु इति स्थिते । ( खसे चपा झसानाम् ) इति कत्वम् । ( किलात्षः सः कृतस्य ) इति षत्वम् । कषसंयोगे क्षः । गोधुक्षु ॥

हकारांतत्वेपि अनडुह्शब्दापेक्षया गोदुह्शब्दस्य भेदः कश्चिद्विशेषोऽस्ति । गां दोग्धीति गोधुक् । दुह् प्रपूरणे । गोपूर्वः क्विप्प्रत्ययांतः । सूत्रम् ( दादेर्घः ) दकारः आदिर्यस्य स दादिस्तस्य दादेः ६—१ ( ङिति । ङस्य । स्रो० ) घ १—१ ( स्रो० । नामि० ) जल० । सिद्धं द्विपदम् । दादेरिति दकारादेर्धातोर्हकारस्य घत्वं भवति आख्याते झसे परे नाम्नस्तद्धिकारस्य रसे परे अथवा पदांतविषये । अनेन भकारादौ सुपि च हस्य घः । सूत्रम् ( आदिज० ) आदौ वर्तमाना जबा आदिजबास्तेषाम् आदिजबानाम् ६—३ ( नुडामः । नामिनः० ) स्वर० ( मोनु० ) झभा अंते यस्य स झभांतस्तस्य ६—१ (ङसस्य) झभाः १—३ । ( सवर्णे० । स्रो०) स् च ध्व् च स्ध्वौ तयोः स्ध्वोः ७—२ । स्वर० ( स्रो० ) चतुष्पदमिदं सूत्रम् । झभांतस्य धातोः आदौ वर्तमानानां जबानां झभा भवंति । जडदगबानां क्रमेण झढधघभा भवंति सकारे ध्वे च परे आख्याते आत्मनेपदे से ध्वे ध्वसंबंधिनि सकारे ध्वशब्दे च परे नाम्नश्च रसे पदांते च । केचित्तु जभतीति जप् । जभौ । जभः इत्यादौ प्रयोगे

जकारस्य झकारासंभवात् आदिजबानां ढभांतस्य ढभाः स्ध्वोः इत्येवं सूत्रं पठंति । अनेन यत्र रसप्रत्याहारस्तत्र दस्य धः । सूत्रम् ( वावसाने ) वा ३-१ । ( अव्य० ) अवसान ७-१ ( अ इ ए । सवर्णे० ) सिद्धं द्विपदम् ( विरामोऽवसानम् ) अग्रे वर्णानामभावो अवसानं तस्मिन् अवसाने अंते वर्तमानानां झभानां जबा भवंति पक्षे विकल्पेन चपा भवंति । अनेन सौ धौ च रूपद्वयं विधाय ( हसे पः सेः० ) इति सिलोपे कृते एकत्र घस्य कः । अन्यत्र गः । स्वरादौ । स्वर० । भकारादौ विभक्तौ तु ( दादेर्घः ) इति घत्वे कृते ( आदिजबानां० ) इति दस्य धः ( झबे जबाः ) घस्य गः ( स्वर० ) सुपि ( दादेर्घः । आदिजबानां० । खसे चपा झसानाम् । ( किलात्षः सः कृतस्य ) इति षत्वम् ( कषसंयोगे क्षः ) ककारषकारसंयोगे क्षो भवति । गोधुक्षु इति सिद्धम् ॥

मधुलिह्शब्दस्य विशेषः । हो ढः ॥ धातोर्हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदांते च । ( वावसाने ) इति ढकारस्य डकारटकारौ । मधुलिट्-मधुलिड् । मधुलिहौ । मधुलिहः । हे मधुलिट्-हे मधुलिड् । हे मधुलिहौ । हे मधुलिहः । मधुलिहम् । मधुलिहौ । मधुलिहः । मधुलिहा । मधुलिड्भ्याम् । मधुलिड्भिः । इत्यादि ॥ तुरासाह्शब्दस्य भेदः । सहेः षः साढि ॥ साढिरूपे सहेर्धातोः सकारस्य षकारादेशो भवति । त्वरं सहतीति तुराषाट्-तुराषाड् । इत्यादि ॥

लिह् आस्वादने । मधुपूर्वः क्विप्प्रत्ययान्तः । मधु मकरंदं पुष्परसं लेढीति मधुलिट् भ्रमरः । मधुलिह्शब्दस्य रसे पदांते च विशेषः । सूत्रम् । ( हो ढः ) ह् ६-१ । स्वर० ( सो० । हवे । उ ओ ) ढः १-१ ( सो० ) सिद्धम् । धातुसंबंधिनो हकारस्य झसे परे ढत्वं भवति नाम्नश्च नामत्वं प्राप्तस्य रसे परे पदांते च । उभयोः १-१ । रूपद्वयम् । उभयत्रापि हस्य ढः ( हसे० । वावसाने ) एकत्र टः अन्यत्र डः । स्वरादौ । स्वर० । भकारादौ ( हो ढः ) इति ढत्वे ( झभे जबाः ) ढस्य डः । स्वर० । सुपि ( हो ढः । खसे च० ) ढस्य टः । स्वर० । मधुलिट्सु इत्यत्र क्वचिदपदान्तेपि पदांतताश्रयणीयेति न्यायात् टोरंत्यादिति सूत्रेण सस्य षत्वाभावः । एवं तुराषाट्-पृतनाषाट्-हव्यवाट्-मघवाड्-भारवाट्प्रभृतयः ॥

मित्रद्रुह्शब्दस्य भेदः । [ द्रुहादीनां घत्वढत्वे वा ] द्रुहादीनां धातूनां घत्वढत्वे वा भवतः धातोर्झसे परे नाम्नश्च रसे पदांते च । मित्रध्रुक्-मित्रध्रुग् । मित्रध्रुट्-मित्रध्रुड् । मित्रद्रुहौ । मित्रद्रुहः ।

धावच्चैवम् । मित्रद्रुहम् । मित्रद्रुहौ । मित्रद्रुहः । मित्रद्रुहा । ( झबे जबाः ) मित्रध्रुग्भ्याम्–मित्रध्रुड्भ्याम् । मित्रध्रुक्षु–मित्रध्रुट्सु इत्यादि । एवं तत्त्वमुहादयः ॥

हकारांतानामपि द्रुहादीनां वाक्यांतरे विशेषमाह । ( द्रुहादीनां घत्वढत्वे वा ) द्रुहादीनामिति द्रुहमुहस्नुहस्निहां रसे पदांते च घत्वढत्वे वा भवतः । विकल्पेन घत्वे कृते । द्वितीयपक्षे ढत्वं भवति । द्रुह् जिघांसायाम् । मुह् वैचित्ये । स्नुह् उद्गिरणे क्षरणे । स्निह् प्रीतौ उद्गिरणे च । णश् अदर्शने । एते द्रुहादयः । अत्र द्रुहो दकारादित्वात् ( दादेर्घः ) इति प्राप्तस्य घत्वस्य विकल्पः । अन्येषां तु अप्राप्तस्य घत्वस्य विकल्पः इत्यर्थः । मित्राय द्रुह्यतीति मित्रद्रुह् । सर्वत्रापि १–१ रूपद्वये ( दादेर्घः ) इति घः । रूपद्वये च ( होढः ) इति ढः ( आदिजबानां० ) इति सर्वत्र द्रुस्थाने ध्रु ( हसेपः० । वावसाने ) घस्य यथासंख्यं कगौ । ढस्य च टडौ । मित्रध्रुक्–मित्रध्रुग्–मित्रध्रुट्–मित्रध्रुड् ४ । एवं सिविषये रूपचतुष्टयम् । मित्रद्रुहौ । मित्रद्रुहः । भकारादौ सुपि च रूपद्वयम् । तत्र एकत्र घत्वे कृते अन्यत्र ढत्वे कृते ( आदिजबानां० ) इति द्रु इत्यस्य ध्रु भकारादौ ( झबे जबाः ) घस्य गः ढस्य च डः। मित्रध्रुग्भ्याम्–मित्रध्रुड्भ्याम् । मित्रध्रुग्भिः–मित्रध्रुड्भिः । सुपि च ( खसे च० ) इति घस्य कः । ढस्य च टः । कत्वे ( किला० ) ( कषसंयोगे क्षः ) मित्रध्रुक्षु । टत्वे । स्वर० । मित्रध्रुट्सु । धौ सिवत् । एवं तत्त्वमुहपुत्रस्निहक्षीरस्नुहोपि साध्याः । तत्त्वं प्रति मुह्यतीति तत्त्वमुट् । हांतानां साधनमेतत् । यकारवकारांता अप्रसिद्धाः ॥

रेफांतश्चतुर्शब्दो नित्यं बहुवचनांतः। चतुराम्शौच॥चतुर्-शब्दस्य आमागमो भवति धिवर्जितेषु पंचसु परेषु शौ च [ मिदंत्यात्स्वरात्परो वक्तव्यः ] चत्वारः । चतुरः। चतुर्भिः। चतुर्भ्यः२।रः संख्यायाः॥ रेफांतसंख्यायाः परस्यामो नुडागमो भवति । णत्वं द्वित्वं च । चतुर्णाम् । चतुर्षु ॥

रांतानाह । रेफांतश्चतुर्शब्दो नित्यं बहुवचनांतः । १–२ सूत्रम् । ( चतुरा० ) चतुर् ६–१ । सांकि० आम् १–१ ( हसे० ) शि ७–१ ( ङेरौ० ) टिलोपः । च १–१ ( अव्य० ) चतुर्० । पंचसुग्रहणं समासांतत्वसूचकम् । यथा प्रियाश्चत्वारो यस्यासौ प्रियचत्वाः । प्रियचत्वारौ । प्रियचत्वारः । हे प्रियचत्वाः । इत्यादि ज्ञेयम् । अन्यथा बहुत्वे पंचस्विति पदं न संभवति। शौ चेति पदकथनेन नपुंसके (जश्शसोः शिः ) इति शौ परेऽपि आम् आगमो भवतीत्यर्थः । ( मिदंत्यात्स्वरात्परो वक्तव्यः)

रकारात्पूर्वम् । आ ( उ वम् ) स्वर० ( स्त्रो० ) ३-३ । ४-३ । ५-३ जल० । ६-३ । सूत्रम् ( रः संख्यायाः ) र् ५-१ । स्वर० ( स्त्रो० ) संख्या ५-१ । ( ङितां यट् । सवर्णे० ) रेफांतो यः संख्यावाची चतुरशब्दस्तस्मात्परस्यामो नुडागमः स्यात् । अनेन नुट् ( ष्रुर्नो० । रहाद्यपो० ) जलतुं० । चतुर्णामिति सिद्धम् । ७-३ ( क्विला० ) जल० । चतुर्षु ( दोषाम् ) इति सूत्रेण कृतस्यैव रेफस्य सप्तमीवहुवचने परे विसर्गो नान्यस्येति वक्तव्यम् । अतः चतुर्ष्वित्यत्र न विसर्गः । (चतुरनडुहोरम् संबुद्धौ )हे प्रियचत्वः । ल्नङणांता अप्रसिद्धाः ॥

नकारांतो राजन्शब्दः ( नोपधायाः ) इति पंचसु दीर्घः । **नाम्नो नो लोपशधौ ॥** नाम्नो नकारस्यानागमजस्य लोपश् भवति रसे पदांते चाधौ । चकारात्क्वचित् नाम्नो नकारस्य लोपश् न भवति । सुष्ठु हिनस्ति पापमिति सुहिन् । राजा । राजानौ । राजानः । अधाविति विशेषणात् । हे राजन् । हे राजानौ । हे राजानः।राजानम्। राजानौ । ( अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ । स्तोः श्चभिःश्चुः ) इति चुत्वे नकारस्य ञकारः । [ जञोर्ज्ञः ] जकारञकारयोः संयोगे ज्ञ इत्यक्षरं भवति । राज्ञः । राज्ञा । योगानामुभयतः संबन्धः लोपशि पुनर्न संधिरिति नियमात् ( अद्भि ) इत्यात्वं न भवति । राजभ्याम् । राजभिः ।राज्ञे । राजभ्याम् । राजभ्यः । राज्ञः । राजभ्याम् । राजभ्यः । राज्ञः । राज्ञोः । राज्ञाम् । राज्ञि ( वेङ्योः ) राजनि । राज्ञोः । राजसु । अधाविति विशेषणात् । हे राजन् । हे राजानौ । हे राजानः । एवं यज्वन्-आत्मन्-सुधर्मन्प्रभृतयः।यज्वा। यज्वानौ । यज्वानः । यज्वानम् । यज्वानौ। अम्वयुक्तादिति विशेषणात् अल्लोपो नास्ति । यज्वनः । यज्वना । इत्यादि ॥

नांतानाह । नकारांतो राजन्शब्दः । तस्य पंचसु वचनेषु ( नोपधायाः ) इति सूत्रेण दीर्घः । राजृ दीप्तौ । राजते इति राजा ( राजादेरन्) १-१ स् । सूत्रम् ( नाम्नो० ) नामन् ६-१ ( अल्लोपः स्वरे ) स्वर० ( स्त्रो० ) न् ६-१ । स्वर० ( स्त्रो० ) पश्चात् ( हवे । उ ओ ) लोपश् १-१ ( हसे० ) पश्चात् । ( हवे । उ ओ ) न धिः अधिस्तस्मिन अधौ ७-१ ( ङेरौ० ) टिलोपः । पश्चात् ( स्वर० )

चतुष्पदम् । नाम्न इति शब्दस्य संबंधिनो नकारस्य लोपश्च वर्णविरोधरूपो भवति । परम् अनागमजस्य शब्दान्तर्भूतस्यैव परं केनापि सूत्रेणागतस्य नस्य लोपश् न भवति रसे परे पदांते च । चकारात् सुहिन् । सुहिंसौ । सुहिंसः । प्रशान् इत्यादौ नकारस्य लोपो न धौ च लोपश् न भवति । अनेन सौ नस्य लोपः । राजा । राजानौ । राजानः । अधौ इति विशेषणात् धौ नस्य लोपश् न । हे राजन् । राजानम् । राजानौ । इति । शसि ( अल्लोपः स्वरे० ) इत्यकारलोपः ( स्तोः श्चुभिः श्चुः ) इति चुत्वे चवर्गे क्रियमाणे नकारस्य ञकारः । ततः ( जञोर्ज्ञः ) जश्च ञश्च जञौ तयोः जञोः जकारञकारयोर्योगे ज्ञो भवतीत्यर्थः । अनेन जञयोगे ज्ञः । स्वर० ( स्तो० ) टाविषयेऽप्येवम् । भकारादौ ( नाम्नो नो लोपशधौ ) ततः लोपशि पुनर्न संधिरिति कारणात् ( अद्भि ) इति सूत्रेण आकारो न भवति । राजभ्याम् । राजभिः । राज्ञे । ङौ ( वेङ्योः ) सुपि ( नाम्नो० ) एवं यज्वन्–आत्मन्–सुधर्मन्–सुपर्वन्–प्रभृतयोऽपि साध्याः । परं शसादौ अम्वयुक्तादिति विशेषणात् मकारवकारयुक्तत्वात् अल्लोपो नास्ति ( अल्लोपः स्वरे० ) इति न भवति । तेन यज्वनः । यज्वना इत्यादि । उक्षन्मूर्द्धन्शब्दौ तु राजन्वत् ॥

श्वन् युवन् मघवन् शब्दानां पंचसु राजन्शब्दवत्प्रक्रिया शसादौ तु विशेषः । श्वादेः[१] ॥ श्वादेर्वकार उत्वं प्राप्नोति शसादौ स्वरे परे तद्धिते ईपि ईकारे च । तद्धिते स्वरे तु न भवति । अत्र नियामकं पाणीनीयं सूत्रम् (श्वयुवमघोनामतद्धिते) तेन माघवनमिति । शुनः । शुना । श्वभ्याम् । श्वभिः । इत्यादि । युवन्शब्दे तु वकारस्योत्वे कृते ( सवर्णे दीर्घः सह ) यूनः । यूना । युवभ्याम् । युवभिरित्यादि । मघोनः । मघोना । मघवभ्यामित्यादि ॥

श्वन् युवन् मघवन् शब्दाः पंचसु राजन्वत्साध्याः । श्वा कुक्कुरवाची । युवा तरुणवाची । मघवा इंद्रवाची । इत्येतेषां शब्दानां पंचसु स्यादिषु वचनेषु राजन्शब्दवत्साधना । शसादौ तु विशेषस्तमेवाह । सूत्रम् ( श्वादेः ) श्वा आदिर्यस्य स श्वादिस्तस्य श्वादेः ६–१ ( ङिति । ङस्य । स्तो० ) श्वादेरिति श्वन्–युवन्–मघवन्शब्दसंबंधिवकारः उत्वमुकारभावं प्राप्नोतीति भावः । शसादौ स्वरे परे तद्धिते प्रत्यये ईपि ईकारे च । ईपि प्रत्यये परे तु शुनी यूनी मघोनी इति भवति । वकारेण सहितोऽकारः इति सस्वरस्यापि वकारस्य स्थाने उकारः ( स्वर० ) शसादौ सर्वत्र

---

१ अत्र वशोर्व उरित्यस्मात्सूत्रात् 'व उः' इत्यनुवृत्तेर्हेतोः 'श्वादे.' इत्येव सूत्रम् ।

उकारः । भकारादौ सुपि च ( नाम्नो नो० ) संबोधने राजन्शब्दवत् । श्वा । श्वानौ । श्वानः । श्वानम् । श्वानौ ( श्वादेः ) शुनः । शुना । श्वभ्याम् । श्वभिः । इत्यादि । युवा । युवानौ । युवानः । युवानम् । युवानौ । युवन्शब्दस्य शसादौ स्वरे (श्वादेः) इति उत्वे कृते ( सवर्णे० ) मघवन्शब्दे उकारे कृते ( उ ओ ) यूनः । यूना । मघोनः । मघोना । मघवभ्याम् । मघवभिरित्यादिरूपाणि ज्ञेयानि । तकारान्तमघवच्छब्दस्य तु मघवान् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्याम् । मघवद्भिः । इत्यादिरूपाणि ॥

**पथिन्शब्दस्य भेदः।इतोऽत्पंचसु ॥ पंचसु स्यादिषु परेषु पथ्यादीनामिकारस्याकारादेशो भवति।थो नुट्॥पथ्यादीनां थकारस्य नुडागमो भवति पंचसु स्यादिषु परेषु ।पन्थन् सि इति स्थिते।आ सौ॥ पथ्यादीनां टेरात्वं भवति सौ परे। पंथाः।पंथानौ । पंथानः । आत्वविधानान्न सेर्लोपः । हे पंथाः । पंथानम् । पंथानौ । पथां टेः॥ पथ्यादीनां टेर्लोपो भवति शसादौ-स्वरे परे। पथः । पथा । पथिभ्याम् । पथिभिरित्यादि । एवं मथिन्ऋभुक्षिन्शब्दौ ॥**

पथिन्शब्दस्य भेदः । सूत्रम् ( इतोऽत्पंचसु ) ६-१ । स्व० ( स्रो० ) अत् १-१ । ( हसे० । अतोऽत्युः । उ ओ० । एदो० ) पंचन् ७-३ ( नाम्नो० ) सिद्धम् । स्यादिषु पंचसु वचनेषु परेषु पथ्यादीनां पथिन्मथिन्ऋभुक्षिन्शब्दानामिकारस्य अकारो भवति । अनेन सिऔजस्अम्औवचनेषु थि इत्यस्य था । सूत्रम् ( थो नुट् ) थः ६-१ स्वर० ( स्रो० ) नुट् १-१ ( हसे० । हवे । उ ओ ) पथ्यादीनां पथिन्मथिन्शब्दयोः थकारस्य पंचसु वचनेषु नुडागमो भवति । टित्वादादौ थस्य पूर्वम् । पन्थन् सि इति स्थिते सति सूत्रम् ( आ सौ ) आ १-१ ( सांके० ) सि ७-१ (ङिरौ०) टिलोपः । स्वर० । सिद्धम् । पथ्यादीनां टेः सौ परे आत्वं भवति अनेन सौ न्-सहितस्य थ इत्यस्य था । टेरात्वकरणादेव सेर्लोपो न किंतु ( स्रो० । नश्चापदांते० ) पंथाः मार्गः । संबोधनेऽप्येवमेव । हे पंथाः । अग्रे द्वितीयाद्वित्वं यावत् ( नोपधायाः ) इति दीर्घः । स्वर० । शसादौ विशेषः । पथिन् ३-३ । सूत्रम । ( पथां टेः ) स्वर० । ( मोनु० ) टि ६-१ ( ङिति । ङस्य । म्रो० ) पथिन्मथिन्ऋभुक्षिन्शब्दानां टेर्लोपो भवति शसादौ स्वरे परे । अनेन शसादौ स्वरे टेः इन् इत्यस्य लोपः । स्वर० । भकारादौ ( नाम्नो० ) सुपि ( नाम्नो० )नकारस्य लोपेऽपि कृते ( किलो० ) एवं मथिन्ऋभुक्षिन्शब्दौ ज्ञेयौ । मंथाः-मंथनदंडः । ऋभुक्षाः-इन्द्रः । ऋभुक्षाणौ । ऋभुक्षाणः । हे ऋभु-

क्षाः । ऋभुक्षाणम् । ऋभुक्षाणौ । ऋभुक्षः । ऋभुक्षा । ( पथां टेः ) ऋभुक्षिभ्याम् । ऋभुक्षिभिः ( नाम्नो० ) ऋभुक्षे । इत्यादि ॥

दंडिन्शब्दस्य भेदः। **इनां शौ सौ॥** इन्हन्पूषन्अर्यमन्इत्येतेषां शौ सौ चाधौ परे उपधाया दीर्घो भवति । नलोपसिलोपौ । दंडी । दंडिनौ । दंडिनः । हे दंडिन् । हे दंडिनौ । हे दंडिनः । दंडिनम् । दंडिनौ । दंडिनः । दंडिना । दंडिभ्याम् । दंडिभिः । इत्यादि । एवं ब्रह्महन्शब्दः। ब्रह्महा । ब्रह्महणौ। ब्रह्महणः । हे ब्रह्महन् । हे ब्रह्महणौ।हे ब्रह्महणः।ब्रह्महणम्।ब्रह्महणौ।शसादौ तु अल्लोपः।**हनो घ्ने॥** हंतेर्धातोर्हकारस्य घकारो भवति अव्यवधाने नकारे व्यवधाने ञ्णिति च परे।असंयोगो णत्वनिषेधार्थः।ब्रह्मघ्नः । ब्रह्मघ्ना। ब्रह्महभ्याम्। ब्रह्महभिः । इत्यादि । अर्यम्णः । अर्यम्णा । अर्यमभ्यामित्यादि । पूषा । पूषणौ। पूषणः । हे पूषन् ।हे पूषणौ । हे पूषणः । पूषणम्। पूषणौ। पूषन्शब्दस्य शसादौ स्वरे परे वा टेर्लोपः। पूष्णः।पूष्णा । पूषभ्याम् । पूषभिः । पूष्णे [ ङौ टिलोपो वा वक्तव्यः ] पूष्णि—पूषणि । पूष्णोः । पूषसु ॥

दंडिन्शब्दस्य भेदः । सूत्रम् । ( इनां शौ सौ ) इन् ६–३ । स्वर० ( मोनु० ) शि ७–१ ( ङसौ० ) शि ७–१ ( ङेरौ० ) सिद्धम् । इन्प्रत्ययान्तः इन्नित्युपलक्षणत्वाद्धिन्प्रत्ययांतोपि । हन्धातुः ब्रह्मभ्रूणवृत्राद्युपपदपूर्वः क्विप्प्रत्ययांतः। पूषन् सूर्यवाची । अर्यमन् सूर्यवाची । इत्येतेषां शौ नपुंसके जश्शसोः स्थाने जाते सौ च पुँल्लिंगे प्रथमैकवचने धिवर्जिते परे दीर्घो भवति ( नोपधायाः ) इत्यनेन सिद्धौ सत्यां ( इनां० ) इति सौ परे एव दीर्घः स्यान्नतु पंचस्विति नियमार्थमुक्तम् । अनेन सौ दीर्घः ( हसेपः० । नाम्नो० ) स्वरादौ सर्वत्र । स्वर० । रसे च ( नाम्नो० ) सुपि ( क्विला० ) धौ अधाविति विशेषणान्न लोपश्चदीर्घौ । हे दंडिन् । शेषं सुकरम् । ब्रह्मन्शब्दो दंडिन्शब्दवत्। ब्रह्महा ( अवकुप्वंतरेपि ) इति णत्वम् । ब्रह्महणौ। ब्रह्महणः । ब्रह्महणम् । ब्रह्महणौ । शसादौ तु ( अल्लोपः स्वरे ) इत्यल्लोपे कृते । सूत्रम्। ( हनो घ्ने ) हन् ६–१। स्वर० ( स्रो० ) घ् १–१ ( हवे । उ ओ ) न ७–१ ( अ इ ए ) सिद्धं त्रिपदम्। हन्तेरिति । हन् इत्यस्य धातोः संबंधिनो हकारस्य घत्वं

भवति नकारे परे तथा ञिति णिति च परे । अनेन हस्य घः । स्वर० । हस्य घत्वे कृते घसंयोगः ( ष्रुन्नों० ) इति णत्वनिषेधार्थः। इतरकारपूर्वस्यैव सति णत्वनिमित्ते णत्वं न तु व्यंजनपूर्वस्य इति वचनात् घकारनकारयोगे जाते सति ( पुन्नों णोनंते ) इति नस्य णत्वप्रतिषेधः । स्वर० । रसे परे (नाम्नो०) ङौ तु ( वेङ्योः ) ब्रह्मघ्नि-ब्रह्महणि । धौ दंडिन्वत् । हे ब्रह्महन् । एवं पूषन्-अर्यमन्-शब्दौ । अत्र शसादौ ( अल्लोपः स्वरे० ) इत्यल्लोपे कृते ( पुन्नों० ) स्वरे० । हसादौ ( नाम्नो० ) शेषं कंठ्यम् । पूषा । पूषणौ । पूषणः । पूषणम् । पूषणौ । पूष्णः । पूष्णा । पूषभ्याम् । पूषभिरित्यादि ७-१ ङौ तु ( वेङ्योः ) पूष्णि- पूषणि । एवम् अर्यमा। अर्यमणौ अर्यमणः। अर्यमणम्। अर्यमणौ । अर्यम्णः । अर्यम्णा। अर्यमभ्याम् । अर्यमभिः। अर्यमणि-अर्यम्णि । अर्यम्णोः । अर्यमसु । इत्यादि ॥

संख्याशब्दाः पंचन्प्रभृतयो बहुवचनांतास्त्रिषु लिंगेषु सरूपाः । पंचन् जस् इति स्थिते । **जश्शसोर्लुक्** ॥ षकारनकारांतसंख्यायाः परयोर्जश्शसोर्लुग्भवति। [ लुकि न तन्निमित्तम् ] लुकि सति तन्निमित्तं कार्यं न स्यात् । तेन ( नोपधायाः ) इति दीर्घत्वं न । पंच । पंचभिः। पंचभ्यः २। **ष्णः** ॥ षकारनकारांतसंख्यायाः परस्यामो नुडागमो भवति । ( नोपधायाः ) इति दीर्घत्वम् । ( नाम्नो नो लोपशधौ) पंचानाम् । पंचसु । एवं सप्तन्-नवन्-दशन्प्रभृतयः ॥

संख्यावाचकाः शब्दाः पंचन्प्रभृतयो बहुवचनांतास्त्रिषु लिंगेषु सदृशरूपाः। जसि शसि च सूत्रम् (जश्शसोर्लुक्) जस् च शस् च जश्शसौ तयोर्जश्शसोः ६-२। स्वर० ( स्रो० ) लुक् १-१ ( हसे० । नामि० ) वृत्तिः कंठ्या । अनेन जश्शस् इत्येतयोर्लुक् । प्रत्ययलोपे प्रत्ययलक्षणं न यातीति न्यायात् ( नोपधायाः ) इति सूत्रेण दीर्घत्वप्राप्तौ निषेधहेतुमाह । लुकि न तन्निमित्तम । इति लुकि कृते तन्निमित्तं कार्यं न भवति स एव निमित्तं कारणं यस्य तत्तन्निमित्तम्। यथा (नोपधायाः) इति सूत्रेण दीर्घत्वप्राप्तावपि न दीर्घता तर्हि दीर्घं विहाय लुक् कार्यः इत्यत्रोच्यते । कृताकृतप्रसंगी यो विधिः स नित्य इति अभावरूपं तु न भवत्येव । तेन (नाम्नो नो लोपशधौ ) इति भवत्येव। ३-३ ।४-३ । ५-३ (नाम्नो०) आमि । सूत्रम् (ष्णः)ष् च न् च ष्ण् तस्मात् ष्णः ५-१ । स्वर०। षकारनकारांतसंख्यायाः संख्यावाचिनः शब्दात्परः यः आम् तस्य नुडागमो भवति। अनेन न् आगमः ( नोपधायाः ) इति दीर्घः (नाम्नो०) सुपि ( नाम्नो० ) एवं सप्तन्नवन्दशन्प्रभृतयोऽपि अष्टादशन्यावत्साध्याः ॥

अष्टन्शब्दस्य भेदः। अष्टनो डौ वा ॥ अष्टन्शब्दात्परयोर्जस्शसोर्वा डौ भवति। डित्त्वाट्टिलोपः। अष्टौ-अष्ट। अष्टौ-अष्ट। वासु॥ वा आ आसु। अष्टन्शब्दस्य आसु परासु विभक्तिषु वा टेरात्वं भवति। अष्टभिः—अष्टाभिः। अष्टभ्यः—अष्टाभ्यः २। अष्टानाम्। अष्टसु-अष्टासु ॥

अष्टन्शब्दस्य भेदः। सूत्रम् ( अष्टनो डौ वा ) अष्टन् ६—१। स्वर० ( स्रो० ) डौ १—१। सांके० ( इवे। उ ओ ) वा ३—१ ( अव्य० ) सिद्धमिदं सूत्रम्। अष्टन्शब्दात्परयोर्जश्शसोर्वा विकल्पेन डौ भवति। गुरुत्वात्सर्वस्य जसो डौ जसि शसि च रूपद्वयम्। अनेन एकत्र डौ औ डित्त्वाट्टिलोपः। स्वर०। अन्यत्र जश्शसोर्लुक् ( नाम्नो० ) तृतीयादिबहुत्वेपि रूपद्वयम्। सूत्रम् ( वासु ) वा ३—१ ( अव्य० ) आ १—१। सांके०। इदम् ७—३ ( त्यदा०। स्म्यः। आवतः स्त्रियाम्। सवर्णे०) त्रिपदम्। अष्टन्निति। अष्टन्शब्दस्य आसु तृतीयादिषु विभक्तिषु परासु सतीषु वा आत्वम् आकारो भवति। अनेन ३—३। ४—३। ५—३। वा आकारः। उभयत्रापि ( पगः ) इति नुट्। तृतीयरूपे ( नोपधायाः ) इति दीर्घः। (नाम्नो०) पक्षद्वयेपि एकत्र अकारे कृते अन्यत्र (नाम्नो०) पक्षद्वयेपि सदृशं रूपम् ॥

सकारांत इदम्शब्दः। इदमोऽयं पुंसि ॥ इदम्शब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य। अयम्। इदम् औ इति स्थिते। द्विवचनादौ ( त्यदादेष्टेरः स्यादौ ) इत्यकारः। इद औ इति स्थिते। दस्यः मः॥ त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे। इमौ। इमे। सर्वादित्वात् ( जसी ) इतीकारः। त्यदादीनां घेरभावः। इमम्। इमौ। इमान्। [ इदमेतदोरन्वादेशे द्वितीया टौस्स्वेनो वा वक्तव्यः। उक्तस्य पुनर्भाषणमन्वादेशः। यथा अनेन बालेन व्याकरणमधीतमेनं छन्दोऽध्यापय। एनम्। एनौ। एनान्। अन टौसोः॥इदमोऽनादेशो भवति टौसोः परयोः। (टेन) अनेन-एनेन। स्भ्यः॥इदमः सकारे भकारे च परे अकारो भवति कृत्स्नस्य। ( अद्वि ) इत्यात्वम्। आभ्याम्। भिस् भिस् ॥ इदमदसोर्भिस् भिसैव भवति न भकारस्याकारः। ( एस्भि बहुत्वे) एभिः। अस्मै। आभ्याम्। एभ्यः। अस्मात्। आभ्याम्। एभ्यः। अस्य।

अनयोः । एनयोः । एषाम् । अस्मिन् । अनयोः-एनयोः । एषु ।
किम्-शब्दस्य ( त्यदादेष्टेरः० )इत्यकारे कृते सर्वशब्दवद्रूपं ज्ञेयम् ।
कः । कौ । के । कम् । कौ । कान् । केन । काभ्याम् । कैः ।
कस्मै । काभ्याम् । केभ्यः । कस्मात् । काभ्याम् । केभ्यः ।
कस्य । कयोः । केषाम् । कस्मिन् । कयोः । केषु ॥

मकारांतानाह । मकारांत इदम्शब्दः । सौ सूत्रम् ( इदमोऽयं० ) इदम् ६-१ । स्वर० ( स्रो० ) अयम् १-१ ( हसे० । अतोत्युः । उ ओ । एदो० ) पुंस् ७-१ । स्वर० । सिद्धम् । इदम्शब्दस्य पुंसि विषये पुंलिंगे एव सौ प्रथमैकवचने परे अयम् इत्यादेशो भवति । गुरुत्वात्सर्वस्य । अनेन सौ परे अयम् । मांतकरणसामर्थ्यादेव ( त्यदादेष्टेरः स्यादौ ) इति न भवति । अन्यथा अय इत्येवावक्ष्यत् । अनेन अयम् इत्यादेशः ( हसे० ) केचित्तु सिसहितस्यैव अयमित्यादेशमिच्छति । द्विवचनादौ तु ( त्यदादेष्टेरः० ) इत्यकारे कृते सूत्रम् ( दस्य मः ) द ६-१ ( ङस्स्य ) म १-१ ( स्रो० ) त्यदादीनां दकारस्य असंयुक्तस्य स्यादौ सर्वविभक्तौ परे मत्वं भवति अनेन सर्वविभक्तिषु मकारः । १-२ ( ओ औ औ ) १-३ ( जसी । अ इ ए ) २-१ ( अम्श० ) २-२ ( ओ औ औ ) २-३ ( अम्श० । सो नः पुंसः । शसि ) ३-१ सूत्रम् ( अन टौसोः ) अन १-१ । सांके० । टा च ओस् च टौसौ तयोः टौसोः७-२ । स्वर० (स्रो०) इदम्शब्दस्य टा इति तृतीयैकवचने ओसि षष्ठीसप्तमीद्विवचने परे अन इत्यादेशो भवति अनेन टावचने परे अन आदेशः । ( टेन । अ इ ए ) अग्रे द्वित्वे सूत्रम् ( स्भ्यः ) स् च भ् च स्भ तस्मिन् ७-१ । स्व० । अ १-१ ( स्रो० ) पश्चात् ( इ यं स्व० ) स्व० । द्विपदम् । इदम्शब्दस्य सकारे भकारे च परे अकारो भवति कृत्स्नस्य समग्रस्येत्यर्थः । न त्वंतस्य । अनेन तृतीयाचतुर्थीपंचमीद्वित्वे इदमोऽकारः ( अद्वि ) इत्यात्वम् ३-२ । ४-२ । ५-२ । (स्भ्यः) इत्यकारः । ततो भिसि सूत्रम् ( भिस् भिस् ) भिस् १-१ ( हसे० ) भिस् १-१ ( हसे० ) द्विपदम् । इदम्अदस्संबंधी यो भिस् स भिस् एव भवति । अत्र भिसो भिस्करणम् ( स्भ्यः ) इति सूत्रेण अकारनिषेधार्थम् । एतदेवाह । न भकारस्याकार इति । ( ए स्मि बहुत्वे ) परं कप्रत्ययसहितयोर्न ततः इमकैः । अमुकैः । एवं चतुर्थीपंचमीबहुत्वेपि ४-१ । ( सर्वादेः स्मद् । स्भ्यः । ए ऐ ऐ ) ५-१ (ङसिरत् । अतः । स्भ्यः । सवर्णे०) ६-१ ( ङस् स्य ६-२।७-२ ) अन टौसोः । ओसि । ए अय् ) स्व० । आमि ( सुडामः । स्भ्यः । ए स्मि बहुत्वे । किला० ) स्वर० । ७-१ ( ङि स्मिन् । स्भ्यः । ए स्मि० । किला० ) त्यदादित्वात्संबोधनाभावः । "इदमः प्रत्यक्षमवे समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्" ॥ किम्शब्दस्य ( त्यदादेष्टेरः० ) इत्यनेन अकारे कृते । सर्वशब्दव-

त्यक्रिया । त्यदादित्वाद्धेरभावः ( संबोधनाभावः ) इत्यादयो मांताः शब्दा ज्ञेयाः । झढधघभांता अप्रसिद्धाः ॥

धकारांतस्तत्त्वबुधूशब्दः । तस्य रसे पदांते बकारस्य ( आदिजबानां० ) इति भकारः । (वावसाने ) तत्त्वभुद्- तत्त्वभुत् । तत्त्वबुधौ। तत्त्वबुधः । हे तत्त्वभुत्—हे तत्त्वभुद् ।तत्त्वबुधम् । तत्त्वबुधौ।तत्त्वबुधः । तत्त्वबुधा । तत्त्वभुद्भ्याम् । तत्त्वभुद्भिः । इत्यादि ॥

धकारांतानाह । धकारांतः तत्त्वबुधूशब्दस्तस्य रसे पदांते च ( आदिजबानां झभांतस्य झभाः स्ध्वोः ) इति बकारस्य भकारः । सौ धौ च सिलोपे कृते ( वावसाने ) इति धकारस्य दकारतकारौ । स्वरादौ । स्वर० । भकारादौ ( झबे जबाः ) स्वर० । सुपि ( खसे चपा झसानाम् ) धस्य तः । स्वर० । एवं मर्मा विध् ॥

जकारांतः सम्राज्शब्दः।छशषराजादेः षः ॥ छकारांतस्य शकारांतस्य षकारांतस्य च राज्यज्सृज्मृज्भ्राजादेश्च षकारो भवति धातोर्झसे परे नाम्नश्च रसे पदांते च ।षस्य षत्वं डत्वनिषेधार्थम् । षो डः ॥ षकारस्य डत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदांते च । ( वावसाने ) इति टकारः डकारश्च । सम्राट्—सम्राड् । सम्राजौ । सम्राजः । हे सम्राट्—हे सम्राड् । सम्राजम् । सम्राजौ । सम्राजः । सम्राजा । सम्राड्भ्याम् । साम्राड्भिः । इत्यादि । एवं विराजादयः ॥

अथ जांताः । तत्र जकारांतः सम्राज्शब्दः । तस्य स्वरादौ । स्वर० । रसे [प]दांते च विशेषः । सूत्रम् ( छशषराजादेः षः ) छश्च शश्च षश्च राजादिश्च छशष[रा]जादिः तस्य ६–१ ( ङिति । ङस्य । स्रो० ) । ष १–१ । ( स्रो० ) सिद्धम् । छकारांतस्य तत्त्वमाछादेः शकारांतस्य विशादेः षकारांतस्य द्विष् इत्यादेः तथा राज्यज्सृज्मृज्भ्राजादेश्च षकारो भवति । ( षष्ठीनिर्दिष्टस्य० ) इत्यंत्यस्य । धातोर्झसे परे नाम्नश्च रसे पदांते च उभयोः । आदिशब्दात् व्रश्चभ्रस्जपरिव्राजां ग्रहणम् । षकारषत्वकरणं डत्वनिषेधार्थम् । षस्य षत्वे कृते ( षो डः ) इति डकारो न भवति । यत्तु षस्य षत्वं डत्वनिषेधार्थमिति तदपि द्वेष्टीत्यादावेव नतु सर्वत्र । यथा द्विषधातोस्त्यादौ द्वेष्टीत्यादिरूपम । यद्वा छशषेति ग्रहणं व्यर्थमिति केचित् । प्रयोगदर्शनाभावात् । यत्तु षस्य षत्वं डत्वनिषेधार्थमिति तदपि व्यर्थम् । द्विट्–द्विड् । द्विषौ ।

द्विषः । अद्वेट् इत्यादौ षस्य षत्वेऽपि डत्वस्य दर्शनात् । तथा द्वेष्टीत्यादावपि षस्य षत्वं न किंतु केवलम् ( ष्टुभिः ष्टुः ) । अनेन रसे पदांते च षस्य डः । ततः सूत्रम् ( षो डः ) षु ६-१ । स्व० (स्रो०) ड १-१ (स्रो०) सिद्धम् । षकारस्य डकारो भवति धातोर्झसे परे नाम्नश्च रसे पदांते च । केचित्तु ( वावसाने ) इत्यनेनैव षकारस्य ऋटुरषा मूर्द्धन्या इति स्थानसवर्णौ मूर्द्धन्यौ टकारडकारौ स्यातामिति । तथा भ्यां भिस् इत्यादौ च ( झबे जबाः ) अनेन डत्वं स्यादतः ( षो डः ) इति सूत्रं व्यर्थमिति वदन्ति तच्चिंत्यम् । अनेन सौ धौ च ( हसे० ) इति सिलोपे कृते षस्य डः ( वावसाने ) डस्य वा टः [ समो मस्य राट्शब्दे परे अनुस्वाराभावो वक्तव्यः ] सम्राट्-सम्राड् । भकारादौ षस्य डत्वे कृते । स्वर० । सुपि डत्वे कृते ( खसे० ) स्वर० । सम्राट्सु । क्वचित् हसादौ विभक्तौ अपदांतेऽपि पदांतताश्रयणीयेति (टोरंत्यात्) इति ष्टुत्वाभावः । शेषं कंठचम् । एवं विराजादयः । विराट्-विराड् । विराजौ । विराजः । राट्-राड् । राजौ । राजः । एवं देवान् यजतीति देवेट्-देवेड् । देवेजौ । देवेजः । विश्वसृट्-विश्वसृड् । विश्वसृजौ । विश्वसृजः । परिमृट्-परिमृड् । परिमृजौ । परिमृजः । विभ्राट्-विभ्राड् । विभ्राजौ । विभ्राजः । एवं परिव्राट्-परिव्राड् । परिव्राजौ । परिव्राजः । तरुवृट्-तरुवृड् । तरुवृश्चौ । तरुवृश्चः । यवभृट्-यवभृड् । यवभृज्जौ । यवभृज्जः । इत्यादि । अन्येऽपि । भूसुक् वलिभुक् हुतभुक् वणिक् भिषक् अश्वयुक्प्रभृतयोपि जातास्तत्र ( चोः कुः ) एवम् ऋत्विक् ( दिशाम् ) इति कुत्वम् । ऋतुषु ऋतुं वा यजतीति ऋत्विक् । ऋत्विजौ । ऋत्विजः । डान्ता अप्रसिद्धाः ॥

दकारांताः त्यद्तद्यद्एतद्शब्दाः । एतेषां ( त्यदादेष्टेरः स्यादौ ) इत्यकारे कृते सर्वत्र सर्वशब्दवत् रूपं ज्ञेयम् । तः[1]॥ त्यदादेस्तकारस्य सौ परे सत्वं भवति । स्यः । त्यौ । त्ये । त्यम् । त्यौ । त्यान् । त्येन । त्याभ्याम् । त्यैः । त्यस्मै । इत्यादि । सः । तौ । ते । यः । यौ । ये । एषः । षत्वम् । एतौ । एते । एतम्-एनम् । एतौ-एनौ । एतान्-एनान् । एतेन-एनेन । एताभ्याम् । एतैः । एतयोः-एनयोः । एतेषाम् । एतस्मिन् । एतयोः-एनयोः । एतेषु ॥

दकारांतास्त्यदादयः शब्दास्तेषाम् ( त्यदादेष्टेरः स्यादौ ) इत्यकारे कृते सर्वत्र सर्वशब्दवत् । सौ तु विशेषः । सूत्रम् ( तः ) स तु ६-१ ( स्रो० ) त्यदादेस्तकार-

१ इह 'तः' इत्येव 'सूत्र' सकारानुवर्त्तनात् ।

स्येति वृत्तिः सुगमा । अनेन सौ तस्य सः । शेषं सर्ववत् । न वरम् । घेरभावः । स्यः । त्यौ । त्ये । एवं तद्यदेतद्शब्दाः । एतच्छब्दस्य सर्वत्र टेरत्वे कृते सौ च ( तः ) इति तस्य सत्वे च कृते । (किला०। स्रो०) एषः । एतौ । एते । द्वितीयायां टौसोश्च विशेषः । एतद् इति एतद्शब्दस्य अन्वादेशे सति । उक्तस्य पुनः कथनमन्वादेश उच्यते । यथा । एष राजा याति एनं पश्य । एष पठति एनं व्याकरणं पाठय अथैनं वेदमध्यापयेत्यन्वादेशः । तस्मिंश्च वाच्यमाने द्वितीयाटौस्सु द्वितीयायां वचनत्रयेपि टा इति तृतीयैकवचने ओसि षष्ठीसप्तमीद्विवचने वा विकल्पेन एनादेशस्तकारस्य वा नकार इत्यर्थः । अनेनोक्तवचनेषु वा एनादेशः । एतम्—एनम् । एतौ-एनौ । एतान्—एनान् । एतेन—एनेन । एतयोः—एनयोः२ । शेषं सुकरम् । इति दांताः। अन्येपि बलभिद्दिविषद्सर्वविद्वेदविद्सुहृद्प्रभृतयः । गबखफांता अप्रसिद्धाः ॥

छकारांतस्तत्त्वप्राछ्शब्दः । तत्त्वप्राट्-तत्त्वप्राड् । तत्त्वप्राछौ । तत्त्वप्राछः । इत्यादि ॥

छकारांतः तत्त्वप्राछ्शब्दः । व्याकरणांतरे तु ( छ्वोः शूडनुनासिके च ) इति छस्य शत्वं विधाय ततः ( छशषराजादेः षः ) इति षत्वे कृते ( षो डः । वावसाने ) सम्राड्वत् तत्त्वप्राट्शब्दः । शेषं सुकरम् । छांतोऽयम् ॥

थकारांतः अग्निमथ्शब्दः । तस्य ( वावसाने) चपा जबाश्च। अग्निमत्-अग्निमद् । संबोधनेऽप्येवम् । अग्निमथौ । अग्निमथः । अग्निमथम् । अग्निमथौ । अग्निमथः । अग्निमथा । अग्निमद्भ्याम् । इत्यादि ॥

थकारांतोऽग्निमथ्शब्दस्तस्य सौ धौ वा सिलोपे कृते ( वावसाने ) इति ( वर्ग्यो वर्ग्येण सवर्णः ) इति वचनात् थकारस्य वा तकारदकारौ । भकारादौ (झवे जबाः) थस्य दः। स्वर० । सुपि ( खसे च० ) थस्य तः। स्वरादौ । स्वर०। एवं थांताः॥

चकारांतः प्रत्यच्शब्दः [ अंचेः पंचसु नुमागमो वक्तव्यः ] प्रत्यन्च् सि इति स्थिते (स्तोः श्चुभिःश्चुः)इति चुत्वेन ञकारः । संयोगान्तस्य लोपः । चोः कुः ॥ चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदांते च यथासंख्येन । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः। प्रत्यञ्चम् । प्रत्यञ्चौ । अंचेरलोपो दीर्घश्च ॥ अंचतेर्धातोरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धिते प्रत्यये ईपि

ईकारे च । निमित्ताभावे नैमित्तिकस्याप्यभावः । प्रतीचः । प्रतीचा । प्रत्यग्भ्याम्। प्रत्यग्भिः । एवम् तिर्यच्प्रभृतयः । तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः। तिर्यञ्चम् । तिर्यञ्चौ । तिरश्चादयः॥ तिरश्चादयो निपात्यंते शसादौ स्वरे परे तद्धिते ईपि ईकारेच । तिरश्चः । तिरश्चा । तिर्यग्भ्याम् । तिर्यग्भिः । तिर्यक्षु । एवम् उदङ् । उदञ्चौ । उदञ्चः । उदञ्चम् । उदञ्चौ । उदच्शब्दस्य उदीच् निपात्यते शसादौ स्वरे परे तद्धिते ईपि ईकारे च । उदीचः उदीचा । समीचः । समीचा ॥

चकारांतः प्रत्यच्शब्दः । अञ्चु गतिपूजनयोः अंच् प्रतिपूर्वः क्विप्प्रत्ययः [ प्रति पूर्वस्य अपूजार्थस्याश्वतेर्नलोपो वक्तव्यः ] यद्वा नो लोपः ( इ यं० ) स्वर० । क्विपः सर्वापहारी लोपः । प्रत्यच् इति सिद्धम् । तस्य पंचसु विशेषः ( अंचेः पंचसु० )इति अंचुगतिपूजनयोरित्यस्य धातोः पुंल्लिंगे स्यादिषु पंचसु वचनेषु परेषु नुम् इत्यागमो भवति । प्रत्यन् च् इति स्थिते ( स्तोः श्चुभिः श्चुः ) इति नस्य ञ् ( हसे० ) इति सेर्लोपः ( संयोगांतस्य० ) इति चलोपः । सूत्रम् ( चोः कुः ) चु ६-१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० ) कु १-१ ( स्रो० ) सिद्धम् । चवर्गस्य० । वृत्तिः सुगमा । न वरम् । यथासंख्येनेति यथाक्रमेण चस्य कः छस्य खः जस्य गः झस्य घः ञस्य ङः इत्यर्थः। अनेन ञस्य ङ् । प्रत्यङ् । केचित्त्वत्र ( स्तोः श्चुभिः श्चुः ) इति न आद्रियंते । यतः ( संयोगान्तस्य० ) इति चलोपे कृते निमित्ताभावे नैमित्तिकस्याप्यभावः । इति पुनर्ञकारस्य नकार एव । ततः (चोः कुः) इत्यपि न भवति किंतु प्रत्यन् इति सिध्यति । द्विवचनादौ नुमागमे कृते ( नश्चापदा० ) स्वर० । प्रत्यंचौ। यद्वा। प्रत्यञ्चौ । प्रत्यञ्चः। प्रत्यञ्चम् । प्रत्यञ्चौ। शसादौ तु विशेषः। सूत्रम् (अंचेरलो०) अंचि ५-१ (ङिति । ङस्य) इत्यलोपः ( स्रो० ) अस्य अकारस्य लुक् अलुक१-१ । (हसे०।नाभिनो०)दीर्घः १-१ (स्रो०)च १-१ (अव्य० । विसर्ज० । स्तोः०) अंचतेर्धातोः शसादौ स्वरे परे तद्धितसंबंधिनि प्रत्यये ईपिप्रत्यये च (ईमौ) इति सूत्रेण कृते ईकारेच परे अकारस्य लोपो भवति पूर्वस्य च दीर्घो भवति । तद्धिते प्रतीचीनः । प्रतीच्यः । ईपि प्रतीची । ईकारे प्रतीची । प्रत्यंचि । अत्र तु शसादौ स्वरे अनेन प्रति अच् इति विश्लेषे कृते अकारलोपः । इति ति इत्यस्य दीर्घः ती । भकारादौ ( चोः कुः ) इति ककारे कृते ( झबे जबाः ) कस्य गः । स्वर० । सुपि (चोः कुः । क्विलात्पः सः। कपसंयोगे क्षः) शेषं कंठ्यम्। पूजार्थस्य तु अंचते-

नलोपो न तेन प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चम् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रत्यञ्चा । प्रत्यग्भ्याम् । प्रत्यग्भिः । प्रत्यञ्चे । इत्यादि । एवं प्राङ् । प्रांचौ । प्रांचः । प्रांचम् । प्रांचौ । प्रांचः । प्रांचा । प्राङ्भ्याम् । प्राङ्भिः । प्राङ्चे । प्राङ्भ्याम् । प्राङ्भ्यः । गत्यर्थस्य तु शसादौ । प्राचः प्राचा । तिर्यच्उदच्शब्दयोः पंचसु प्रत्यच्शब्दवत् । शसादौ तु विशेषः । सूत्रम् ( तिरश्चादयः ) तिरश्च् आदिर्येषां ते तिरश्चादयः १–३ ( ए ओ जसि । ए अय् ) स्वर० ( स्रो० ) तिरश्चादय इति । तिर्यच्उदच्सध्र्यच्सम्यच्शब्दानां यथाक्रमं तिरश्च् उदीच् सध्रीच् समीच् इत्यादेशा निपात्यंते शसादौ स्वरे तद्धिते प्रत्यये ईपि ईकारे च । तद्धिते यथा तिरश्चीनः । ईपि तिरश्ची । ईकारे तिरश्ची । तिर्याचि । अनेन शसादौ स्वरे परे तिर्यच्शब्दस्य तिरश्च् । उदच्शब्दस्य उदीच् । स्वर० । भकारादौ ( चोः कुः । झबे जबाः ) सुपि च ( चोः कुः । किला० ) इत्यादि । प्रत्यच् इत्यादयश्चांताः । टकारांता अप्रसिद्धाः ॥

तकारांतो मरुत्शब्दः ( वावसाने ) मरुत्-मरुद् । मरुतौ । मरुतः । मरुतम् । मरुतौ । मरुतः । मरुता । मरुद्भ्याम् । मरुद्भिः । इत्यादि । एवमग्निचित्प्रभृतयः । अग्निचित्–अग्निचिद् । अग्निचितौ । अग्निचितः । इत्यादि ॥

तकारांतो मरुत्शब्दस्तस्य सौ धौ च सिलोपे कृते ( वावसाने ) तकारस्य वा दकारः । भकारादौ (झबे जबाः) तस्य दः । स्वर० । स्वरादौ ( सुपि च ) स्वर० । एवम् अग्निचित्प्रभृतयोऽपि साध्याः । अग्निं चिनोति इंधनैर्वर्द्धयतीति अग्निचित् ॥

तकारांत उकारानुबन्धो महत्–शब्दः । ऋितो नुम् ॥ उकारानुबंधस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि विषये पंचसु परेषु । न्सम्महतोऽधौ दीर्घः शौ च ॥ न्संतस्य अप्शब्दस्य महत्शब्दस्य च दीर्घो भवति पंचसु धिवर्जितेषु शौ च परे । महान् । महांतौ । महांतः । हे महन् । महांतौ । महतः । महता । महद्भ्याम् । महद्भिः । इत्यादि ॥

तकारांत उकारानुबंधो महच्छब्दस्तस्य पंचसु विशेषः । मह पूजायाम् ( द्रुहिमहिपृषिभ्यः शतृ ) एभ्यः शतृप्रत्ययो भवति । ऋकारानुबंधित्वं तु चिंत्यम् । महाते इति महत् । कार्यार्थमुच्चरितस्य वर्णस्यानुबंधः इति संज्ञा । यथा–उच्चारितप्रध्वंसिनो ह्यनुबंधाः । सूत्रम् ( ऋितः० ) उश्च ऋश्च ऋ वृ इत् यस्य स ऋित् तस्य ऋितः ६–१ । स्वर० ( स्रो० ) नुम १–१ ( इसे० । इवे । उ ओ ) सिद्धम् । उकारानुबंधस्य

वतुप्रत्ययादेः ऋकारानुबन्धस्य शतृप्रत्ययादेः नुमागमो भवति पुंसि पुँल्लिंगे पंचसु वचनेषु परेषु शौ च इति नपुंसके जश्शसोः स्थाने जाते शौ परे । अनेन पंचसु स्वादिषु तकारात् पूर्वं न । सूत्रम् ( न्सम्महतोऽधौ दीर्घः शौ च ) न्स् च अप् च महच्च न्सम्महत्तस्य ६-१ । स्वर० । न्सम् अग्रे महत् ( ञमे ञमा वा ) पस्य मः। स्वर० । न धिः अधिस्तस्मिन् अधौ ७-१ ( ङेरौ० ) टिलोपः । स्व० ( अतो० । उ ओ । एद्रो० ) दीर्घ १-१ ( स्रो० ) शि ७-१ ( ङेरौ० ) टिलोपः । स्वर० । च. १-१ ( अव्य० ) पंचपदम् । न्संतस्योति सुहिन्नस्शब्दं विहाय नुमागमसहितसकारांतस्य तथा अप्शब्दस्य जलवाचिनो नित्यं बहुवचनांतस्य तथा महत्शब्दस्य उकारानुबंधस्य पुंसि पंचसु वचनेषु धिवर्जितेषु नपुंसके शौ च दीर्घो भवति । ह्रस्वदीर्घप्लुता विधीयमानाः स्वरस्थाने भवंतीति न्सादीनां व्यंजनसन्निकृष्टस्य स्वरस्य दीर्घो भवतीत्यर्थः । अप्शब्दो बहुत्व एव । तत्र असमासांतस्य जसि दीर्घो नान्यत्र । समासांतस्य पंचस्वेव इयं विवक्षा । तथा शोभना आपो यत्र स स्वाप् देशः । स्वाप्-स्वाब् । स्वापौ । स्वापः । स्वापम् । स्वापौ । इति नपुंसके शौ स्वांपि । सरांसि । इति अनेन धिवर्जितेषु पंचसु दीर्घः । धौ तु नुमागम एव न दीर्घः । ( हसे० । संयोगांतस्य० ) इति सौ धौ च तकारस्य लोपः । शेषेषु ( नश्चापदांते झसे ) शसादौ । स्वर० । भकारादौ ( झबे जबाः ) स्वर० । शेषं सुगमम् ॥

उकारानुबंधो भवच्छब्दः । अत्वसोः सौ ॥ अत्वंतस्यासन्तस्य च दीर्घो भवति धिवर्जिते सौ च परे । भवान् । भवंतौ । भवंतः । हे भवन् । भवन्तम् । भवंतौ । भवतः । भवता । भवद्भ्याम् । भवद्भिरित्यादि । ऋकरानुबन्धः पंचतृशब्दः । तस्य नुमागम एव न दीर्घो भवति । पचन् । पचंतौ । पचंतः । पचंतम् । पचंतौ । पचतः । पचता । पचद्भ्यामित्यादि । एवम् ऋकारानुबन्धो भवतृशब्दः ॥

उकारानुबंधो भवत्शब्दः । भा दीप्तौ । भातेर्डवतुः । यतः 'भातेस्तु भवतुः परः । भवान् पूज्ये युष्मदर्थे' । इति । तस्य पंचसु ( व्रितो नुम् ) इति नुमागमः । सूत्रम् । ( अत्वसोः सौ ) अतुश्च अस् च अत्वसौ तयोः अत्वसोः ६-२ । स्व० ( स्रो० ) सि ७-१ ( ङेरौ० ) सिद्धम् । अत्वंतस्येति उकारानुबंधस्य असंतस्येति नुमागमरहितस्याऽसंतस्य शब्दस्य धिवर्जिते सौ परे दीर्घो भवति। अनेन सौ दीर्घो भवति न धौ धिवर्जित इति विशेषणात् धौ ( हसे० । संयो० ) हे भवन् । पक्षे हे भोः । अन्यत्र ( नश्चाप० ) स्वरादौ । स्वर० । भकारादौ (झबे जबाः) शेषं सुकरम् । एवम् अष्ठीवत्चक्रीवत् कक्षीवत्शब्दाः । ऋकारानुबन्धो भवत्शब्दः । भू । ( शतृशानौ तिसिवत्क्रियायाम् ) इति शतृ-

प्रत्ययः ( अप्कर्त्तरि । गुणः । ओ अव् ) स्वर० । भवत् ( सुपि च ) इति तस्य ( त्रितो नुम् ) इति नुमागमे कृते एव स्यात् । परम् अत्वंताभावात् ( अत्वसोः सौ ) इति दीर्घत्वं न । शेषं सुगमम् । एवं पचत् शब्दोपि रितु ऋकारानुबंध इत्यर्थः । एवम् अन्येपि शतृप्रत्ययांता ऋकारानुबंधा ज्ञेया इति तांताः । कपांता अप्रसिद्धाः ।'

शकारांतो विश्शब्दः (छशषराजादेः षः ) इति षत्वम् (षोडः)इति डत्वं च ( वावसाने ) चपा जबाश्च । विट्-विड् । विशौ । विशः । इत्यादि।षकारन्तः षष्शब्दः नित्यं बहुवचनांतस्त्रिषु सरूपः (जश्शसो-र्लुक्। षो डः। ( वावसाने)षट्-षड्। षड्भिः। षड्भ्यः२ ।(ष्णः) इति नुट् । षड् नाम् इति स्थिते । डूणः ॥ संख्यासंबंधिनो डकारस्य णत्वं भवति नामि परे । षण्णाम् । षट्सु[क्वचिदपदान्तेऽपि पदांतता-श्रयणीया ] दोषाम्॥ःदोष्सजुष्आशिष्हविष्प्रभृतीनां षकारस्य रेफो भवति रसे परे पदांते च । दोः । दोषौ । दोषः । दोषम् । दोषौ । [ शसादौ स्वरे परे नांतता वा वक्तव्या ] दोष्णः-दोषः। दोष्णा-दोषा । दोर्भ्याम् । दोर्भिः । दोष्णे-दोषे । दोर्भ्याम् । दोर्भ्यः । दोष्णः-दोषः । दोर्भ्याम् । दोर्भ्यः । दोष्णः-दोषः । दोष्णोः-दोषोः। दोष्णाम्-दोषाम्। दोष्णि-दोषि । दोष्णोः-दोषोः । दोर्षु । सजूः । सजुषौ । सजुषः । सजुषम् । सजुषौ । सजुषः । [ सजुषाशिषो रसे पदांते च दीर्घो वक्तव्यः ] ॥

शकारांतो विश्शब्दस्तस्य ( छशषरा० ) इति षत्वे कृते ( षो डः । वावसाने ) स्वरादौ । स्वर० । सुपि ( खसे च० ) सम्राज्शब्दवत् । विट्-विड् । विशौ । विशः इत्यादीनि रूपाणि । विट्-मनुष्यो वैश्यश्च । इत्यादयः शांताः । षकारांतः षष्शब्दो नित्यं बहुवचनांतस्त्रिषु लिंगेषु सदृशरूपः ( जश्शसोर्लुक् । षोडः । वाव-साने ) षट्-षड् । पुनरपि षट्-षड् । भकारादौ ( षो डः ) इति डत्वे कृते । स्वर० । आमि ( ष्णः ) इति नुडागमः ( षो डः ) इति डत्वम् । षड् नाम् इति स्थिते सति सूत्रम् ( ड् णः ) ड् ६-१ ( सांके० ) ण् १-१ ( हसे० ) न् ६-१ ( स्नो० ) संख्या० । वृत्तिः कंठ्या । अनेन नामि परे डकारस्य णकारः ( ष्टुभिः ष्टुः ) स्वर० । सुपि ( षो डः । खसे च० ) ततः टकारसकारयोगे ( ष्टुभिः ष्टुः ) इति प्राप्तौ ( टोरंत्यात् ) इति सूत्रेण ( ष्टुभिः ष्टुः ) इति सस्य षत्वनिषेधः । ननु अत्र पदांतत्वाभावात् टोरंत्यादिति सूत्रं कथं संभवति,तत्राह क्वचिदिति । क्वचित्प-

योगांतरे अपदांतेपि पदांतता आश्रयणीया ग्रहणीया वक्तव्येति भावः । दोष्शब्दो भुजार्थवाचकस्तस्य भेदः । सूत्रम् । दोष् ६-३ । स्वर० । एकपदमिदं सूत्रम् । दोप्-सजुष्आशिष्हविष्आयुष्सर्पिष्धनुष्ज्योतिष्प्रभृतिशब्दानां षकारस्य रसे परे पदांते च रेफो भवति सकारस्थाने जातस्य षकारस्येति व्याख्येयम् । अनेन रसे पदांते च रेफः । सौ धौ च ( हसे० । स्त्रौ० ) द्विवचनादौ । स्वर० । दोः । दोषौ । दोषः । दोषम् । दोषौ । शसादौ तु विशेषः [ शसादौ स्वरे परे नांतता वा वक्तव्या ] अस्यार्थः । दोष्शब्दस्य शसादौ स्वरे परे नांतत्वं भवति वा विकल्पेन अंते नकारागमो भवतीत्यर्थः । दोष् न् इति स्थिते ( ष्रुन्नो० ) स्वर० । दोष्णः-दोषः । दोष्णा । दोषा । भकारादौ ( दोषाम् ) जल० । दोर्भ्याम् । दोर्भिः । यद्वा (दोषाम् । रहाद्यपो० । झबे जबाः ) स्वर० । दोर्भ्याम् । दोर्भिरित्यादि । केचित्तु शसादावनंतता वा वक्तव्या इत्येवं पठंति । स्वरे इति पदं न पठंति । तन्मते स्वरादौ हसादौ च सर्वत्र विकल्पेन अन्-आगमे कृते स्वरादौ ( अल्लोपः स्वरे । ष्रुन्नो० ) स्वर० । द्वितीयपक्षे केवलम् । स्वर० । दोष्णः-दोषः । दोष्णा-दोषा । भकारादौ एकत्र अन्-आगमे कृते । स्वर० (नाम्नो०) दोषभ्याम् । द्वितीये ( दोषाम् ) जल० । दोर्भ्याम् । एवं दोषभिः-दोर्भिः । दोषे । स्वर० । दोष्णे । शसादावनंतता । स्वर० । ततः अल्लोपः । स्वर० ( ष्रुनो०) स्वर० दोषभ्याम्-दोर्भ्याम् । दोषभ्यः-दोर्भ्यः । दोष्णः-दोषः । दोषभ्याम्-दोर्भ्याम् । दोषभ्यः-दोर्भ्यः । दोष्णः-दोषः । दोष्णोः-दोषोः । दोष्णाम्-दोषाम् ( वेङ्यो: ) दोष्णि-दोषणि-दोषि । दोष्णोः-दोषोः । सुपि अनंतत्वे कृते ( नाम्नो० ) दोषसु । पक्षे ( दोषाम् ) इति रत्वे ( क्विला० ) दोर्षु । केचित्तु ( दोषाम् । स्रो० । विसर्ज०) दोष्षु इत्यपि साधयंति । केचित्तु दोःषु इत्यपि पठंति ततो यथासंभवं साध्यः। दोष्शब्दः पुंक्लीबलिंगः क्लीबे तु । दोः । दोषी । दोंषि । जुषी प्रीतिसेवनयोः । जोषणं जुट् मिलनं प्रीतिः सह तेन वर्त्तते इति सजूर्मित्रम् [ सजुषाशिषो रसे पदांते च दीर्घो वक्तव्यः ] इति केचिन्नेच्छंति ( दोषाम् ) इति रत्वं विधाय ( य्वोर्वि हसे ) इत्यनेनैव सिद्धत्वात् । इति षांताः ॥

सकारांतः पुंस्शब्दः । **पुंसोऽसुङ्**॥ पुंस्शब्दस्य पंचसु परेषु असुङादेशो भवति । ङकारोंत्यादेशार्थः । उकारो नुम्विधानार्थः ( स्वरे मः ) पुमस् सि इति स्थिते ( उवितो नुम् ) इति नुमागमः ( न्सम्महतोऽधौ दीर्घः शौ च ) ( संयोगांतस्य लोपः ) (हसे० ) इति सेर्लोपः सयोगांतस्य लोपः । पुमान् । पुमांसौ । पुमांसः । हे पुमन् । पुमांसम् । पुमांसौ । पुंसः । पुंसा । पुंभ्याम् । पुंभिः ॥

सकारांतः पुंस्शब्दः। पुनातीति पुमान् (पुनातेः सुप् नुम् च) इति सुप्प्रत्ययो नुमागमश्च। प्रादेर्ह्रस्वः। अथवा (पातेर्डुम्सुरिमन्) इति डुम्सुप्रत्ययः। डित्वा-ट्टिलोपः। पुम्स्शब्दस्य पंचसु विशेषः। सूत्रम् (पुंसोऽसुङ्) पुंस् ६–१ स्वर० (स्रो०) असुङ् १–१ (हसे०। अतोत्युः। उ ओ। एदो०) पुम्स्शब्दस्य पंचसु स्यादिषु परेषु असुङ् इत्ययमादेशो भवति। ङकारोंत्यादेशार्थः। उकार उच्चारणार्थः। अनेनांत्यस्य सकारस्य अस् इत्यादेशः। पुमस् इति स्थिते (त्रितो नुम्) इति नुमागमः। पंचसु (न्सम्महतः०) इति धिवर्जमन्यत्र दीर्घः। सौ धौ च (हसे०) इति सिलोपः। (संयोगांतस्य०) इति सलोपः। अग्रे द्वितीयाद्वित्वं यावत् (नश्चा०) स्व०। पुमान्। पुमांसौ। पुमांसः। हे पुमन्। हे पुमांसौ। हे पुमांसः। पुमांसम्। पुमांसौ। शसादौ (नश्चा०) स्व०। पुंसः। पुंसा। भकारादौ (संयोगांतस्य०। नश्चा०) एवं सुपि (संयोगां० नश्चा०) पुंसु॥

**असंभवे पुंसः कक्सौ॥** असंभवेर्थे वाच्ये सति पुंस्शब्दस्य कगागमो भवति सुपि परे। (स्कोराद्योश्च) इति सकारलोपः। कषसंयोगे क्षः। पुंक्षु। एवम् विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। विद्वांसम्। विद्वांसौ। **वसोर्व उः॥** वसोः संबंधी वकार उत्वं प्राप्नोति शसादौ स्वरे परे तद्धिते ईपि ईकारे च। विदुषः। विदुषा। (वसां रसे) विद्वद्भ्याम्। विद्वद्भिः। विद्वत्सु। इत्यादि॥

अथ रूपांतरं साधयति। असंभवे वैदिकप्रयोगे। असंभवो नाम वेदांतैकवेद्यस्यात्मनो बहुत्वाऽसंभवः। न विद्यते आत्मनो ब्रह्मणो बहुत्वसंभवो यत्रासौ असंभवः। कुतः। "एकमेवाद्वितीयं ब्रह्म। नेह नानास्ति किंचन" इति वेदांतशास्त्रेण वेद्यस्य ज्ञेयस्य आत्मनो बहुत्वाऽसंभवः। अथवा नास्ति संभवो बुद्धेः सूत्रादश्च यत्र सोऽसंभवस्तस्मिन् वाच्ये सति पुंस्शब्दस्य सौ इति सुपि परे कगागमो भवति। अनेन पुंस् अग्रे कक्। कित्वादन्ते (स्कोराद्योश्च) इति सलोपः (किला०) कषसंयोगे क्षः। पुंक्षु। इति सिद्धम्। परमपुरुषे पुंक्षु वैदिकप्रयोगोयं लौकिकेषु पुरुषेषु पुंसु। विद्वस्शब्दस्य पंचसु पुंस्वत् (त्रितो नुम्। न्सम्महतो धौ दीर्घः०। संयो०) विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। विद्वांसम्। विद्वांसौ। शसादौ तु विशेषः। सूत्रम् (वसोर्व उः) वसु ६–१ (ङिति। ङस्य। स्रो०) व १–१ (स्रो०। नामि०) जल०। उ १–११ (आदवे०) वसोरिति क्वसुकानौ णवेवत् (विदेर्वा वसुः) इत्यादिसूत्रोत्पन्नो यो वसुप्रत्ययस्तस्य संबंधी वकारः सस्वरः उत्वं प्राप्नोति शसादौ स्वरे तद्धिते यप्रत्यये परे ईपि ईकारे च परे। तद्धिते वैदुष्यम्। ईपि च

विदुषी । अत्र अनेन शसादौ स्वरे परे सर्वत्र द्व इत्यस्य दुः ( किला० ) स्व० । हसादौ ( वसां रसे ) इति सस्य दत्वे कृते । भकारादौ । स्वर० । सुपि ( खसे० ) दस्य तः । स्वर० । एवं तस्थिवस्शब्दः । तस्थौ इति तस्थिवान् । ष्ठा गतिनिवृत्तौ । ( आदेः ष्णः स्नः ) स्था क्वसु-प्रत्ययः वस् च णवेवत् । तेन द्वित्वं ह्रस्वः ( शसात् खपाः ) इति पूर्वसस्य लोपः । (झपानां जबचपाः ) इति थस्य तः । (स्थामी ) इति आकारस्य इकारः । तस्थिवस् इति जातम् । स्यादिः तस्थिवान् । तस्थिवांसौ । तस्थिवांसः । तस्थिवांसम् । तस्थिवांसौ । शसादौ स्वरे परे ( वमोर्व उः ) इति वस्य उत्वे कृते निमित्ताभावे नैमित्तिकस्याप्यभावः इति इकारस्य आकार एव । ततः ( आतोऽनपि ) इत्याकारलोपः । स्वर० ( किला० ) तस्थुषः । तस्थुषा । तस्थिवद्भ्यामित्यादि । एवं गतः इति जग्मिवान् । जग्मिवांसौ । जग्मिवांसः । जग्मिवांसम् । जग्मिवांसौ ( गमां स्वरे ) जग्मुषः । जग्मुषा । जग्मिवद्भ्यामित्यादि । अथवा जगन्वस्शब्दः । गम् वस्प्रत्ययः । द्वित्वम् ( मो नो धातोः ) जगामेति जगन्वान् । शसादौ स्वरे निमित्ताभावे नैमित्तिकस्याप्यभावः इति नकारस्य मकार एव । ( गमां स्वरे ) जग्मुषः । जग्मुषा । जगन्वद्भ्याम् । जगन्वद्भिरित्यादि । एवं पेचिवान् । पेचिवांसौ । पेचिवांसः । पेचिवांसम् । पेचिवांसौ । पेचुषः । पेचुषा । पेचिवद्भ्याम् । पेचिवद्भिरित्यादि । उपासंसूपर्णध्वंसादीनां तु रसे पदांते च ( वसां रसे ) इति दत्वम् स्वरादौ । स्वर० । उपास्रत् (द्) । उपास्रसौ । उपास्रसः । उपास्रसम् । उपास्रसौ । उपास्रसः । उपास्रसा । उपास्रद्भ्याम् । उपास्रद्भिः । उपास्रत्सु । एवं पर्णध्वत् । पर्णध्वसौ । पर्णध्वसः । इत्यादि ॥

सुवचस्शब्दे तु ( अत्वसोः सौ ) इति दीर्घः । सुवचाः । सुवचसौ । सुवचसः । हे सुवचः । सुवचसम् । सुवचसौ । सुवचसः । सुवचसा ( स्रोर्विसर्गः । हवे) उत्वम् ( उ ओ ) सुवचोभ्याम् । सुवचोभिः । इत्यादि । एवं चन्द्रमस्शब्दः । चन्द्रमाः । चन्द्रमसौ । चन्द्रमसः । हे चन्द्रमः । चन्द्रमसम् । चन्द्रमोभ्याम् । चन्द्रमस्सु । इत्यादि ॥

सकारांतः सुवचस्शब्दः । वच् परिभाषणे । सुपूर्वः (वचादेरस् ) स्वर० । नामत्वात्स्याद्यः । ततः । सौ परे ( अत्वसोः सौ ) इति दीर्घः ( हसे० । स्रो० ) धौ ( हसेपः० । स्रो० ) हे सुवचः । स्वरादौ सर्वत्र सुपि च स्व० । भकारादौ ( स्रो० । हवे । उ ओ ) शेषं सुगमम् । एवं चद्रमस्शब्दः । चंद्रमाः । चंद्रमसौ । चंद्रमसः । हे चंद्रमः । चंद्रमोभ्याम् । चंद्रमस्सु । एवं वेधाः । दुर्मेधाः । इत्यादि । एवं प्रचेतस्ज्ञातवेदस् उच्चैःश्रवस्सुमनस्सुतजस्विडौजस्प्रभृतयः साध्याः ॥

उशनस्शब्दस्य विशेषः । उशनसाम् ॥ उशनस् पुरुदंसस् अनेहस् इत्येतेषां सेरधेर्डा भवति । डकारष्टिलोपार्थः । उशना । उशनसौ । उशनसः । उशनसम् । उशनसौ । उशनसः [ उशनसो धौ सांतता नांतता अदंतता च वक्तव्या ] हे उशनः—हे उशनन्—हे उशन । हे उशनसौ । हे उशनसः ॥

उशनसादीनां सौ विशेषः । सूत्रम् (उशनसाम्)उशनस् ६—३ । स्व० । उशनस् पुरुदंसस् अनेहस् इत्येतेषां शब्दानां धिवर्जितस्य सेर्डा भवति। अनेन सेर्डा। डकारष्टिलोपार्थः ( डिति टेः ) इति टिलोपः। स्वर०। शेषं द्वित्वादौ सुवचस्वत् । उशनसौ । धौ विशेषमाह । [ उशनसो धौ० ] इति उशनस्शब्दस्य धिविषये नान्तता अंत्यसकारस्य नकारः अदंतता अकारांतता च सकारस्य लोपो भवतीत्यर्थः । चकारात् तृतीये तु सांत एव तिष्ठतीति धौ रूपत्रयम् । यतः “ संबोधने तूशनसस्त्रिरूपम् ” इति । एकत्र ( हसे० । स्रो० ). द्वितीयरूपे सस्य नः ( हसे० ) तृतीये तु अदंतता वक्तव्येति सलोपः ( समाना० ) इति धेर्लोपः । हे उशनः- हे उशनन्-हे उशन इति ज्ञेयम् । उशनस् भ्याम् । इत्यत्र ( स्रो० । हवे । उ ओ ) उशनोभ्याम् । उशनोभिरित्यादि । उशना शुक्रः । एवं पुरुदंसस्—अनेहस्प्रभृतयः। पुरुदंसा । पुरुदंससौ। पुरुदंससः । पुरुदंसा इंद्रः । अनेहा । अनेहसौ । अनेहसः । इत्यादि । अनेहा कालः वर्षमासदिनादिः ॥

अदस्शब्दस्य भेदः ( त्यदादेष्टेरः स्यादौ ) इति सर्वत्राकारः । अदस् सि इति स्थिते । सौ सः ॥सौ परे अदसो दकारः सो भवति।सेरौ॥ अदसः सेरौकारादेशो भवति । असौ । द्विवचने अद औ इति स्थिते दस्य मः ।मादू ॥ उश्च ऊश्च ऊ ।अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारो भवति दीर्घस्य च दीर्घ ऊकारो भवति । अमू । बहुवचने सर्वादित्वात् ( जसी।अ इ ए)अमे इति स्थिते। एरी बहुत्वे ॥ बहुत्वे सत्यदस एकारस्य ईकारादेशो भवति।अमी । अमुम् । अमू। अमून्। तृतीयादौ मत्वे उत्वे च कृते (टा नास्त्रियाम्)अमुना।द्विवचने ( अद्भि ) इत्यात्वं पश्चादूकारः ॥ अमूभ्याम् । अमीभिः।अमुष्मै । अमूभ्याम् । अमीभ्यः । अमुष्मात् । अमूभ्याम् ।अमीभ्यः।अमुष्य। ओसि एत्वे कृते अयादेशे च कृते पश्चादुकारः । अमुयोः । अमी-

पाम् । अमुष्मिन् । अमुयोः । अमीषु । ( सामान्ये अदसः कः स्यादि-वच्च ) अमुकः । अमुकौ । अमुके । पुँल्लिंगे सर्ववत् ॥ ॥ इति हसांत-पुँल्लिंगप्रक्रिया ॥

अदस्शब्दस्य सकारांतस्यापि विशेषः । तस्य ( त्यदादेष्टेरः० ) सर्वत्राकारे कृते अद् सि इति स्थिते । सूत्रम् ( सौ सः ) सि ७-१ ( ङेरौ० ) टिलोपः । स १-१ ( स्रो० ) अदसो दकारस्य सौ परे सो भवति । अनेन दस्य सः । अस इति स्थिते सूत्रम् । सि ६-१ (ङिति । ङस्य । स्रो०) औ १-१ । सांके० (नामिनो रः) स्वर०। अदसः संबंधिनः सेः औकारो भवति । अनेन सिस्थाने औं ( ओ औ औं ) असौ इति सिद्धम् । द्विवचनादौ ( त्यदादेष्टेः० ) इति सर्वत्राकारे कृते (दस्य मः) अम औ इति स्थिते (ओ औ औ) सूत्रम् । (मादू) म ५-१ ( ङसिरत् । सवर्णे०) उश्च ऊश्च ऊ १-१।सांके० ( चपा अबे० ) सिद्धम् । अदसो मकारात्परस्य ह्रस्वस्य स्वरस्य ह्रस्व उकारो भवति दीर्घस्य च दीर्घ ऊकारो भवति । अनेन अमौ इत्यस्य औकारस्य दीर्घत्वादूकारः । अत्र पूर्वं विभक्तिकार्यं पश्चात् ( मादू )। टास्थाने तु पूर्व ( मादू ) पश्चाद्विभक्तिकार्यमिति विवेकः । । अमू । बहुवचने सर्वादित्वात् ( जसी । अ इ ए ) अमे इति स्थिते । सूत्रम् । ( एरी० ) ए ६-१ ( स्रो० ) ई १-१ । सांके० ( नामि० ) स्व० । बहुत्वे ७-१ (अ इ ए) बहुत्वे बहुवचने सति अदस्शब्दस्य मकारात्परस्य एकारस्य ईकारो भवति । अनेन एकारस्य ईकारः । अमी । मकारात्परस्येति चेन्न व्याक्रियते तदा । अमुकः । अमुकौ । अमुके । इति न सिद्ध्यति । अमि (अम्श०। मादू०) इति अकारस्य उकारः । अमुम् इति सिद्धम्। द्विवचनं प्रथमाद्विवचनवत् । बहुत्वे ( अम्श० । सोनः पुंसः । शसि । मादू ) । अमून् इति सिद्धम् । टाविषये ( मादू ) अस्य उः । अमु । ततः ( टा नास्त्रियाम् ) अमुना । द्विवचने ( अद्भि ) इत्यात्वम् । पश्चात ( मादू ) इत्याकारस्य दीर्घत्वादूकारः । अमूभ्यामिति सिद्धम् । एवं चतुर्थीपंचमीद्वित्वेऽपि तृतीयाबहुवचने (भिस-भिस् ) इति वचनात् ( ए स्भि बहुत्वे । एरी बहुत्वे ) अमीभिः । एवं ४-३ । ५-३ चतुर्थ्येकवचने ( सर्वादेः स्मट् । मादू । क्लि० । ए ऐ ऐ ) अमुष्मै । पंचम्येकव-चने ( ङसिरत् । अतः ) इति स्मडागमः ( सवर्णे० । मादू । क्लि० ) अमुष्मात् षष्ठ्येकवचने ( ङस्स्य । मादू । क्लि० ) अमुष्य ६-२ । ७-२ । ओसि अका-रस्य एकारः ( ए अय् । मादू ) स्वर० । अमुयोः । आमि ( सुडामः । ए स्भि० । एरी बहुत्वे । क्लि० ) अमीषाम् । ७-१ (ङि स्मिन् । मादू । क्लि०) अमुष्मिन्। सुपि (ए स्भि० । एरी बहुत्वे । क्लि०) अमीषु । त्यदादित्वाद्धेरभावः । संबोधनं न भव-तीत्यर्थः । पुनर्विशेषमाह । सामान्य इति सामान्येऽर्थे विशेषकथने अज्ञानाद्यर्थे अदस-

शब्दस्य कः प्रत्ययो भवति । स च स्यादिवत् ज्ञेयः । स्यादौ परे सति यत्कार्यं भवति तत्कार्यं कप्रत्यये परे भवतीत्यर्थः । तेन ( त्यदा० । दस्य मः । मादू ) इति भवति । स्यादिवच्चेति चकारात्प्रथमैकवचने असकौ इत्यपि रूपमपि भवति । पुंसि स्त्रियां च अदसः कप्रत्ययः । स्यादिवत्त्वात् ( त्यदादेष्टेरः स्यादौ । दस्य मः । मादू ) अमुक इति सिद्धम् । ततः स्यादयः । प्रक्रिया सर्वशब्दवत् ॥

इति हसांतपुँल्लिंगसाधनम् ।

---

## अथ हसांताः स्त्रीलिंगाः १०.

हकारांत उपानह्शब्दः । नहो धः ॥ नहो हकारस्य धकारादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदांते च ( वावसाने ) इति तत्वं दत्वं च । उपानत्—उपानद् । उपानहौ । उपानहः । हे उपानत्—हे उपानद् । हे उपानहौ । हे उपानहः । उपानहम् । उपानहौ । उपानहः । उपानहा । उपानद्भ्याम् । उपानद्भिः । इत्यादि ॥

अथ हसांतस्त्रीलिंगे किंचिच्छब्दसाधनं लिख्यते । हकारांतः उपानह्शब्दः पादत्राणार्थवाचकः । तस्य स्वरादौ । स्वर० ( हो ढः ) इति ढत्वप्राप्तौ तदपवादार्थं रसे पदांते च विशेषमाह । सूत्रम् । ( नहो० ) नह् ६—१ । स्वर० ( स्रो० । हवे । उ ओ ) ध १—१ ( स्रो० ) सिद्धम् । वृत्तिः कंठ्या । अनेन रसे पदांते च हस्य धः । सौ धौ च धत्वे कृते ( हसे० । वावसाने ) धकारस्य वा तकारदकारौ । भकारादौ । ( नहो धः । झबे ज० ) धस्य दः । स्वर० । सुपि ( नहो धः । खसे० ) धस्य तः । स्व० । शेषं कंठ्यम् । गोधुक्प्रभृतयः पुँल्लिंगवत् ज्ञेयाः । उष्णिक्—उष्णिग् । उष्णिहौ । उष्णिहः । उत् ऊर्ध्वं स्निह्यति क्षरतीति वा उष्णिक्—यवागूः ( दिशाम् ) इति कत्वम् । इति हांताः । यकारांता अप्रसिद्धाः ॥

वकारांतो दिव्शब्दः । दिव औः ॥ दिव्शब्दस्य औकारादेशो भवति सौ परे । द्यौः । दिवौ । दिवः । दिव् अम् इति स्थिते । वामि ॥ दिवो वकारस्य अमि परे वा आ भवति । द्याम्—दिवम् । दिवौ । दिवः । दिवा ( ऊ रसे ) दिवो वकारस्य उकारो भवति रसे परे । द्युभ्याम् । द्युभिः । दिवे । द्युभ्याम् । द्युभ्यः । इत्यादि ॥

वकारांतो दिव्शब्दः स्वर्ग—आकाशार्थवाचकः । तस्य नामसंज्ञायां स्यादयः । दिव् स् इति स्थिते । सूत्रम् । दिव् ६—१ । स्वर० ( स्रो० ) औ १—१ सांके० ।

(आदत्रे०) अत्र 'आ सौ' इति सूत्रात् 'सौ' इत्यनुवर्तते। दिव इति षष्ठ्या निर्दिष्टत्वा-द्दिव्शब्दसंबंधिनो वकारस्य औकारो भवति सौ परे। अनेन सौ धौ च वस्य औकारः ( इ यं० ) स्व० ( स्रो० ) द्यौः। एवं हे द्यौः। वर्णविधौ नेदमिति यदादेशस्तद्वद्भवतीति सिलोपो न। द्वित्वे बहुत्वे च। स्व०। अमि विशेषः। सूत्रम् ( वामि ) वा ३-१ ( अव्य० ) अम् ७-१। स्वर० ( सवर्णे० ) आ १-१। सांके० ( इ यं० ) त्रिपदम्। दिवो वकारस्य अमि परे वा आत्वं भवति। अनेन अम्विषये वकारस्य आकारः ( इ यं स्वरे ) स्वर०। द्याम्-पक्षे दिवम्। अग्रे स्वरादौ सर्वत्र। स्वर०। हसादौ तु विशेषः। सूत्रम्। उ १-१ सांके०। रसे ७-१ ( अ इ ए ) दिवो वकारस्य रसे परे उकारो भवति। यद्वा ( ऊ रसे ) उ १-१। उ ७-१। रसे ७-१। इति त्रिपदं सूत्रं पठंति। तेन रसे परे उवर्णेपि परे उकारो भवति। यथा द्युषितः दिवि ऊषितः द्यूषितः। एवं दिवम् ऊर्णोति आच्छादयतीति द्यूर्णुत्। अनेन भकारादौ सुपि च वस्य उकारः ( इ यं स्वरे ) सुपि ( ऊ रसे ) ततः ( क्विलात्षः सः० ) इति वांताः॥

रकारांतश्चतुर्शब्दो नित्यं बहुवचनान्तः। **त्रिचतुरोः स्त्रियां तिसृचतसृवत्॥** स्त्रियां वर्त्तमानयोस्त्रिचतुर्शब्दयोस्तिसृ चतसृ इत्येतावादेशौ भवतः स्यादौ विभक्तौ परतः ऋकारश्च ऋकारवत्। ततः ( स्तुरार् ) इत्यादिसूत्रैः ऋदंतशब्दकार्यं न भवति। किं तु ( ऋ रम् ) भवति। तिस्रः। तिस्रः। चतस्रः। चतस्रः। तिसृभिः। चतसृभिः। तिसृभ्यः २। चतसृभ्यः २। **न तिसृ चतसृ नामि दीर्घत्वम्॥** तिसृचतसृ इत्येतयोर्दीर्घो न भवति नामि परे छंदसि वा। तिसृणाम्। चतसृणाम्। छन्दसि तु वा भवति। तिसॄणाम्। चतसॄणाम्। तिसृषु। चतसृषु॥

रेफांतश्चतुर्शब्दो नित्यं बहुवचनांतस्तस्य च स्त्रियां विशेषः। सूत्रम् ( त्रिच० ) त्रिश्च चतुश्च त्रिचतुरौ तयोः ६-२। स्वरे० ( स्रो० ) स्त्री ७-१ ( स्त्रियां योः ) स्त्रीभ्रुवोः। ( ङितामट् ) स्व० ( सव० ) तिसृ च चतसृ च तिसृचतसृ १-२ सांके०। ऋवत् १-१ ( अव्य०। सवर्णे० ) सिद्धमिदं सूत्रम्। स्त्रियां वर्तमानौ यौ त्रिचतुर्शब्दौ तयोस्तिसृचतसृ इत्येतावादेशौ क्रमात् भवतः। त्रिशब्दस्य तिसृ चतुर्शब्दस्य चतसृ ऋकारश्च ऋकारवत् ऋकारेण तुल्यो ज्ञेयः। ततो दीर्घत्वाज्जसि ( स्तुरार् ) इति सूत्रेण आर् न भवति ( पंचसु ) इत्यर्। शसि ( अम्श० ) इत्य-

कारलोपो न । सप्तस्वपि बहुवचनेषु त्रिशब्दस्य तिसृ आदेशः चतुर्शब्दस्य चतसृ । जसि शसि च ( ऋ रम् ) स्वर० ( स्त्री० ) आमि नुडागमे कृते विशेषः । सूत्रम् । न १–१ ( अव्य० ) नाम् ७–१ । स्व० । दीर्घः १–१ ( स्त्री० ) तिसृ चतसृ ६–२ । सांके० । छंदसि ७–१ । वा ३–१ तिसृचतसृ इत्येतयोरिति । स्त्रीलिंगे वर्त्तमानयोस्त्रिचतुर्शब्दयोर्नामि परे दीर्घो न भवति । छंदसि तु वा भवति । वेदे तु तिसृणाम्–तिसॄणाम् । चतसृणाम्–चतसॄणाम् । इति द्वे रूपे भवतः। अन्यथा तिसृणाम् । चतसृणामित्येव । सुपि ( क्लिा० ) ॥

गिर्शब्दस्य भेदः । य्वोर्वि हसे ॥ धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः पदान्ते च । गीः । गिरौ । गिरः । हे गीः। गिरम् । गिरौ । गिरः । गिरा । गीर्भ्याम् । गीर्भिः । गीर्षु । पूः । पुरौ । पुरः । हे पूः । धूः । धुरौ । धुरः । हे धूः । धकारांतः समिध्शब्दः ( वावसाने ) समित्–समिद् । समिधौ । समिधः। हे समित्–हे समिद् । समिधम् । समिधौ । समिधः । समिधा । समिद्भ्याम् इत्यादि । भकारांतः ककुभ्शब्दः ( वावसाने ) ककुप्–ककुब् । ककुभौ । ककुभः । ककुभम् । ककुभौ । ककुभः । ककुभा । ककुब्भ्याम् । हे ककुप्–हे ककुब् । इत्यादि ॥

रेफांतो गिर्शब्दः गिरत्यनयेति गीः । गीर्वाणी सरस्वती चगॄ निगरणे । क्विप्प्रत्ययः । क्विपः सर्वापहारी लोपः ( ऋत इर् ) इति गिर् इति जातम् । तस्य स्वरादौ सर्वत्र । स्व० । हसादौ तु विशेषः । सूत्रम् ( य्वो० ) इश्च उश्च य्वौ तयोः य्वोः ६–२ ( इ यं० । उ वम् ) । स्व०( स्त्री०) र् च व् च र्व् तस्मिन् र्वि ७–१।स्व०। पश्चात् ( नामि० । रिलोपो दीर्घः० ) हसे ७–१ ( अ इ ए ) धातुसंबंधिनोरिकारोकारयोर्दीर्घो भवति रेफवकारयोः परयोः सतोः । किंविशिष्टयोः रेफवकारयोः हसपरयोः हसः परो अग्रे वर्तमानो याभ्यां तौ हसपरौ तयोः। अनेन हसादौ दीर्घः । गि इत्यस्य गी ( हसे० । स्त्री० ) गीः । गिरौ । गिरः । हे गीः । गीर्भ्याम् । गीर्भिः । गीर्भ्यः २ । गीर्षु इत्यादिरूपमवसेयम् । शेषं कण्ठ्यम् । एवं पुर्धुरादयः । उकारस्य दीर्घत्वे ऊकारः । शेषं गिर्–शब्दवत् । पूः । पुरौ । पुरः । पुरम् । पुरौ । पुरः । पुरा । पूर्भ्याम् । पूर्भिः । इत्यादि । एवम् । धूः । धुरौ । धुरः । इत्यादि । धकारांतः समिध्शब्दः इंधनार्थवाचकः । तस्य सौ धौ च ( हसे० ) इति सिलोपे कृते ( वावसाने ) धस्य वा तकारदकारौ । समित्–समिद् । भकारादौ ( झबे जबाः ) धस्य दः । स्व० । सुपि ( खसे० ) धस्य तः । स्व० । समित्सु । शेषं सुकरम् । एवं वीरुध् क्षुध् क्रुध् शब्दाः । भकारांतः ककुभ्शब्दः दिग्वाचकस्तस्य समिध्शब्दवत् प्रक्रिया । न वरम् ( वावसाने ) इति जबत्वे बः चपत्वे

ककुप्-ककुब् । ककुभ्याम् । ( झबे जबाः ) ककुप्सु ( खसे० ) इत्यादि । जकारांतः स्रज्शब्दः पुष्पमालावाचकः । ( दिशाम् ) इति कत्वम् । स्रक्-स्रग् । स्रजौ । स्रजः । एवम् । रुक्-रुग् । रुजौ । रुजः । भकारादौ ( झबे जबाः ) स्रग्भ्याम् । स्रग्भिः । सुपि ( दिशाम् ) इति कत्वम् ( खसे० । किला० ) ( कष० ) स्रक्षु । दकारांताः शरद्संविद्संपद्आपद्विपद्परिषद्प्रतिषद्संसद्मुद्प्रभृतयः ॥

दकारांताः त्यद्तद्यद्एतद् शब्दाः ( तः ) ( त्यदादेष्टेरः स्यादौ ) इति सर्वत्राकारः ( आवतः स्त्रियाम् ) पकारः सिलोपार्थः ( सवर्णे दीर्घः सह ) इति दीर्घे कृते स्त्रीलिंगसर्वशब्दस्येव रूपं ज्ञेयम् । स्या[1] । त्ये । त्याः । त्याम् । त्ये । त्याः । त्यया । त्याभ्याम् । त्याभिः । त्यस्यै । त्याभ्याम् । त्याभ्यः । इत्यादि । सा । ते । ताः । या । ये । याः । एषा । एते । एताः । अन्वादेशे । एताम्-एनाम् । एते-एने । एताः-एनाः । एतया-एनया । एतयोः-एनयोः । एवं किम् । का । के । काः । इयं स्त्रियाम् ॥ इदम् शब्दस्य स्त्रियामियं भवति सौ परे सिसहितस्य । इयम् । इमे । इमाः । इमाम्-एनाम् । इमे । इमाः । अनया । आभ्याम् । आभिः । अस्यै । आभ्याम् । आभ्यः । अस्याः । आभ्याम् । आभ्यः । अस्याः । अनयोः । आसाम् । अस्याम् । अनयोः । आसु ॥

त्यदादीनां विशेषः । दकारांतास्त्यद्तद्यद्एतद्शब्दास्तेषाम् ( त्यदादेष्टे० ) इत्यकारे कृते ( आवतः स्त्रियाम् ) इति सूत्रेण आप्प्रत्ययः । आप् इति पकारः ( आपः ) इति सूत्रेण सिलोपार्थः । ततः ( सवर्णे० ) इति दीर्घे कृते सिविषये ( तः ) इति तस्य सः । साधना सर्वशब्दवत् । स्या । त्ये । त्याः । एवं तद् । सा ( आपः ) ते ( औंगी ) ताः ( सवर्णे० । स्रो० ) ताम् ( सवर्णे० ) ते ( औरी ) ताः ( सवर्णे० । स्रो० ) तया ( टौसोरे । ए अय् ) ताभ्याम् । ताभिः । तस्यै ( ङितां यट् । यटोच्च ) इति सुट्पूर्वस्य आपः अकारः । स्वर० ( ए ऐ ऐ ) ताभ्याम् । ताभ्यः । तस्याः ५-१ ( ङितां यट् । यटोच्च ) इति सुट् ६-१ । ङितां यट् । यटो० ) तयोः ( टौसोरे । ए अय् ) स्वर० । तासाम् ( सुडामः ) स्वर० । तस्याम् ( आम्ङेः । ङितां यट् । यटोच्च ) स्वर० । तयोः । तासु । त्यदादित्वात्संबोधनाभावः । एवम् या । ये । याः । एतद्शब्दस्य एनादेशादिकं पुंवत् ( तः । किला० ) एषा । एते । एताः [ इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः ] एताम्-एनाम् । एते-एने । एताः-एनाः । एतया-एनया ।

---

[1] त्यच्छब्दस्य प्रायस्तच्छब्दस्यैव प्रयोगो भवति । 'यत्र त्यमाभवत्' इत्यादुक्तिस्तु प्रयोगोपलंभात् ।

एतयोः–एनयोः । इति विशेषः । इत्यादि ज्ञेयम् । एवं मकारांतः किमूशब्दोऽपि सर्वाशब्दवत् ( त्यदादेष्टेरः स्यादौ )( आवतः स्त्रियाम् )का । के । काः । इदमूशब्दस्य सौ विशेषः । इदम् १–१ सूत्रम् । इयम् १–१ ( हसे० ) स्त्री ७–१ ( स्त्रियां योः । स्त्रीभ्रुवोः । ङितां यट् ) स्वर० ( सवर्णे० ) द्विपदम् । इदम् शब्दस्य स्त्रीलिंगे सौ परे इयम् आदेशो भवति गुरुत्वात्सर्वस्य । अनेन । इयम् ( हसे० ) इयम् । इमे । इमाः । अग्रे द्वितीयाबहुत्वं यावत् । त्यदादेष्टेरत्वे कृते ( दस्य मः ) इति मत्वे कृते ( आवतः स्त्रियाम् । सवर्णे० ) गंगाशब्दवत् । तृतीयादौ ( त्यदादेष्टेः० ) इति सर्वत्र अकारः टाविषये ओसि च (अनटौ०) इति अनादेशे कृते(आवतः स्त्रियाम् । टौसोरे । ए अय् ) स्व० । अनया । अनयोः । भकारादौ सुपि च ( स्म्यः ) इति अकारे कृते ( आवतः स्त्रियाम् ) आभ्याम् । आभिः । ङेङसिङस्ङिषु(आवतः स्त्रियाम् । ङितां यट् । यटोच्च । स्म्यः ) अस्यै । अस्याः । सप्तम्येकवचने (आवतः स्त्रियाम् । आम् ङेः । ङितां यट् । यटोच्च । स्म्यः ) स्वरहीन० । अस्याम् । आमि ( सुडामः । स्म्यः । आवतः० ) स्व० । आसाम् । शेषं सुगमम् ॥

चकारांतः त्वचूशब्दः ( चोः कुः ) इति कत्वम् । त्वक्–त्वग् । त्वचौ । त्वचः । त्वचम् । त्वचौ । त्वचः । त्वचा । त्वग्भ्याम् । त्वग्भिः । त्वक्षु । इत्यादि । एवम् ऋचूवाचूप्रभृतयः ॥

चकारांतस्त्वचूशब्दस्तस्य रसे पदांते च ( चोः कुः ) इति चस्य कः सौ धौ च ( हसे० ) इति सिलोपे कृते चस्य कत्वे कृते ( वावसाने ) इति वा कस्य गकारः । पक्षे ककार एव तिष्ठति । त्वक्–त्वग् । हे त्वक्–हे त्वग् । भकारादौ तु कत्वे कृते ( झबे जबाः ) कस्य गः । स्व० । त्वग्भ्याम् । त्वग्भिरित्यादि । सुपि ( चोः कुः । कि० ) कषसंयोगे क्षः । त्वक्षु । स्वरादौ सर्वत्र । स्वर० । त्वचौ । त्वचः । इत्यादि । एवम् ऋचूवाचूशुचूप्रभृतयोऽपि चकारांता ज्ञेयाः । ऋक्–ऋग् । ऋचौ । ऋचः । वाक्–वाग् । वाचौ । वाचः । इत्यादि । शुक्–शुग् । शुचौ । शुचः । तकारांता योषित् सरित् तडित् विद्युत् प्रभृतयः ॥

पकारांतोऽपूशब्दो नित्यं बहुवचनांतः।अप् जस् इति स्थिते(न्सम्महतः०) इति दीर्घः ।आपः । द्वितीयाबहुवचने पंचस्विति विशेषणात्र न दीर्घः । अपः । भि दपाम् ॥ अबादीनां भकारे परे दत्वं भवति। अद्भिः । अद्भ्यः २ । अपाम् । अप्सु ॥

पकारांतः अपूशब्दो नित्यं बहुवचनांतः नित्यं स्त्रीलिंगे । अप् अस् इति स्थिते सति ( न्सम्महतः० ) इति दीर्घः । स्वर० ( स्रो० ) आपः । शसि पंचसु इति विशेषणान्न दीर्घः किंतु । स्वर०( स्रो०) अपः । भकारादौ विशेषः । सूत्रम् ( भिदपाम् ) भ् ७–१ । स्वर० । द् १–१ ( हसे० ) अप्६–३ त्रिपदम् । अबादीना-

मित्युक्तः पाठः । किं तु अप्शब्दस्य अप्शब्दसंबंधिनः पकारस्य स्यादौ भकारे परे दकारो भवति । सूत्रे अपामिति बहुवचनं अप्शब्दस्य बहुवचनांतत्वे ज्ञापकम् । अनेन पस्य दः । अद्भिः । अद्भ्यः २ । आमि सुपि च । स्व० । अपाम् । अप्सु ॥

चकारांतो दिश्शब्दः । दिशाम्[1]॥ दिश् दृश् स्पृश् मृश् इत्यादीनां रसे पदांते च कुत्वं भवति । दिक्—दिग् । दिशौ । दिशः । दिशम् । दिशौ । दिशः । दिशा । दिग्भ्याम् । दिक्षु । इत्यादि । षकारांतः त्विष्शब्दः । ( षो डः ) इति डत्वम् ( वावसाने ) इति टकारः । त्विट्—त्विड् । त्विषौ । त्विषः । हे त्विट्—हे त्विड् । त्विषम् । त्विषौ । त्विषः । त्विषा । त्विड्भ्यामित्यादि । आशिष्शब्दः सजुष्शब्दवत् । आशीः । आशिषौ । आशिषः । इत्यादि । स्त्रीलिंगस्य अदस्शब्दस्य सौ न विशेषः । द्विवचनादौ तु टेरत्वे मत्वे च कृते अनन्तरम् ( आवतः स्त्रियाम् ) इत्याप् दीर्घत्वं विभक्तिकार्यम् । पश्चात् ( माद् ) इति ह्रस्वस्य ह्रस्व उकारः दीर्घस्य दीर्घ ऊकारश्च । असौ । अमू । अमूः । अमूम् । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूषु ( सामान्ये अदसः कः० ) अमुका । अमुके । अमुकाः । इत्यादि स्त्रीलिंगे सर्वाशब्दवद्रूपं ज्ञेयम् ॥

इति हसांताः स्त्रीलिंगाः ।

शकारांतो दिश्शब्दस्तस्य रसे पदांते च विशेषः । सूत्रम् । दिश् ६-३ । स्वर० ( सो० ) दिश्दृश्स्पृश्मृश्ऋत्विजदधृष्स्रजउष्णिह्अंच्युजक्रुञ्च्असृज् इत्यादीनां शकारस्य अन्तस्य च रसे पदांते च कुत्वमित्यर्थः । शेषं कंठचम् । अनेन रसे पदांते च शस्य कः । ततः ( वावसाने ) दिक्—दिग् । हे दिक्—हे दिग् । दिशौ । दिशः । दिग्भ्याम् ( दिशाम् । झवे जबाः ) दिक्षु ( दिशाम् ) इति कत्वम् ( कि३० ) कपसं० । एवम् । दृक्—दृग् । दृशौ । दृशः । मर्मस्पृक्—मर्मस्पृग् । मर्मस्पृशौ । मर्मस्पृशः । ऋत्विक्—ऋत्विग् । ऋत्विजौ । ऋत्विजः । इत्यादि । षकारांतस्त्विष्शब्दस्तस्य रसे पदांते ( षोडः ) इति डत्वम् । सौ धौ च ( हसे० । वावसाने ) डकारटकारौ । त्विट्—त्विड् । हे त्विट्—हे त्विड् । भकारादौ ( षोडः )

१ अत्र चोः कुरित्यस्मात्कुशब्दानुवृत्तौ कृतायां 'दिशाम्' इत्येवम् सूत्रम् ।

स्वर० । त्विड्भ्यामित्यादि । सुपि । ( षो डः । खसे चपा० ) डस्य टः । स्वर० । त्विट्सु । एवं प्रावृष् विप्रुष् रुष् तृष् शब्दाः । आशिष्शब्दः सजुष्शब्दवत् ज्ञेयः । ( दोषाम् ) इति षस्य रः । ( सजुषाशिषो रसे पदांते च दीर्घः ) स्रो० । आशीः । स्वरादौ । स्वर० । आशिषौ आशिषः। आशिषम्। आशिषौ । आशिषः।(दोषाम्) सजुषाशिषो रसे पदांते च दीर्घः । जल० । आशीर्भ्याम् । आशीःषु । ( स्रो० ) इत्यादि ज्ञेयम् । सकारांतस्य स्त्रीलिंगस्य अदस्शब्दस्य सौ विशेषो न सिविषये । यथा पुँल्लिंगे रूपं तथैवात्रापि ( त्यदादेष्टेः० ) इत्यकारः ( आवतः स्त्रियाम् । मौ सः । सेरौ । ओ औ औ ) असाविति सिद्धम् । द्विवचनादौ सर्वत्र टेरत्वे कृते ( दस्य मः ) ततः ( आवतः स्त्रियाम्) इत्यापि कृते स्त्रीलिंगे सर्वाशब्दवत् विभक्तिकार्ये कृते ( औरी । अ इ ए ) पश्चात् ( मादू ) इति ह्रस्वस्य स्वरस्य ह्रस्व उकारः दीर्घस्य स्वरस्य दीर्घ ऊकारः । अमूः । ( सवर्णे०। मादू । स्रो० ) अमूम् । अमू । अमूः । अमुया ( टौसोरे ) अमूभ्याम् । अमूभिः । ( मादू ) अमुष्यै ( ङितां यट् । यटोच्च ) इति पूर्वस्यापोऽकारः ( मादू । कि० ) स्वर० ( ए ऐ ऐ ) अमूभ्याम् । ( मादू ) अमूभ्यः ( मादू ) अमुष्याः । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमुयोः ( टौसोरे । ए अय् ) स्वर० ( मादू ) अमूषाम् । ( सुडामः । मादू । कि० ) स्वरहीनं० । अमुष्याम् ( आम्ङेः । ङितां यट् । यटोच्च ) पूर्वस्य चापोऽकारः ( मादू । किला० ) स्व० । अमुयोः ( टौसोरे ) अमूषु ( मादू । किला० ) सामान्येऽर्थे वाच्ये सति अदस्शब्दात्कः प्रत्ययो भवति । अमुका । अमुके । अमुकाः ।इत्याद्या ज्ञेयाः ।सुमनस् अप्सरस् भास् सुवचस्प्रभृतयो ज्ञेयाः॥

इति हसांतस्त्रीलिंगसाधनम् ।

---

## अथ हसांता नपुंसकलिंगाः ११.

अथ हसान्ता नपुंसकलिंगाः प्रदर्श्यन्ते। रेफांतो वार्शब्दः(नपुंसकात्स्यमोर्लुक् ) वाः, वारी, वारि २ । अयम इति विशेषणात नुम् न भवति । वारा । वार्भ्याम् । वार्भिः । वार्षु । इत्यादि । चतुर्शब्दो नित्यं बहुवचनांतः (चतुराम्शौ च) इत्याम् । चत्वारि२ ।इत्यादि ॥

अथ हसांतनपुंसके किंचित्साधनमुच्यते । अथ मुख्यवृत्त्या हकारांतः शब्दो नास्ति । गौणत्वे तु सुष्ठु अनड्वान् यस्य तत् स्वनडुह्।स्वनडुह् १-१ (नपुंसकात्स्यमोर्लुक् । वसां रसे । वावसाने ) स्वनडुत्-स्वनडुद् । स्वनडुही । स्वनड्वांहि ( चतुरनडुहोराम् शौ च ) इत्याम् । पुनरपि । स्वनडुत्-स्वनडुद् । स्वनडुही । स्वनड्वांहि। एवम् । गोधुक्-गोधुग् । गोदुही । गोदुंहि । अनुपानत्-अनुपानद् । अनुपानही । अनुपानांहि इत्यादि । अथ रेफांतो वार्शब्दस्तस्य ( नपुंसकात्स्यमोर्लुक् । स्रो० )

वाः। हे वाः। द्वित्वे तु ( ईमौ ) स्व० । वारी । हे वारी । जसि शसि च ( जश्शसोः शिः ) इति शौ कृते अयम इति विशेषणात् यमप्रत्याहारांतस्य नुमागमनिषेधान्नुमागमो न भवति । तेन स्व० । वारि । हे वारि । पुनरपि द्वितीयायाम् । वाः । वारी । वारि । तृतीयादौ स्वरादौ । स्व० । वारा । हसादौ तु । जल० । वार्भ्याम् । सुपि ( किला० ) जल० । वार्षु । इत्यादयः । चतुर्शब्दस्य बहुवचनांतस्य ( जश्शसोः शिः ) इतीकारे कृते ( चतुराम् शौ च ) इत्याम् ( उ वम् ) स्व० । चत्वारि २ । चतुर्भिः । चतुर्भ्यः।चतुर्भ्यः। आमि (रः संख्यायाः) इति नुडागमः (ष्रुनों०। रहाद्यपो० ) स्वर० । चतुर्णाम् । सुपि ( किला० ) चतुर्षु । शेषं कंठयम् । गौणत्वे तु प्रियाश्चत्वारः पुरुषा यस्य तत् । प्रियचतुः । प्रियचतुरी । प्रियचत्वारि । प्रियाः चतस्रः स्त्रियो यस्य तत्–प्रियचतस्र । प्रियचतसृणी । प्रियचतसॄणि ॥

नकारांतः अहन्शब्दः । अह्नः ॥ अहन्शब्दस्य नकारस्य विसर्गादेशो भवति रसे पदांते च ( स्रोर्विसर्गः ) अहः ( ईमौ।वेङ्योः) अह्नी-अहनी, अहानि २ । अह्ना । अहोभ्याम् । अहोभिः।अह्ने । अहोभ्याम् । अहोभ्यः ।अह्नः।अहोभ्याम् । अहोभ्यः।अह्नः।अह्नोः। अह्नाम् । अह्नि-अहनि । अह्नोः । अहःसु । ब्रह्मन्शब्दस्य रसे पदांते च नस्य लोपः । ब्रह्म,ब्रह्मणी, ब्रह्माणि २ । ब्रह्मणा । ब्रह्मभ्याम् इत्यादि [ संबुद्धौ नपुंसके वा नलोपो वाच्यः । ] एवं चर्मन् वर्मन् पर्वन् प्रभृतयः ॥

नकारांतः अहन्शब्दः । सूत्रम् अहन् ६–१ ( अल्लोपः स्वरे० ) स्व० । ( स्रो० ) अह प्रकाशगत्योः । अह्नातीति अहः । अन्नंताहन्शब्दस्य संबंधिनो नकारस्य सकारो भवति षष्ठीनिर्दिष्टत्वादंत्यस्य रसे पदांते च । अनेन सौ धौ च अमि च ( नपुंसकात्स्यमोर्लुक् ) इति स्यमोर्लोपे कृते ( अहः ) इति नकारस्य सकारे कृते ( स्रो० ) अहः २ । हे अहः । द्विवचने तु ( ईमौ ) इतीकारे कृते ( वेङ्योः ) इति वा अकारलोपः । स्वर० । अह्नी–अहनी २ । जसशसविषये तु ( जश्शसोः शिः । नोपधायाः ) स्वर० । अहानि २ । यमप्रत्याहारांतत्वान्न नुम् स्वरादौ सर्वत्र ( अल्लोपः स्वरे) इति अल्लोपः । अह्ना । अह्ने । इत्यादि। भकारादौ (अहः )इति नकारस्य सकारः (स्रो० । हवे । उ ओ ) अहोभ्याम । अहोभिरित्यादि । ङिवचने (वेङ्योः) इति वा (अल्लोपः स्वरे०) अह्नि–अहनि । सुपि ( अहः ) इति सः। स्व०। अहस्सु। ब्रह्मन्शब्दस्य ( नपुंसकात्स्यमोर्लुक् ) इति सौ अमि च लुप्ते सति ( नाम्नो० ) इत्यधाविति ,विशेषणात् धौ नस्य लोपो न भवति । ब्रह्म । हे ब्रह्मन् । क्षेमेंद्राचार्यस्तु–संबो-

१ अत्र 'स्रोर्विसर्गः' इति सूत्रात् 'विसर्गः' इत्यस्य पदस्यानुवर्तने जाते 'अहः' एतावन्मात्र-मेव सूत्रम् ।

धनोपि वा नकारलोपमिच्छति । तेन हे ब्रह्म इत्यपि स्यात् । प्रक्रियाकौमुद्यां च ( संबुद्धौ वा नपुंसकानां नलोपो वाच्यः ) इति द्विवचने तु ( ईमौ ) इति ईकारे कृते अम्वयुक्तादिति विशेषणादल्लोपनिषेधः । स्वर० । ब्रह्मणी, बहुत्वे ( जश्शसोः शिः । नोपधायाः । ष्रुर्नो० ) स्व० । ब्रह्माणि २ । अग्रे स्वरादौ सर्वत्र ( ष्रुर्नो० ) स्व० । ब्रह्मणा । रसे परे च ( नाम्नो० ) ब्रह्मभ्याम् । ब्रह्मसु । एवं चर्मन्कर्मन्वर्मन्शर्मन्नर्मन्पर्वन्प्रभृतयः ( अल्लोपः स्वरे० ) इत्यकारलोपानर्हाः । दामन्सामन्नामन्लोमन्व्योमन्प्रेमन्धामन्हेमन्प्रभृतयोऽपि नांताः शब्दाः साध्याः । नाम, नामनी, नामानि २ । एवं दंडिन्– दंडि, दंडिनी, दंडीनि २ ॥

नांतादंताच्छंदसि ङिश्योर्वा लोपः । [ छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ ] परमे व्योमन् । सर्वा भूतानि ।

पुनर्विशेषमाह । ( नांता० ) छंदसि वेदे नांतात् नकारांतात् अदंतात् अकारांतात् शब्दात्परयोर्नपुंसकलिंगसंबंधिनोर्ङिश्योर्वा लोपः । ङि सप्तम्येकवचनम् । शि ( जश्शसोः शिः) इति एतयोर्वा बहुलं लोपो भवति । यथा परमे७–१ । व्योमन्७–१ उभयत्रापि ७–१ । ङि एकत्र ( अ इ ए ) अन्यत्र ङिलोपः । छांदसिकत्वात् ( नाम्नो नो० ) इत्यपि न भवति । अथवा ( छंदस्यागमजानागमजयोर्नकारयोर्लोपालोपौ क्वचिद्वक्तव्यौ ) इति । सर्व १–३ । भूत १–३ । उभयत्र प्रथमाबहुवचने ( जश्शसोः शिः । नुमयमः । नोपधायाः । ष्रुर्नो० ) स्वर० । ततः शिलोपः छांदसिकत्वात् ( नाम्नो नो लोशपवौ ) इति नकारस्यापि लोपो भवति । यद्वा निमित्ताभावे नैमित्तिकस्याप्यभावः छांदसिकत्वादेव दीर्घत्वं तु न निवर्त्तते । भूत १–३ ( जश्शसो० । नुम० । नोप० ) स्वर० । परमे प्रकृष्टे व्योमन् आकाशे सर्वा भूतानि सर्वाणि भूतानि वर्त्तते इत्यर्थः । यथा परमे व्योमन् इत्यत्र ङिलोपः। सर्वाणि भूतानि इत्यत्र नुम्सहितशिलोपः । परमे व्योमन् सर्वा भूतानि इति छांदसिकम योगः । असृक्–असृग् । असृजी । असृंजि ( दिशाम् ) इति कत्वम् ॥

दकारांतास्त्यदादयः शब्दाः । त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति स्यादाविति विशेषणात् । द्विवचनादौ टेरत्वे कृते सर्वशब्दवद्रूपं ज्ञेयम् । त्यत्–त्यद्, त्ये, त्यानि २ । तत्–तद्, ते, तानि २ । यत्–यद्, ये, यानि २ । [ नपुंसके एतदोऽन्वादेशे अमि एनदिति वक्तव्यम् ] एतत्–एतद्, एते, एतानि२ । एनत्(द्)एने।एनानि । किम्, के, कानि २ । इदम्, इमे, इमानि २ । तृतीयादौ सर्वत्र पुंवत् ॥

अथ दकारांतास्त्यदादयः । तेषां त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति । स्यादौ विभक्तौ परे एव भवति न तु लुकि कृते इति विशेषणात् लुकि न तन्निमित्तमिति । अत एव ( तः ) इति सत्वमपि न भवति । तत् । द्विवचनादौ ( त्यदादे० । ईमौ । अ इ ए ) त्ये, त्यानि २ । तत् ( त्यदादे० । जश्श० । नुम० । नोप० ) स्व० । तृतीयादौ सर्वत्र ( त्यदादेष्टे० । टेन ) तेन । ताभ्याम् ( आद्धि ) तैः ( अ इ ए । ए ऐ ऐ ) तस्मै ( सर्वादेः स्मट् । ए ऐ ऐ ) ताभ्याम् ( अद्धि ) तेभ्यः ( ए स्भि० ) तस्मात् ( ङसिरत् ) इति स्मडागमः ( सवर्णे० ) ताभ्याम् । ( अद्धि ) तेभ्यः ( ए स्भि० ) तस्य ( ङस्स्य ) तयोः ( ओसि । ए अय् ) तेषाम् ( सुडामः । ए स्भि० । किला० ) स्व० । तस्मिन् ( ङि स्मिन् ) तयोः ( ओसि । ए अय् ) तेषु ( कि० ) त्यदादीनां धेरभावः । एवम् । एतत्-एतद् । एते । एतानि । द्वितीयायाम् [ एतदोन्वादेशे० ] इत्यस्य प्राप्तौ अमि विषये वक्तव्ये विशेषमाह [ नपुंसके एतदोऽन्वादेशे अमि एनदिति वक्तव्यम् ] एतत् ( द् )-एनत् ( द् ) । एते-एने । एतानि-एनानि । शेषं पुंवत् । केचित्तु इदम्शब्दस्याप्यन्वादेशे नपुंसके अमि एनदितीच्छंति । मकारांतः किम्शब्दस्तस्य ( नपुंसकात्स्यमोर्लुक् ) इति लुकि कृते त्यदादेष्टेरत्वं न । किंतु ( मोनु० ) अन्यत्र तु त्यदादेष्टेरत्वे कृते नपुंसके सर्वशब्दवत् । किम्, के, कानि २ । एवम् । इदम्, इमे, इमानि २ । तृतीयादौ सर्वत्र पुंवत् पुँल्लिगवत् ॥

चकारांतः प्रत्यच्शब्दः (चोः कुः) प्रत्यक् २ ।(अञ्चेरलोपो दीर्घश्च) प्रतीची २ । प्रत्यञ्चि २ । तकारांतः जगत्शब्दः । जगत ( द् ), जगती, जगंति २। महत्शब्दे तु न्सम्महत इति विशेषणात सिविषये दीर्घत्वम् । महत् ( द् ), महती, महांति २ । इत्यादि ॥

चकारांतः प्रत्यच्शब्दः ( नपुंसकात्स्यमोर्लुक् । चोः कुः । वावसाने ) प्रत्यक्-प्रत्यग् २ । द्विवचने ( ईमौ । अञ्चेरलुग्दीर्घश्च ) स्वर० । प्रतीची २ । बहुत्वे ( जश्श० । नुम० । नश्चा० ) प्रत्यञ्चि २ । अत्राकारस्योपधाऽभावात् ( नोपधायाः ) इति न दीर्घत्वम् । अग्रे तृतीयादौ पुंवत् । एवम् स्वरादौ ( अञ्चेरलोपो दीर्घश्च ) भकारादौ ( चोः कुः । झबे जबाः ) प्रतीचा । प्रत्यग्भ्याम् । प्रत्यग्भिरित्यादि । सुपि ( चोः कुः । किला० ) कष० । प्रत्यक्षु । एवम् । तिर्यक् ( ग् ), तिरश्ची, तिर्यञ्चि २ । अन्वक् ( ग् ), अनूची, अन्वञ्चि २ । गवाक् ( ग् ), गोची, गवाञ्चि २ । गामंचतीति गोअक् ( नो लोपः । गवादेरवर्णागमः । ओ अव् ) गवाक ( ग् ) । गवाच् औ ( अञ्चेरलोपो० ) निमित्ताभावे नैमित्तिकस्याप्यभावः । इत्यवर्णागमस्यापि लोपः ( ओ अव् ) इत्यस्यापि निषेधः । गोची । गवाच् अस् ( जश्शसोः

शिः । नुमयमः ) इत्यादि । तकारांतो जगतुशब्दस्तस्य स्यमोर्लुकि । जगत् (द्) २ । द्वित्वे (ईमौ) स्वर० । जगती २ । बहुत्वे (जश्श० । नुम० । नश्चाप० ) जगंति २ । शेषं कंठ्यम् । एवं यकृत् ( द् ) । यकृती । यकृंति । शकृत् (द्) । शकृती । शकृंति । महत्शब्दोऽप्येवम् । न वरम् । शौ विषये ( न्सम्महतोश्चौ दीर्घः० ) इति दीर्घत्वम् । महत् (द्), महती, महांति २ । महता । महद्भ्यामित्यादि । पुंवत् ॥

सकारांताः पयस्तेजस्वचस्प्रभृतयः । पयः, पयसी, पयांसि २। पयसा । पयोभ्याम् । पयोभिः । इत्यादि । अदस्शब्दस्य स्यमोर्लुकि कृते ( स्रोर्विसर्गः ) द्विवचनादौ टेरत्वे कृते मत्वोत्वे । अदः, अमू, अमूनि २ । शेषं पूर्ववत् । इति हसांता नपुंसकलिंगाः ॥

इति हसांताः समाप्ताः ।

सकारांतः पयस्शब्दः । पयः पानीयं दुग्धं वा । स्यमोर्लुकि कृते (स्रो०) पयः २। द्वित्वे ( ईमौ ) स्वर० पयसी २ । बहुत्वे ( जश्शसोः शिः । नुमयमः । न्सम्महतः०) इति दीर्घः । पयांसि २ । तृतीयादौ स्वर दौ । स्वर० । भकारादौ (स्रो० । हवे । उ ओ ) पयसा । पयोभ्याम् । पयोभिरित्यादि । एवं तेजस् वचस् महस् यशस् वयस् शिरस् तपस् मनस् नमस् अभस् नभस् एनस् सरस् वासस् रजस् छंदस् अनस् अयस् स्रोतस् रक्षस् श्रेयस् उषस् वर्चस् मेदस् शेफस् श्रवस् अर्चस् तरस् रहस् ऊधस् यादस् आगस् एधस् ओकस् प्रभृतयः । हविष्शब्दो हविर्द्रव्यवाची । (दोषाम् । नपुंस० । स्रो० ) हविः, हविषी, ( ईमौ ) स्वर० । हवींषि २ । ( जश्शसोः शिः । नुम० । न्सम्महतो धौ दीर्घः० ) इति दीर्घे कृते नुमि सकार एवास्तीति न्सन्तत्वम् ततो नुम् । विसर्गव्यवधानेपि षत्वम् । हविषा । भ्यांभिस्भ्यस्सुब्विषये(दोषाम्) जल० । हविर्भ्याम् । हविर्भिः । हविःषु । एवम् । अर्चिः । अर्चिषी । अर्चींषि । ज्योतिः । ज्योतिषी । ज्योतींषि । रोचिः । रोचिषी । रोचींषि । आयुः । आयुषी । आयूंषि । वपुः । वपुषी । वपूंषि । जनुः । जनुषी । जनूंषि । चक्षुः । चक्षुषी । चक्षूंषि । यजुः । यजुषी । यजूंषि । सर्पिः । सर्पिषी । सर्पींषि । धनुः । धनुषी । धनूंषि । इत्यादि । अदस्शब्दस्य प्रथमाद्वितीययोर्विशेषः । तत्रैकवचने ( नपुंसकात्स्यमोर्लुक् ) इति लुकि कृते सति त्यदादेष्टेरत्वं न भवति । किंतु ( स्रो० ) अदः २ । द्वित्वे ( त्यदादेष्टेरः० । दस्य मः । ईमौ । अ इ ए । मादू ) एकारस्य ऊकारः अमू २ । अमुनी इति तु छांदसं रूपम् । उक्तं च भागवते । " अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते । उभे अपि न गृह्णंति मायासृष्टे विपश्चितः " ॥ १ ॥ इति । बहुत्वे ( त्यदादे० । दस्य मः । जश्शसोः० । नुम० । नोपधायाः । मादू ) आकारस्य ऊकारः । अमूनि २ । तृतीयादौ सर्वत्र पुंवत् । ३—१ ( त्यदादेष्टेरः० । मादू । टा नास्त्रियाम् ) अमुना । ३—२ ( त्यदादे० । अद्भि । मादू ) अमूभ्याम् । ३—३ ( भिस भिस् । ए स्मि० । एरी व० ) अमीभिः । ४—१ ( त्यदा० । दस्य मः ।

सर्वादेः स्मट् । मादू । किला० । ए ऐ ऐ ) अमुष्मै । ४-२ ( अद्भि । मादू ) अमूभ्याम् । ४-३ ( ए स्भि० । एरी० ) अमीभ्यः । ५-१ ( त्यदा० । दस्य मः । अतः । मादू । किला० ) अमुष्मात् । ५-२ ( अद्भि । मादू० ) अमूभ्याम् । ५-३ ( ए स्भि० । एरी० ) अमीभ्यः । ६-१ ( त्यदा० । ङस्स्य । दस्य मः । मादू । किला० ) अमुष्य । ६-२ ( ओसि । ए अय् । मादू ) अमुयोः । ६-३ (त्यदा० । दस्य मः । सुडामः । ए स्भि० । एरी० । किला०) अमीषाम् । ७-१ ( त्यदा० । दस्य मः । ङि स्मिन् । मादू । किला० ) अमुष्मिन् । ७-२ ( त्यदा० । दस्य मः । ओसि । ए अय् ) स्व० । ( मादू ) अमुयोः । ७-३ ( ए स्भि० । एरी० । किला०) अमीषु ॥ ॥ इति हसांतनपुंसकलिंगसाधनम् ॥

इति षड्लिंगाः समाप्ताः ।

## अथ युष्मदस्मत्प्रक्रिया १२.

अथ युष्मदस्मदोः स्वरूपं निरूप्यते । तयोश्च वाच्यलिंगत्वात्त्रिष्वपि लिंगेषु समानं रूपम् । **त्वमहं सिना ॥** युष्मदस्मदोः सिसहितयोः त्वम्-अहम् इत्येतावादेशौ भवतः यथासंख्येन । त्वम् अहम् । **युवावौ द्विवचने॥** युष्मदस्मदोर्द्विवचने परे युव आव इत्येतावादेशौ भवतः॥

अथेति संज्ञासंधिस्वरांतहसांतलिंगत्रयसाधनानंतरं युष्मदस्मदोः युष्मच्च अस्मच्च युष्मदस्मदौ तयोः स्वरूपं मुख्यस्वरूपमेव निरूप्यते, न तु गौणत्वविशेषादिक-मित्यर्थः । अत्राह परः । ननु यथा सर्वादयो लिंगत्रये साधितास्तथा एतावपि कथं न साधितौ तत्रोत्तरमाह । तयोर्युष्मदस्मच्छब्दयोर्वाचि वचने वाग्व्यवहारकाले वाच्यलिंगत्वात् स्वविषये लिंगोद्योतकत्वाभावात् त्रिष्वपि पुंस्त्रीनपुंसकलिंगेषु समानं सदृशमेव रूपम् । यथा त्रिषु लिंगेषु-सर्वो जनः, सर्वा जगती, सर्वं जगत् इत्यादिरूप-भेदो दृश्यते न तथैतयोः । यथा-त्वं देवः, त्वं देवी, त्वं ब्रह्म इत्यादौ न कोपि रूप-भेदः । अतः प्राङ् न साधितावित्यर्थः । अथवा वाच्यमिति नामशब्दरूपम् अभि-धेयं विशेष्यपदमित्यर्थः । तस्येव लिंगं विद्यते ययोस्तौ वाच्यलिंगौ । यदि वा वाच्यस्य पुरुषस्त्रीकुलादेर्लिंगमेव लिंगं ययोरिति बहुव्रीहिः । यदुक्तम् । "वाच्य-मित्युच्यते भेद्यं तल्लिंगं भजते तु यः । विशेषणत्वमापन्नो वाच्यलिंगः स उच्यते" १ ॥ इति । अनयोः साधनमुच्यते । प्रथमैकवचने सूत्रम् । त्वं च अहं च त्वमहम् १-२ । सांक० । सि ३-१ ( टा नास्त्रियाम् ) युष्मद० । वृत्तिः कंठ्या । युष्मदः सिना सह त्वम् इत्यादेशः । अस्मदश्च सिना सह अहम् इत्यादेशः । द्विवचने-युष्मद् औ अस्मद् औ इति स्थिते सति । सूत्रम् (युवावौ०) युवश्च आवश्च युवावौ १-२ । (औ औ औ) द्विवचने । ७-१ ( अ इ ए ) युष्मद० । युष्मदः सर्वविभक्तिद्विवचने परे युव-आदेशः अस्मदश्च आव इत्यर्थः । युव औ आव औ इति स्थिते ॥

आमौ ॥ युष्मदस्मद्भ्यां पर औ आम् भवति । युवाम् । आवाम् । यूयंवयं जसा ॥ जसा सहितयोर्युष्मदस्मदोर्यूयम् वयम् इत्येतावादेशौ भवतः । यूयम् । वयम् । त्वन्मदेकत्वे ॥ युष्मदस्मदोः त्वद् मद् इत्येतावादेशौ भवतः एकत्वे गम्यमाने । आम्श्भौ ॥ युष्मदस्मदोष्टेरात्वं भवति अमि सकारे भिसि च परे । त्वाम् । माम् । युवाम् । आवाम् । त्यदादेष्टेरत्वे कृते ( शसि ) इति दीर्घत्वम् [ शसो नो वक्तव्यः ] युष्मान् । अस्मान् ॥

सूत्रम् । आम् १–१ (हसे०) औ १–१ । सांके० । स्वर० । सिद्धम् । युष्मदस्मद्भ्यां परः औ आम् भवति । यदादेशस्तद्वदिति । ननु आम् किमिति क्रियते अमेव कथं न क्रियते । मात्रालाघवमपि पुत्रोत्सवं मन्यंते वैयाकरणा इति । सत्यम् । अमि कृते ( अम्शमोरस्य ) इत्यलोपः स्यादिति आमेव युक्तः अनेन औ इत्यस्य आम् ( सवर्णे० ) युवाम् । आवाम् । इति सिद्धम् । बहुत्वे युष्मद् अस् अस्मद् अस् इति स्थिते । सूत्रम् ( यूयंवयं० ) यूयं च वयं च यूयंवयम् १–१ । सांके० । जस् ३–१ । स्वर० । सिद्धम् । जसा० । अनेन जस्सहितस्य युष्मदो यूयम् इत्यादेशः अस्मदश्च वयम् इत्यादेशः । यूयम् । वयम् । अमि । सूत्रम् ( त्वन्मद्० ) त्वच्च मच्च त्वन्मद् १–२ । सांके० । एकस्य भाव एकत्वं तस्मिन्नेकत्वे ७–१ ( अ इ ए ) त्वन्मद् । अग्रे एकत्वे । स्वर० । सिद्धम् । अग्रे वृत्तिः कंठ्या । एकवचने एकार्थवाचित्वे वा युष्मदस्त्वद् अस्मदो मद् आदेशः । त्वद् अम् मद् अम् इति स्थिते । सूत्रम् । आ १–१ । सांके० । अम् च शस् च भिस् च अम्श्भ । देशैकग्रहणेन देशीयग्रहणम् । तस्मिन् अम्श्भौ ७–१ ( ङेरौ० ) टिलोपः । स्व० । आ अग्रे अम्श्भौ ( सवर्णे० ) युष्मद० । अनेन त्वत् इत्यस्य त्वा मत् इत्यस्य मा ( अम्श० ) त्वाम् । माम् । द्विवचने तु प्राग्वत् । शसि युष्मद् अस् अस्मद् अस् इति स्थिते । त्यदादेष्टेरकारे कृते ( अम्श० ) इत्यकारलोपः ( शसि ) इति दीर्घः । वाच्यलिंगत्वात्केवलं पुंल्लिंगत्वाभावात् ( सो नः पुंसः ) इति सूत्रेण सकारस्य नकारो न भवति तेन विशेषमाह [ शसो नो वक्तव्यः ] शसः सकारस्य नकारो भवतीत्यर्थः । युष्मदस्मदोरेवेति विशेषः । ( शसि ) युष्मान् । अस्मान् । इति सिद्धम् ॥

त्वन्मदादेशे च कृते । ए टाङ्योः ॥ युष्मदस्मदोष्टेरेत्वं भवति टा ङि इत्येतयोः परयोः । अयादेशः । त्वया । मया । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः । तुभ्यं मह्यं ङ्या ॥ ङ्या सहितयोः युष्मदस्मदोः तुभ्यम् मह्यम् एतावादेशौ भवतः । तुभ्यम् । मह्यम् ।

युवाभ्याम् । आवाभ्याम् । भ्यस्श्भ्यम् ॥ युष्मदस्मदोः परो भ्यस् श्भ्यं भवति । शकारो भकारादित्वव्यावृत्त्यर्थः।तेनात्वैत्वे न भवतः। युष्मभ्यम् । अस्मभ्यम् । ङसिभ्यसोः श्तुः ॥ पंचम्या ङसिभ्यसोः श्तुर्भवति ॥

तृतीयैकवचने त्वन्मदादेशे च कृते त्यदादेष्टेरकारः । त्व आ म आ इति स्थिते सूत्रम् । ए १-१ । सांके० । टाङ्योः । टा च ङिश्च टाङी तयोः ७-२ । ( इयं० ) स्वर० । सिद्धमिदं सूत्रम् । युष्म० । वृत्तिः कंठ्या । आदेशिवत् आदेशोऽपि भवति इति न्यायात् । अनेन यथाक्रमं त्वे मे ( ए अय् ) स्वर० । त्वया मया इति रूपद्वय सिद्धम् । द्विवचने भ्याम् ( युवावौ द्विवचने ) युव ( अद्भि ) युवाभ्याम् । आव ( अद्भि ) आवाभ्याम् । एवं चतुर्थीपंचमीद्वित्वेऽपि । भिसि ( आम्स्भौ ) इति टेराकारः । युष्माभिः । अस्माभिः । चतुर्थ्येकवचने सूत्रम् ( तुभ्यंमह्यं० ) तुभ्यं च मह्यं च तुभ्यंमह्यम् । १-२ । सांके० । ङे ३-१ ( ए अय् ) स्व० । सिद्धम् । वृत्तिः सुबोधा । अनेन यथाक्रमं ङेसहितयोः युष्मदस्मदोः तुभ्यम् मह्यम् आदेशौ भवतः । तुभ्यम् । मह्यम् । चतुर्थ्यां बहुत्वे सूत्रम् । भ्यस् १-१ । सांके० । श्भ्यम् १-१ ( हसं० ) युष्मदस्मच्छब्दाभ्यां परं यच्चतुर्थीबहुवचनं तस्य कृत्स्नस्यापि श्भ्यं भवति । भ्यमादेशस्य गुरुत्वात्सर्वस्य प्राप्तौ शकारग्रहणं किमर्थमित्याह । शकारो भकारादित्वनिषेधकः । उच्चारणमात्रः । शकारो भकारादित्वव्यावृत्त्यर्थः । भकार एव आदिर्यस्य स भकारादिस्तस्य भावो भकारादित्वं तस्य व्यावृत्त्यर्थः निषेधार्थः । भ्य म् इत्येवं चेत्क्रियतां तदा ( अद्भि । ए स्भि० ) एतयोः सूत्रयोः प्राप्तिर्भवति भकारपरत्वात् । अतस्तन्निवारणार्थं श्भ्यम् इति क्रियते । तेन ( अद्भि ) इत्यात्वं ( ए स्भि० ) इति एत्वं च न भवति । अनेन चतुर्थीबहुवचनस्य श्भ्यम् ( त्यदादे० ) युष्मभ्यम् । अस्मभ्यम् । पंचम्येकवचन त्वन्मदादेशे कृते त्वत् अस् मत् अस् इति स्थिते । सूत्रम्-ङसिश्च भ्यस् च ङसिभ्यसौ तयोः ६-२ । स्व० । ( स्रो० ) श्तु १-१ ( स्रो० ) पंचम्याः एकवचनस्य बहुवचनस्य च श्तु इत्यादेशो भवति अनेन ङसिस्थाने श्तुर्भवति ॥

शकारः सर्वादेशार्थः । उकार उच्चारणार्थः। त्वत्।मत् । युवाभ्याम्। आवाभ्याम् । युष्मत् । अस्मत् । तव मम ङसा ॥ ङसा सहितयोर्युष्मदस्मदोः तव मम इत्येतावादेशौ भवतः ।तव ।मम।युवयोः । आवयोः । सर्वादित्वात्सुट् । सामाकम् ॥ युष्मदस्मदोः परः साम् आकम् भवति । युष्माकम् । अस्माकम् । त्वयि । मयि । युवयोः । आवयोः । युष्मासु । अस्मासु ॥

शकारः सर्वादेशार्थः । उकार उच्चारणार्थः । त् इति स्थिते ( त्यदादे० ) त्वत्
( द् ) मत् ( द् ) युवाभ्याम् । आवाभ्याम् । बहुत्वे भ्यसस्थाने त् ( त्यदादे० )
युष्मत् ( द् ) अस्मत् ( द् ) षष्ठ्येकवचने सूत्रम्—तव च मम च तवमम १-२
( सांके० ) ङस् २-१ । स्व० । ङसा० । अनेन ङस्सहितस्य युष्मदस्तव अस्मदो
मम इत्यादेशः । तव । मम । ओसि विषये युव आव आदेशे कृते ( ओसि । ए
अय् ) स्व० । युवयोः । आवयोः । एवं सप्तमीद्विवचनेऽपि आमि ( त्यदादेः० ।
सुडामः ) स्व० । युष्म साम् । अस्म साम् इति स्थिते । सूत्रम् । साम् १-१(हसे०)
आकम् १-१ ( हसे० ) स्व० । युष्मदस्मद्भ्यां परस्य सुट्सहितस्य आम् आकम्
इत्यादेशो भवति अनेन आकम् ( सवर्णे० ) युष्माकम् । अस्माकम् । सुट्स-
हितस्यामः आकमादेशविधानम् ( ए स्भि बहुत्वे ) इत्येकारनिवृत्त्यर्थं नत्वाम्स्भा-
विति आकारस्य निवृत्त्यर्थम्॥ कृते तस्मिन्न रूपविपर्ययः स्यादिति । सप्तम्येकव-
चने ( त्वन्मदेकत्वे । त्यदादे० । ए टाङ्योः । ए अय् ) स्वर० । त्वयि । मयि ।
युवयोः । आवयोः । सुपि ( आम्स्भौ ) युष्मासु । अस्मासु । त्यदादित्वात्स-
बोधनाभावः । तथा समासांतत्वे प्राधान्ये च युष्मदस्मदोः सिजसुङेङस्सु एव एते
पूर्वोक्ताः। त्वम् अहं यूयं वयं तुभ्यं मह्यं तव मम आदेशाः स्युः नान्यत्र। अन्यत्र तु
सिजसुङेङस्वर्जितेषु सप्तदशवचनेषु एकवचने एकस्यातिक्रमे त्वमौ द्वयोर्गतिक्रमे युवावौ
बहूनामतिक्रमे युष्मास्मौ । यथा त्वाम् अतिक्रांतः अतित्वम् । अतित्वाम्।अतियूयम्
अतित्वाम् ।२-१ । अतित्वाम्२-२।अतित्वान् २-३।अतित्वया । अतित्वाभ्याम् ।
अतित्वाभिः । अतितुभ्यम् । अतित्वाभ्याम् । अतितुभ्यम् । अतित्वत् । अति-
त्वाभ्याम् । अतित्वत् । अतितव । अतित्वयोः । अतित्वाकम् । अतित्वयाम् ।
अतित्वयि । अतित्वयोः । अतित्वासु । एव युवाम् अतिक्रांतः अतित्वम् १-१ ।
अतियुवाम् १-२ । अतियूयम् १-३ । अतियुवाम् २-१ । अतियुवाम् २-२ ।
अतियुवान् २-३ । अतियुवया ३-१ । एवं युष्मान् अतिक्रांतः अतित्वम् ।
अतियुष्माम् । अतियूयम् । अतियुष्माम् २-१ । अतियुष्माम् २-२ । अति-
युष्मान् । उक्तं च प्रक्रियाकौमुद्याम् "सुजसुङेङस्सु परत आदेशाः स्युः सदैः
ते । त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि॥" यथा प्रियस्त्वं प्रियौ युवां प्रिया यूय
वा यस्य प्रियत्वम् । एवं प्रियोऽहम् प्रियौ आवाम् प्रिया वयं वा यस्य स प्रियाहम्
एवं जसि प्रिययूयम् । प्रियवयम् । ङेविषये प्रियतुभ्यम् । प्रियमह्यम् । ङसि प्रिय-
तव प्रियमम । तथा त्वाम् अतिक्रांत इति विग्रहे अतित्वम् । माम् अतिक्रांत इति
अत्यहम् । इत्यत्रापि सिजसुङेङस्सु प्राग्वत् एवादेशाः स्युः । तथा द्विवचने युवा-
वादेशौ न भवतः । यथा अतित्वम् १-१ अत्यहम् १-१ अतित्वाम् १-२ अति-
माम् १-२ अतियूयम् १-३ अतिवयम् १-३ अतित्वाम् २-१ अतिमाम् २-१
द्वित्वेऽपि । अतित्वाम् २-२ अतिमाम् २-२ अतित्वान् २-३ अतिमान् २-३
अतित्वया ३-१ अतिमया ३-१ अतित्वाभ्याम् ३-२ अतिमाभ्याम् ३-२ अतित्वाभिः

३-३ अतिमाभिः ३-३ अतितुभ्यम् ४-१ अतिमह्यम् ४-१ अतित्वाभ्याम् ४-२ अतिमाभ्याम् २-३ अतितुभ्यम् ४-३ अतिमभ्यम् ४-३ अतित्वत् ५-१ अतिमत् ५-१ अतित्वाभ्याम् ५-२ अतिमाभ्याम् ५-२ अतित्वत् ५-३ अतिमत् ५-३ अतितव ६-१ अतिमम ६-१ अतित्वयोः ६-२ अतिमयोः ६-२ अतित्वाकम् ६-३ अतिमाकम् ६-३ केचित्तु अतित्वयाम् ६-३ अतिमयामिति वदंति । अतित्वयि ७-१ अतिमयि ७-१ अतित्वयोः ७-२ अतिमयोः ७-२ अतित्वासु ७-३ अतिमासु ७-३ । एवं युवाम् आवां वा अतिक्रांत इत्यत्रापि सिजसूङेङस्सु प्राग्वत् । अतित्वम् । अत्यहम् । अतियुवाम् । अत्यावाम् । अतियूयम् । अतिवयम् । अतियुवाम् । अत्यावाम् । द्विवचनेऽपि । अतियुवाम् । अत्यावाम् । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । इत्यादि । एवं युष्मान् अस्मान्वा अतिक्रांत इत्यत्राऽपि सिजसूङेङस्सु प्राग्वत् । अतित्वम् । अत्यहम् । अतियुष्माम् । अत्यस्माम् । अतियूयम् । अतिवयम् । अतियुष्माम् । अत्यस्माम् । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । इत्यादि । एवं परमत्वम् । परमाहम् । परमयूयम् । परमवयम् । परमतुभ्यम् । परममह्यम् । परमतव । परममम । इत्यादि लोकाज्ज्ञेयम् ॥

इति युष्मदस्मत्साधनम् ।

अथानयोरादेशविशेषविधिर्निरूप्यते ।

**युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमेवांनौवस्नसौ ॥**
**युष्मदस्मदोर्यथासंख्येनामी आदेशा भवंति । तत्रैकवचनेन सह ते मे भवतः । द्विवचनेन वां नौ बहुवचनेन वस्नसौ ॥**

पुनर्विशेषमाह । अथेति । अथ युष्मदस्मच्छब्दयोः साधनानंतरं कश्चित् आदेशस्य विशेषः आदेशविशेषस्तस्य विधिः । आदेशाः पूर्वं कथिता अयमादेशविशेषविधिः कथ्यते इत्यध्याहारः । सूत्रम् । युष्मदस्मदोः ६-२ षष्ठीचतुर्थीद्वितीयाभिः ३-३ तेमे १-२ । सांके० । वांनौ १-२ । सांके० । वस्नसौ १-२ स्व० । पंचपदमिदं सूत्रम् । ( युष्म० । ) युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयानामेकवचनद्विवचबहुवचनेषु क्रमेण अमी अग्रे वक्ष्यमाणाः तेमेवांनौवस्नस् आदेशा भवंति । अयं भावः । षष्ठीचतुर्थ्येकवचनेन सह युष्मदस्ते अस्मदश्च मे आदेशः । द्वितीयैकवचनस्य त्वा मा इति विशेषविधानात् ते मे न भवतः । ६-२ । ४-२ । २-२ । युष्मदो वाम् अस्मदश्च नौ आदेशः । ६-३ । ४-३ । २-३ । युष्मदो वस् अस्मदश्च नस् आदेशः । द्वितीयाचतुर्थीषष्ठीति वक्तव्ये व्युत्क्रमेण षष्ठीचतुर्थीद्वितीयाभिरित्युक्तत्वात् क्वचित्त्वया मयेत्यस्मिन्नर्थे ते मे भवतः इत्यपि सूचितम् । यथा । "श्रुतं ते निखिलं पार्थ-" इत्यादिप्रयोगेषु । तथा च । "कया वृत्त्या वर्त्तितं वश्चरद्भिः क्षितिमंडलम्" । तथा च रघुकाव्ये । "गेये किं न विनीतौ वाम्" इत्याद प्रथमाद्विवचनेपि वाम् इत्यादेशार्थम् । केचित्तु वामित्यव्ययं मन्यंते । "विपर्ययविधानेन

नियमो नेष्यते बुधैः ॥ अतो विभक्तिष्वन्यासु भवंति वसूनसादयः" ॥ यद्वा षष्ठी-चतुर्थ्योरत्र षष्ठ्याः अल्पस्वरत्वात् पूर्व निपातः । द्वितीयापेक्षया चतुर्थ्याश्चाल्पस्वर-त्वात्पूर्वनिपातः । इति द्वंद्वः ॥

उक्तं च । "स्वामी ते स समायातः स्वामी मे सांप्रतं गतः ॥
नमस्ते भगवन्भूयो देहि मे मोक्षमव्ययम् ॥ १ ॥
स्वामी वां स जहासोच्चैर्दृष्ट्वा नौ दानयाचनाम् ॥
राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः ॥ २ ॥
देवो वामवताद्विष्णुर्नरकान्नौ जनार्दनः ॥
स्वामी वो बलवान्राजा स्वामी नोऽसौ जनार्दनः ॥ ३ ॥
नमो वो ब्रह्मविज्ञेभ्यो ज्ञानं नो दीयतां धनम् ॥
सानंदान्वः प्रपश्यामः पश्यामो नः सुदुःखिनः ॥ ४ ॥"

त्वामामा ॥ अमासहितयोर्युष्मदस्मदोः त्वा मा इत्येतावादेशौ भवतः । "पश्यामि त्वा मदालीढं पश्य मा मदभेदकम् ॥
पश्यामि त्वा जगत्पूज्यं पश्य मा जगतांपतिम्" ॥

तत्रोदाहरणानि श्लोकैर्व्यञ्जयति । यथा—स्वामी० । स ते तव स्वामी समायातः मे मम स्वामी सांप्रतं गतः अत्र स्वामित्वे षष्ठी तस्या एकत्वे ते मे इत्यादेशौ दर्शितौ । चतुर्थ्येकवचने दर्शयति ॥ नमस्ते० । भगो ज्ञानमस्यास्तीति भगवान् तस्यामंत्रणं हे भगवन्भूयः पुनरपि वारंवारं ते तुभ्यं नमः । अत्र नमःशब्दयोगे चतुर्थी । तत्र युष्मदस्ते आदेशः । मे मह्यम् अक्षयं मोक्षं देहि प्रयच्छ । अत्र दानार्थे चतुर्थी । अस्मदो मे आदेश एकवचनत्वात् ॥ १ ॥ द्विवचनत्वात् द्विवचनादेशं दर्शयति । स्वामी वां० । स वां युवयोः स्वामी उच्चैरतिशयेन जहास अहसत् । किं कृत्वा । नौ आवयोर्दानयाचनां दानपीडां दृष्ट्वा । अत्र षष्ठीद्विवचने युष्मदो वाम् अस्मदो नौ आदेशः । अथ चतुर्थीद्विवचने । वां युवाभ्यां राजा भूपतिर्दानं दास्यते । मधुसूदनः कृष्णः नौ आवाभ्यां ज्ञानं तत्त्वाववोधं दास्यते । अत्र चतुर्थीद्विवचनम् ॥ २ ॥ द्वितीयाद्विवचने । देवो वां० । वां युवां विष्णुर्देवः अवतात् पातु । जनार्दनः कृष्णः नौ आवां नरकाद्रक्षतु । अत्र द्वितीयाद्विवचनम् । बहुत्वे दर्शयति । स्वामी वो० । वो युष्माकं स्वामी राजा बलवान् बलयुक्तः । नः अस्माकम् असौ जनार्दनः कृष्णः स्वामी ॥ ३ ॥ षष्ठीबहुत्वे रूपमिदम् । नमोवः० । युष्मदो वस् अस्मदो नस् । ४–३ वो युष्मभ्यं नमः । किंविशिष्टेभ्यो वः ब्रह्मविज्ञेभ्यः ब्रह्म विशेषेण जानंतीति ब्रह्मविज्ञास्तेभ्यो ब्रह्मविज्ञेभ्यः । ज्ञानज्ञातृभ्य इत्यर्थः । नः अस्मभ्यं ज्ञानधनं ज्ञानमेव धनं भवद्भिः दीयताम् । चतुर्थीबहुत्वे रूपमिदम् । २–३ । सानंदान् वः० । युष्मान् वयं सानंदान् सह आनंदेन वर्त्तमानान्प्रपश्यामः । नः अस्मान् सुदुःखिनो दुःखयुक्तान्

पश्यामः । 'पश्य त्वं नः सुखान्वितान्' इति पाठः। द्वितीयाबहुवचने रूपमिदम्॥४॥

अमि विशेषमाह । सूत्रम् । त्वामा १-२ सांके० । अम् ३-१ । स्वर० । ( सवर्णे० ) द्विपदम् । अमा० । युष्मदः अमूसहितस्य त्वा अस्मदश्च मा आदेशः अत्रोदाहरणम् । पश्यामि त्वा० । त्वा त्वाम् अहं मदालीढं मदव्याप्तं गर्वयुक्तं पश्यामि । मा मां मदभेदकं मदोत्तारकं पश्य ॥

नादौ ॥ पादादौ वर्त्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवंति ।

"तव ये शत्रवो राजन्मम तेऽप्यतिशत्रवः ॥
तव मित्राणि यानि स्युर्मम मित्राणि तान्यपि ॥ १ ॥
रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता ॥
स एव नाथो भगवानस्माकं पापनाशनः ॥ २ ॥"

पादादाविति किम् ।

"पांतु वो नरसिंहस्य नखलांगलकोटयः ॥
हिरण्यकशिपोर्वक्षःक्षेत्रासृक्कर्दमारुणाः ॥ ३ ॥"

पुनरादेशनिषेधमाह । सूत्रम् । न १-१ ( अव्य० ) आदि ७-१ ( ङेरौ० )टिलोपः पश्चात् । स्व० । सिद्धम् । पादः श्लोकचतुर्थांशस्तस्यादौ तेमेवांनौवस्नस् इत्येते आदेशा न भवंति । अत्रोदाहरणम् । "तव ये शत्रवो राजन्मम तेऽप्यतिशत्रवः तव मित्राणि यानि स्युर्मम मित्राणि तान्यपि ॥ युष्माकं भगवान्देवश्चास्माकं पापनाशनः" । अत्र पादादित्वात् ते मे आदेशौ वः नः आदेशौ च न जातौ संबोधनमामंत्रणं तदंतं यत्पदं तदग्रेपि वस्नसादय आदेशाः प्रायो बाहुल्येन न भवंति । यथा । राजन् मम इत्युदाहरणम् । अथवा 'हे देव तव दासोऽस्मि देव तुभ्यं नमो नमः ।' पादादाविति किम् । पादादावेव एतेषामादेशानां निषेधो न तु पादमध्ये । तत्रोदाहरणम् । श्लोकः-पांतु वो० । नरसिंहस्य नरसिंहावतारस्य विष्णोः नखलांगलकोटयः नखा एव लांगला हलास्तेषां कोटयः अग्रभागाः वो युष्मान् पांतु रक्षन्तु । कथंभूताः नखलांगलकोटयः हिरण्यकशिपोरेतन्नाम्नो दैत्यस्य यद्वक्षो हृदयं तदेव क्षेत्रं तत्र योऽसौ असृजो रुधिरस्य कर्दमः पंकस्तेन अरुणा आरक्ताः एवंविधा नरसिंहरूपधारिणो विष्णोर्नखरूपहलाग्रभागाः वो रक्षंतु इत्यर्थः पांतु व इत्यत्र पादाद्यभावान्न प्रतिषेधः ॥ इति युष्मदस्मदादेशविशेषविधिः ॥

इति युष्मदस्मत्प्रक्रिया ।

## अथाव्ययानि ।

चादिभिश्च ॥ चादिभिः पंचभिरपि योगे नैते आदेशा भवंति।

"आवयोर्युवयोश्चेशो वेशो हेशस्तथैव च ॥

अहेश आवयोरेवं हरिर्ममैव रक्षतु ॥"

चादिर्निपातः ॥ चादिर्गणो निपातसंज्ञको भवति ।

च वा ह अह एव इह एवम् नूनम् पृथक् विना नाना स्वस्ति अस्ति दोषा मृषा मिथ्या मिथस् वृथा अथ अथो ह्यस् श्वस् उच्चैस् नीचैस् स्वर् अंतर् प्रातर् पुन भूयस् आहोस्वित् उत स्वित् सह ऋते अन्तरेण अंतरा नमस् अलम् कृतम्।अ-मा-नो-नाः प्रतिषेधे। ईषत् किल खलु वै आरात् दूरात् भृशम् यत् तत् स्वराश्च। इत्येवमादिर्गणो निपातसंज्ञो भवति।त्रादिर्विभक्त्यर्थे॥निपात्यते॥ तस्मिन्निति तत्र । यस्मिन्निति यत्र । कस्मिन्निति कुत्र—कुह क्व । अस्मिन्निति अत्र । तस्मिन्काले तदा । यस्मिन्काले यदा । कस्मिन्काले कदा।अन्यस्मिन्काले अन्यदा।तेन प्रकारेण तथा।केन प्रकारेण कथम्। अनेन प्रकारेण इत्थम्। तस्मादिति ततः । कुतः । अतः । इतः ।यतः । सार्वविभक्तिकस्तस् इत्येके । पूर्वस्मिन्निति पुरस्तात् । परस्तात् । परस्मिन्निति—परेण । आहिच् दूरे ॥ दूरेऽर्थेवाच्ये सति आहिच् प्रत्ययो भवति । दक्षिणाहि वसंति चांडालाः ॥

पुनर्निषेधांतरमाह । सूत्रम ( चादिभिः० ) च आदिर्येषां ते चादयस्तैश्चादिभिः ३—३ ( स्त्रो० ) च १—१ ( अव्य० । विसर्ज० । स्तोः श्चुभिः श्चुः ) सिद्धमिदम् । चादिभिरपि सह योगे । च वा ह अह एव एतेषां पंचानामव्ययानां योगेऽपि समीपवर्तित्वे सति एते तेमेवांनौवस्नसरूपाः आदेशाः प्रायो न भवंति । यथा "तव मम च समागमस्तदासीत्तव मम वा न किमप्यसाध्यमस्ति । तव ममाह महन्नकास्ति सख्यं न तव ममाह क्वचिद्भवेद्वियोगः" ॥ सदा तवैव भक्तोस्मि । "भवतु तव ममैव सर्वदा सन्निधानम्" । इत्यादिद्विवचनादावपि प्रयोगवशाच्च ज्ञेयम् । अथ चादिनिपातानाह । सूत्रम् । चादिः १—१ ( स्त्रो० ) निपतत्यनेकेष्वर्थेष्विति निपातः १—१ ( स्त्रो० ) सिद्धम् । च, वा, ह इत्यारभ्य यावत्स्वराश्च इत्येवमादिर्गणो निपातसंज्ञो भवति । एते निपाता उच्यंते ॥ अथैतेषां किञ्चिद्विवरणं लिख्यते । च पुनरर्थे समुच्चयादिषु च । वा विकल्पार्थे उपमानार्थे च । ह अह इति द्वौ खेदार्थौ पादपूरणार्थौ च । अह इत्यपि खेदे आश्चर्ये च । एव निश्चयार्थे अवधारणे औपम्ये वा । एवम् अमुना प्रकारेण अंगीकरणे च पूर्वोक्तस्मरणे च उपमायां च । नूनम् निश्चये । पृथक् भिन्नार्थे । विना अभावार्थे वर्जनार्थे च । नाना बहुप्रकारवाची । स्वस्ति कल्याणार्थे । अस्ति सत्तार्थे । दोषा रात्र्यर्थे । मृषा मिथ्या एतौ द्वौ असत्यार्थौ । मिथस् परस्परार्थे । अथ अथो एतौ आनंतर्यार्थे मंगलारंभयोश्च अर्थांतर-

कथने च । ह्यस्–शब्दो गतदिनार्थे । श्वम् आगामिदिनार्थे । उच्चैस् उच्चत्ववाचकः अतिशयार्थवाचकश्च एवम् उच्चकैरपि । एवं नीचैः नीचकैर्नीचत्वार्थः अल्पार्थश्च हीनत्वार्थश्च । स्वर् स्वर्गार्थः । अंतर् मध्ये । प्रातः प्रभाते । पुनर् भूयस् एतौ द्वौ पौनःपुन्ये द्वितीयवारार्थे । आहोस्वित् वितर्के संबोधने च । उत अथवार्थे । स्वित् इत्यपि वितर्के । सह सहार्थे । ऋते विनार्थे । अंतरेण विनार्थे । अंतरा मध्येर्थे । नमस् नमस्कारे । अलम् भूषायां निवारणे च पर्याप्ते सामर्थ्ये च । कृतम् निवारणे पूरणार्थे च । अमानोनाः इमे चत्वारः प्रतिषेधार्थे च । ईषत् स्तोकार्थे इत्यर्थः । किल खलु वै एते त्रयोपि निश्चयार्थे स्मरणार्थे च । आरात् निकटार्थे दूरार्थे च । दूरात् दूरार्थे च । भृशम् अत्यर्थे । यत् यस्मात्कारणात् । तत् तस्मात्कारणात् । स्वराश्च-अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ एते निपाताः । एते चतुर्दश स्वरा अपि अर्थांतरवाचकत्वे निपातसंज्ञका भवंति । तत्र अ संबोधने निर्भर्त्सने च । आ वाक्यस्मरणे च । इ संबोधने । ई दुःखचिंतने च । उ रोषोक्तौ निवारणे च । ऊ प्रश्ने निश्चये रोषे च । ऋकारऌकारौ क्षोभवाचकौ लोभवाचकौ च । लोभो दोषवृद्धिः । विश्रामवाचकौ वा । ए संबोधने । ऐ आश्चर्ये । ओ अनुनये । औ भवत्यर्थे । अम् अंगीकारे । अः भये आश्चर्ये च । इत्यादिर्गणो निपातसंज्ञो भवति । आदिशब्दादन्येऽपि ज्ञेयाः । सह साकं सार्धं सत्रा अमा एते सहार्थे । कच्चित् इष्टपरिप्रश्ने । अयि अये एतौ द्वौ कोमलामंत्रणे । ननु निश्चये वितर्के च । नु वितर्के । नक्तं रात्रिवाचकं स्यात् । अनेकांतपर्यायाः । अनेकांतार्थवाचका इत्यर्थः । इति समाप्त्यर्थे । नाम इति कोमलामंत्रणे । मन्ये इति वितर्के विचारणे च । एतेषु च केचिद्वाचकाः। केचित्सूचकाः । तत्र वाचकाः पृथगादयः। ते ह्यर्थं वदंति सूचकाश्चादयः ते किल सूचयंत्यतः सूचका उच्यंते । "कप्येषां द्योतकाः केपि वाचकाः केप्यनर्थकाः ॥ आगमा इव केऽपि स्युः संभूयार्थस्य साधकाः" ॥ १ ॥

अथ विभक्त्यर्थसूचकान्निपातानाह । तत्रादिर्विभक्त्यर्थे निपात्यते । तत्र सप्तम्यर्थे यथा ७–१ तस्मिन्नित्यस्यार्थे तत्रेति निपातः । एवम् तयोः तेषु तस्यां तयोः तासु एतेष्वपि तत्रेति निपातः । सप्तम्यर्थे वर्तमानात्तच्छब्दात् त्रप्रत्ययः दलोपश्च । एवं सप्तम्यर्थे वर्तमानाद्यच्छब्दात् त्रप्रत्ययो दलोपः। यस्मिन्नित्यस्य यत्र। किम्शब्दात् त्रप्रत्ययः । किमः कुआदेशश्च । कुत्र । एव सप्तम्यर्थे किम्शब्दात् अप्रत्ययः कुआदेशः (उ वम्)स्वर० । क्व । कस्मिन्नित्यस्य कुत्र कुह क्व । एवम् द्वि भवत् युष्मदस्मदौ वर्जयित्वा सर्वादिगणात् सप्तम्यर्थे त्र इति भवति । सर्वत्र उभयत्र अन्यत्र एकत्र पूर्वत्र परत्र इत्यादि । तस्मिन्काले तदा । यस्मिन्काले यदा । कस्मिन्काले कदा । एवम् एकदा सर्वदा । पक्षे सर्वस्य सः।सदा। अन्यदा । तेन प्रकारेण तथा । येन प्रकारेण यथा ।केन प्रकारेण कथम् । अनेन प्रकारेण इत्थम् ।सर्वेण प्रकारेण सर्वथा । एवम् अन्यथा इतरथा अपरथा। तस्प्रत्ययांतानाह । पंचम्यर्थे तस्। कस्मादित्यर्थे कुतः। अस्मादित्यर्थे इतः । अमुष्मादित्यर्थे अमुतः । एवम् ग्रामतः । लोकतः । सर्वतः । (सार्व०)एके आचार्या इत्याहुः । तस्प्रत्ययः सार्वविभक्तिकः सर्वविभक्तिषु भवति ।

सर्वासां विभक्तीनामर्थे भवतीत्यर्थः। स्वमते तु पंचम्यर्थे एव अयम् इति भावः। अयम् इति अतः। क इति कुतः। पार्श्वे इति पार्श्वतः। पूर्वस्यामिति पूर्वतः। एवं सर्वतः। इतः। इत्यादयोऽन्वसेयाः। पूर्वस्मिन्निति पुरस्तात् पूर्वस्मिन्काले देशे च पूर्वस्यां दिशि वेत्यर्थः। तथा च कालापके। पूर्वशब्दात् दिग्देशकालार्थात्सप्तमी- पञ्चमीप्रथमांतात् अस्तातिः। पूर्वस्य पुर इति निपातः अनद्यतने काले। एवम् अधः इति अधस्तात् अधः एवम् उपरिष्टात्—उपरि इत्यर्थः। परस्मिन्निति परस्मिन् देशे काले। परस्यां दिशि वेति परेण। दक्षिणस्यां दिशि दूरे दक्षिणाहि चांडालाः वसंति। दक्षिणस्यां दिशि दूरे वसंतीत्यर्थः। एवम् उत्तराहि वसंति कौरवाः। उत्त- रस्यां दिशि दूरे वसंतीत्यर्थः॥

[ किमः सामान्ये चिदादिः ] कश्चित् कौचित् काचित् केचित् कश्चन क्वचित् क्वचन। [ तदधीनकात्स्न्र्ययोर्वा सात् ] राजाधीनं राजसात्। भस्मसात् [ ऊर्युररर्यंगीकरणे ] ऊरीकृत्य। उररीकृत्य। सद्यआदिः काले॥ निपात्यते। सद्यः। अद्य। सपदि। अधुना। इदानीम्। सांप्रतम्। संप्रति। आशु। शीघ्रम्। झटिति। तूर्णम्। पूर्वेद्युः। परेद्युः। यर्हि। तर्हि॥

( किमः सामा० ) त्रिषु लिंगेषु सिद्धादेव किमूशब्दात् सामान्ये अज्ञातार्थे, अनिर्धारणेऽर्थे सप्तसु विभक्तिषु चिदादिरिति। चित्चनप्रत्ययौ भवतः। सार्वविभि- क्तिकास्तुरत इति भावः। अज्ञातः कः कश्चित्। कौचित्। केचित्। किंचित्। कुत्र- चित्। क्वचित्। कश्चन। काचन। किंचन। क्वचन। एवं सप्तस्वपि विभक्तिषु। पुन- र्निपातांतरमाह। ( तदधीन० ) इति। यद्यस्याधीनमायत्तं तत्तदधीनम्। कृत्स्नस्य समग्रस्य भावः कात्स्न्र्यं समग्रत्वम् तदधीनं च कात्स्न्र्यं च तदधीनकात्स्न्र्ये तयोः। ततः एतयोरर्थे नाम्नः पुरतः सात्प्रत्ययो निपात्यते। राजन् भस्मन्। राज्ञः अधीनं राजसात्। सर्वं भस्म भवति इति भस्मसात् ( तदधीनकात्स्न्र्ययोः० ) इति सात्प्र- त्ययः। (नाम्नो० ) राजसात् भस्मसात्। सात्प्रत्ययस्य षत्वं नेच्छंति। यथा अग्नि- सात् ( ऊर्यु० ) अंगीकरणेऽर्थे ऊरीउररीशब्दौ निपात्येते। ऊरीकृत्य। उररीकृत्य। अंगीकृत्येत्यर्थः। ऊरीकृतम् उररीकरोति ( सद्यआदिः काले ) निपात्यते। अर्थे कालविशेषे सद्यआदिर्निपात्यते। सद्यस्तत्कालम्। अद्य सांप्रतदिने। सपदि शीघ्रम्। अधुना, इदानीम्। एतौ वर्त्तमानक्षणार्थे। अक्षिपक्ष्मावच्छिन्नकालः क्षणः। एवम् संप्रति सांप्रतमपि। झटिति आशु शीघ्रम् तूर्णम् एते चत्वारः औत्सुक्यार्थाः। पूर्व- स्मिन् इति पूर्वदिवसे। पूर्वेद्युरिति गतदिवसार्थवाचकम्। परेद्युः दिवसांतरवाचकम्। यर्हि—यदि। तर्हि-तदा। कर्हि—कदा। आदिशब्दात् परुत् परारि ऐषमः अपरेद्यवि अपरेद्युः अन्येद्युः उत्तरेद्युः उभयेद्युः इत्यादयो ज्ञेयाः॥

**प्रादिरुपसर्गः ॥ प्र परा अप सम् अनु अव निर् दुर वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप श्रत् अंतर् प्रादुः आविः। अयं गण उपसर्गसंज्ञकः ॥**

सूत्रम् । ( प्रादिः० ) प्र आदिर्यस्य स प्रादिः १-१ ( स्रो० ) उपसृज्यते धातोः समीपे क्रियते इत्युपसर्गः १-१ ( स्रो० ) प्रादिः अग्रे उपसर्गः ( नामि० ) द्विपदं सिद्धं सूत्रम् । प्र-आरभ्य यावत्-आविः । प्र १ परा २ अप ३ सम् ४ अनु ५ अव ६ निर् ७ दुर् ८ वि ९ आङ् १० नि ११ अधि १२ अपि १३ अति १४ सु १५ उत् १६ अभि १७ प्रति १८ परि १९ उप २० ॥ अत्र अभियुक्तोक्तिः । यथा । "प्रपरापसमन्ववनिर्दुरभिव्याधिसूदातिनिः प्रतिपर्यपयः । उप आङिति विंशतिरेष सखे उपसर्गगणः कथितः कविना" ॥ १ ॥ अयं प्रादिः आविःपर्यवसानो गणः उपसर्गसंज्ञकः । तत्र प्रशब्दः प्रकर्षार्थः । यथा प्रणम्य । प्रवादः । "आदिकर्मणि दीर्घे च सामर्थ्ये भृशसंभवे । वियोगशुद्धिशक्तीच्छाशांतिपूजाग्र्यदर्शने" ॥ १ ॥ आदिकर्मणि प्रारब्धम् प्रकृतम् । आयामे प्रलंभः । सामर्थ्ये प्रभुः । भृशार्थे प्रतपति । संभवे प्रभवति । प्रीणने प्रतुष्यति । गमने प्रयाति । प्रतिष्ठते । प्रविशति । इच्छायां प्रार्थयते । शांतौ प्रशांतः । मुख्ये प्रवरः । अवलोकने प्रपश्यति । शुद्धौ प्रसन्नाः आपः । प्रसन्नेंद्रियः । प्रीतौ प्रसीदति राजा । पूजायां प्रांजलिः । प्रह्वः । तत्परे पितामहात्परः प्रपितामहः । एवं प्रपौत्रः । प्रशिष्य इत्याद्यर्थेषु प्र इत्युपसर्गो ज्ञेयः ॥ १ ॥ परा-इति विपरीतार्थे पराजयार्थे विमुखार्थे दुःखार्थे दूरीकरणे च । यथा-पराजितः । पराभूतः । पराकृतः । पराङ्मुखः । परावृत्तः । पराक्रमः । परामर्शः । २ । अप-असत्यार्थविकारवर्ज्जनस्तेनकर्षणादौ । यथा-अपकर्षति । अपचरति । अपशब्दः । अपनयति । पूजायाम् अपचितिः । निह्नवे अपजानीते । अपलापः । अपकृतः । अपहरति । ३ । सम्-संभवसम्यक् प्रकारादौ । यथा संभवति। मिलने संगच्छति । समवाये संकरः । एवं संधिः । संकेतः । संस्कृतः । संशयः । संरंभः । संवृतम्।४।अनु-अनुज्ञापश्चाद्भावादौ सादृश्याऽभिमुख्यहीनसामीप्यवीप्सादौ पश्चात्सादृश्ययोरनु । अनुजानाति । अनुवदति । अनुगच्छति । अनुकरोति । अनुहरति । वत्सा मातरमनुधावन्ति। अन्वर्जुनं योधारः । अनुमेघम । अनुगृहम् । अनुग्रहः । अनुशयः । अनुबंधः । अनुकूलः । ५ । अव-अवज्ञाऽवलंवनज्ञानशुद्धिव्याप्त्यादौ। अवगणयति । अवजानाति । यष्टिमवष्टभ्य तिष्ठति। अवगताऽर्थः। अवदातम् । अवकीर्णः।६। निर्निश्चयगमनातिशयनिर्णयादौ। निर्णयति। निर्गतः।निरुपमः। निष्पन्नः।निश्चयः। निर्मक्षिकम् ।७।दुरिति दुष्टे दुःखकष्टाद्यर्थे।दुर्जनः। दुष्करम्। दुर्लभम्।दुर्नयः।दुर्गंधिः।८। वि-इति नानार्थवियोगविदीर्णवैषम्यवैमनस्यविशेषणाद्यर्थे। विविधम्।वियुक्तः।विदारितः।विकटः।विमनाः।विराजते। विशेषणादौ यथा।विशिनष्टि। विरूपः। विलोमः। विस्मितः। विषण्णः। विप्रकृतः। विमुखः। विनयः ।९। आङ्-इति

मर्यादाभिविधिईषत्समंतात्आशंसनोपदेशआगमादौ । यतः । आङ् "सीमायामभिविधौ क्रियायोगेषदर्थयोः" ॥ आसमुद्रक्षितिशानाम् । आजन्मशुद्धानाम् । आगच्छति । आरोहति । आशास्ते । आलभते । आलिंगते । आरभते । आदत्ते । आताम्रा । आसन्नः । आसादितः । आशयः । १० । नि–निरन्तरनिक्षेपणादौ । निपीय । निहितम् । निक्षिपति।दर्शने निध्यायति।निशामयते । निवर्त्तते । निष्णातः । निपुणः । निर्द्रव्यः । निहितः । निकरः । नियुक्तः।निमन्त्रणम्।निकटः।निपातः । नियोगः । ११ । अधि–इतिअध्ययनाधीनाधिपत्याधिकाधिष्ठानादौ । यथा अधीतः । अधीनः । अधिगुणः । अधिपतिः । अधितिष्ठति । अधिरोहति । स्मरणे मातुरध्येति । अधिकृतो ग्रामे अध्याहारः । १२ । अपि–आच्छादनादौ । अपिदधाति । यतः । "अपि संभावनाप्रश्नशंकागर्हासमुच्चये ।" अपिहितं द्वारम् । अपिनद्धः । अपिषेक्ति । अपि ते कुशलम् । किमपि । अपि च भवान् सावद्य सेवते । इन्द्रादयोऽपि ।१३। अति–अतिशयादौ ।"अतिशब्दः प्रशंसायां प्रकर्षे लंघनेऽप्यति" । यथा–अतिरथः । अतितप्तम् । अतिक्रामति । अतिशेते । पूजितो राजा अतिराजा। अतिगः । भृशार्थे अतिसारः । अतिरिक्तम् । अतीतम् । १४ । सु–इति पूजाप्रशंसनातिशयसुखशोभनशुभादौ । सुसाधुः । सुरूपः । सुतप्तम् । सुस्वरम् । सुकरः । सुगन्धः । सुपूजितो राजा सुराजा । सुगौः । सुकृतम् । सूक्तम् । १५ । उत्–प्राबल्ये ऊर्ध्वक्रियोत्कर्षादौ । "उत्–प्राबल्ये वियोगे च प्रकाशे चोर्ध्वकर्मणि" ॥ उन्मादना । उत्तिष्ठति शयनात् । उन्मीलितम् । उद्गच्छति । उदयति । उत्पन्नः । उच्चरति । उत्कर्षति । उत्सुकः । उन्मत्तः । उत्सृष्टः । उत्सवः । उत्साहः । १६ । अभि–अभिवादनेच्छारूपसम्मुखपराभवादौ । यथा–अभिवन्दते गुरुं नमस्करोतीत्यर्थः । अभिवादयति द्विजो द्विजम् । अभीष्टम् । अभीप्सितम् । अभिरूपः । अभिगच्छति । अभिभवति । अभिजातः । अभिधेहि । अभ्यासः । अभितः ।अभिप्रायः । १७ । प्रति–प्रतिष्ठाप्रतिज्ञासादृश्यांगीकारग्रहणाभिमुख्यसमीपहिंसाप्रतिषेधादौ । यथा–"प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः" । प्रतिष्ठा । प्रतिजानीते । प्रतिमः । प्रतिपन्नम् । प्रतिसूर्यम् । प्रतिशुक्रम् । प्रतिग्रामम् । प्रतिषिद्धम् । प्रत्यादिष्टम् । प्रतिदानम् । प्रतिक्रिया । प्रतीकारः । प्रत्युत्तरम् । प्रतिलोमम् । प्रतिकूलम् । प्रतिपत्तिः । प्रत्ययः । प्रत्यक्षम् । वृक्षं प्रति । १८ ।परि–सामस्त्यदोषकथनालिंगनपरिभवादौ । परिभ्रमति । परिलापयति । परीवादः । परिरिप्सते । परिष्वंगः । परिभूतः । परिचरति गुरुम् । परिगतंभ्यः । परिभवति । परिच्छेत्तुम् । परिधत्ते । परिधानम । परिषत् । परिधिः । पर्यंकः । परिणामः । परिवारः । परिसरः । १९ । उप–इति समीपव्याप्तोपरमप्रतिक्रियाऽध्ययनपुष्ट्यादौ । उपतिष्ठते । उपकुम्भम् । उपरतः । उपवासः । एधोदकस्योपस्कुरुते ।उपस्कृतः । उपेक्षा । उपपन्नं रहसि । उपकरः । उपांशु । उपमा । उपालंभः । उपाध्यायः । उपनयः ।

उपकारः । उपचारः । उपहारः । उपज्ञा । उपमा । उपदेशः । २० । श्रत्–श्रद्धायामास्तिक्यबुद्धौ च । श्रद्धत्ते । २१ । अन्तर्मध्ये तिरोधाने च । अन्तर्विशतु । अन्तर्दधे । २२ । प्रादुः–प्राकट्ये । आविः–प्राकट्ये । आविः करोति । आविर्भवति । २३ । अन्ये अर्थाः शास्त्रांतरेभ्यो ज्ञेयाः । अयं प्रादिर्गणः उपसर्गसंज्ञकः । एतेपि बाधकानुवर्त्तकविशेषनिरर्थकभेदाच्चतुर्धा । यतः "धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्त्तते ॥ तमेव विशिनष्टयन्योऽनर्थकोऽन्यः प्रयुज्यते" ॥ १ ॥ यथा–पराजयते । वितरति । "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते" इति वचनात् तमुपसर्गमनुवर्तते । यथा–विजयते । विशिनाष्टि । विशेषयति । यथा प्रभवति । निरर्थकस्तु अशोभनार्थः । यथा–प्रलोकते ॥

**प्राग्धातोः ॥** उपसर्गाः धातोः प्राक् प्रयोक्तव्याः ॥

अथैतेषां प्रयोजनमाह । सूत्रम् । प्राक् १–१ ( अव्य० ) धातु ६–१ ( ङिति । ङस्य । स्रो० ) सिद्धम् । उपसर्गा धातोः भ्वादेः क्रियायोगे प्राक् पूर्वम् आदौ प्रयोक्तव्याः । यथा प्रभवतीत्यादि ॥

**तदव्ययम् ॥** तदिदं चादिशब्दरूपमव्ययसंज्ञं भवति क्त्वाद्यंतं च । क्त्वा । क्यप् । तुम् । णम् । च्वि । डा । धा । वत् । आम् । कृत्वस् । शस् । सु ॥ **अव्ययाद्विभक्तेर्लुक् ॥** अव्ययात्परस्या विभक्तेर्लुग् भवति न शब्दनिर्देशे । अव्ययानां न च लिंगादिनियमः । उक्तं च "सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्" ॥ १ ॥ उक्तान्यलिंगान्यव्ययानि ॥

अथ चादीनां प्रादीनां च संज्ञामाह । सूत्रम् । तद् १–१ ( नपुंसकात्स्यमो० ) अव्ययम् न व्येति न क्षय यातीत्यव्ययम् । १–१ ( अतोम् । अम्श० ) पश्चात् । स्वर० । द्विपदम् । तदिदं पूर्वोक्तं चापि चवाहेत्यारभ्य आविःपर्यन्तं यत् शब्दरूपं वत् अव्ययसंज्ञं भवति । च पुनः क्त्वा इति ( पूर्वकाले क्त्वा ) इति सूत्रोत्पन्नः क्त्वा आदौ यस्य स क्त्वादिः( भुवो भावे क्यप्) इति सूत्रोत्पन्नक्यप्प्रत्ययं यावत् । नः अन्ते यस्य तत् क्त्वाद्यंतम् । क्त्वातुमुक्यप्धाकृत्वसूणमुवत्आमृशस्सुप्रत्ययांतः शब्दः सोपि अव्ययसंज्ञक इत्यर्थः । यथा–कृत्वा । दत्त्वा । कर्तुम् । भोक्तुम् । प्रणम्य । प्रणिपत्य । द्विधा । त्रिधा । चतुर्धा । चतुष्कृत्वः । सप्तकृत्वः । कारंकारम् । पायंपायम् । घटवत् । पटवत् । बहुशः । द्विः । त्रिः । इत्यादि । ततः किं कार्यमित्याह । सूत्रम् । अव्यय ५–१ ( ङसिरत् । सवर्णे० ) विभक्ति ६–१ ( ङिति । ङस्य । चपा अबे० ) लुक् १–१ ( हसे० । नामि० ) सिद्धं त्रिपदम् । अव्ययात्परा या विभक्तिस्तस्या लुग्भवति । तत्रापि विशेषः । न तु शब्दनिर्देशे तु परं शब्दनिर्देशे विभक्तेर्लुक् न भवति शब्दस्वरूपत्वेन प्रतिपादन शब्दनिर्देशः । अव्य-

यस्य नामग्रहणं न तु तदर्थवाचकत्वमित्यर्थः । यथा अवाप्योरुपसर्गयोरिति । तथा द्वितीयवृत्तौ ( क्रीडोऽनुसंपरिभ्यश्च । समवप्राविभ्यः स्थः । उद्भिभ्यां तपः ) इत्यादौ शब्दनिर्देशत्वादव्ययात्परस्या अपि विभक्तेर्न लुक् । च पुनः अव्ययानां लिंगादिनियमो नास्ति लिंगविभक्तिवचनभेदो न । उक्तं च शास्त्रांतरे—सदृशं० । यत्त्रिषु लिंगेषु पुंस्त्रीनपुंसकेषु सदृशं समानरूपम् च पुनः सर्वासु प्रथमाद्वितीयादिषु सप्तम्यंतासु विभक्तिषु सदृशं समानरूपम् सर्वेषु च एकत्वद्वित्वबहुत्वेषु सदृशं समानरूपम् यन्न व्येति व्ययं न याति रूपांतरं न भजति तदव्ययम् इत्युच्यते । अव्ययोपसंहारमग्रेतनसूत्रसंबंधं च व्याचिकीर्षुः फक्किकामाह । उक्ता० । अव्ययानि उक्तानि कथितानि किंभूतानि अव्ययानि अलिंगानि पुंस्त्र्यादिलिङ्गभेदरहितानि ॥

इत्यव्ययानि ।

## अथ स्त्रीप्रत्ययाः १३.

अधुना लिंगविशेषविजिज्ञापयिषया स्त्रीप्रत्ययाः प्रस्तूयंते ( आबतः स्त्रियाम् ) । जाया माया मेधा श्रद्धा धारा इत्यादि । [ अजादेश्चाप् वक्तव्यः ] अजा एडका कोकिला बाला शूद्रा गणिका । अत्र काप्यतः ॥ कापि इ अतः । स्त्रियां कापि परे पूर्वस्य अकारस्य इकारो भवति । कारिका । पाचिका । पाठिका । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।आपं चैव हसांतानां यथा वाचा निशा दिशा।।" अवगाहः—वगाहः । अपिधानम्—पिधानम्। ह्रस्वो वा।।स्त्रियां कापि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति।वेणिका—वेणीका।नदिका-नदीका । श्रेयसितरा—श्रेयसीतरा । श्रेयसितमा—श्रेयसीतमा । नौकादौ ह्रस्वो न भवति । वाग्रहणादेव इयं विवक्षा । निश्चयेन पतंत्यनेकेऽर्थेष्विति निपातानामनेकार्थत्वात् ॥

अधुना वक्ष्यमाणसूत्रैर्लिंगविशेषविजिज्ञापयिषया लिंगरूपो विशेषस्तस्य विशेषेण ज्ञापयितुमिच्छया स्त्रीलिंगभेदज्ञापनाय स्त्रीप्रत्ययाः स्त्रीत्वसूचकाः स्त्रीलिंगज्ञापका ये प्रत्ययास्ते प्रस्तूयंते प्रारभ्यंते इत्यर्थः । सूत्रम् । ( आबतः० ) आप् १-१ ( हसे० ) अत् ५-१ स्वर० । ( स्त्रो० । चप० ) स्त्री ७-१ ( स्त्रियां योः । स्त्रीभ्रुवोः । वेयुवः ।) स्व० । सिद्धम् । त्रिपदम् । अकारांतं स्त्रियां वर्त्तमानं स्त्रीलिंगत्वेन निर्दिष्टं विवक्षितं टित् षित् नदादिवर्जितं यन्नाम तस्मात्पुरतः आप्प्रत्ययो भवति । पकारः सिलोपार्थः । उदाहरणम् । जाया माया मेधा श्रद्धा धारा । अनेन आप्प्रत्ययः । सर्वत्र

( सवर्णे० ) १-१ ( आपः ) इति सेर्लोपः । अग्रे गंगावत् । पुनर्विशेषमाह । आवतः स्त्रियामित्याप्सिद्धौ पुनरजादेरिति ( जातेरयोपधात् ) इतीपो निषेधार्थं पठ्यते । अजादेरिति । अजादेः शब्दगणाज्जातिवाचित्वेपि आप्प्रत्ययो भवति । यथा । अजा एडका कोकिला बाला शूद्रा गणिका । अत्र शूद्रा आभीरजातिः । एवम् अश्वा चटका मूषिका बलाका मर्त्या इत्यजादयः । अजादेरित्याप् ( सवर्णे० ) [ प्रथमवयोवाचिनः अत ईप् वक्तव्यः ] सूत्रम् । काप् ककारेण सहित आप् काप् तस्मिन् कापि ७-१ अग्रे इ १-१ ( सांके० ) अग्रे अतः ६-१ । स्त्र० । ( स्रो० ) कापि अग्रे इ ( सवर्णे० ) अग्रे अतः ( इ यं स्वरे ) स्वर० । त्रिपदं सिद्धम् । स्त्रियामिति स्त्रीलिंगे कसहिते आप्प्रत्यये परे अकारस्य इकारो भवति । उदाहरणं च डुकृञ् करणे । कृ । डुपचष् पाके । पच् । पठ व्यक्तायां वाचि । पठ् । करोतीति कारकः । पचतीति पाचकः । पठतीति पाठकः ( तृवुणौ ) इति वुण् प्रत्ययः । कृधातोः ( नामिनः ) इति वृद्धिः कृ इत्यस्य कार् । पच् पठ इत्यत्र ( अत उपधायाः ) इति प इत्यस्य पा ( युवोरनाकौ ) इति वु इत्यस्य अकादेशः । स्व० । कारकः । पाचकः । पाठक इति सिद्धम् । ततः ( आवतः स्त्रियाम् । सवर्णे० ) ततः ( काप्यतः ) इत्यनेन अकारस्य इकारो भवति । १-१ सु ( आपः ) इति सेर्लोपः । कारिका पाचिका पाठिका इति रूपत्रयम् । "कारिका तु स्वल्पवृत्तौ बह्वोर्थस्य सूचिका" एवमन्यान्यप्यवसेयानि । वाटिका । शाटिका । कन्यायाः कापि परे ह्रस्वतैव न त्विकारः कन्यका इत्यादि । क्वचिन्न भवत्यपि । यथा बहुपरिव्राजका । बहुपाठका । अथ आप्प्रत्ययाधिकारे व्यंजनेभ्योपि तत्कारणसूचकं श्लोकमाह । वष्टि० । भागुरिराचार्यः अतोऽकारस्य लोपं वष्टि अभिलषति वांछति । कयोः । अव अपि इत्येतयोर्द्वयोरुपसर्गयोः यथा पिदधाति मुखम् । आपिधानम्-पिधानम् । अवगाहः-वगाहः । विमलगिरिरवतंसः विमलगिरिर्वतंसः । तोयनिधी अवगाह्य-तोयनिधी वगाह्येत्यादयः । च पुनः एव अवधारणे । केषांचित् हसांतानां व्यंजनांतानां शब्दानामपि आपम् आप्प्रत्ययं वष्टि । यथेत्युदाहरणोपन्यासे । वाच् निश् दिश् । सर्वत्र आप्प्रत्ययः । स्व० । १-१ ( आपः इति श्लोकव्याख्या । सीमन्शब्दस्य वा आप्टिलोपश्च । सीमा । "अज्ञाते कुत्सिते चैव संज्ञायामनुकंपने । तद्युक्तनीतावप्यल्पे ह्रस्वे स्वार्थे च कः स्मृतः" । अज्ञाते-अमुकः । कुत्सिते-अश्वकः । संज्ञायाम्-देवदत्तकः । तद्युक्तनीतौ-गुडेन धाना गुडधानकाः । अल्पे-अल्पं तैलं तैलकम् । ह्रस्वत्वे-ह्रस्वा वृक्षाः वृक्षकाः । च पुनः स्वार्थेऽपि चौर एव चौरकः । अथ कावधिकारात् कापि परे अन्यकृत्यमाह । सूत्रम् ( ह्रस्वो वा ) ह्रस्व १-१ ( स्रो० ) वा १-१ ( अव्य० । ह वे । उ ओ ) द्विपदम् । स्त्रियामित्यादिवृत्तिः सुगमा । न वरम् । तरादाविति तरतमौ तद्धितप्रत्ययौ ( तरतमेयस्विष्ठाः प्रकर्षे ) इति सूत्रोत्पन्नौ । उदा० । वेणी, नदी । वेण्येव वेणीका-वेणिका वा । नद्येव नदीका नदिका वा । (स्वार्थेपि) इति कप्रत्ययः । यद्वा । ह्रस्वा वेणी वेणीका वेणिका वा । ह्रस्वा नदी नदीका नदिका

वा । ह्रस्वात्कप्रत्ययः सर्वत्र । ( आवतः स्त्रियाम् ) इत्याप् । अनेन सूत्रेण एकत्र वेणी इत्येतस्य वेणि । नदी इत्यस्य नदि । सर्वत्र १-१ सू( आपः ) "सेतौ च वरणे वेणी नदीवाहे कचोच्चये" । अग्रे श्रेयसी २ । अतिशयेन श्रेयसी श्रेयसीतरा श्रेयसितरा वा । ( तरतमेयस्विष्ठाः० ) इति तरप्रत्ययः । ( ह्रस्वो वा ) इति सी इत्यस्य वा सि । एवं श्रेयसीतमा, श्रेयसितमा । प्रयोगांतरे ह्रस्वनिषेधमाह । नौकादौ तु ह्रस्वो न भवति । ह्रस्वा नौर्नौका । इत्यादौ शब्दे तु का इति पदं न भवति । एवं सुरैका सुग्लौका द्यौः । एवमन्येपि यथासंभवमवसेयाः । कुतो ह्रस्वनिषेध इत्याह । वाग्रहणादेवेति । सुगमम् । अत्राह परः । ननु विकल्पसूचको वाशब्दः कथं निषेधार्थं सूचयति तत्राह । निपातानामनेकार्थत्वात् । निपतंति निश्चयेन नितरां वा पतंति प्रवर्तंते अनेकेषु वहुष्वर्थेष्विति निपाताः । यथा चशब्दः पुनरर्थे समुच्चयार्थे च । एवं वाशब्दो विकल्पार्थे निषेधार्थे चेति । कुत्रचिद्विकल्पं कुत्रचिन्निषेधं सूचयतीति न दोषः ॥

**न्ऋण ईप् ॥ नकारांताद्दकारांतादण्णंताच्च स्त्रियामीप्प्रत्ययो भवति । दंडिनी । दंतिनी । करिणी । मालिनी [ ईपि राज्ञोऽल्लोपो वक्तव्यः ] राज्ञी । शुनी । कर्त्री । हर्त्री । औपगवी । यस्य लोपः ॥ इश्च अश्च यं तस्य इवर्णावर्णयोर्लोपो भवति तद्धितयस्वरयोरीपि च परे ॥**

स्त्रीप्रत्ययाधिकारादाप्प्रत्ययमुक्त्वा ईप्प्रत्ययमाह । सूत्रम् ( न्ऋण० ) न् च ऋ च अण् च न्ऋण् तस्मात् न्ऋणः ५-१ स्व० ( ऋ रम् ) स्व० । ( स्रो० ) ईप् १-१ ( हसे० ) द्विपदम् । नकारांता इन्प्रत्ययान्तादयः ऋकारांतास्तृप्रत्ययांतादयः अण्णंता औपगवादयः एतेभ्यः शब्देभ्यः स्त्रियां स्त्रीलिंगे ईप् प्रत्ययो भवति । उदा० । दंड-दंत-कर-माला । दंडोऽस्त्यस्या इति दंडिनी । दंतौ स्तः अस्या इति दंतिनी । करः शुंडा अस्त्यस्या इति करिणी । माला अस्ति अस्या इति मालिनी ( मांतोपधात्० ) इति इन्प्रत्ययः । ( यस्य लोपः ) इति अवर्णलोपः । स्व० । अग्रे ( न्ऋण ईप् ) इति सूत्रेण ईप्प्रत्ययः । स्वर० । १-१ ( हसे० ) करिणी इत्यत्र ( ष्रुर्न्नो० ) इति सूत्रेण नस्य णः । एवं राजन् अग्रे ईप्प्रत्ययः [ ईपि० ] ईपि प्रत्यये परे राज्ञो राजन्शब्दसंबंधिनोऽकारस्य लोपो वक्तव्यः । अनेन उपधाया अकारस्य लोपः ( स्तोः श्चुभिः श्चुः ) इति नस्य ञः [ जञोर्ज्ञः ] स्व० । राज्ञी । अन्येपि । श्वन् ( न्ऋण ईप् । श्वादेः ) स्व० । शुनी-मघोनी-इत्यादयो नांताः । युवन्शब्दस्य तु युवतिरिति वक्ष्यति । ओणृ अपनये ( अन्येभ्योऽपि दृश्यते ) इति वन् ( विड्वनोरनुनासिकः स्यात् ) इति णस्य अकारः । अवावा । विधवा स्त्री ( वनोर च ) वन्नन्तात्स्त्रियां ङीप् स्यात् रश्चान्तादेशः । अतिधीवरी । शर्वरी । अथ ऋकारांताः । हृञ् हरणे । डुकृञ् करणे । हरतीति हर्त्री । करोतीति कर्त्री ।

शीले तृन्प्रत्ययः गुणः करः हरः ( रहाद्य० ) जल० । ऋकारांतत्वात् ( त्रण ईप् ) इतीप् ( ऋ रम् ) स्व० । अथ अण्णंत उपगुः । उपगोरपत्यं औपगवी । ( अपत्येऽण् । आदिस्वरस्य ञ्णिति वृद्धिः ) उ इत्यस्य औ ( वो व्यस्वरे ) इति उकारस्य अव् । स्व० । अण्णंतत्वादीप् । औपगव ई इति स्थिते । सूत्रम् ( यस्य लोपः ) इ अ । इश्च अश्च यं तस्य यस्य ६-१ ( ङस्स्य ) लोपः १-१ ( स्तो० ) सिद्धम् । यद्वा इश्च ई च ई (सवर्णे०) अश्च आ च आ (सवर्णे०) ततः ईश्च आश्च या ६-१ ( नपुंसकस्य० ) इति ह्रस्वः । ( ङस्स्य ) लोपः १-१ ( स्तो० ) इवर्णस्य अवर्णस्य च इति इकारस्य ईकारस्य च अकारस्य च आकारस्य च लोपो भवति । वृत्तिः कंठ्या । न वरम् । यस्येति इवर्णस्य अवर्णस्य च लोपो भवति ईपि प्रत्यये परे तद्धिते स्वरे परे यकारे च परे । अनेन वकारस्य अलोपः । स्व० । औपगवीति सिद्धम् । अण्णंताच्चेति चकारात्पंचादीनां नकारांतत्वेपि स्वस्रादिशब्दानाम् ऋकारांतत्वेऽपि ईप् न स्यात् । पंच सप्त स्वसा दुहिता ननांदा माता यातां तिस्रः चतस्रः इत्यादि ॥

ष्टिृतः ॥ षकारटकारउकारऋकारानुबंधात् स्त्रियामीप्प्रत्ययो भवति । ष् वराकी । ट् कुरुचरी । उ गोमती । ऋ पचन्ती । इत्यादि ॥

सूत्रम् । ( ष्टिृतः ) ष् च ट् च उश्च ऋश्च ष्टृ ते इतो यस्य स ष्टिृत् तस्मात् ष्टिृतः ५-१ अस् मध्ये ( उ वम् । ऋ रम् ) स्व० ( स्तो० ) । इत् इति पदं शकारादिषु प्रत्येकं योज्यम् । तेन षकारानुबंधाः षाकप्रत्ययांतादयः । टकाराऽनुबन्धाः टप्रत्ययान्तादयः, उकारानुबंधाः मत्वन्तादयः, ऋकारानुबंधाः शतृप्रत्ययांतादयः,तत एभ्यः स्त्रियामीप्प्रत्ययो भवति । षानुबंधमाह । वृ निवारणे । वृ ( षाकोकणः ) इति षाकप्रत्ययः । षकारस्येत्संज्ञत्वाल्लोपः । आक । स्व० । षकारानुबंधत्वात् ( ष्टिृतः ) अनेन ईप्प्रत्ययः ( यस्य लोपः ) स्व० ( हमे० ) टानुबंधो यथा । चर गतिभक्षणयोः । चर कुरुपूर्वः । कुरुषु देशेषु चरतीति कुरुचरी । ( अटौ ) इति टप्रत्ययः । टकार इत् । अ इति । स्व० ईप्प्रत्ययादिकं प्राग्वत् । उकारानुबंधो यथा-गावोऽस्या अस्तीति गोमती । अस्त्यर्थे मतुः । मत् । उकारानुबंधत्वादीप्प्रत्ययः । शेषं प्राग्वत् । ऋकारानुबंधो यथा-डुपचष् पाके । पच् । पठ व्यक्तायां वाचि । पठ् ( शतृशानौ ) इति शतृप्रत्ययः । ऋकारः शकारश्च इत् ( अप् कर्त्तरि ) इति अप्प्रत्ययः । स्वर० ( अदे ) इत्यप्प्रत्ययत्याकारस्य लोपः । स्वर० । ऋकारानुबंधत्वादीप्प्रत्ययः ( अप्ययोरान्नित्यम ) इति नुमागमः ( नश्चा० ) स्व० । शेषं प्राग्वत् ( ष्टिृतः ) इति केवलात् धातोर्न भवति । तेन त्रपूष् लज्जायाम् त्रपा । क्षमूष् सहने क्षमा । धेट् पाने इत्यस्य तु ईप् भवति । स्तनंधयी ॥

नदादेः ॥ नदादेर्गणात्स्त्रियामीप्प्रत्ययो भवति । नदी । गौरी । गौतमी ॥

सूत्रम् । ( नदादेः ) नद आदिर्यस्य स नदादिस्तस्मात् ५-१ ( ङिति ) इति इकारस्य एकारः । ( ङस्य ) इत्यकारलोपः ( स्त्रो० ) नदादिर्योऽसौ गणस्तस्मात्स्त्रीलिंगे ईप्प्रत्ययो भवति । नद गौर गौतम । अनेन ईप्प्रत्ययः ( यस्य लोपः ) स्व०। नदादिराकृतिगणो द्रष्टव्यः । यथा—नर्त्तकी तैषी पौषी मत्सी अनडुही अनड्वाही मातामही पितामही महिषी सूकरी आगस्ती त्रिदशी ॥

**इंद्रादेरानीप् ॥** इंद्रादेर्गणात्स्त्रियामानीप्प्रत्ययो भवति । इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानीप्प्रत्ययो भवति। इन्द्राणी । भवानी । [ मातुलोपाध्याय क्षत्त्रियाचार्यमर्यादा ] मातुली-मातुलानी । उपाध्यायी—उपाध्यायानी । क्षत्त्रियी—क्षत्त्रियाणी । आचार्यी-आचार्यानी । [ हिम.रण्ययोराधिक्ये आनीप्प्रत्ययो भवति ] महद्धिमम्—हिमानी । महदरण्यम्—अरण्यानी ॥

सूत्रम् । इंद्रादि ५-१ ( ङिति । ङस्य । स्रो० ) आनीप् १-१ ( हसे० ) पश्चात् ( नामिनो रः ) स्व० । केचित्तु इंद्रादेः आन् ईप् इति त्रिपदं मन्यंते मन्मते इंद्रादेः ईप्प्रत्ययः आन् आगमश्चेति । इंद्रादेर्गणात् स्त्रियाम् आनीप्प्रत्ययो भवति । इंद्रभवशर्वमृडवरुणब्रह्मरुद्र-। अनेन सूत्रेण आनीप्प्रत्ययो भवति । यथासंभवं नकारस्य णकारः ( यस्य० ) इंद्रस्य स्त्री इंद्राणी । स्व० । ( हसे० ) मातुलश्च उपाध्यायश्च क्षत्रियश्च आचार्यश्च सूर्यश्च मातुलोपाध्यायक्षत्रियाचार्यसूर्यम् तस्मात् एतस्माच्छब्दपंचकाद्वा आनीप्प्रत्ययो भवति । आचार्यक्षत्रियाभ्यां तु स्वार्थे एव वा आनीप् । मातुल २ एकत्र आनीप्, अन्यत्र ईप् ( यस्य० ) शेषं सुकरम् । एवं च उपाध्याय २ एकत्र आनीप् प्रत्ययः, अन्यत्र ( पुंयोगे च ) इति ईप् । उपाध्यायानी—उपाध्यायी । एवं क्षत्रियसूर्ययोः ( ऋन्नों० ) भवति । ( आचार्यादणत्वम् ) इति । आचार्यानी- आचार्या । क्षत्रियाणी-क्षत्रिया । सूर्याणी—सूर्या । अर्याणी-अर्या । पंयोगे तु ईप् । एवं क्षत्रियी । अर्यी । उपाध्यायी । स्वयंव्याख्यात्री तु उपाध्याया अत्र आप् [ हिमारण्ययोर्महत्त्वे आनीप् ] महत् हिमं हिमानी । महत् अरण्यम् अरण्यानी [ यवनशब्दाल्लिप्यामानीप् ] यवनानां तुरुष्काणां लिपिर्यवनानी ( यवाद्दोषे वा आनीप् ) दुष्टो यवो यवानी ॥

[ ईप्समाहारे गुणश्च ] त्रयी । **पुंयोगे च ॥** पुंयोगे च स्त्रियामीप् प्रत्ययो भवति । शूद्री । गणकी ॥

( ईप्समाहारे गुणश्च) समाहारः एकीभावस्तत्रार्थे ईप्प्रत्ययो भवति । नामिनो गुणश्च । त्रयाणां समाहारस्त्रयी समाहारत्वात् ईप् । इकारस्य च एकारो गुणः । ( ए अय् ) स्व० । ( हसे० ) केचित्तु ( ईप्समाहारे गुणश्च ) इति न मन्यंते । तन्मते

( तयायडौ संख्यायाम् ) इति त्रिशब्दादयटि कृते ( यस्य० ) इतीकारलोपः । टित्वात् ( ष्ठिन्नतः ) इतीप् । पुनः ( यस्य लोपः ) स्व० । त्रयः अवयवा अस्या इति त्रयी । सूत्रम् ( पुंयोगे च ) पुमान् पुरुषः तस्य योगे च ईप्प्रत्ययो भवति । शूद्र गणक । शूद्रस्य भार्या शूद्री । जात्या या काचिद्भवतु परं शूद्रस्य पुरुषस्य स्त्रीत्वात् शूद्री । गणकस्य भार्या गणकी । ईप्प्रत्ययः ( यस्य० ) शेषं सुगमम् ॥

जातेरयोपधात् ॥ जातिवाचिनो यकारोपधादकारांतात् स्त्रियामीप्प्रत्ययो भवति । मेषी । सूकरी । हंसी । कुक्कुटी । ब्राह्मणी । अयकारोपधग्रहणात् । क्षत्रिया । वैश्या ॥

सूत्रम् ( जाते० ) जाति ५-१ ( ङिति ) इति इकारस्य एकारः ( ङस्य ) इत्यकारलोपः ( स्रो० ) योकारः उपधा यस्य स योपधः न योपधः अयोपधः तस्मात् । ५-१ ( ङसिरत् । सवर्णे० ) पश्चात् ( नामिनो रः ) स्व० । सिद्धम् । जातिर्मेषादिकानाम् ताम् वक्तीति जातिवाची तस्मात् । स जातिवाची शब्दो यकारोपधोपि स्यादत आह । अयकारोपधादिति । यकारोपधवर्जितादित्यर्थः । यकारोपधवर्जिता अपरेपि स्वराः स्युरत आह अकारांतादिति । सुगमम् । जातिलक्षणमाह। " आकृतिग्रहणा जातिर्लिंगानां च न सर्वभाक्॥सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह " इति । आकृतिः आकारग्रहणं व्यंजकं यस्याः सा । च पुनः लिंगानां सर्वभाक् न । सर्वलिंगानि न भजते इत्यर्थः । यथा ब्राह्मणः । पुंसि स्त्रियां च पुनः सकृदुपदिष्टा सती निर्ग्राह्या निश्चेतुं शक्या सा जातिः । अपत्यप्रत्ययांतस्य चरणसंज्ञा । गोत्रम् गोत्रमपत्यप्रत्ययांतः शब्दोऽपि जातिः । चरणैः अपत्यैः सह गोत्रं जातिरुच्यते । यद्वा नित्या एका अनेकसमवेता सामान्यरूपा जातिः। यदि नित्या न तर्हि पिंडे नष्टे सैव नश्यति । यद्येका न तर्हि अनेकेष्वप्येका जातिर्न स्यात् । यद्यनेकसमवेता न तर्हि यस्मिन्पिण्डे उक्ता तस्मिन्नष्टे अन्यतरे पिंडे न प्रतीयते इति । तस्माज्जातिवाचकशब्दादीप्प्रत्ययो भवति । उदा० । मेषसूकरहंसकुक्कुटब्राह्मण । अनेन जातित्वादीप्प्रत्ययो भवति । ( यस्य० ) १-१ ( हसे ) शेषं सुगमम् । मेषस्य जातिः मेषी । क्षत्रिया । वैश्या । अत्र जातिवाचिनोऽपि यकारोपधत्वादीप्प्रतिषेधः। ततः आप्प्रत्ययः । मत्स्यमनुष्यहयगवयानां यकारोपधत्वेऽपि ईत् निषेधो न । मत्स्य ईप्प्रत्ययः ( यस्य० ) यलोपश्च । स्व० । मत्सी इत्यादि । जातेः किम् । मुंडा । अकारांतात्किम् । गौः ॥

( प्रथमवयोवाचिनोऽत ईव्वक्तव्यः ) कुमारी । किशोरी । कलभी इत्यादयः । प्रथमवयोग्रहणात् । वृद्धा । स्थविरा । इत्यादौ न ईप् । अद्ग्रहणात् । शिशुः ॥

( प्रथम० ) कालकृता शरीरावस्था वयः प्रथमवयो बाल्यं तद्वक्तीत्येवंशीलाद्-कारांताच्छब्दादीप्प्रत्ययो भवतीत्यर्थः । कुमारकिशोरकलभ। अनेन ईप्प्रत्ययः ( यस्य० ) स्व० । १–१ ( हसे० ) वृद्धा । स्थविरा । अत्र प्रथमवयोवर्जितत्वादाप्-प्रत्यय एव न त्वीप् । इयं स्त्री शिशुः । अत्र प्रथमवयोवाचित्वे सत्यपि अकारांतत्वा-भावात् ईप्प्रत्ययनिषेधः १–१ ( स्रो० ) ॥

**स्वांगाद्वा** ॥ स्वांगवाचिनो वा स्त्रियामीप्प्रत्ययो भवति । "स्वांगं स्यादद्रवन्मूर्त्तं प्राणिस्थमविकारजम् । तत्र दृष्टमतत्स्थं चेत्तु स्थितं तद्वच्च तादृशि" ॥ १ ॥ सुमुखी । मृगाक्षी । तन्वंगी । वाग्रहणात् । पद्मवदना । कमलनयना । इत्यादौ न ईप् ॥

सूत्रम् ( स्वांगाद्वा ) स्वं स्वकीयमंगं स्वांगं तद्वाची शब्दोपि स्वांग इत्युच्यते । यद्वा सुष्ठु शोभनमंगं स्वंगं स्वंगमेव स्वांगम् । यद्वा सुष्ठु शोभनम् आसमंतात् अंगं स्वांगम् । स्वस्य प्राणिनो वा अंगं स्वांगं तस्मात् ५–१ ( ङसिरत् । सवर्णे० ) वा ३–१ ( अव्य० । चपा अबे० ) स्व० । सिद्धं स्वांगमिति । "प्राणिस्थमद्रवन्मूर्त्तं स्वांगं स्यादविकारजम् । तत्र दृष्टमतत्स्थं चेत् स्थितं तद्वच्च तादृशि" ॥ प्राणिस्थं चेतनशरीरे वर्त्तमानम् पुनः अद्रवत् प्रस्वेदादिराहितम् पुनर्मूर्त्तम् आकारसहितम् । पुनः अविकारजं शोफादिविकाररहितम् तत् स्वांगम् उच्यते । पुनः पूर्वं तत्र प्राणिनि दृष्टं पश्चात् यदि अतत्स्थम् अप्राणिस्थं भवति तदपि वा स्वांगम् । च पुनः तद्वत् प्राणिवत् तादृशि प्राणिसदृशे अप्राणिन्यपि स्थितं भवति तदपि वा स्वांगम् । यत्तु अप्राणिस्थं द्रवरूपम् अमूर्त्तम् अरूप विकाराज्जातं तत्स्वांगं न । यथा सुमुखा शाला । अत्र अप्राणिस्थत्वात् ईप् न । बहुस्वेदा । अत्र द्रवत्वात् ईप् न । सुज्ञाना । अत्र अमूर्त्तत्वात् नेप् । बहुशोफा । अत्र विकारजत्वात् नेप् । सुकेशी सुकेशा वा रथ्या । प्राणिस्थस्य अप्राणिनि दृष्टत्वात् । वाग्रहणादेवात्र वा ईप् । सुस्तनी सुस्तना वा प्रतिमा । प्राणिवत् प्राणिसदृशे स्थितत्वात् । इत्यादौ विकल्पेनेप् । स्वांगं मुख-कर्णादि तद्वाचिनः शब्दात् स्त्रियाम् ईप्प्रत्ययो भवति । वाशब्दः प्रयोगांतरे निषे-धार्थो न विकल्पार्थः । सुमुख मृगाक्ष तन्वंग । सुष्ठु मुखं यस्याः सा सुमुखी । मृगवत् अक्षिणी यस्याः सा मृगाक्षी । अथवा मृगस्य अक्षिणी इव अक्षिणी यस्याः सा मृगाक्षी । तनु कृशम् अंगं यस्याः सा तन्वंगी ( स्वांगाद्वा ) इतीप् ( यस्य० ) स्वर० । ( हसे० ) वाशब्दस्य निषेधार्थत्वात् पद्मवदना कमलनयना किसलयकरा सुजघना इत्यादौ ईप्प्रत्ययो न भवति ॥

---

१ अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम्—इत्यन्यत्र पाठः । स एव भट्टोजिदीक्षितकृतसिद्धांत-कौमुद्यां दृश्यते । २ कमलवदना—इ० पा० ।

[ क्तदिकाराद्क्तेरीब्वा वक्तव्यः ]अंगुलिः-अंगुली । धूलिः-धूली । आजिः-आजी । अक्तेरिति विशेषणात् । कृतिः । भूतिः । ऐ च मन्वादेः ॥ मन्वादेर्गणात्स्त्रियामीप्प्रत्ययो भवति ऐकारादेशश्च॥ मनायी । आदिशब्दात् अग्नेर्भार्या स्वधा अग्नायी।कुसितस्य भार्या कुसितायी ।पूतक्रतोर्भार्या पूतक्रतायी।अन्यथा पूताः क्रतवो यस्याः सा पूतक्रतुः । चकारात् [ मनोरौ वा ] मनावी मनायी मनुः । वृषाकपायी ॥

(क्तदिकारा० ) क्तः इकारः क्तदिकारस्तस्मात् । क्तादिकारात् । क्तादिति तृतीयवृत्तिप्रत्ययोत्पन्नो योऽसौ इकारस्तस्मात् ईप्प्रत्ययो वा भवति । किंविशिष्टात् क्तादिकारात् अक्तेः क्तिप्रत्ययवर्जितादिकारादित्यर्थः । उदा० । आगि रगि लगि गत्यर्थाः। अग ( ध्वादेरुलिः ) इति उलिप्रत्ययः ( इदितः० ) इति नुमागमः । ( नश्चा० ) स्व० । अंगुलिः । धूञ् कंपने । धू ( ध्वादेरुलिः ) इति उणादित्वादुलिप्रत्ययः ( सवर्णे० ) धूलिः । अज गतौ क्षेपणे च । अज । उणादौ इण्प्रत्ययः । णित्वात् ( अत उपधायाः ) इति वृद्धिः । स्वर० । आजिः । अनेन वा ईप्प्रत्ययः । ( यस्यलो० ) स्व० । १-१ ( हसे० ) अन्यत्र १-१ ( सो० ) अक्तेरिति किम् । डुकृञ् करणे । कृ । मनु ज्ञाने । मन् भू सत्तायां भू ( क्तिः ) इति क्तिप्रत्ययः ति । मन् इत्यत्र (लोपस्त्वनुदात्ततनाम् ) इति नलोपः । अक्तेरिति विशेषणादीप्प्रत्ययनिषेधः । सूत्रम् । ऐ १-१ । सांके० । च १-१ ( अव्य० ) मनुरादिर्यस्य स मन्वादिस्तस्माद् ५-१ ङिति । ङस्य० । ( सो० ) मन्वादेरित्यादिवृत्तिः सुकरा । अंत्यस्वरस्य च ऐकारादेशो भवति । उदा० । मनु वृषाकपि । मनोर्भार्या मनायी । वृषस्य धर्मस्य आसमंतात् कं फलं पिबतीति वृषाकपिस्तस्य वृषाकपेः भार्या वृषाकपायी । उकारेकारयोश्च अंत्यस्वरस्य वा ऐकारः ( ऐ आय् ) स्व० । ( हसे० ) "वृषाकपायी श्रीगौर्योः"इत्यमरः । चकारात् मनुशब्दसंबंधिनः उकारस्यौकारो वा भवति । ततः ( औ आव् ) स्वर० । मनावी । एवम् अग्नायी । पूतक्रतायी । कुसितायी । कुसिद ऋषिस्तस्य भार्या कुसिदायी कुसीदो वृद्धिजीवकस्तस्य भार्या कुसीदायी । पूताः क्रतवो येन स पूतक्रतुस्तस्य स्त्री पूतक्रतायी ॥

पत्न्यादयः ॥ पत्न्यादयः शब्दाः ईप्प्रत्ययांताः निपातास्साधवः । ( समानैकवीरपिंडपुत्रभ्रातृदासेभ्यो बहुव्रीहौ पत्युर्नादेश ईप् च ) पत्नी । समानः पतिरस्याः सा सपत्नी । एकः पतिरस्याः सा एकपत्नी । वीरः पतिर्यस्याः सा वीरपत्नी । पिंडः

पतिर्यस्याः सा पिण्डपत्नी । एवम् । पुत्रपत्नी । भ्रातृपत्नी । दासपत्नी । इत्यादि ॥ अंतर्वत्नी । सखी । अशिश्वी । अर्धजरती । युवती । प्रतीची । प्राची । समीची । उदीची । इत्यादयः।दारशब्दो नित्यं बहुवचनांतः पुँल्लिंगः । दाराः । दारान् । इत्यादि ॥

सूत्रम् ( पत्न्यादयः ) पत्नी आदिर्येषां ते पत्न्यादयः १-३ जस्( ए ओ जसि । ए अय् ) स्व० । ( स्रो० ) पत्न्यादयः शब्दाः ईप्प्रत्ययांता निपात्यन्ते । न वरम् । पत्नी भार्या । अन्तर्वत्नी गुर्विणी । नारी स्त्री । सखी प्रसिद्धा । पतिवत्नी जीवद्भर्तृका । अशिश्वी अप्रसूता स्त्री । अर्धजरती अर्धवृद्धा स्त्री । युवती स्त्री । प्राची पूर्वा दिक् । प्रतीची पश्चिमा दिक् ।एवमन्येऽप्यूह्याः।सपत्नी एकपत्नी वीरपत्नी इत्यादयः ईप्प्रत्ययांता निपातसिद्धा इत्यर्थः । कुशी लोहविकारः । कामुकी वृषस्यंती । मैथुनेच्छावतीति यावत् । कबरी केशवेशे।इत्यादयोऽपि निपात्यन्ते । तथा उदीची मत्सी मानुषी अगस्ती पाणिगृहीती असिक्नी पलिक्नी पितामही स्थली कुण्डी गोणी कबरी नारी नागी कुशी कामुकी इत्यादयः पत्न्यादिषु ज्ञेयाः । अकारांतो दारशब्दो नित्यं बहुवचनांतः पुँल्लिंगे[1] कलत्रवाची तस्मात् आप्प्रत्ययः ईप्प्रत्ययोऽपि न भवतीति । किंतु । दाराः । दारान् । दारैः । दारेभ्यः । दारेभ्यः । दाराणाम् । दारेषु । देवशब्दस्य बहुवचनवत्साध्यः ।

वोर्गुणात् ॥ उकारांताद्गुणवाचिनो वा स्त्रियामीप्प्रत्ययो भवति । "सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" ॥ १ ॥ पट्वी—पटुः । मृद्वी—मृदुः । तन्वी—तनुः । ऋज्वी—ऋजुः ॥

सूत्रम् ( वो० ) वा १-१ ( अव्य० ) उ ५-१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० । ओ औ औ ) अग्रे गुण ५-१ ( ङसिरत् । सवर्णे० । नाम्नि० ) जल० । गुणा रूपादयश्चतुर्विंशतिः । "सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते । आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" ॥ १ ॥ बुधैः-स गुणः उच्यते । स कः । यः सत्त्वे द्रव्ये एव निविशते वर्त्तते इत्यर्थः । पुनस्तस्मात् द्रव्यात् अपैति याति । च पुनः पृथग्जातिषु द्रव्यत्वावांतरजातिषु दृश्यते । च पुनः आधेयः उत्पाद्यः । यथा कस्तूरिकासंयोगाद्वस्त्रगंधः । पुनः अक्रियाजः अनुत्पाद्यः । यथा आकाशादौ महत्त्वादि । पुनः असत्त्वप्रकृतिः अद्रव्यस्वभावः स गुणस्तद्वाची उकारांतो यः शब्दस्तस्मात्स्त्रियां स्त्रीलिंगे वा ईप्प्रत्ययो भवति पट्वी—पटुः । अनेन वा ईप्प्रत्ययः ( उ वम् ) स्वर० ( हसे० ) अन्यत्र ( स्रो० ) एवम् । मृद्वी—मृदुः । तन्वी—तनुः ।

[1] पुँल्लिंगः -इति पाठोऽन्यत्र । सोपि साधुः ।

बह्वी–बहुः । ऋज्वी–ऋजुः । लघ्वी–लघुः । वाग्रहणादेव खरुः पांडुः इत्यादौ नेपू । गुणग्रहणात् । धेनुः रज्जुः अणुः इत्यादौ नेपू ॥

**उत ऊः ॥** उकरांतान्मनुष्यजातेः स्त्रियामूप्रत्ययो वा भवति । पंगूः–पंगुः । वामोरूः–वामोरुः ॥

सूत्रम् ( उत ऊः ) उत् ५–१ स्व० ( स्रो० ) ऊ १–१ ( स्रो० ) मध्ये(आदवे) वृत्तिः कंठ्या । न वरम् । गुणवाचिनोऽगुणवाचिनोऽपि मनुष्यजातिवाचिन उकारान्तात्स्त्रियाम् ऊप्रत्ययो वा भवति । उदा० । अनेन ऊप्रत्ययः ( सवर्णे० ) १–१ ( स्रो० ) पंगूः–पंगुः । एवं वामोरूः । ऊप्रत्ययः ( सवर्णे० ) करभोरूः । पुरुषश्चेत् पंगुः । स्त्री चेत् पंगूः ॥

**यूनस्तिः ॥** युवन्शब्दात् स्त्रियां तिप्रत्ययो भवति । ( नाम्नो नो लोप० ) । युवतिः । एभ्यो नामत्वात्स्यादयः । आवंतात् ( आपः ) इति सेर्लोपः । ईबन्तात् ( हसेपः सेर्लोपः ) पूर्ववत्प्रक्रिया ॥

इति स्त्रीप्रत्ययाः समाप्ताः ॥

( यूनस्तिः ) युवन्शब्दात् तिप्रत्ययो भवति स्त्रियाम् । ईब्निषेधः । युवन् अग्रे तिप्रत्ययः ( नाम्नो० ) ( स्रो० ) पक्षे पत्न्यादिषु पाठात् युवती इत्यपि । एवं स्त्रीप्रत्यया ज्ञेयाः । अथ तेषां विभक्तिकार्यमाह । एभ्य इति ॥ एभ्यः पूर्वोक्तस्त्रीप्रत्ययांतेभ्यः शब्देभ्यः ( अविभक्ति नाम ) इति सूत्रोक्तलक्षणनामत्वात्स्यादयो विभक्तयो दीयन्ते । तत आबन्तात् आप्प्रत्ययांतात् ( आपः ) इति सूत्रेण सिलोपः । ईबंतात् ( हसेपः सेर्लोपः ) इति सिलोपः । तत्र आवंताः गंगाशब्दवत्साध्याः । ईबंताः नदीशब्दवत् । इकारोकारांता बुद्धिरज्जुवत् । ऊकारांता वधूवत् ।

इति स्त्रीप्रत्ययाः समाप्ताः ॥

---

## अथ कारकप्रक्रिया १९.

अथ विभक्त्यर्थो निरूप्यते । **लिंगार्थे प्रथमा ॥** धातुप्रत्ययातिरिक्तमर्थवच्छब्दरूपं लिंगं तस्यैवार्थे सन्मात्रे प्रथमा विभक्तिर्भवति । लिंगादयोऽपि प्रथमार्था इति केचित् । तत्सद्ग्रह ।

रविरिव राजते राजा रोषात्कुमारी रोरूयते ॥
बोभुज्यते भुवं भूपालः प्रागास्तां रामलक्ष्मणौ ॥ १ ॥

मनसिवचसिकाये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयंतः ॥ परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि विकसंतः संति संतः कियंतः ॥ २ ॥

कुमाराः शेरते स्वैरं रोरूयंते च नारकाः ॥
जेगीयंते च गीतज्ञा मेम्रियंते रुजा जिताः ॥ ३ ॥

एवं ये पुँल्लिंगादयः स्त्रीप्रत्ययांता उक्तास्ते विभक्तिमंतरा न शब्दतां प्राप्नुवंतीति विभक्तिकार्यसंबंधमाह । अथेति । संज्ञासंधिकार्यस्वरांतहसांतलिंगत्रयप्रक्रियायुष्मदस्मत्स्त्रीप्रत्ययकथनानतंरं विभक्तीनां कर्तृत्वादिसूचिकानां प्रथमादीनाम् अर्थोऽभिधेयो निरूप्यते तत्र प्रथमाविभक्तेः कार्यमाह । सूत्रम् ( लिंगा० ) लिंगार्थे लिंगस्य अर्थो लिंगार्थस्तस्मिन् ७-१ ( अ इ ए ) प्रथमा १-१ ( आपः ) सिद्धं सूत्रम् । लिंग्यन्ते चिह्नयंते ज्ञायंते पुंस्त्रीनपुंसकतया शब्दा अनेनेति लिंगम् । तत् किंविशिष्टम् । धातुप्रत्ययातिरिक्तमिति । धातुः भ्वादिः, प्रत्ययाः कृदादयस्तेभ्योऽतिरिक्तम् अधिकम् अन्यत् पृथक् यत् पुंस्त्रीनपुंसकलिंगभेदज्ञापकं तल्लिंगम् । "नामैव लिंगम्" इति कौमाराः "संस्त्यानप्रसवौ लिंगम्" इति महाभाष्यकारः । संस्त्यानं स्त्रीत्वम् । प्रसवः उपचयः । क्रमादुपचयापचयस्थितिरूपो वस्तुधर्मः । उपचये यथा । हरिः रविः । अपचये यथा । गंगा शाला । क्वचिदुपचयाभावः । यथा—कुलम् । ज्ञानम् । तस्य लिंगस्य एवार्थे अभिधेये सन्मात्रे सत्तामात्रे विद्यमानमात्रे वाच्यमाने प्रथमा—सि औ जस्-रूपा विभक्तिर्भवति । लिंगादयोपि प्रथमार्था इति मतांतरवाचकं पदं लिंगम् । पुँल्लिंगस्त्रीलिंगनपुंसकलिंगम् । आदिशब्दात्परिमाणवचनप्रभृतयः । प्रथमैव अर्थो येषां ते प्रथमार्थाः । लिंगवचनपरिमाणानां त्रयाणामप्यर्थे प्रथमा विभक्तिर्भवतीत्यर्थः । यथा—देवः श्रीः ज्ञानम् । खारी द्रोणः आढकम् । एकः द्वौ बहवः इति । उदा० । तत्सद्ब्रह्म । तदिति ज्ञानदृष्टिगोचरम् । सदिति वर्तमानं अविनाशि प्रधानं वा । एवंविधं ब्रह्म ज्ञानस्वरूपं परब्रह्म वर्त्तते । तत्सद्ब्रह्म इति त्रिष्वपि स्थानेषु नपुंसकलिंगस्य प्रथमाया उदाहरणम् । रविरिव० । राजा राजते क इव रविः इव सूर्य इव । राजा अत्र पुँल्लिंगे प्रथमैकवचने उदाहरणम् । पुनः कुमारी रोरूयते । अतिशयेन रोदिति कस्माद्रोषात् । कुमारी अत्र स्त्रीलिंगे प्रथमैकवचनोदाहरणम् । भूपालो राजा भुवं पृथ्वीं बोभुज्यते अतिशयेन पालयतीत्यर्थः । भूपालः अत्रापि पुँल्लिंगे प्रथमैकवचनोदाहरणम् । रामलक्ष्मणौ प्राक्पूर्वम् आस्ताम् अभूताम् । रामलक्ष्मणौ इति पुँल्लिंगे प्रथमाद्विवचनस्योदाहरणम् । १ । संतः सज्जनाः कियंतः संति पुनः श्लोकेन उदाहरति । कुमाराः० । कुमाराः बालकाः स्वैरं स्वेच्छया शेरते । तु पुनः नारकाः नरकस्था जना रोरूयंते अतिशयेन फूत्कुर्वंति । पाठांतरे तु रोरूयंते कुमारिकाः इति । गीतज्ञा जेगीयंते अत्यर्थं गायंति । रुजा रोगेण जिता ग्रस्ताः पुरुषा मेम्रियंते अतिशयेन म्रियंते । संतः कुमाराः नारकाः गीतज्ञाः रुजा जिताः । अत्र सर्वत्रापि पुँल्लिंगे प्रथमाबहुवचनस्योदाहरणानि ॥

**आमंत्रणे च ॥** अभिमुखीकरणेपि प्रथमा विभक्तिर्भवति ॥

१ रुजार्दिताः—इति पाठः । २ च-इति पाठः ।

मां समुद्धर गोविंद प्रसीद परमेश्वर ॥
कुमारौ स्वैरमासाथां क्षमध्वं भोस्तपस्विनः॥ १ ॥

सूत्रम् । ( आमंत्रणे च ) आमंत्र्यते आहूयते पुरुषोऽनेनेति आमंत्रणं संबोधनं तस्मिन् ७-१ ( अ इ ए ) च १-१ ( अव्य० ) आमंत्रणम् अभिमुखीकरण-मित्यादि सुगमम् । उदा० श्लोकेन । मां समुद्धर० । व्याख्या । हे गोविंद त्वं मां समुद्धर । भवसमुद्रादिति गम्यम् । हे परमेश्वर त्वं प्रसीद प्रसन्नो भव । हे कुमारौ युवां स्वैरं स्वेच्छया सुखेन आसाथाम् उपविशतम् । भोस्तपस्विनो यूयं क्षमध्वं क्षमां कुरुध्वम् । अत्र गोविंद १-१ परमेश्वर १-१ कुमारौ १-२ तपस्विनः १-३ इत्यत्र यथाक्रमं प्रथमाया एकद्विबहुवचनानि ॥

भोस् भगोस् अघोस् ॥ एते शब्दा भवद्भगवदघवतां स्थाने निपात्यंते धिविषये ।

क्षमस्व भो दुराराध्य भगोस्तुभ्यं नमोऽस्तु ते ॥
अधीष्व भो महाप्राज्ञ घातयाघोः स्वघस्मरम् ॥ १ ॥

भोस् १-३ । स्त्र० ( स्रो० ) एकस्य ग्रहणे तज्जातीयान्यशब्दस्य ग्रहणमिति न्यायाद्भोस इत्यनेन भोः भगोः अघोः इति त्रयाणामपि ग्रहणम् । सूत्रपाठे तु भोस् भगोस् अघोस् इत्येवंरूपं सूत्रं दृश्यते । तेन भवन्नित्यत्य भोस् इति निपातः । भगवन्नित्यस्य भगोस् इति निपातः । अघवन्नित्यस्य अघोस् इति निपातः । यतः भवद्भगवदघवतां भोस् भगोस् अघोस् एते शब्दा वा निपात्यंते धौ विषये । संबो-धने इत्यर्थः । भोः इत्यामन्त्रणे । भगोः इति पूज्यामंत्रणे । अघोः इति पापजन-वाचि संबोधनविषये । एते शब्दा निपात्यंते । उदा० । भो दुराराध्य दुःखेन आराध्यते सेव्यते इति दुराराध्यस्तस्यामंत्रणे भो दुराराध्य त्वं क्षमस्व क्षमां कुरु । न विद्यते स्तुतिर्वचनगोचरा यस्य सः अस्तुतिस्तस्यामंत्रणे हे अस्तुते वचनागोचर स्तवनातीत इति संबोधनपदम् । यद्वा न स्तौति अन्यं कंचन इति अस्तुत् तस्मै अस्तुते तुभ्यम् इति चतुर्थ्यंतम् । एवंविध हे भगोः हे भगवन् तुभ्यं नमः । अथवा "भगोस्तुभ्यं नमोनमः" इति पाठे सुगमम् । भो महाप्राज्ञ महांश्चासौ प्राज्ञश्च महा-प्राज्ञस्तस्यामंत्रणे भो महाप्राज्ञ त्वम् अधीष्व । हे अघोः पापिष्ठ स्वघस्मरं स्वभक्षकम् अर्थात् स्वपापं कालं वा घातय विनाशयेति श्लोकार्थः ॥

शेषाः कार्ये कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ संबंध आधा-रभावयोः ॥ शेषा विभक्तयो द्वितीयाद्या एष्वर्थेषु भवंति। "कर्त्ता कर्म्म च करणं संप्रदानं तथैव च । अपादानाऽधिकरणमित्याहुः कारकाणि षट्" ॥ कार्ये कर्मकारके उत्पाद्ये आप्ये संस्कार्ये विकार्ये

च द्वितीया विभक्तिर्भवति ।

कटं करोति कारूको रूपं पश्यति चाक्षुषः ॥
राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोमपाः ॥ १ ॥

इत्थं प्रथमार्थमुक्त्वा इदानीं द्वितीयादिशेषविभक्त्यर्थसूचकं सूत्रमाह (शेषाः० ) इति । शेषाः १–३ ( सवर्णे० । स्रो० ) कार्य क्रियते यत्तत्कार्य तस्मिम् ७–१ ( अ इ ए ) कर्तृसाधनयोः । करोतीति कर्ता । साध्यते छिदादिक्रिया अनेनेति साधनम् । कर्ता च साधनं च कर्तृसाधने तयोः ७–२ ( ओसि । ए अय् ) स्व० । दानार्थं पात्रं दानपात्रं तस्मिन् ७–१ ( अ इ ए ) पश्चात् ( नामि० ) जल० । अग्रे विश्लेषावधौ विश्लेषे विश्लेषं प्रति वा अवधिराश्रयः विश्लेषावधिः तस्मिन् ७–१ ( ङेरौ० ) टिलोपः । स्व० । अग्रे संबध्यते भृत्यस्वाम्यादिरनेनेति संबंधस्तस्मिन् ७–१ ( अ इ ए ) आधारभावयोः आध्रियते स्थाप्यते वस्तु यत्र स आधारः। भूयते क्रियालक्षणतया अनेनेति भावः । ततः आधारश्च भावश्च आधारभावौ तयोः ७–२ ( ओसि । ए अय् ) स्व० । ( स्रो० ) पश्चात् ( ए अय् । य्वोर्लोपश् ) सिद्धं सूत्रं सप्तपदम् । शेषाः प्रथमा उक्ता अतः शेषा द्वितीयाद्याः पट् विभक्तय इत्यादिवृत्तिः । तत्र कार्ये द्वितीया । कर्तृसाधनयोस्तृतीया । दानपात्रे चतुर्थी । विश्लेषावधौ पंचमी । संबंधे षष्ठी । आधारभावयोः सप्तमी । इति संक्षेपार्थः । अथ विस्तरार्थः । कार्य इत्यादि । कार्ये द्वितीया विभक्तिर्भवतीति योगः । कार्ये इति कोऽर्थः कर्मकारके क्रियते यत्तत् कर्म नाम यत्कारकं कर्म तस्मिन्कर्तुः कर्मतापन्ने वस्तुनीत्यर्थः । यद्वा कार्यं कर्म तत्कारकसंज्ञत्वात्कारकं कर्म कारकं षष्ठीं विना अन्या विभक्तयः कारकसंज्ञकाः । क्रियाहेतुः कारकम् । षष्ठ्यास्तु क्रियाहेतुत्वाभावेन कारकसंज्ञा न । यतः "कर्ता १ कर्म २ च करणं ३ संप्रदानं ४ तथैव च । अपादाना ५ धिकरणे ६ इत्याहुः कारकाणि षट्" ॥ १ ॥ इति तस्मिन्कर्मकारके कथंभूते इत्याह । उत्पाद्ये १ आप्ये २ संस्कार्ये ३ विकार्ये च ४ एवं चतुर्विधे । तत्र उत्पाद्यते यन्नवीनं क्रियते तदुत्पाद्यम् । यदाप्यते सिद्धमेव प्राप्यते तदाप्यम् । संस्क्रियते इति संस्कार्यम् । संस्कारो नाम कश्चिदतिशयस्तदर्हं संस्कार्यम् । संस्कारो द्विधा । गुणाधानं मलापकर्षो वा । पूर्वजन्मकृतः शुभाशुभो वा संस्कारः तस्माद्भवं संस्कार्यम् । सिद्धमेव रूपं पश्यतीति गुणाधानम् । यद्वा रूपमिति चक्षुर्ग्राह्यत्वादाप्यमिति केचित् । राज्यमिति राज्ञः संस्कारात् संस्कार्यम् । विकार्ये इति विक्रियते अवस्थांतरं भजते इति विकार्यं तस्मिन् विकार्ये ततः एवं चतुर्विधेऽपि कर्मकारके द्वितीया विभक्तिर्भवति । उदा० । कटमित्यादिश्लोकः । कारूकः पुमान् कटं करोतीत्यत्र कटस्य उत्पाद्यकार्यत्वात् द्वितीयांतत्वम् । एवं चाक्षुषो नेत्रवान् जनो रूपं पश्यतीति रूपम् आप्यं कर्म तत्र द्वितीया । केचित्तु

रूपस्य नेत्रेंद्रियेण स्थापने संस्कार्ये द्वितीया। अतिधर्मिष्ठः पुमान् राज्यं प्राप्नोति। अत्र राज्य संस्कार्य तत्र द्वितीया केचित्तु राज्यम् आप्यमिति। सोमम् अमृतवल्लीरसं पिबतीति सोमपाः ब्राह्मणः सोमम् अमृतवल्लीं सुनोति खंडयति इत्यर्थः। अत्र सोमस्यामृतवल्ल्याः खंडनरूपो विकारस्तत्र द्वितीया। अवस्थान्तरापादनं विकार इति॥

अभिसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु॥
द्वितीयाम्रेडितांतेषु ततोऽन्यत्रापि दृश्यते॥ १॥

अभितो ग्रामं नदी वहति। सर्वतो ग्रामं वनानि संति। धिग्देवदत्तम्। उपर्युपरि ग्रामं मेघाः पतन्ति। अधोधो वृक्षं याति। अध्यधि व्याधं मृगाः पतन्ति। समया ग्रामम्। निकषा ग्रामम्। प्रति ग्रामम्। अनुग्रामम्। [कालाध्वनोर्नैरंतर्येऽपि] मासमधीते। क्रोशं पर्वतः॥

एवं द्वितीयार्थमाख्यायाधुना तदधिकारात्पुनर्वृत्तिकारः उपपदद्वितीयार्थमाह। अभिसर्वतसोरित्यादिः श्लोकः। तस् च तस् च तसौ अभिश्च सर्वश्च अभिसर्वौ ताभ्यां सहितौ तसौ अभिसर्वतसौ अभितस्सर्वतसावित्यर्थः। अथवा द्वंद्वांते श्रूयमाणः शब्दः प्रत्येकं संबध्यते इति तयोरर्थयोगे षष्ठ्यर्थे द्वितीया विभक्तिः कार्या प्रयोक्तव्या। पुनर्धिगिति धिगर्थेपि धिक्छब्दयोगेऽपि द्वितीया कार्या प्रयोक्तव्या॥ धिङ्निर्भर्त्सननिंदयोः। पुनस्त्रिषु उपर्यादिषु इति उपरि अधः अधि इत्येवं त्रिष्वव्ययेषु प्रयुज्यमानेषु द्वितीया विधेया। कथंभूतेषु उपर्यादिषु आम्रेडितांतेषु। आम्रेडितमिति द्विस्त्रिर्भाषणं तदंते येषां ते आम्रेडितांताः। द्विवारमुच्चारिता इत्यर्थः। यथा उपर्युपरि–अधोधः–अध्यधिरूपास्तेषु। तत इति अभितस्सर्वतसादिव्यतिरिक्ते अन्यत्र उपपदयोगेपि शब्दार्थे द्वितीया दृश्यते रूढिवशादिति तत्रोदाहरणमाह। अभितो ग्रामम् ग्रामंग्रामम् अभितः अभितोग्रामम् अनेन द्वितीया। अभितो ग्राममिति ग्रामस्य समीपे चतुर्दिक्षु वा नदी वहति। एवं सर्वतो ग्राम वनानि दृश्यंते। ग्रामस्य सर्वतः चतुर्दिक्षु वनानीत्यर्थः। एवं समया ग्रामं तीर्थं वर्तते। ग्रामस्य समीपे इत्यर्थः। निकषा ग्रामं निहतः शत्रुः। ग्रामस्य समीपे इत्यर्थः। धिग्देवदत्तमित्यत्र धिग्योगे द्वितीया। "धिक् तां च तं च मदनं च इमां च मां च" उपर्युपरि ग्रामं पक्षिणो गच्छंति। उपर्युपरि ग्रामं मेघो वर्षति। ग्रामस्य उपरि इत्यर्थः। अधोऽधो ग्राम निधानं दृश्यते। ग्रामस्य अध इत्यर्थः। अध्यधि ग्रामं तापसास्तिष्ठंति। ग्रामेग्रामे इत्यर्थः। एवमत्र त्रिष्वाम्रेडितांतेषु द्वितीया। 'ततोऽन्यत्रापि दृश्यते' इति वचनात् उभयतः परितः समया निकषा हा प्रति

अनु एषां योगेऽपि द्वितीया । समया ग्रामं तीर्थं वर्तते । ग्रामस्य समीपे तीर्थम् । निकषा ग्रामं शत्रुर्निहतः । ग्रामस्य निकषा समीप इत्यर्थः । अनुग्रामं ग्रामस्य अनु पश्चात्सीमा वर्तते । एवं ग्रामंग्रामं प्रति प्रतिग्रामं जिनालयाः संति । हा स्वामिनम् । इत्यादि । कालाध्वनोरितीयं फक्किका । अंतरेण रहितत्वं नैरंतर्यं तस्मिन् नैरंतर्ये वाच्यमाने । तथा कालो दिवसमासादिः । अध्वा मार्गः क्रोशयोजनादिस्तत एतयोर्विषये द्वितीया कार्या नैरंतर्ये कालवाचकशब्दात् । अध्ववाचकशब्दाच्च नैरंतर्ये निरंतरार्थे द्वितीया भवतीत्यर्थः । तत्रोदाहरणम् । काले । मासं यावत् निरंतरम् अधीते पठति । अत्र नैरंतर्ये द्वितीया । अन्यथा मासस्य द्विरधीते मासे वा दशदिवसानधीते इति भवति । एवं मार्गे क्रोशं पर्वतः । क्रोशं यावन्निरंतरं पर्वत इत्यर्थः । क्रोशप्रमाणत्वं इत्यर्थः । अन्यथा क्रोशस्यैकभागे पर्वत इति द्वितीयार्थः । अन्यत्रापीति ग्रहणात् अंतर्ग्रामसुपग्राममित्यादयः शब्दा ज्ञेयाः । इति द्वितीयार्थः ॥ २ ॥

> [ कर्त्तरि प्रधाने क्रियाश्रये साधने च ] प्रधाने कर्त्तरि क्रियासिद्ध्युपकारके करणेर्थे तृतीयाविभक्तिर्भवति ।
>
> भिन्नः शरेण रामेण रावणो लोकरावणः ॥
> कराग्रेण विदीर्णोपि वानरैर्युद्ध्यते पुनः ॥ १ ॥

अथ तृतीयार्थसूचकं कर्तृसाधनयोरिति पदं व्याचिख्यासुराह । ( कर्तरि० )इति । कर्तरि कर्तुर्विषये तृतीयाविभक्तिर्भवति । कर्त्रुक्तौ इति शेषः । कथंभूते कर्त्तरि । प्रधाने मुख्यक्रियायाः आश्रये मुख्यवृत्त्या कार्यस्य कारके च उत्पादके ईदृशे कर्तरि तृतीया वा च पुनः साधनेपि तृतीया । कथंभूते साधने । क्रियासिद्ध्युपकारके कार्यस्य साहाय्यकारके पुनः करणनामकारके साधनेऽपि तृतीया । यः प्रधानभूतः सन् क्रियायाः आश्रयभूतः स्वातंत्र्येण क्रियां कार्यं कर्तुं प्रवृत्तः स कर्ता तस्यार्थे तृतीया भवति । च पुनः क्रियासिद्धेरुपकारके करणे प्रकृष्टकारणभूते साधनेपि तृतीया भवति । करोतीति कर्ता । स कर्त्ता[1] उच्यते इत्याह । क्रियाश्रयः क्रियायाः कार्यस्य आश्रयः क्रियाश्रयः क्रियाया आश्रयोऽप्रधानोपि भवति पटोत्पत्तौ तुरीवेमादिवत्तत्राह । प्रधान इति । सकलकारकप्रयोक्तृत्वे सति इतरकारकाप्रयोज्यत्वमत्र प्रधानत्वं तस्मिन् । किंविशिष्टे साधने । क्रियासिद्ध्युपकारके क्रियायाः सिद्धस्य उपकरोतीति क्रियासिद्ध्युपकारकम् । क्रियासिद्धेः साहाय्यदायकभेदनादिक्रियासिद्धौ उपसंनिहितत्वेन कारकं तस्मिन् । पुनः कीदृशे साधने । करणे । साधकतमं करणं क्रियासिद्धे । प्रकृष्टं कारणम् । यद्वा करणं नाम कारकं तस्मिन् । एवं कर्तृसाधनयोर्द्वयोरर्थे तृतीया भवति । उदाहरणम् । भिन्नः शरेण० इत्यादिः श्लोकः । रामेण रावणो

१ 'क्रिया करोतीति कर्ता स स्वतंत्रः प्रयोजकः कर्मकर्ता चेति भेदात्त्रिविधः' इति तत्त्वदीपिकायाम् ।

भिन्नः । केन कृत्वा शरेण । रामेण इति कर्त्तरि तृतीया । शरेणेति साधने तृतीया । कथंभूतो रावणः लोकरावणः लोकान् रावयति क्रंदयति इति लोकरावणः । उदाहरणांतरमाह । तथा रावणो वानरैः कराग्रेण नखेन विदीर्णोऽपि विदारितोपि पुनः पुनरपि युध्यते । अत्र वानरैरिति कर्तृपदम् । कराग्रेणेति साधनपदम् । उभयत्रापि तृतीया । कराग्रेणेत्यत्र जातावेकवचनम् । पुनस्तृतीयार्थं विनासहेत्यादिना अग्रे वक्ष्यति । इति तृतीयार्थः ॥ ३ ॥

दानपात्रे संप्रदानकारके चतुर्थी ] दानपात्रे संप्रदानकारके चतुर्थी विभक्तिर्भवति । सम्यक् श्रेयोबुद्ध्या प्रदीयते यस्मै तत्संप्रदानम् ।
दद्राति दण्डं पुरुषो महीपतेर्न चातिभक्तिर्न च दानकामना ।
यद्दीयते वासनया सुपात्रे तत्सम्प्रदानं कथितं मुनीन्द्रैः ॥
वेदविदे गां ददाति । अन्यत्र राज्ञो दण्डं ददाति । रजकस्य वस्त्रं ददाति । इति चतुर्थी ॥

अथ चतुर्थ्यर्थमाह ( दानपात्रे० )। इति । दीयते इति दानं दानाय पात्रं दानपात्रम् । दत्तवस्तुनः स्वामी भवतीति यावत् । तस्मिन् दानपात्रे । कीदृशे । संप्रदाननामकारके । सम्यक् श्रेयोबुद्ध्या यस्मै प्रदीयते तत् संप्रदानम् । यस्मै दत्ते सति आमुष्मिकफलप्राप्तिर्भवति तत्संप्रदानमुच्यते । संप्रदानं च तत्कारकं च संप्रदानकारकम् । तस्मिन् । यदुक्तम् "ददाति दंडं पुरुषो महीपतेर्न चात्र भक्तिर्न च दानकामना ॥ यद्दीयते वासनया सुपात्रे तत्संप्रदान कथित मुनीन्द्रैः" ॥ १ ॥ तत्रोदाहरणम् । वेदं वेत्तीति वेदवित् तस्मै वेदविदे वेदज्ञाय ब्राह्मणाय कश्चित्पुरुषो गां ददाति इत्यत्र वेदवित्त्वे सति दानपात्रत्वं संगतमेव । एवं साधवे अन्नं प्रतिलाभयति । अन्यथा दानपात्राभावे राज्ञो दंडं ददाति इत्यत्र चतुर्थ्यभावः ॥ इति चतुर्थ्यर्थः ॥ ४ ॥

[ विश्लेषावधावपादानकारके पंचमी ] विश्लेषो विभागस्तत्र योऽवधिश्चलतया अचलतया वा विवक्षितस्तत्रापादाने पंचमी ॥ धावतोऽश्वादपतत् । भूभृतोऽवतरति गंगा । इति पञ्चमी ॥

अथ पंचम्यर्थं व्याचिख्यासुः ( विश्लेषावधौ० ) इति पदं व्याकरोति । अश्वादपतत् इत्यत्र । विश्लेष इति कोर्थः । विभागो विरहः पृथग्भावः । बुद्ध्या स्वरूपेण वा एकाश्रयात् पृथग्भवनमित्यर्थः । तत्र विश्लेषे योऽवधिराश्रयो यस्मात्

१ दानं त्रिविधम्—अनिराकर्तृ—प्रेरकम्—अनुमंतृ चेति । तल्लक्षणानि च प्रसादे गीतासु च "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ॥ देशे काले च पात्रे च तद्दान सात्त्विकं स्मृतम्" इत्यादिलक्षणे सात्त्विकराजसतामसभेदैस्त्रिविधं ज्ञेयम्

विभागो जायते स चलतया अश्वकरभादिभावेन अचलतया वा पर्वतशिखरादिभावेन विवक्षितो वक्तुमिष्टः वाञ्छितः तत्र विश्लेषावधावपादाननामकारके अपादीयते पृथक्क्रियते यस्मात्तदपादानम् अपादानं च तत्कारकं च अपादानकारकं तस्मिन् पंचमीविभक्तिर्भवति । तत्रोदाहरणम् । कश्चित्पुरुषो धावतोऽश्वादपतदित्यत्र अपतदिति विश्लेषः । अश्वादिति तस्य अवधिः आश्रयः । धावत इत्यश्वस्य चलनक्रियाकारित्वाच्चलतया विवक्षितावधित्वम् । एवं भूभृतः पर्वताद्गंगा पुरुषो वा अवतरतीत्यत्र अवतरणात्मको विश्लेषः भूभृत इति स्थिरावधिः एवमन्येऽप्यवसेयाः ॥ इति पञ्चम्यर्थः ॥ ५ ॥

संबंधे षष्ठी । संबंधिनोर्मध्ये योऽप्रधानस्तत्र षष्ठी ।

भेद्यभेद्यकयोः श्लिष्टः संबंधोऽन्योन्यमुच्यते ॥

द्विष्ठो यद्यपि संबंधः षष्ठ्युत्पत्तिस्तु भेदकात् ॥

एकक्रियातः परस्पराऽपेक्षारूपः संबंधः ।

राज्ञः स पुरुषो ज्ञेयः पित्रोरेतत्प्रपूजनम् ॥

गुरूणां वचनं पथ्यं कवीनां रसवद्वचः ॥ १ ॥

अथ षष्ठ्यर्थमाह । संबंधे इति । संबध्यते स्वजनादिरनेनेति संबंधो जन्यजनकादिः । स्वस्वामित्वादिः । यथालिंगार्थकारकव्यतिरिक्तः स्वस्वामित्वादिलक्षणः संबंधः । स चोभयनिष्ठश्च भवति तस्मिन्नर्थे षष्ठीविभक्तिर्भवति । यतः । "भेद्यभेदकयोः श्लिष्टः संबंधोऽन्योन्यमिष्यते ॥ द्विष्ठो यद्यपि संबंधः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ २ ॥ भेद्यं विशेष्यमित्याहुर्भेदकं च विशेषणम् ॥ प्रधानं च विशेष्यं स्यादप्रधानं विशेषणम्" ॥ १ ॥ उदाहरणं श्लोकेनाह । राज्ञः० । इति । स पुमान् राज्ञो राजसंबंधी ज्ञेय इत्येवं स्वामिसेवकसंबंधः । एतत्समीपतरवर्ति प्रपूजनं पूजनोपकरणं पूजासामग्री पित्रोरिति । माता च पिता च पितरौ तयोः पितृमातृसंबंधि । गुरूणां गुरुसंबंधि वचनं जाड्यज्वरविमुक्तानां पथ्यवत् पथ्यतुल्यं हितकारकम् । तथ्यमिति वा पाठः । कवीनां वचो वचनं रससंयुक्तं मिष्टम् । एवमन्येऽप्यूह्याः । इति षष्ठ्यर्थः ६

[ आधारे सप्तमी ] आधारोऽधिकरणम् । तत् षड्विधम् । औपश्लेषिकम् १ सामीपिकम् २ अभिव्यापकम् ३ वैषयिकम् ४ नैमित्तिकम् ५ औपचारिकम् ६ चेति ।

कटे शेते कुमारोऽसौ वटे गावः सुशेरते ।

तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् ॥ १ ॥

युद्धे संनह्यते धीरोंगुल्यग्रे करिणां शतम् ।

---

१ संबंधः । सामान्यविशेषणात् द्विविधः । इति तत्त्वदीपिकायाम् ।

[ भावः क्रियालक्षणं तत्रापि सप्तमी ] प्रसिद्धक्रिययाऽप्रसिद्ध क्रियाबोधनं भावः । वर्षति देवे चौर आयातः । पतत्यं-शुमालिनि पतितोऽरातिः । काले शरदि पुष्यन्ति सप्तच्छदाः ॥

आधारभावयोरिति पदं व्याचिख्यासुः प्रथमम् आधारं प्रकटयन्नाह ( आधारे सप्तमी ) इति सुगमार्थः । आध्रियते स्थाप्यते षट्प्रकारा क्रिया अस्मिन्नित्याधारः क्रियाश्रयस्य कर्तुः क्रियाया आश्रयस्तत्र सप्तमी विभक्तिर्भवति । आधाराधिकरणे एकपर्याये। आधारशब्देन अधिकरणमेवोच्यते । अतः अधिकरणस्याधारस्य भेदा-नाह । षड्विधमिति । अधिक्रियते आधारतया तदधिकरणम् । गुणानां गुणिवत् तत् षड्विधमिति षडिति । षट्संख्याका विधाः प्रकारा यस्य तत् षड्विधं षोढे-त्यर्थः । तानेव षड्भेदानाह । औपश्लेषिकमित्यादि । उप सामीप्येन श्लेषणं संघ-ट्टनम् उपश्लेषः । एकदेशमात्रसंयोगो वा उपश्लेषः । यथा—कटे शेते । कटस्यैकदेशे इत्यर्थस्तेन निर्वृत्तमौपश्लेषिकम् ॥ १ ॥ सामीपिकमिति । समीपेन निर्वृत्तं सामी-पिकं यदाधेयसमीपमात्रेण क्रियाहेतुः । यथा वटे वटसमीपे गावः सुशेरते । गंगायां घोषः । गंगासमीपे घोषो व्रजं गोकुलं वर्त्तते इति ॥ २ ॥ अभि समंताद्व्याप्नोती-त्यभिव्यापकम् । आधेयेन समस्तावयवसंयोगोऽभिव्यापकः । अपृथग्भूतयोराधारा-धेययोर्यः सकलावयवसंबंधः सोऽभिव्यापकः यथा तैलं तिलेषु ॥ ३ ॥ विषये भवं वैषयिकम् अन्यत्र संभवो वा विषयः । स यथा । नभसि तारकाः । आकाशे वायुः। हृदि ब्रह्मेत्यादि हृदि विषये ब्रह्म एवं परं प्रकृष्टं अमृतम् अस्ति । नहि सर्वाधारस्य परब्रह्मणो हृदयमाधारो भवितुमर्हति । विषयमात्रम् ॥ ४ ॥ निमित्तेन भवं नैमि-त्तिकम् । यथा युद्धे युद्धनिमित्तमित्यादि ॥ ५ ॥ अविद्यमानस्यारोपणमुपचारः । उपचारे भवम् औपचारिकम ॥ ६ ॥ एवं षड्विधेप्यधिकरणे सप्तमीविभक्तिर्भवतीति शेषः । अथ सार्धश्लोकेन षडप्याधारभेदोदाहरणान्याह । कटे शेते इत्यादि । असौ कुमारः कटे शेते इति कटमुपश्लिष्य शेते इत्यत्र औपश्लेषिकमधिकरणम् । अत्र शयनक्रियाश्रयः कर्त्ता कुमारस्तदाधारः कटस्तत्रोपश्लेषः । गावो धेनवः वटे इति वटसमीपे शेरते शयनं कुर्वते इति । सामीपिकाधिकरणम् । नहि वटस्योपरि गावः शेरते किंतु समीपे । एवं गंगायां घोषः । गंगासमीपे घोषः । गोकुलम् ॥ तिलेषु तैलं विद्यते । तिलेष्वभिव्याप्य सर्वत्र स्थितमित्यर्थः । अभिव्यापकमेतदिति ॥ हृदीति । हृदिविषये ब्रह्म परममृतमित्येतत् वैषयिकाधिकरणम् । युद्धे युद्धनिमित्तं धीरः संनह्यते संनाहं परिदधाति इति नैमित्तिकमधिकरणम् । अंगुल्यग्रेण प्रदर्श्यमानम् इत्यर्थः। करिणां हस्तिनां शतमित्युपचारमात्रत्वादौपचारिकं नतु साक्षाद्वर्तमानमिति॥ इत्थमाधारमाख्यायेदानीं भावपदस्यार्थमाह ( भावः क्रियालक्षणम् ) इति । क्रिया गमनस्थानोत्थानादिका तस्या यल्लक्षणं चिह्नं स भाव इति कथ्यते । प्रसिद्धक्रियया कृत्वा अप्रसिद्धक्रियाया लक्षणं बोधनं भावः इति तत्रापीति तस्मिन्नर्थेपि सप्तमीविभ-

क्तिर्भवति॥ उदा०। देवे मेघे वर्षति चौरस्तस्करः आयातः आगतः। अत्र मेघवर्षणरूपा प्रसिद्धा क्रिया तथा चौरागमनरूपा अप्रसिद्धक्रिया लक्षिता। देवे मेघे वर्षतीति प्रसिद्धेन मेघवर्षणेन अप्रसिद्धं चौरागमनं लक्ष्यते इति तत्र सप्तमी॥ "राज्ञि मेघे सुरे देवः" इति कोशः। एवम् अंशुमालिनि सूर्ये पतति अस्तं गच्छति सति अरातिः शत्रुः पतित इति। युद्धार्थमागत्य पतित इत्यर्थः। यद्वा पतितो मृत इत्यर्थः। अत्र प्रसिद्धेन सूर्यस्यास्तमनेन अप्रसिद्धं शत्रोः पतनं लक्ष्यते। एवं गुरौ धर्ममुपदिशति सति शिष्यः आगत इत्येवमादयोऽवसेयाः। एवं द्वितीयादिविभक्तीनामर्थाः॥

अथोपपदविभक्त्यर्थो निरूप्यते।**विनासहनमऋतेनिर्धारणस्वाम्यादिभिश्च॥**एतैरपि योगे द्वितीयाद्या विभक्तयो भवंति। विनादियोगे द्वितीया। विनापापं सर्वं फलति। "विना वातं विना वर्षं विद्युतः पतनं विना॥ विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ" ॥ १ ॥ अंतरेणाक्षिणी किं जीवितेन।अंतरा त्वां मां हरि रित्यादिपदाद् ग्राह्यम्। [ सहादियोगे तृतीया। ] सह सदृश साकं समं सार्धमित्यादियोगे तृतीयाविभक्तिर्भवति। सह शिष्येणागतो गुरुः। सदृशश्चैत्रो मैत्रेण। साकं नयनाभ्यां श्लक्ष्णा दंताः। समं चन्द्रेणोदितो गुरुः। सार्धं धनिभिर्धूतः साधुः। [ नम आदियोगे चतुर्थी ] नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी। नमो नारायणाय। स्वस्ति राज्ञे। सोमाय स्वाहा। पितृभ्यः स्वधा। अलं मल्लो मल्लाय। वषडिंद्राय। [ ऋत आदियोगे पञ्चमी ] ऋते ज्ञानान्न मुक्तिः। अन्यो गृहाद्विहारः। ऋतेयोगे द्वितीयापि। ज्ञानमृते। विनायोगेपि तृतीया। ज्ञानेन विना। दिग्योगे पञ्चमी। पूर्वो ग्रीष्माद्वसंतः। [ निर्द्धारणे षष्ठीसप्तम्यौ। ] निर्धारणं क्रियागुणजातिभिः समुदायात् पृथक्करणं तत्र षष्ठी सप्तमी च। क्रियापराणां भगवदाराधकः श्रेष्ठः। क्रियापरेषु वा। गवां कृष्णा गौः संपन्नक्षीरा गोषु वा। एतेषां क्षत्रियः शूरतमः एतेषु वा॥

अथ पुनस्तासामुपपदविभक्तीनामर्थान् प्रकारांतरेणाह। सूत्रम् ( विना २ सह ३ नम ४ ऋते ५ निर्धारण ६ स्वाम्यादि ७ भिश्च ) ततो विना सहेत्यादिपदकस्य

---

१ 'मधुमधु' इत्यपि पाठः।

द्वंद्वः । ते आदौ येषां ते तथा तैः ३-३ ( स्त्रो० ) च १-१ ( अव्य० ) सिद्धं सूत्रम् । एनैर्विनादिभिरपि शब्दैर्योगे सति द्वितीयाद्या षट् विभक्तयः षट्स्वप्यर्थेषु यथाक्रमं भवंति । द्वंद्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यत इति आदिशब्दो विनादिषु प्रत्येकं योज्यः । विनादिवाचके शब्दे प्रयुज्यमाने द्वितीयाविभक्तिर्भवतीति विनादियोगे द्वितीया । सहादियोगे तृतीया । नम आदियोगे चतुर्थी । ऋत आदियोगे पंचमी । निर्द्धारणाद्यर्थे षष्ठी । स्वाम्याद्यर्थे सप्तमी । तत्रोदाहरणेन द्वितीयां व्यंजयति । विना पापमिति । पापं विना । पापाभावेन सर्वमपि धर्मकृत्यादिफलमावहति सफलं भवति । एवमत्र विनार्थे वाच्यमाने विनाशब्दयोगे पापमिति द्वितीया । चकारात्पापेन विना पापाद्विना इति तृतीयापंचम्यावपि । यथा वृद्धत्वं जरसा विना । अक्षिणी इति । नेत्रे अंतरेण विना जीवितेन जीवनेन किम् । न किमपीति भावः । अक्षिणी इदमत्र द्वितीयाद्विवचनं नपुंसकांतम् । अंतरेत्यादि । त्वां माम् अंतरा मध्ये विचाले मधु क्षौद्रं मद्यं वा वर्त्तते । अथवा यथा भीम इत्युक्ते भीमसेनः । भामा इत्युक्ते सत्यभामा । यथा मधुः इत्युक्ते मधुसूदनः । कृष्णः त्वां माम् अंतरा मध्ये विचाले वर्त्तते । त्वामिति युष्मदस्मदोर्द्वितीयैकवचनांतत्वम् । आदिशब्दादंतरेण अंतरा इत्यर्थद्वयेऽपि द्वितीयाविभक्तिर्भवति । एतदेवाह । इत्यादिपदाद्ग्राह्यमिति इत्युदाहरणद्वयम् । आदिपदाद्विनादियोगे द्वितीयेत्यादिशब्दाद्ग्राह्यमेवेयमिति भावः । इति द्वितीयार्थः ॥ २ ॥ अथ तृतीया । तत्र द्रव्यगुणक्रियाभिस्तुल्ययोग्यतायां विद्यमानायां सहार्थे तृतीयाविभक्तिर्भवति इति वृद्धाम्नायः । सह शिष्येणेति । गुरुः शिष्येण सह आगतः । अत्र आगमनक्रियया शिष्यशब्दस्य गुरुणा तुल्ययोग्यतायां सत्यां तृतीयांतत्वम् । सह पुत्रेण पिता धनी । इत्यत्र धनद्रव्येण तुल्ययोग्यत्वे पुत्रस्य तृतीयांतत्वम् । सदृशश्चैत्रो मैत्रेण । चैत्रनामा कश्चित्पुरुषः मैत्रेण मैत्रनाम्ना पुरुषेण सदृशः तुल्यः । साकं नयनाभ्यामिति । नयनाभ्यां साकं सहिता दंता श्लक्ष्णा मनोज्ञाः । अत्र गुणेन तुल्यत्वे तृतीया । एवम् आदिशब्दात्साधुः पुरुषः धनिभिः धनवद्भिः पुरुषैः सार्द्धं धृतो गृहीतः । बद्ध इत्यर्थः । वारणार्थालंयोगे तृतीया । समर्थार्थालंयोगे चतुर्थी इत्यर्थः । एतावता अलम् । अलं विवादेन । धर्म्मेण अर्थः । गुडेन मिश्रः । शस्त्रेण कलहः । कर्मणा विना । पुण्येन हीनः इत्यादिशब्दात् अवसेयाः । प्रक्रियामते तु तुल्यार्थे तृतीयाषष्ठ्यौ स्तः । कृष्णेन कृष्णस्य वा तुल्यः । यदुक्तं रघुकाव्ये "धृतेश्च धीरः सदृशीर्व्यधत्त सः" । इति तृतीया ॥ ३ ॥ अथ चतुर्थीं व्याचष्टे । नम आदियोगे चतुर्थी । [ नमः स्वस्ति स्वाहा स्वधा अलम् वषट् एतेषामव्ययानां योगे चतुर्थी वक्तव्या ] इति सुगमम् । तत्र नमः नमस्कारार्थः । स्वस्ति इति कल्याणवाचकमव्ययम् । स्वाहा इति होमावसरे मन्त्रावसाने अक्षरद्वयोच्चारणं हव्यवस्तुवाचकम् । स्वधा इति पितृकल्प्यम् । अलमिति

१ द्वंद्वात्परतः श्रूयमाणमित्यन्यत्र ।

सामर्थ्यार्थे । वषट् होतव्यं वस्तु । नमो नारायणायेति नमः नमस्कारार्थे । स्वस्ति राज्ञे । राज्ञे नृपाय स्वस्ति कल्याणं भवतु अत्र स्वस्त्यर्थे । सोमाय चन्द्राय स्वाहा । पितृभ्यः स्वधा । तत्संतानकल्पितं वस्तु । अलमिति । मल्लो मल्लाय अलम् समर्थः । इन्द्राय वषट् होतव्यं वस्तु । इत्यादिष्वर्थेषु चतुर्थी । बृहट्टीकासु च अन्यान्यप्युदाहरणानि दृश्यन्ते तानि त्वत्र ग्रन्थगौरवभयान्न व्याख्यायन्ते ॥ ४ ॥ अथ पंचमी । ऋते इति । ज्ञानात् ऋते विना मुक्तिर्न भवतीति शेषः । अत्र ऋते-शब्दयोगे पंचमी ज्ञानादत्र । आदिशब्दात् गृहादन्यो विहारः विचरणम् । विना-पृथग्योगेऽपि पंचमी । विना कामात् । पृथक् ग्रामात् । एवं भिन्नो । ग्रामात् इतरो ग्रामात् । प्राक् ग्रामात् । दक्षिणाहि ग्रामात् । गृहाद्बहिः आरात् ग्रामादित्यादि ॥ ५ ॥ अथ षष्ठ्यर्थसूचकं निर्धारणं व्याचष्टे । निर्धारणमिति । निर्धियते पृथक्क्रियते अनेनेति निर्धारणम् । काभिः क्रिया १ गुण २ जातिभिः ३ । क्रिया करणा-त्मिका गमनस्थानादिका । गुणो रूपादिः । जातिर्ब्राह्मणादिः । ततः क्रिया च गुणश्च जातिश्चेत्यादिना द्वंद्वस्ततस्ताभिः कृत्वा यत्समुदायात् बहूनां समूहात् पृथक्करणम् एकस्य तन्निर्धारणमुच्यते तत्र षष्ठीविभक्तिर्भवति । तत्रोदाहरणम् । क्रियासु पराः क्रियापराः क्रियासु निष्ठाः तत्परा इत्यर्थः । तेषां मध्ये यो भगव-तश्चिदानन्दस्य आराधकः स एव श्रेष्ठः प्रशस्तः । अत्र सामान्यक्रियापरेषु भगव-दाराधकत्वरूपया क्रियया पृथक्करणे परशब्दस्य षष्ठी । गवां धेनूनां मध्ये या कृष्णा गौः सा संपन्नक्षीरा बहुदुग्धा । अत्र गोशब्दस्य कृष्णत्वगुणेन निर्धारणे षष्ठी । एतेषां क्षत्रियः शूरतम इति । एतेषां सर्वजातीयानां पुरुषाणां मध्ये क्षत्रियोः अतिशयेन शूरः शूरतमः । अत्र जात्या निर्द्धारणे षष्ठी । व्याकरणांतरमते तु निर्द्धारणे षष्ठीसप्तम्यौ द्वे अपि भवतः ॥

स्वाम्यादिभिश्च । स्वाम्यादियोगे षष्ठीसप्तम्यौ भवतः । गवां स्वामी गोषु स्वामी । गवामधिपतिः गोष्वधिपतिः । **कर्तृकार्ययोरक्तादौ कृति षष्ठी ॥** कर्त्तरि कार्ये च षष्ठी विभक्तिर्भवति क्तादिवर्जिते कृदंते शब्दे प्रयुज्यमाने । व्यासस्य कृतिः । भारतस्य श्रवणम् ॥

( स्वाम्या० ) स्वाम्यादियोगे षष्ठीसप्तम्यौ भवतः । गवां स्वामी गोषु स्वामी । एवं गवामधिपतिः गोष्वधिपतिरित्येतदपि ज्ञेयम् । स्वामीश्वराधिप-तिदायादसाक्षिप्रतिभूप्रसूतआयुक्तकुशलप्रभुशब्दयोगे षष्ठीसप्तम्यौ भवतः । पुनः षष्ठ्यर्थांतरमाह । सूत्रम् ( कर्तृकार्ययो:० ) इति । कर्त्ता च कार्यं च कर्तृकार्ये तयोः ७-२ ( ओसि० । ए अय् ) स्वर० ( स्रो० ) अग्रे अक्तादिः क्तप्रत्ययः आदिर्यस्य सः क्तादिर्न क्तादिरक्तादिः तस्मिन् ७-१ ( ङेरौ० ) टिलोपः पश्चात्

( नामि० ) स्व० । कृत् ७-१ स्व० । अग्रे षष्ठी षण्णां संख्यापूरणी षष्ठी १-१ ( हसे० ) सिद्धम् । कर्त्तरीति । प्रागुक्तलक्षणे प्रधाने क्रियाश्रये अर्थे तथा कार्ये कर्मणि चार्थे षष्ठीविभक्तिर्भवति क सति कृति इति कृदंत इति कृत् तृतीयावृत्तिप्रोक्तः प्रत्ययसमूहः सोऽन्ते यस्य स कृदन्तस्तस्मिन्कृदंते शब्दे प्रयुज्यमाने वाच्यमाने सतीति भावः । कथंभूते कृदन्ते शब्दे क्तादिवर्जिते क्तप्रत्ययादिरहिते । क्तादीत्यादिशब्दात् क्तक्तवतुईषदूदुःसुषु खलशतृशानौ कसुकानौ पूर्वकाले क्त्वा समासे क्यप् तुम् इष्णु स्नु कु इत्यादि कृत्प्रत्ययांतान् विहाय अन्येषु कृत्प्रत्ययांतेषु परेषु सत्सु इत्यर्थः । तत्रोदा० । व्यासस्य कृतिः । व्यासेन क्रियते स्म इति । अत्र व्यासः कृतेः कर्ता ततः कृतिरिति कृत्प्रत्ययांते शब्दे प्रयुज्यमाने व्यासस्येति कर्त्तरि षष्ठी । एवं भारतस्य श्रवणम् भारतं शृणोतीति श्रवणमिति युङ्क्ते कृदंते प्रयुंक्ते भारतस्येति कर्मणि षष्ठी । अत्रोभयत्रापि कृद्योगलक्षणा षष्ठी । अक्तादाविति किम् । त्वया कृतम् । ग्रामं प्राप्तः । अत्र यथाक्रमं कर्त्तरि कर्मणि च तृतीया द्वितीया क्तप्रत्ययांतत्वात् षष्ठी न । आदिशब्दात् शतृशानकसुकानइष्णुस्नुक्नुक्त्वातुमूक्यप्इत्याद्यंतेष्वपि शब्देषु परेषु षष्ठी न भवति । किंतु द्वितीयैव । ग्रामं गच्छन् । अन्नं पचमानः । अन्नं पेचिवान् । शुभं चक्राणः । देवं दिदृक्षुः । आत्मानमलंकरिष्णुः । दैत्यान् घातुकः । दानवान् जिष्णुः । देवं नत्वा । गुरुं प्रणम्य । कार्यं कर्त्तुम् । ग्रामं गंतुम् उत्कंठितः इत्यादीन्युदाहरणान्यवसेयानि । द्विषेः शतुर्वा षष्ठी । मुरस्य मुरं वा द्विषन् ॥

[ स्मरतौ च कार्ये ] स्मरतौ धातौ प्रयुज्यमाने कर्मणि षष्ठी भवति । मातुः स्मरति मातरं स्मरति ॥

किंच ( स्मरतौ च कार्ये ) स्मरतावर्थे स्मरणार्थे स्मृञ् स्मरणे धातुयोगे कार्ये कर्मणि विषये षष्ठीविभक्तिर्भवति । उदा० । पुत्रः मातुः स्मरति । मातुः स्मर्त्तव्यत्वे षष्ठी चकाराद्द्वितीयापि । कर्मापि भवति । मातरं स्मरति । तृप्त्यर्थानां करणे वा षष्ठी । फलैः फलानां वा तृप्तः । अद्भिः अपां वा तृप्तः ।

[ हेतौ तृतीया पंचमी च वक्तव्या ] अनित्यः शब्दः कृतकत्वेन कृतकत्वात् वा ॥

( हेतौ० ] इति हेतौ साधके तृतीयापंचम्यौ भवतः इह किल प्रतिज्ञा १ हेतु २ दृष्टांत ३ उपनय ४ निगमन ५ भेदादनुमानस्य पंचावयवाः । तत्र पक्षवचनं प्रतिज्ञा प्रतिज्ञास्थापको हेतुः । यथा पर्वतोऽयं वह्निमान् कस्मात् धूमवत्त्वात् । अयं पर्वतो वह्निमान् इति प्रतिज्ञा सा च धूमवत्त्वेन हेतुना स्थाप्यते इति । तत्र [ हेतौ० ] इति । द्वितीयानुमानावयवे तृतीया पंचमी च भवति । तत्रोदाहरणम् । अनित्यः शब्दः इति

प्रतिज्ञा १ । केन कस्माद्वा कृतकत्वेन कृतकत्वाद्वेति हेतुस्तत्र तृतीया विकल्पेन तु पंचम्या वा प्रयोगः । हेतुत्वादिति २ । प्रस्तावाच्छेषा अपि त्रयोऽवयवाः व्यज्यंते ते चामी । योयः कृतकः सस आनित्यः यथा घट इति दृष्टांतः ३ । कृतकोय-मित्युपनयः ४ । तस्मादनित्यश्चायमिति निगमनम् ५ ॥

[ भयहेतौ पंचमी ] चौराद्बिभेति । व्याघ्रात्रस्यति । विद्युत्पाता-च्चकितः [ षष्ठी हेतुप्रयोगे च ] कस्य हेतोरियं कन्या ॥

( भय० ) इति । भयहेतौ भयस्य कारणे पंचमी भयस्य हेतुः यः पशुपुरुषा-दिजनितः कारणवर्गस्तस्मिन्नर्थे पंचमीविभक्तिर्भवति । चौराद्बिभेति । व्याघ्रात्र-स्यति । विद्युत्पाताच्चकितः । अत्र भयहेतौ भयोत्पादकार्थे पंचमी ( षष्ठी हेतु-प्रयोगे च ) हेतुशब्दस्य प्रयोगे हेतुः इति शब्दे प्रयुज्यमाने षष्ठी भवति । कस्य हेतोरियं कन्या । कस्य निमित्तमित्यर्थः । चकारात्सर्वादेः हेतुप्रयोगे तृतीयाषष्ठ्यौ स्तः । केन हेतुना कस्य हेतोः । निमित्तकारणे हेत्वर्थप्रयोगे सर्वादेः सर्वा विभक्तयो भवंति । को हेतुः । कं हेतुं वसति । केन हेतुना । कस्मै हेतवे । कस्मात् हेतोः । कस्य हेतोः । कस्मिन् हेतौ । इत्यादि ॥

[ इत्थंभावे तृतीया ] शिष्यं पुत्रेण पश्यति । पश्यति संसारमसा-रेण । पुष्करिणीं नद्या पश्यति ॥

( इत्थंभावे तृतीया ) इति । असावयमिति इत्थभावस्तस्मिन्नर्थे तृतीया विभ-क्तिर्भवति । उदा० । गुरुः शिष्यं पुत्रेण पश्यति । पुत्रसदृशं पश्यति पुत्रमिवेति भावः । यद्वा अयं प्रकारः इत्थं तस्य भावः इत्थंभावः । सामान्यस्य भेदको विशेषः प्रकारः किंचित्प्रकारांतरं प्राप्तः इत्थंभावः । यथा मनुष्यसामान्यभेदको विशेषः शिष्यत्वं तल्लक्षणं पुत्र इति न भवति किं तु तद्गतस्नेहः पुत्रशब्देनोच्यते इति । आचार्यः शिष्यं पुत्रेण पश्यति पुत्रमिव पश्यतीत्यर्थः । एवं साधुः संसारमसारेणे-त्यपि ज्ञेयम् । साधुः संसारं असारमिव पश्यति असारतया पश्यति इत्यर्थः ॥

[ येनांगविकारः ।] येन विकृतेनांगेनांगिनो विकारो लक्ष्यते तस्मा-दङ्गात्तृतीया विभक्तिर्भवति ॥ देवदत्तः अक्ष्णा काणः । पादेन खञ्जः । कर्णेन बधिरः । शिरसा खल्वाटः । करेण कुणिः ॥

( येनां० ) यत् ३-१ ( त्यदा० । टेन० । अ इ ए ) अंगविकारः अंगं विक्रि-यते अनेनेत्यंगविकारः १-१ ( स्तो० ) पश्चात् ( सवर्णे० ) सिद्धं द्विपदम् । येन विकृतेनांगेन अक्ष्यादिना अंगिनः शरीरिणोऽङ्गविकारः शरीरविकृतिर्लक्ष्यते ज्ञायते तस्माद्विकृतादंगात् तृतीया विभक्तिर्भवतीति । तत्र विकृतत्वं द्विविधं न्यूनत्वेन १ आधिक्येन २ चेति न्यूनत्वं व्याचष्टे । अक्ष्णा नेत्रेण काणः । पादेन खञ्जः ।

शिरसा मस्तकेन खल्वाटः । केशरहितः इत्यर्थः । करेण कुणिः न्यूनत्वविकृतेरिदमुदाहरणचतुष्टयम् । एवं मुखेन त्रिलोचनः । वपुषा चतुर्भुजः । इत्येतदुदाहरणद्वयमाधिक्यविकृतौ ज्ञेयम् । अथ पंचम्या अर्थांतरमाह ॥

[ जनिकर्तुः प्रकृतिः । ] जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति । तत्रापादाने पंचमी । "यस्मात्प्रजाः प्रजायंते तद्ब्रह्मेति विदुर्बुधाः" । [ आङादियोगे च ] आङादियोगे लिंगात्पंचमी भवति । आपाटलिपुत्राद्वृष्टो देवः ॥

( जनिकर्तुः० ) जनेर्जन्मनः कर्त्ता जनिकर्ता क्रियापदस्य कर्त्ता उत्पद्यमानवस्तुजननकर्त्ता तस्य ६-१ ( ऋतो ङ उः ) अस्य उः । ङित्त्वाट्टिलोपः । स्व० । प्रकृति १-१ (स्त्रो० ) सिद्धम् ( जनिकर्तुः प्रकृतिरपादानम् ) इत्यं वा । अथ वृत्तिः । जनिकर्तुरिति कोर्थः । जायमानस्य जायमानमुत्पद्यमानं यत्कार्यं तस्य प्रकृतिः उपादानं मूलकारणं तदपादानसंज्ञं भवति तत्रापादाने पंचमीविभक्तिर्भवतीति शेषः । अर्थाज्जनेर्द्धातोर्जनिक्रियायाः जननं जनिरुद्भवः इति जनेरुत्पत्तिर्यः कर्त्ता स जायमानः सन्कार्यं भवति तस्य प्रकृतिः कारणं तदपादानं तत्र पंचमी । उदा० "यस्मात्प्रजाः प्रजायंते तद्ब्रह्मेत्यभिधीयते" । प्रजायंते इति जनिधातुः क्रियापदम् । प्रजा इति जनिकर्तृपदं जायमानकार्यत्वात्तस्य प्रकृतिर्यच्छब्दनिर्दिष्टं ब्रह्म ततो यस्मादिति मूलकारणत्वात्प्रकृतिपदात्पंचमी आङुपसर्गादियोगेपि पंचमी । आदिशब्दात् आङ्अपपरियोगे । आङ् उपसर्गो मार्यादायाम् अभिविधौ च वर्तते । तत्र तेन विनेति मर्यादा तेन सहेत्यभिविधिरिति भेदः । तत्रोदाहरणम्-आपाटलिपुत्रादिति पाटलिपुत्रं नगरं मर्यादीकृत्य तस्मादर्वाक् अभिव्याप्य देवो मेघः वृष्ट इत्यर्थः । पर्यपाभ्यां वर्जने पंचमी । अपपरी वर्जनार्थे । परि त्रिगर्तेभ्यो देवो वृष्टः । अप त्रिगर्तेभ्यो वृष्टो देवः । त्रिगर्तदेशान् वर्जयित्वा वृष्ट इत्यर्थः । "राज्ञि मेघे सुरे देवः" इत्यनेकार्थः ॥ विद्यास्वीकारे आख्यातुः पंचमी स्यात् । उपाध्यायादधीते ॥

[ तादर्थ्ये चतुर्थी च वक्तव्या ]

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ॥
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये ॥ १ ॥

अथ पुनश्चतुर्थीमाह । तादर्थ्ये इति । सः अर्थो यस्य तत्तदर्थं तस्य भावः तादर्थ्यम् । यद्वा स एव अर्थस्तदर्थस्तस्य भावस्तादर्थ्यम् । यद्वा तस्मै कार्याय इदं कारणं तदर्थम् तस्य भावस्तादर्थ्यं तस्मिंस्तादर्थ्ये अर्थे वाच्यमाने चतुर्थी विभक्तिर्भवति । तत्रोदाहरणं श्लोकेन । संयमायेति।नरो मनुष्यः श्रुतं शास्त्रं धत्ते धारयति

१ तद्ब्रह्मेत्यभिधीयते इत्यपि पाठः ।

कस्मै संयमाय संयमार्थमित्यर्थः । धर्माय धर्मार्थं संयमं धत्ते । मेधावी बुद्धिमान् मोक्षाय मोक्षार्थं धर्मं धत्ते । नरो दानाय दानार्थं तथा भुक्तये भोगाय धनं धत्ते । अत्र संयमादिभ्यस्तादर्थ्ये चतुर्थी ॥

[ क्रुध्यादियोगे च । ] क्रूराय क्रुध्यति । विप्रायद्रुह्यति । पुत्राय कुप्यति । गुणवते असूयति ॥

क्रुध्यादिधातुयोगेपि चतुर्थी । क्रुधि द्रुहि ईर्ष्या असूया श्लाघ् ह्नुङ् स्था शप् धारि स्पृहि एते क्रुध्यादयः । क्रूराय क्रूध्यति । मित्राय द्रुह्यति । क्रूरं प्रति क्रोधः इत्यस्मिन्नर्थे क्रुधधातुयोगे क्रूरायेत्यत्र चतुर्थी । आदिशब्दात् मित्राय द्रुह्यतीति गुणवते पुरुषाय असूयतीत्यादिरोषवाचकधातुयोगेपि चतुर्थी । पुत्राय कुप्यति । दुष्टायेर्ष्यतीत्येवमादयः । गुणेषु दोषारोपोऽसूया । परसंपत्त्यसहनम् ईर्ष्या इति भेदः । [ सोपसर्गयोश्च क्रुधद्रुहोर्योगे चतुर्थीप्रतिषेधो वक्तव्यः ] क्रूरमभिक्रुध्यति । मित्रमभिद्रुह्यति । चकारात् श्लाघ्शप्स्थाधृञ्स्पृहादीनां रुच्यर्थानां च तृप्यमाणात् चतुर्थीति सूचितम् । भगवते श्लाघते । मदनाय शपते । मित्राय तिष्ठति । पत्न्यै धारयति भूषणानि पतिः । कृष्णाय स्पृहयति गोपी । क्षुधिताय रोचते अन्नम् । इत्यादि ज्ञेयम् । लोकानां शुभाशुभसूचको भूतादिविकार उत्पातस्तत्रापि चतुर्थी । वाताय कपिला विद्युत् । वातोत्पातज्ञापिका इत्यर्थः । तुमंतलोपे चतुर्थी । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । तुमर्थाच्च भाववचनात् । यागाय याति । यष्टुं यातीत्यर्थः । मन्यतेः कर्मण्यनादरे वा चतुर्थी । न त्वां तृणाय मन्य इत्यर्थः । कर्मणि द्वितीयाचतुर्थ्यौ । गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ व्रजाय व्रजति व्रजं वा ॥

[ क्यब्लोपे कर्मण्यधिकरणे पंचमी च वक्तव्या ]हर्म्यात्प्रेक्षते हर्म्यमारुह्य प्रेक्षते इत्यर्थः । आसनाद्वदति आसने उपविश्य वदतीत्यर्थः ।

[ निमित्तात्कर्मयोगे सप्तमी च वक्तव्या ]

चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरम् ॥
केशेषु चमरीं हंति सीम्नि पुष्कलको हतः ॥ १ ॥

[ विषये च । ] तर्के चतुरः [ षष्ठीसप्तम्यौ चानादरे । ] बहूनां क्रोशतां गतश्चौरः । बहुष्वसाधुषु निवारयत्स्वपि स्वयमार्यो याति साधुमार्गेण ॥ बहुषु साधुषु निवारयत्स्वपि स्वयमनार्यो यात्यसाधुमार्गेण ॥ मातापित्रो रुदतोः प्रव्रजति पुत्रः ॥

[ क्यब्लोपे० ] इति । क्यबर्थो वाच्यमानः क्यपश्च अप्रयोगः स क्यब्लोपस्तस्मि-

---

१ 'वदत्स्वपि' इत्यपि पाठः ।

न्यर्थे पंचमी वक्तव्या । यतः "क्यबर्थो दृश्यते यत्र क्यबंतं न प्रयुज्यते । स एव क्यब्लोपः स्यादिति प्रोक्तं मनीषिभिः" ॥ १ ॥ [ क्यब्लोपे कर्मण्यधिकरणे च पंचमी वक्तव्या ] उदा० । हर्म्यात्प्रेक्षते इति । कोर्थः। हर्म्यं गृहमारुह्य प्रेक्षते पश्यतीत्यर्थः । अत्र आरुह्येति क्यप्प्रत्ययांतं पदं तस्य लोपे हर्म्यादिति पंचमी । एवम् आसनात् वदति आसने उपविश्य वदतीत्यर्थः । सप्तमीमाह । निमित्तादिति । निमित्तं नाम पंचमोधिकरणभेदस्तस्मान्निमित्तात् । यद्वा निमित्तात्प्रयोजनवाचिनः शब्दात्कर्मयोगे सति सप्तमी वक्तव्या । तत्रोदा० । चर्मणि० । चर्मणीति । चर्मनिमित्तं द्वीपिनं चित्रकं हंति विनाशयति । दंतयोर्दन्तनिमित्तं कुंजरं हस्तिनं हंति । केशेषु केशनिमित्तं चमरीं गां हंति । सीम्नि सीमायां सीमानिमित्तं केनापि पुरुषेण पुष्कलको नामा क्षुद्रग्रामाधिपतिः हतो मारितः । पुष्कलकः कीलको वा हतः निखातः । कीलः पुष्कलकः शिवः ॥ "पुष्कलकः स्याद्गंधमृगः सीमा तत्राभिरुच्यते" । कस्तूरिकानिमित्तं गंधमृगो हत इति भावार्थः । ( विषये च ) इति । विषये विषयार्थे ग्राह्यार्थे वाच्यमाने सप्तमी विभक्तिर्भवति । उदा० । तर्के तर्कविषये चतुरो निपुणः ॥ अत्र तर्कः क्रियाश्रयत्वाभावान्नाधिकरणं ततो विषये सप्तमी। षष्ठी० । अनादरे क्रियमाणे सति षष्ठी सप्तमी च भवति। तत्रोदा० । बहूनां जनानां क्रोशतां सतां फूत्कारं कुर्वतां सतां स चौरो गतः । बहून् जनानाक्रुशतोवज्ञाय अनादृत्येत्यर्थः । बहुष्वनार्येषु निषेधयत्स्वपि साधुमार्गेण याति साधुः । बहुषु साधुषु निवारयत्सु सत्स्वपि निषेधयत्स्वपि अनार्योऽसाधुः स्वयमात्मना असाधुमार्गेण असमीचीनमार्गेण अधर्ममार्गेण दुराचारे याति । बहुषु साधुजनेष्वनादरं कृत्वा व्रजतीत्यर्थः । एवं मातापित्रो रुदतोः सतोः प्रव्रजति पुत्रः इत्यपि ज्ञेयम् । मातापित्रोः अनादरं कृत्वा दीक्षां गृह्णाति इत्यर्थः । इन्नंते कर्मण्यपि सप्तमी । अधीती व्याकरणे ॥

**अन्योक्ते प्रथमा॥ यदिदं कार्याद्यन्येनाख्यातेन कृता चोक्तं भवति तदा प्रथमा प्रयोक्तव्या । घटः क्रियते । पटः कार्यः ॥**

सूत्रम् ( अन्योक्ते ) अन्येनोक्तं अन्योक्तं तस्मिन् ७-१ ( अ इ ए ) प्रथमा १-१ ( आपः० ) इति सेर्लोपः । सिद्धं सूत्रं द्विपदम् । अन्योक्त इति पदं व्याचष्टे यदिति । यत् इदं कार्यादि कर्म कारकम्, अन्येनेति कोऽर्थः अन्येन कर्मोक्तिभावोक्तिसंबध्याख्यातेन द्वितीयवृत्त्युक्तसूत्रनिष्पन्नेन यक्प्रत्ययान्तधातुरूपेण कृता कृदंतप्रत्ययेन तृतीयवृत्तिप्रत्ययसाधितशब्देन चशब्दात्समासेन तद्धितेन च सह यदुक्तं भवति यत् उच्यते तदा तस्मिन्कर्मणि प्रथमा विभक्तिर्भवति । अर्थात् ·यत्र तृतीयांतः कर्ता तत्र कर्मणि प्रथमा भवतीति भावः । उदा० । कुंभकारेण घटः क्रियते। इत्यत्र घटस्य कार्यत्वात्क्रियते इत्याख्यातोक्तत्वेन कर्मणि प्रथमा । एवं कारुकेण कटः कार्यः । इत्यत्र कृतोक्तत्वात् कर्मणि प्रथमा ॥

**[ छन्दसि स्यादिः सर्वत्र ] दध्ना जुहोति । पुनंतु ब्रह्मणस्पतिः । व्रजतीर्विरेजुः ॥ ॥ इति कारकप्रक्रिया ॥**

छन्दसि कारकानियममाह । ( छंद० ) छंदसि वेदविषये स्यादिर्विभक्तिः सर्वत्र सर्वेष्वर्थेषु व्यत्ययेन भवति। सर्वा विभक्तयः सर्वविभक्तीनामर्थे भवंतीत्यर्थः। तत्रार्षत्वान्न विभक्तीनियम इत्यर्थः । उदा० । दध्ना जुहोतीति । दधि जुहोतीति द्वितीयासंभवे छांदसत्वात् द्वितीयास्थाने तृतीया । ब्रह्मणस्पतिः पुनंतु । ब्राह्मणाः ब्रह्मणस्पतिं प्रक्षालयंतु इति द्वितीयार्थे प्रथमा । यद्वा एवं ब्रह्मणस्पतिर्ब्रह्मा पुनंतु अत्रैकवचनसंभवे बहुवचनम् । उक्तं च भागवते दशमस्कंधे पंचमाध्याये कृष्णजन्माधिकारे "नंदालयं सवलया व्रजतीर्विरेजुः" इति । एवमन्यान्यपि छांदसोदाहरणान्यवसेयानि । ग्रंथगौरवभयान्न लिख्यंते । अथ विभक्तीनां कांश्चिदर्थान्न समाहृत्याह । सामान्यलिंगवचनपरिमाणकर्तृसंबोधनान्योक्तेषु प्रथमा । तृतीयांते कर्त्तरि सति कर्मणि प्रथमा १ स्यात् इत्यर्थः । कर्मण्यभितः सर्वतः उभयतः परितः प्रति समया निकषा हा अनु धिग् उपर्युपरि अधोधः अध्यधि विना अंतरेणांतरा स्मरति कालाध्वनोर्नैरंतर्ये शतृ शान क्वसु कान इष्णु स्नु क्त्वा तुम् क्यप्-योगे क्रियाविशेषणे च द्वितीया २ । कर्तृसाधनयोः सह सदृशं साकं सार्द्धं विना इत्थं तद्भावे येनांगविकारचारणार्थालंयोगनिषेधार्थकृतादियोगहेतुतुल्यार्थादिषु तृतीया ३ । दानपात्रे नमः स्वस्तिस्वाहास्वधावषट्तादर्थ्यक्रुध्यादिरुच्यर्थादिधातुयोगसमर्थार्थालंयोगेषु बलिरक्षितहितशब्दयोगोत्पातज्ञापितेषु चतुर्थी ४ । विश्लेषावधौ ऋते अन्यादिविना पृथक् भिन्नेतरप्रभृत्यारभ्य बहिःशब्दयोगहेत्वर्थजनिकर्तृमर्यादाङादियोगक्यब्लोपभयहेतुविद्याख्यातृप्रभृत्यर्थेषु पंचमी ५ । संबंधनिर्द्धारणस्वामित्वकर्तृकार्यस्मरणार्थधातुहेतुशब्दप्रयोगतुल्यार्थानादरादिषु षष्ठी ६ । आधारभावस्वामित्वनिमित्तविषयानादराधीत्यादिष्वर्थेषु सप्तमी ७ । छंदसि सर्वा विभक्तयः सर्वेष्वर्थेषु व्यत्ययेन च भवंति । जातावेकवचनं बहुवचनवद्भवति । एको द्वौ वास्मदो विशेषणे बहुवद्भवतः । गुरौ च एको द्वौ बहुवद्भवतः इत्यादि ज्ञेयम् । यथात्र देशे प्रचुरो यवो विद्यते तथा अहम् आवाम् एतयोरर्थे वयमिति भवति । तथा एकस्मिन्नपि गुरौ एते गुरव इति बहुवचनं भवति ॥

इति कारकप्रक्रियाविवरणं संक्षेपतः समाप्तम् ॥

---

## अथ समासप्रक्रिया १६.

अथार्थवद्विभक्तिविशिष्टानां पदानां समासो निरूप्यते ।

**समासश्चान्वये नाम्नाम् ॥** नाम्नामन्वययोग्यत्वे सत्येव समासो भवति चशब्दात्तद्धितोपि भवति । ततो भार्या पुरुषस्येत्यादौ न भवति ॥

अथ समाससमारंभः । अत्र प्रथमं परिभाषामाह । अथार्थेत्यादि । अथ व्याख्या। अथेति कारककथनानंतरं समासो निरूप्यते स्थाप्यते इति संबंधः । तत्र समसनम् अनेकेषां पदानामेकपदमित्यादि यत्संक्षेपणं स समासो निरूप्यते कथ्यते । केषां पदानां स्यादिविभक्त्यंतानाम् । एवंविधानां पदानां समासो निरूप्यते कथ्यते इति योगः । कथंभूतानां पदानां अर्थवदित्यादि । अर्थः प्रथमादीनां लिंगादिः स आसामस्तीति अर्थवत्यः ताश्चता विभक्तयश्च अर्थवद्विभक्तयः ताभिर्विशिष्टानि युक्तानि अर्थवद्विभक्तिविशिष्टानि तथा तेषाम् । यद्वा अर्थवंति च तानि विभक्तिविशिष्टानि च अर्थ वद्विभक्तिविशिष्टानि तेषाम् । अथ समासस्य याथातथ्यमाह । सूत्रम्(समासः०) समास १-१ ( स्रो० ) च १-१ ( अव्य० ) पश्चात् ( विसर्ज० । स्तोः श्चुभिः श्चुः) स्व० । अन्वयेति पदानामर्थमित्यन्वयस्तस्मिन् ७-१ ( अ इ ए ) पश्चात् ( सवर्णे०) नामन् ६-३ ( अल्लोपः स्वरे ) सिद्धं सूत्रम् । नाम्नामन्वयेत्यादिवृत्तिः सुगमा कंठ्या । परमत्र नामशब्देन पदमेव विवक्षितम् । अन्यथा अविभक्ति नामेत्युक्ते ( समासप्रत्यययोः० ) इति सूत्रं व्यर्थं स्यादिति द्विवचनस्य बह्वर्थांतःपातित्वात् द्वयोरपि नाम्नोः समासः स्यात् । यद्वा नाम्नी च नामानि च नामानि तेषां नाम्नाम् एकशेषः समासः । तेन द्वयोर्नाम्नोर्बहूनां च नाम्नां समासो भवति । न वरम् । अन्वययोग्यत्वे सत्येवेति परस्परमर्थानुगमनमन्वयः । बाधकप्रमाणाभावो योग्यता यत्र नाम्नां पदानां शब्दानां अन्वययोग्यत्वं संभवति तत्रैव समासो भवति नान्यत्रेति भावः । चशब्दात्तद्धितोपि। तद्धितप्रत्ययसंबंधिविग्रहोऽप्यन्वययोग्यत्वे सत्येव भवति। तत् इति तस्मात्कारणात् भार्या पुरुषस्येत्यादौ विपरीतान्वये समासो न भवति । यथा-देवदत्तस्य भार्या पुरुषस्य वस्त्रमित्यत्र चतुर्णां पदानां मध्यात् आदिमम् अंतिमं च पदं शब्दं विहाय मध्यस्थशब्दद्वयग्रहणादन्वययोग्यत्वं नास्ति ततः समासो न भवति । अन्वयायोग्यत्वात् । पुरुषस्य भार्येत्यादौ तु भवति ॥

स च षड्विधः।अव्ययीभावस्तत्पुरुषो द्वंद्वो बहुव्रीहिः कर्मधारयो द्विगुश्चेति । तत्र पूर्वपदप्रधानोऽव्ययीभावः। द्विगुतत्पुरुषौ परपदप्रधानौ।द्वंद्वकर्मधारयौ चोभयपदप्रधानौ । बहुव्रीहिरन्यपदप्रधानः।तस्य क्रियाभिसंबंधादुभयपदप्रधानो बलवान् ॥

अथ समासः कतिविध इति नामभिस्तद्भेदानाह । स चेति । स समासः षड्विधः षट्प्रकारः षट्संख्याक इत्यर्थः । तत्राद्यः अव्ययीभावो द्वितीयस्तत्पुरुषस्तृतीयो द्वंद्वश्चतुर्थो बहुव्रीहिः पंचमः कर्मधारयः षष्ठो द्विगुरिति । एवं समासः षड्विधो ज्ञेयः । सांप्रतं समासेषु पदानां प्राधान्यमाह । पूर्वपदप्रधानः अव्ययीभावः । पूर्वपदमव्ययं परपदमनव्ययं तद्वशेन अनव्ययस्य अव्ययभवनम् अव्ययीभावः। द्विगुतत्पुरुषौ समानौ परपदप्रधानौ पूर्वोत्तरयोः पदयोर्मध्ये यत्परम् अग्रेतनं पदं तस्यार्थः प्रधानो ययोस्तौ

द्वकर्मधारयौ चोभयपदप्रधानौ उभे पूर्वापरे पदे प्रधाने मुख्ये ययोस्तौ। बहुव्रीहिरन्यप-
प्रधानः । पूर्वोत्तराभ्यां पदाभ्याम् अन्यत्किंचिद्बहिः स्थितं पदं प्रधानं यस्मिन् सः।
कस्मात् । तस्य क्रियाभिसंबंधात् । अस्य व्याख्या यथा । तस्य क्रियाभिसंबंधादिति
पदं सर्वत्रापि योज्यते तत्रतत्र तस्यतस्य पदस्य क्रियाभिः सह अभिसंबंधात् क्रियायां
मुख्याधिकारित्वात् क्रियायोगित्वेन प्राधान्यादित्यर्थः । अव्ययीभावः पूर्वपदप्रधानो
यथा अधिस्त्रि स्त्रियं स्त्रियां वा अधिकृत्य भवतीत्यत्र पूर्वपदस्य अधिशब्दस्य क्रियायां
मुख्यत्वात् अव्ययीभावः पूर्वपदप्रधानः । तथा तस्य अग्रेतनपदस्य क्रियाभिसंबंधात्
द्विगुस्तत्पुरुषश्च एतौ द्वौ परपदप्रधानौ । यथा पंचानां गवां समाहारः पंचगु इत्यत्र
पंचन्शब्दस्य संख्याभूतस्य विशेषणत्वं गोशब्दस्य विशेष्यत्वं विशेष्यविशेषणयोर्विशे-
ष्यस्य मुख्यत्वमिति गोशब्दस्य परपदस्य द्विगुसमासे प्रधानत्वम् । यथा ग्रामं प्राप्त-
स्तथा पुरं गृहं धनं सुखं प्राप्त इत्यादिषु पूर्वपदस्य परावृत्तिमद्विग्रहत्वात्परपदस्य च
परावृत्त्यसहत्वात्तत्पुरुषे परपदस्य प्राधान्यम् । एवं द्विगुतत्पुरुषयोः परपदस्य क्रिया-
भिसंबंधात् द्विगुतत्पुरुषौ परपदप्रधानौ ।तथा द्वंद्वे कर्मधारये च उभयपदयोः क्रिया-
भिसंबंधाद्द्वंद्वकर्मधारयौ उभयपदप्रधानौ । यथा अग्निश्च सोमश्च अग्नीषोमौ वर्तेते
इत्यादिषु परपदस्य द्वयस्यापि क्रियायाम् अधिकारित्वाद्द्वंद्वे उभयपदयोः प्राधान्यम् ।
तथा कर्मधारये नीलं च तदुत्पलं चेत्यत्र विशेषणविशेष्ययोरेकार्थनिष्ठत्वादन्योन्या-
श्रयभूतत्वाच्च पदद्वयस्य प्राधान्यम् । बहुव्रीहौ चान्यपदस्य प्राधान्यम् ।यथा बहु धनं
यस्येत्यत्र बहुधनस्य वस्तुभूतत्वं यच्छब्दस्य तु स्वामित्वमिति अन्यपदस्य प्राधान्यं
तस्यान्यपदस्य क्रियाभिसंबंधादिति । अथ बलाबलत्वमाह । उभयपदप्रधानो
बलवानिति समासद्वयस्य संभवे यः उभयपदप्रधानः समासः स बलवान्भवति ।
यथा निषादस्थपतिरित्यत्र निषादानां स्थपतिरित्यत्र तत्पुरुषे क्रियमाणे परपद-
प्रधानत्वम् । तथा निषादश्चासौ स्थपतिश्चेति कर्मधारये क्रियमाणे उभयपदप्रधा-
नत्वम् । ततोऽत्र कर्मधारय एवोभयपदप्रधानत्वाद्बलवान् । अतोत्र बलवत्त्वात्कर्म-
धारय एव स्यात् न तु तत्पुरुषः ॥

**ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनम् । अधि स्त्री इति स्थिते स्त्रीशब्दात् द्वितीयैकवचनम् अम् ( स्त्रीभुवोः )स्त्रियमधिकृत्य भवतीति विग्रहे अन्वययोग्यार्थसमर्पकः पदसमुदायो विग्रहो वाक्यमिति यावत [ कृते समासे अव्ययस्य पूर्वनिपातो वक्तव्यः ] ॥**

ननु विभक्तान्येव पदानि प्रयोक्तव्यानि किं समासेनेत्यतः समासस्य प्रयोजनमाह।
ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनमिति । अनेकेषां पदानामेकपद-

मिति तस्य भाव ऐकपद्यं बहूनि पदानि द्वे वा पदे उच्चार्य विभक्तिलोपं कृत्वा समासत्वात् या विभक्तिः क्रियते तस्यां कृतायामेकपदभावो भवति तदैकपद्यम् । यद्वा एकशेषः । द्वे त्रीणि वा पदान्युच्चार्य एकं पदमवशिष्यते तदैकपद्यम् । देवश्च देवश्च देवश्च देवाः । तथा अनेकेषां स्वराणामेकस्वरस्तस्य भावः ऐकस्वर्यम् । यथा स्त्रियमधिकृत्य भवतीति विभागोच्चारणे प्रयत्नगौरवं स्यात् समासे तु कृते उच्चारणप्रयत्ने लाघवं स्यात् । इदमेकं प्रयोजनम् ऐकपद्यात् शरवणादौ णत्वमपि प्रयोजनम् । तथा वैदिकप्रक्रियाप्रसिद्धोदात्तादिस्वराणाम् ऐकस्वर्यं च प्रयोजनम् । अनेकासां विभक्तीनामेकविभक्तिः तस्या भावः एकविभक्तिकत्वं समासस्य प्रयोजनमिति । यथा शशाश्च कुशाश्च पलाशाश्च इत्यत्र । समासकरणे पदत्रयम् । विभक्तिलोपानंतरं त्रयाणामपि पदानामेकपदम् तथा समासे किंचित्पदमुदात्तस्वरेणोच्चार्यते किंचिदनुदात्तस्वरेण किंचित्स्वरितपदेनोच्चार्यते । ततः समासे कृते एकस्वरेणैवोच्चारणम् । तथा विभक्तित्रयस्याप्येकपदत्वे एकैव विभक्तिरित्येकविभक्तिकत्वमिति समासेन तत्त्रयं साध्यत इत्यर्थः । यतः "विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते॥ऐकपद्यं पदानां च स समासोऽभिधीयते"॥१॥ अथ पूर्वमुद्दिष्टत्वादव्ययीभावोदाहरणमाह ॥ अधि स्त्री इति ताव ल्लिख्यते । अत्राधिरुपसर्गोऽधिकृत्येत्यर्थस्य वाचकः । स्वपदैरन्यपदैर्वा कथनं विग्रहस्तेनाव्ययीभावस्य स्वपदविग्रहत्वात् अधिशब्दो नोच्चार्यते किंतु तदर्थवाचकोधिकृत्येति शब्दोऽलिखित एवाग्रे उच्चार्यते अतः केवलस्त्रीशब्दस्याग्रे द्वितीया वा एकवचनम् अम् प्रदीयते ( स्त्रीभ्रुवोः ) इति ( वाम्शसि ) इति वा इयू । स्व० । स्त्रियमिति सिद्धम् । ततः स्त्रियमधिकृत्येति विग्रहो भवति।यद्वा स्त्रियाम् अधिकृत्य इति सप्तमी। अधिरुपसर्गः सप्तम्यर्थ इति । अथ विग्रहपदस्यार्थमाह । अन्वयेत्ति । परस्परसापेक्षपदैकार्थीभावोऽन्वयस्तस्यान्वयस्य योग्यो योऽसावर्थस्तस्य समर्पकः प्रापकः समर्थको वा दृढकरः यः पदसमुदायः पदसमूहः स विग्रहस्तस्यापरं नाम वाक्यमित्यर्थः। समासार्थबोधकवाक्यं विग्रह इति वा । ततोऽधिस्त्रियमितिपदं स्त्रियमधिकृत्य भवतीति कृते विग्रहे यद्वा स्त्रियमधिकृत्य उच्चार्य कृते विग्रहे अव्ययस्य पूर्वनिपातः कार्यः । अन्यच्च यत्प्रतिपदं प्रधानं तस्य पदस्य सर्वत्र समासे पूर्वनिपातो वक्तव्य इति ॥

पूर्वेऽव्ययेऽव्ययीभावः ॥ अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति । समाससंज्ञायाम् ।समासप्रत्यययोः॥ समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुग्भवति । इत्यमो लुक् । निमित्ताभावे नैमित्तिकस्याप्यभावः । नामसंज्ञायां स्यादिर्विभक्तिः । अधिस्त्री सि इति स्थिते । स नपुंसकम् ॥ सोऽव्ययी-

भावः समासो नपुंसकलिंगो भवति। नपुंसकत्वाद्ध्रस्वत्वम्। अधिस्त्रि। अव्ययीभावात् ॥ अव्ययीभावात्परस्या विभक्तेर्लुग्भवति। अधिस्त्रि गृहकार्यम्। रायमतिक्रांतम्—अतिरि कुलम्। नावमतिक्रांतम्—अतिनु जलम्। [ ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ च वक्तव्यौ ] ॥

अथाव्ययीभावस्य लक्षणमाह। पूर्व ७–१ ( अ इ ए ) अव्यय ७–१ ( अ इ ए ) अव्ययीभावः १–१ ( स्त्रो० ) अकारद्वयस्यापि ( एदो० ) इति लोपः। त्रिपदमिदं सूत्रम्। अव्यये पूर्वपदे सति प्राधान्येन पूर्वपदवर्तिनि सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति। अत्र अधि इत्युपसर्गस्य ( तदव्ययम् ) इति सूत्रेण अव्ययसंज्ञा। ततोऽव्यये पूर्वपदे अस्यान्वयस्य अव्ययीभाव इति समाससंज्ञा। ततः समाससंज्ञायां सिद्धायां किं कृत्यमिति सूत्रेणाह ( समास० ) इति। समासप्रत्यययोः समासश्च प्रत्ययश्च समासप्रत्ययौ तयोः समासप्रत्यययोः ७–२ ( ओसि ) इति अकारस्यैकारः ( ए अय् ) स्वर०। ( स्त्रो० ) समासे अव्ययीभावादौ वर्तमानाया विभक्तेस्तथा प्रत्यये कृत्तद्धितलक्षणे परे च विभक्तेर्लुग्भवति। समासे वर्तमानत्वं प्रस्तुतमेव। तद्धितप्रत्यये परे यथा उपगोरपत्यमत्र षष्ठीलोपः। कृत्प्रत्यये यथा कुंभं करोतीत्यत्र द्वितीयावर्तमानार्थयोर्लोपः। इति सूत्रेण अमो लुक्। ततो निमित्ताभावे नैमित्तिकस्याप्यभाव इति वचनात् द्वयोरपि निषेधः। स्त्रीशब्दः प्रकृत एव तिष्ठति। अधिस्त्री। इति जातम्। ततः ( कृत्तद्धितसमासाश्च) इति समासस्य नामसंज्ञा। अग्रे नामत्वात्स्यादयः इति सामान्येन १–१ सु। अधिस्त्री स् इति स्थिते लिङ्गव्यवस्थां सूत्रेणाह ( स नपुंसकम् ) इति। तद् १–१ ( त्यदादेः० । तः ) इति तस्य सः ( स्त्रो० ) नपुंसक १–१ ( अतोम् । अमृशसोरस्य । सैषाद्धसे ) इति विसर्गलोपः। द्विपदमिदं सूत्रम्। सोऽव्ययीभावो नपुंसकलिंगो भवतीति नपुंसकलिंगता। ततो नपुंसकत्वात् ( नपुंसकस्य० ) इति सूत्रेण ह्रस्वत्वमेव नान्यत्सेरमादिकार्यम्। ( नपुंसकात्स्यमोर्लुक् ) इति सूत्रेण स्यमोर्लुकि प्राप्ते सर्वविभक्तिलुगर्थं सूत्रांतरमाह ( अव्य० ) अव्ययीभाव ५–१ ( ङसिरत् । सवर्णे० ) अव्ययीभावसमासात्परस्याः सर्वस्या अपि विभक्तेर्लुग्भवति। न शब्दानिर्दिष्ट इति सर्वविभक्तीनां लुगेव। न तु (अतोऽम् । औरी। जश्शसोः शिः ) इत्यादिसूत्रप्राप्तिः इति सेर्लुक्। अधिस्त्रि इति सिद्धम्। स्त्रियमधिकृत्य आश्रित्येत्यर्थः। इदं गृहकार्यं स्त्रीस्वामिकं स्त्र्याधारमित्यर्थः। स्त्रिया अधिकारे भवति। सप्तस्वपि विभक्तिषु सर्ववचनेषु अधिस्त्रि ईदृशमेव रूपं स्यात्। एवं हरौ अधिकृत्य प्रवृत्ता कथा अधिहरि। एवम् अतिरै अतिनौ इत्यत्र २–१ अम् ततो रायमतिक्रांतम्—नावमतिक्रांतमिति विग्रहे कृते अव्ययीभावः समासः। ततः ( समासप्रत्यययोः ) इति विभक्तिलोपः। निमित्ताभावे नैमित्तिकस्याप्यभाव

इत्यमभावे ( ऐ आय् ) इत्येतस्याप्यभावः । ततो नपुंसकत्वाद्ध्रस्वत्वं क्रियत इति ह्रस्वकरणविधिमाह [ ह्रस्वादेशे० ] इति । सन्ध्यक्षराणामेकारैकारादीनाम् एऐओऔ एतेषां ह्रस्वादेशे क्रियमाणे सति एकारैकारयोरिकारः ओकारौकारयोः उकारादेशः इति अतिरै इत्यत्र ऐकारस्य इकारः । अतिनौ इत्यत्र औकारस्य उकारः । ततः १-१ ( अव्ययीभावात् ) इति सेर्लोपः । अतिरि इति सिद्धम् । एतत्कुलम् अतिरि । द्रव्यपूर्णमित्यर्थः । एवम् एतज्जलम् अतिनु । नावापि तरीतुमशक्यमित्यर्थः । अन्ये त्वत्राव्ययीभावं नेच्छंति । किंतु । अत्यादयः क्रांताद्यर्थे द्वितीयया सह समस्यंते समासश्च तत्पुरुषो भवति इति तत्पुरुषसमासमिच्छंति । अत्र तु अव्ययीभावस्तच्चिंत्यम् । एवम् उपनदि उपबन्धु उपकर्तृ अभ्यग्नि प्रत्यग्नि साग्नि अनुगिरि अनुवनम् अनुज्येष्ठम् प्रत्यक्षम् परोक्षम् समक्षम् । नाय निद्राकाल इति अतिनिद्रम् । पारेमध्येशब्दौ षष्ठ्या वा समस्येते सोऽव्ययीभावः । एदंतत्वं चानयोर्निपात्यते । पारे गंगायाः पारेगंगम् । मध्ये गंगाया मध्येगंगम् । समुद्रस्य मध्ये मध्येसमुद्रम् । पक्षे गंगापारमित्यादि लोकात् ज्ञेयम् । ततः उक्तं प्रक्रियाकौमुद्याम् । ( अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाऽभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु ) इति । विभक्तौ-हरौ अधि प्रवृत्ता कथा इत्यधिहरि । समीपे-कुम्भस्य समीपमुपकुम्भम् । समृद्धौ-मद्राणां देशानां समृद्धिः सुमद्रम् । ऋद्धेर्व्यपगमो व्यृद्धिः । यवनानाम् ऋद्धेर्निर्गमः दुर्यवनम् । अर्थाभावे-मक्षिकाणामभावो निर्मक्षिकम् । अत्यये-अतीतानि हिमानि अतिहिमम् । संप्रति नासौ निद्राकाल इति अतिनिद्रम् । शब्दप्रादुर्भावे-इतिहरि । हरिशब्दप्रकाश इत्यर्थः । पश्चात्-विष्णोः पश्चादनुविष्णु । आनुपूर्व्ये-ज्येष्ठंज्येष्ठम् अनुक्राम्य अनुज्येष्ठम् । यौगपद्ये-चक्रेण युगपदेहि इति सचक्रम् । सादृश्ये-सदृशः सख्या इति ससखि । संपत्तौ-क्षत्राणां संपत्तिः सक्षत्रम् । साकल्ये-तृणेन सकलम् अत्ति इति सतृणम् । अन्तवचने-अग्निग्रंथपर्यंतम् अधीते इति साग्नि ॥

**यथाऽसादृश्ये ॥ यथाशब्दोऽसादृश्ये वर्तमानः समस्यते । शक्तिमनतिक्रम्य करोतीति यथाशक्ति ॥**

पुनरव्ययीभावसंभवमाह । यथाशब्दः सादृश्यार्थे असादृश्यार्थे वा वर्तते तत्र सादृश्यार्थे उपमार्थे यथाशब्देन सह समासो न भवतीत्यर्थः । यद्वा योग्यता १ वीप्सा २ पदार्थानतिवृत्ति ३ सादृश्यानि ४ इति यथाशब्दस्य चत्वारोऽर्थास्तत्र सादृश्यार्थं विहायाऽन्येष्वर्थेषु वर्तमानस्य यथाशब्दस्यान्वितेन पदेन सह समासो भवतीत्यर्थः । बाधाभावो योग्यता । पदार्थानां व्याप्तुमिच्छा वीप्सा ।उदाहरणम् । यथारूपं चेष्टते । रूपस्य योग्यं यथारूपम् इति योग्यता १। यथावृद्धं प्रणमति येये वृद्धास्तांस्तान् यथाक्रमं प्रणमति इति यथावृद्धमिति वीप्सा २ । शक्तिमनतिक्रम्य करोतीति. यथा-

शक्ति। एवं सूत्रम् अनतिक्रम्येति यथासूत्रम्। इति पदार्थानतिवृत्तिः ३। सादृश्ये तु न समासः। यथा विष्णुस्तथा शिवः। यथाशक्ति। शक्ति २-१ अम् (अम्श०) अग्रे अनतिक्रम्येति उच्चारणमात्रं तमनुसृत्येत्यर्थः। अनतिक्रम्य अनुल्लंघ्येत्यर्थः। पूर्वं यथाशब्दः। असादृश्यार्थत्वात्समासः स चाव्ययीभाव इति समाससंज्ञायां विभक्तेरभो लोपः नामसंज्ञायां स्यादिर्विभक्तिः १-१ अव्ययीभावादिति सेर्लोपः। यथाशक्ति शक्त्यनुसारेण करोतीत्यर्थः। सादृश्ये यथा विष्णुस्तथा शिवः। अत्र न समासः। एतच्चाव्ययीभावादिति सूत्रं सामान्यसूचकम्॥

**अतोऽमनतः॥** अकारांतादव्ययीभावात्परस्या विभक्तेरम् भवति अतं वर्जयित्वा। कुंभस्य समीपे उपकुंभं वर्तते। उपकुंभं पश्य॥

अथाऽकारांतात्परतो विभक्तीनां विशेषमाह। (अतोऽमनतः) अत् ५-१। स्व० (स्रो०) अम् १-१ (हसे०) न अत् अनत् तस्मात् अनतः ५-१। स्व० (स्रो०) पश्चात् (अतोत्युः। उ ओ। एदो०) मकारस्य अकारेण सह। स्व०। त्रिपदमिदं सूत्रम्। अकारांतो योऽव्ययीभावस्तस्मात् परस्याः सर्वस्या विभक्तेः सप्तानामपि विभक्तीनाम् अमादेशो भवति। परम् अतमिति। पंचम्या अत्-आदेशं त्यक्त्वा। अत-आदेशग्रहणादादेशिनं ङसिं वर्जयित्वेत्यर्थः। पंचम्या अम् न भवतीति तात्पर्यार्थः। अत्रोदाहरणम्। कुम्भस्य समीपमिति विग्रहे कुंभ ६-१ (ङस्स्य) कुम्भस्य इति सिद्धम्। समीपार्थे उप इति पूर्वमुपसर्गरूपमव्ययम्। उपशब्देन समीपार्थस्योक्तत्वादुक्तार्थानामप्रयोग इति समीपशब्दस्याप्रयोजनम्। ततोऽव्ययीभावसमाससंज्ञा (समासप्रत्ययोः) इति षष्ठीलोपः। उपकुंभ इति समासपदस्य नामसंज्ञा। तत्र (लिंगार्थे प्रथमा) इति १-१ (अतोऽमनतः) इति सेरम् (अम्शसो०) प्रथमायाम्। उपकुंभं वर्तते इति। अग्रे उपकुंभशब्दात् द्वितीयाद्याः सप्तमीपर्यंता विभक्तयो यथार्थं योज्याः। तत्र द्वितीयायामुपकुंभं पश्य॥

**वा टाङ्योः॥** आकारांतादव्ययीभावात्परयोष्टाङि इत्येतयोर्वा अम् भवति। उपकुंभेन कृतम् उपकुंभकृतम्। उपकुंभे देहि। उपकुंभादानय। अनत इति विशेषणात्पंचम्या अम् न भवति। उपकुंभं देशः। उपकुंभे निधेहि। उपकुंभं निधेहि॥

सूत्रम् (वा टाङ्योः) इति। वा ३-१ (अव्य०) टा च ङिश्च टाङी तयोः ६-२ (इ यं०) स्व०। द्विपदमिदं सूत्रम्। टा ङि इत्येतयोर्वचनयोर्वा अम् भवति। उप कुंभ द्विस्थाने उभयत्रापि ३-१ टा एकत्र अम् आदेशः। अन्यत्र वाशब्दस्य बहुलार्थत्वाल्लुक् न किंतु (टेन। अ इ ए) उपकुंभेन वा कर्त्रा कृतम्। कुंभस्य समीपेन कृतमित्यर्थः। चतुर्थ्यां तु उपकुंभं देहि कुंभस्य समीपाय देहि

इत्यर्थः। पंचम्याम्। अनत इति विशेषणात्पंचम्या अम् न भवति। अतः उपकुंभात् कुंभस्य समीपादानय। षष्ठ्याम् उपकुंभं देशः। कुंभसंबंधिनः समीपस्य देशः प्रदेश इत्यर्थः। सप्तम्यां तु (वा टाङ्च्योः) इति विकल्पेन अम्। पक्षे ( अ इ ए ) उपकुंभम् उपकुंभे। ङौ इति रूपद्वयम्। कुंभस्य समीपे निधेहि स्थापयेत्यर्थः॥

**अवधारणार्थे यावति च॥** अवधारणार्थे यावच्छब्दे प्रयुज्यमाने सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति। यावंत्यमत्राणि संभवंति तावतो ब्राह्मणानामन्त्रयस्वेति यावदमत्रमामंत्रयस्व। मक्षिकाणामभावो वर्तत इति निर्मक्षिकं वने वर्तते॥

पुनरव्ययीभावं वक्तव्यरूपया फक्किकया निरूपयति। न केवलम् अव्यये पूर्वपदे एवाव्ययीभावः। किंत्ववधारणार्थे यावच्छब्देपि पूर्वपदे सति अव्ययीभावः अवधारणार्थे परिमाणे यावच्छब्दः ततोऽवधारणेऽर्थे यावच्छदे पूर्वपदे प्रयुज्यमाने योन्वयो विग्रहः सोऽव्ययीभावसंज्ञकः समासो भवति। च शब्दादभावार्थेपि अव्ययपूर्वकत्वे अव्ययीभावः समासः इति समाससंज्ञायाम् यावत् १-३ ( जश्शसोः० । नुमय० । नश्चा० )स्व०। अग्रे अमत्र १-३ ( जश्शसो० । नुम०। नोप० । ष्ठ्नर्णो० ) स्व०। यावंति यावत्संख्याकान्यमत्राणि पात्राणि भाजनानि संभवंति तावतस्तावत्संख्याकान् ब्राह्मणान् आमंत्रयस्व भोजनार्थं निमंत्रयस्वेति विग्रहं कृत्वा पदद्वयेऽपि ( समासप्रत्यययोः ) इति विभक्तिलोपः। यावत् अमत्र इति स्थिते ब्राह्मणानित्यत्र विशेषस्य द्वितीयाबहुवचनांतत्वात् द्वितीयाबहुवचनं शस् ( अतोऽमनतः ) इति शसः अम्-आदेशः ( अम्श० । चपा० ) तस्य दः। यावदमत्रमिति पात्रसंख्यया ब्राह्मणानामंत्रयस्वेत्यर्थः। तथा मक्षिका ६-३ ( नुडामः। ष्ठ्नर्णो० ) स्व०। मक्षिकाणामभावः इति विग्रहे अभावार्थे पूर्वं निरः प्रयोगः। अत्राभावेपि अव्ययीभावसमासः ( समासप्रत्यययोः ) इति षष्ठीलोपः। नामसंज्ञायां स्यादिः १-१ अव्ययीभावस्य नपुंसकलिंगत्वात् ( नपुंसकस्य० ) इति ह्रस्वत्वम् ( अतोऽमनतः ) इति सेरम् ( अम्श० । मोनु० ) निर्मक्षिकं वर्तते। अग्रे निर्मक्षिकं पश्य निर्मक्षिकं कृतमित्यादीनि द्वितीयादिषूदाहरणानि ज्ञेयानि॥

॥ इत्यव्ययीभावः समासः॥

**अमादौ तत्पुरुषः॥** द्वितीयाद्यंते पूर्वपदे सति योन्वयः स तत्पुरुषसंज्ञकः समासो भवति। ग्रामं प्राप्तो ग्रामप्राप्तः। दात्रेण च्छिन्नं दात्रच्छिन्नम्। यूपाय दारु यूपदारु। वृकेभ्यो भयं वृकभयम्। राज्ञः पुरुषो

राजपुरुषः। अक्षेषु शौंडः अक्षशौंडः ॥ [ क्वचिदमाद्यंतस्य परत्वम् ] आहिताग्निः। भूतपूर्वः ॥

अथ तत्पुरुषसमासमाह। सूत्रम् ( अमादौ० ) इति। अम् आदिर्यस्याः सा अमादिः तस्या अमादौ ७–१ ( ङेरौ० ) ङित्त्वाट्टिलोपः। अग्रे तत्पुरुषः १–१ ( स्रो० ) अमादावित्यत्र जातावेकवचनम्। तेन अमाद्या द्वितीयाद्याः सप्तमीपर्यंताः षड्विभक्तयो ग्राह्या इति। यस्य पदस्यांते द्वितीयाद्या विभक्तयो भवंति तस्मिन्पदे पूर्वपदे सति योन्वयो विग्रहः स तत्पुरुषसंज्ञकः समासो भवति। अत्रान्वयशब्देनान्वयप्रातिपादको विग्रहो ग्राह्यः। तत्र प्रथमं द्वितीयांतस्य पूर्वपदस्योदाहरणम्। ग्राम २–१ अम् ( अम्शसो० । मोनु० ) प्राप्त १–१ ( स्रो० ) ग्रामं प्राप्त इति द्वितीयांते पूर्वपदे तत्पुरुषः ( समासप्रत्यययोः ) अमुस्योर्लोपः। नामसंज्ञायाम्। १–१ ( स्रो० ) ग्रामप्राप्तः इति सिद्धम्। अत्र द्वितीयातत्पुरुषः। दात्रशब्दात् साधने तृतीया ३–१ ( टे न। अ इ ए। ष्णर्नो० ) छिन्न १–१ ( अतोम्। अम्शसोरस्य। मोनु० ) दात्रेण छिन्नमिति। साधने तृतीयांते पूर्वपदे तत्पुरुषः। पूर्ववद्विभक्तिलोपः। पुनरपि नामसंज्ञायां स्यादिः १–१ ( अतोऽम्। अम्श०। दात्रेण च्छिन्नमिति दात्राच्छिन्नं क्षेत्रम् इति। अत्र तृतीयातत्पुरुषः। एवं यूपाय यज्ञस्तंभाय दारु काष्ठं यूप ४–१ ( ङे अक्। ए अय्। सवर्णे० ) स्वर०। तादर्थ्ये चतुर्थी यूपाय दारु यूपदारु काष्ठं १–१ ( नपुंसकात्स्य० ) इति लुक्। ( समासप्रत्यययोः ) इति विभक्तिलोपः। अत्र चतुर्थीतत्पुरुषः। वृक ५–३ भ्यस् ( ए स्भि बहुत्वे ) भय १–१ ( अतोम् ) भयहेतौ पंचमी इति ५–३। वृकेभ्यो भयमिति विग्रहे ( समासप्रत्यययोः ) इति विभक्तिलोपादि पूर्ववत्। ततस्तत्पुरुषस्य परपदप्रधानत्वात्। भयशब्दः क्लीवलिंगः १–१ ( अतोऽम्। अम्श०। ) अत्र पंचमीतत्पुरुषः। तथा राज्ञः पुरुष इत्यत्र राजन्शब्दात् संबंधे षष्ठी। राजन् ६–१ ( अल्लोपः० ) स्वर०। ( स्तोः श्चुभिः श्चुः ) जञोर्ज्ञः। स्व०। अग्रे पुरुषः १–१ ( स्रो० ) राज्ञः पुरुष इति विग्रहे ( समासप्रत्यययोः ) इति विभक्तेर्लोपः। ( नाम्नो नो लोपशधौ ) इति राजन् इत्यत्र नकारलोपः। ततो नामसंज्ञायां स्यादिः १–१ ( स्रो० ) अत्र षष्ठीतत्पुरुषः। अक्ष ७–३ सुप् ( ए स्भि०। किला० ) अग्रे शौंडः १–१ ( स्रो० ) अक्षेषु पाशकेषु शौंडश्चतुरः। अत्र विषयार्थे सप्तमी ( समासप्रत्यययोः ) १–१ ( स्रो० ) अक्षशौंड इति सिद्धम्। सांप्रतं विशेषमाह ( क्वचिदमाद्यन्तस्य ) इति। तत्पुरुषसमासे वर्तमानस्य द्वितीयादिविभक्त्यंतस्य प्रथमांतस्य च पूर्वपदस्य परत्वमिति उत्तरपदत्वम् अग्रेवर्तित्वं भवति क्वचित्प्रयोगांतरे नतु सर्वत्रेत्यर्थः। उदाहरणमाह। अग्निपदात् ७–१ ( ङेरौ० ) ङित्त्वाट्टिलोपः। स्व०। आहितः १–१ ( स्रो० ) अग्नौ आहित इति विग्रहे तत्पुरुषसमासे विभक्तिलोपे कृते अग्निपदमाहितपदस्याग्रे प्रयुज्यते ( सवर्णे०। स्रो० ) आहिताग्निरिति

अग्निविषये तत्पर इत्यर्थः। एवं पूर्वस्मिन्काले भूत इति विग्रहे सप्तमीप्रथमयोर्लोपे ( क्वचिदमाद्यंतस्य परत्वम् ) इति भूत इति पदस्याग्रे पूर्व इति पदं लिख्यते १-१ ( स्रो० ) भूतपूर्व इति सिध्यति। क्वचिदित्युक्तत्वात् अग्न्याहित इत्यपि भवति॥

**[ समासे क्वचिदैकपद्यं णत्वहेतुः। ] शरवणम्। आम्रवणम्। त्रिणयनः। [ पानस्य वा ] सुराणां पानं सुरापाणं-सुरापानम् ॥**

अथ समासे पुनः ऐकपद्यस्य कार्यांतरमाह। ( समासे क्वचिदैकपद्यं णत्वहेतुः ) समासविषये क्वचित्प्रयोगे पूर्वपदस्थात् षकाररेफऋवर्णरूपान्निमित्तादुत्तरपदस्थनकारस्य णत्वकरणे ऐकपद्यं हेतुः कारणं भवतीत्यर्थः। यथा आम्राणां वनम् आम्रवणम् शराणां वनं शरवणमित्युभयत्रापि षष्ठीतत्पुरुषसमासः। ( समासप्रत्यययोः ) इति विभक्तेर्लोपः। एकपदत्वे ( ष्रुर्नो० ) इति पूर्वपदस्थात् व्यवहितरेफान्निमित्तादुत्तरपदवनसंबधिनोपि नस्य णत्वम् १-१ ( अतोऽम्। अम्श० ) अत्र णत्वसंभवः। एवं शरवणम्। प्लक्षवणम्। खदिरवणम्। तथा त्रीणि नयनानि यस्य स त्रिनयन इत्यत्र क्वचिदिति कथनादेकपदेपि न णत्वम्। केचित्तु त्रिणयनः। अत्रापि विकल्पेन णत्वमिच्छंति णत्वप्रसंगाद्बहुव्रीहेरुदाहरणमिदम्। ( पानस्य वा ) इति। पानसंबंधिनो नकारस्य वा णत्वं भवति। सुरायाः पानं सुरापाणं-सुरापानम् इति विकल्पेन णत्वम्। एवं क्षीरपानं-क्षीरपाणम्। क्वचिदिति शब्दप्रयोगानुसारेण णत्वे नित्यत्वं विकल्पोऽपवादश्च ज्ञेयः। प्रवणम्। अंतर्वणम्। पूर्वाह्णः। अपराह्णः। खुरणाः। खुरणसः शूर्पणखा। इत्यादौ नित्यं णत्वम्। दूर्वावनं-दूर्वावणम्। गिरिनदी-गिरिणदी। चक्रनितंबा-चक्रणितंबा। इत्यादौ विकल्पेन णत्वम्। इंद्रवाहना हरिभामिनी प्रिययूना परिपक्वानि। इत्यादौ ऐकपद्यात्प्राप्तस्यापि णत्वस्याऽपवादः। एवं लौकिकप्रयोगवशाज्ज्ञेयम् ॥

**नञि ॥ नञि पूर्वपदे सति योन्वयः स तत्पुरुषसंज्ञकः समासो भवति। न ब्राह्मणोऽब्राह्मणः ॥ ना ॥ समासे सति नञोकारादेशो भवति नाकादिवर्जम् ॥**

अथ पुनस्तत्पुरुषं सूत्रेणाह। सूत्रम्। नञ् ७-१ स्व०। एकपदमिदं सूत्रम्। यत्र नञ इति निषेधवाचकमव्ययं पूर्वपदं भवति स नाम्नामन्वयो विग्रहस्तत्पुरुषः समासो भवति। न १-१ ( अव्य० ) सिलोपः। ब्राह्मण १-१ ( स्रो० ) न ब्राह्मण इति स्थिते। सूत्रम्। न ६-१ ( अव्य० ) अग्रे। अ १-१। सांके०। पश्चात् ( संयोगां०। सवर्णे दीर्घः सह ) ना इति सिद्धं द्विपदं सूत्रम्। समासे सति नञः अकारादेशो भवति तत्रापि नाकादीन्वर्जयित्वा। नास्ति अकं दुखं यस्मिन् स नाकः नागः नमुचिः नखं नक्षत्रं नपुंसक नकुलः नगः नक्रः नभ्राट् नासत्यः नाराचः नाचिकेतः नापितः नमेरुः ननांदा नभस्वान् नारंगः नास्तिकः

नग्नः नभागः नपान्नवेदा नातिविस्तरा इत्यादयः शब्दा नाकादौ द्रष्टव्याः । एषु नञोऽकारादेशो न भवति । अनेन नकारस्याकारः । अब्राह्मण १-१ ( स्लो० ) अब्राह्मणः । ब्राह्मणादन्य इत्यर्थः ॥

**अन्स्वरे ॥** समासे सति नञोऽनादेशो भवति स्वरे परे । अश्वादन्योऽनश्वः । धर्माद्विरुद्धः अधर्मः । ग्रहणाभावः अग्रहणम् । तदन्यतद्विरुद्धतदभावेषु नञ् वर्तते ॥

सूत्रम् । अन् १-१ ( हस्ले० ) स्वर० ७-१ । ( अ इ ए ) समासे कृते सति नञ् इत्यस्याव्ययस्य अन्यविरुद्धाभाववाचिनः स्वरे परे अन्-आदेशो भवति । अत्रापि नाकादिवर्जमिति योज्यम् । तदुदाहरणमाह । अश्व ५-१ ( ङसिरत् । सवर्णे० ) अन्य १-१ ( स्लो० ) धर्म ५-१ ( ङसिरत् । सवर्णे० ) विरुद्ध १-१ ( स्लो० ) ग्रहण ६-१ ( ङस्स्य ) अभाव १-१ ( स्लो० ) अश्वादन्यः धर्माद्विरुद्धः ग्रहणस्याभाव इति विग्रहत्रयम् । त्रिष्वपि पूर्वं नञ्प्रयोगः । उक्तार्थानामप्रयोग इति अन्यविरुद्धाभावानां लोपः ( समासप्रत्यययोः ) इति पंचमीषष्ठीलोपः अश्वशब्दे परे स्वरपरत्वात् ( अन् स्वरे ) इति नञोऽनादेशः । स्व० । शेषोदाहरणद्वये प्राक् स्वरत्वाभावे ( ना ) इति सूत्रेण नञः केवलोऽकारादेशः १-१ सर्वत्र उदाहरणद्वयं पुंल्लिंगे तृतीयं नपुंसकेष्वर्थेषु नञ् प्रयुज्यत इत्याह ( तदन्य० ) इति । तस्मादन्यस्तदन्यः। तस्माद्विरुद्धस्तद्विरुद्धः । तस्याभावस्तदभावः।एषु अर्थेषु नञ् प्रवर्त्तते । नञ्शब्दः पूर्वं प्रयुज्यत इति भावः । तदन्य इति अश्वादन्यः। तद्विरुद्ध इति धर्माद्विरुद्धः । तदभाव इति ग्रहणस्याभावः । एष्वर्थेषु उपसर्गरूपो नञ् भवति । तस्मिन्नञि पूर्वपदे तत्पुरुषसमासो भवतीत्यर्थः ॥ ॥ इति तत्पुरुषः ॥

**चार्थे द्वंद्वः ॥** समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । यत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियासंबंधे समुच्चये समासो नास्ति। बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबंधेऽन्वाचये च समासो नास्ति । परस्परमसंबंधात् । इतरेतरयोगे समाहारे च चार्थे द्वंद्वः समासो भवति ॥

सांप्रतं द्वंद्वसमासो निरूप्यते । ( चार्थे द्वंद्वः ) चस्य अर्थश्चार्थः तस्मिन् ७-१ ( अ इ ए ) द्वंद्वः १-१ ( स्लो० ) द्विपदमिदं सूत्रम् । अथैतत्सूत्रं व्याचिख्यासुश्चार्थान् चार्थेषु समाससंभवासंभवं चाह । समुच्चयः १ अन्वाचयः २ इतरेतरयोगः ३ समाहार ४ श्चेति चत्वारश्चार्थाः। तत्र कर्मद्वयस्य एकक्रियानिष्ठत्वं समुच्चयः १ कर्मद्वयेऽपि प्रत्येकं क्रियाद्वयेन संबंधोऽन्वाचयः २ पदद्वयेन संबंधो नास्तीति दर्शयति । तत्र ईश्वरं गुरुं च भजस्वेत्यत्र कर्मद्वयस्यैकक्रियानिष्ठत्वे समुच्चये समासो

नास्ति । अत्र चकारो भजनक्रियाया ईश्वरेण गुरुणा च संबंधं द्योतयति । इति एकक्रियाभिसंबंधश्चार्थस्तस्मिन् । तथा हे बटो भिक्षामट गां चानयेति अटनक्रियाया भिक्षा कर्म । आनयनक्रियायाः गौः कर्म । अत्र चकारः एकस्य बटोः आनयने च क्रियाद्वये संबंधं द्योतयति । एवमेकस्य कर्तुः कर्मद्वयसंबंधेऽन्वाचये च चार्थे समासो नास्ति । कुतः परस्परमसंबंधात् । अन्वययोग्यत्वाऽभावात् । नाम्नामन्वययोग्यतायामेव समासविधानात् । अत्र क्रियानिरोधात् नाम्नां परस्परसंबंधाभावात् समासो नास्तीत्यर्थः । यतः ईश्वरस्य गुरोश्च युगपद्भजनेऽसंबंधः। तथान्वाचये भिक्षाटनस्य गवामानयनस्य च परस्परमसंबंधात् समासो नास्ति इतरेतरयोगे समाहार च चार्थे संबंधसंभवात् द्वंद्वः समासो भवति । अन्योन्यं सापेक्षं द्वयोर्योगः एकक्रियाभिसंबंधः स इतरेतरयोगः बहूनां समुदायः समाहारः ॥

[ द्वंद्वेऽल्पस्वरप्रधानेकारोकारांतानां पूर्वनिपातो वक्तव्यः । ] पटुश्च गुप्तश्च पटुगुप्तौ । उक्तार्थानामप्रयोगः । अग्निश्च मारुतश्च अग्निमारुतौ । भोक्ता च भोग्यश्च भोक्तृभोग्यौ । धवश्च खदिरश्च धवखदिरौ । स्त्री च पुरुषश्च स्त्रीपुरुषौ ॥

अथ द्वंद्वसमासे पदानां समानत्वात् कः शब्दः पूर्वं प्रयोज्यः कः पश्चात् प्रयोज्य इत्याशंक्याह ॥ [ द्वंद्वेऽल्पस्वर० ] इति । द्वंद्वे द्वंद्वसमासे प्रस्तावादितरेतरयोगे यदल्पस्वरं पदं समस्वरं वा पदं समस्वरे वा यत्प्रधानं पदं तथा इकारांतम् उकारांतं यत्पदं भवति तस्य पूर्वनिपातः प्राक्प्रयोगः कर्तव्यः । परं बहुष्वनियमः । अथ उकारांतोदाहरणमाह । पटु १-१ ( स्नो० ) च १-१ ( अव्य० । विसर्ज० । स्तोः श्चु० ) गुप्त १-१ ( स्नो० ) च १-१ ( अव्य० । विसर्ज० । स्तोः० ) पटुश्च गुप्तश्चेत्यत्र समस्वरत्वेपि उकारांतस्य पूर्वनिपातः ( समासप्र० ) इति प्रथमायाः सिलोपः । ततः उक्तार्थानामप्रयोगः उक्ता अर्था यैस्ते उक्तार्थाश्चकारादयस्तेषामप्रयोगोऽभावो लोप इत्यर्थः । इति चकारलोपः । पटुगुप्त इति स्थिते नामसंज्ञायां स्यादिः । इतरेतरयोगात् प्रथमाद्विवचनम् ( ओ औ औ ) पटुगुप्तौ कार्यं कुरुत इत्युक्तौ पटुः सहायो गुप्तस्य गुप्तः सहायः पटोरिति गम्यते इत्यन्योन्यापेक्षास्ति । एकस्याभावे तन्न क्रियते । एवमन्यत्रापि ज्ञेयम् । पटुगुप्तौ इत्यत्र पटुशब्दस्य उकारांतत्वात्पूर्वनिपातः । परं गुप्तपटुः इति न भवति एवमेव अग्निश्च मारुतश्चेति अग्निशब्दस्याल्पस्वरत्वादिकारांतत्वात्पूर्वं प्रयोगः पूर्ववद्विभक्तेश्चकारस्य च लोपः । ततः १-२ ( ओ औ औ ) तथा भोक्तृ १-१ ( स्तुरार् ) भोक्ता । यदादेशस्तद्वद्भवति इति न्यायात् ( सेरा ) डित्त्वाट्टिलोपः । इत्यारलोपः । स्व० । च १-१ ( अव्य० ) भोग्य १-१ ( स्नो० ) च १-१ ( अव्य० ) पश्चात् ( विसर्ज० । स्तोः श्चु० ) भोक्ता च भोग्यश्चेति विग्रहे भोक्तुः प्रधान-

भूतत्वाद्भोक्तृशब्दस्य प्रथमं प्रयोगः । । भोक्ता पुरुषः । भोग्यः विषयादिः । भोक्तुः भोग्यस्य स्वामित्वात् प्रधानत्वम् । ततः प्राग्वद्विभक्त्यादिलोपः । भोक्तृभोग्य १-२ ( ओ औ औ ) एवं धवश्च खदिरश्च धवखदिरौ । इत्यत्र धवशब्दस्याल्पस्वरत्वात्प्रथमं प्रयोगः । स्त्री च पुरुषश्च स्त्रीपुरुषौ । अत्र पुरुषस्य प्रधानत्वेपि अल्पस्वरत्वात्स्त्रीशब्दस्य पूर्वनिपातः ॥

[ देवताद्वंद्वे पूर्वपदस्य वा दीर्घो वक्तव्यः ] अग्नीषोमौ । इंद्राबृहस्पती [ अग्न्यादेः सोमादीनां षत्वं वक्तव्यम् । ]

" यत्र द्वित्वं बहुत्वं च स द्वंद्व इतरेतरः ।
समाहारः स विज्ञेयो यत्रैकत्वं नपुंसकम् " ॥ १ ॥

[ इतरेतरयोगे द्विवचनं च एकवद्भावो वा समाहारे वक्तव्यः ] शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशाः-शशकुशपलाशम् । [अन्यादीनां विभक्तिलोपे कृते पूर्वस्य सगागमो वक्तव्यः ] अन्यश्च अन्यश्च अन्योन्यम् । परश्च परश्च परस्परम् ॥

अथ द्वंद्व एव विशेषमाह [ देवताद्वंद्वे० ] इति । देवतावाचकशब्दभवे द्वंद्वे समासे पूर्वपदसंबंधिनोऽन्त्यस्वरस्य वा दीर्घो वक्तव्यः । इति वाग्रहणात्प्रयोगांतरे न भवत्यपि । अथ देवतार्थोदाहरणमाह । अग्निश्च सोमश्चेति विग्रहे विभक्तिलोपे उक्तार्थानामप्रयोगे च अग्निसोम इति स्थिते देवताद्वंद्वे इति अग्निशब्दस्य इस्वस्य दीर्घ ईकारः । द्वयोरपि देवत्वात् । अग्नीसोम इति स्थिते [ अग्न्यादेः सोमादीनां० ] इत्यादि । अग्न्यादेर्दीर्घाणामंत्यात्परेषां सोमादीनामाद्यसकारस्य षकारो भवति । ( किला० ) इत्यस्य सूत्रस्य न प्राप्तिः । सकारस्य अकृतत्वात् ॥ अग्नीसोम १-२ ( ओ औ औ ) अग्नीषोमौ इति सिद्धम् । अत्र इकारांतस्य पूर्वत्वम् अग्न्यादेरित्यादिशब्दात् अग्निष्टोमः अग्निष्टुत् ज्योतिष्टोमः अयष्टोमः अंगुलिषंगः मीलष्ठानं मातृष्वसा पितृष्वसा इत्यादौ षत्वम् । एवम् इंद्रश्च बृहस्पतिश्चेत्यत्र इंद्रशब्दस्याल्पस्वरत्वात् पूर्वनिपातः । विभक्तिलोपे उक्तार्थानामप्रयोगे च देवताद्वंद्वे इति इंद्रस्य दीर्घः । १-२ (औ यू ) इतीकारः (सवर्णे०) इंद्राबृहस्पती । एवं सूर्याचंद्रमसौ मित्रावरुणौ । उदाहरणान्युक्त्वा अग्न्यादेरिति वक्तव्यं दृश्यते तच्च प्रागेव व्याख्यातम् । सांप्रतमितरेतरयोगद्वंद्वस्य वचननियममाह। इतरेतरयोगे द्विवचनमिति । इतरेतरयोगे द्वन्द्वे द्विवचनं भवति पदद्वयात्मकत्वात् । लिंगनियमस्तु उभयपदप्रधानत्वेपि उत्तरपदलिंगप्रयोगो भवति । सांप्रतं समाहारद्वंद्वविशेषमाह [एकवद्भावो वा समाहारे वक्तव्यः ] समाहारे द्वंद्वे पदानां समासे कृते एकवद्भाव एकवचनं वा भवति।पक्षे बहुवचनं भवति। [एकवद्भावो

वा समाहारे वक्तव्यः ] इत्यत्र समुदायार्थप्राधान्यविवक्षायामेकवचनम् । अवयवार्थ-प्राधान्यविवक्षायां पक्षे बहुवचनमपि भवति । वाग्रहणात् एकमिव एकवत् एकवचनं तस्य भावः । पक्षे पदानां समाहारत्वात् । बहुत्वाद्बहुवचनमपि निपातानामनेकार्थ-त्वात् । वाग्रहणादेव क्वचिदितरेतरयोगेप्येकवद्भावो भवतीति विशेषः । द्वित्वमतंत्र-मिति वचनाद्वा । समाहारोदाहरणं यथा । शश १–३ ( सव० । स्रो० ) च १–१ (अव्य० ) एवं कुश १–३ ( सव० । स्रो० ) च १–१ ( अव्य० ) पलाश १–३ ( सव० । स्रो० ) च १–१ ( अव्य० ) शशाश्च कुशाश्च पलाशाश्च इति विग्रहे अत्र पदद्वयाधिकपदात्मकत्वात्समाहारद्वंद्वः ( समासप्रत्यययोः ) इति विभक्तिलोपे उक्तार्थानां च प्रयोगे शशकुशपलाशस्थाने एकत्र समाहारबहुत्वम् १–३ । पलाश-शब्दस्य वृक्षवाचित्वात् । पुँल्लिंगत्वम् १–३ ( सवर्णे० । स्रो० ) द्वितीयरूपे ( एक-वद्भावो वा ) इत्येकवचनम् १–१ । सत्यपि पुंस्त्वे (एकत्वे द्विगुद्वन्द्वौ) इति वक्ष्यमाण-सूत्रेण क्लीबलिंगता ( अतोऽम् । अम्शसोः० । ) साम्प्रतम् इतरेतरयोगेपि एकव-द्भावोदाहरणमाह । अन्यश्च अन्यश्च इति विग्रहे तथा परश्च परश्चेति विग्रहे ( समा-सप्रत्यययोः ) इति उभयत्रापि विभक्तिलोपे उक्तार्थानां चाप्रयोगे अन्यअन्य इति परपर इति स्थिते सति अन्यादीनां शब्दानां समासे वर्त्तमानानां पूर्वपदवर्तिनां सगागम इति सकार आगमो वक्तव्य इति आदिभूतयोरन्यपरशब्दयोः सगागमः किस्वादंते । अन्यस् इति स्थिते ( स्रो० । अतोत्युः । उ ओ । एदो० ) अन्योन्य १–१ ( अतोऽम् ) अत्र पदांतताश्रयणीया ( स्रो० । एदो० ) तयोः अप्रधान-भूतत्वात् ( त्वन्यादेः ) इत्यपि न भवति । अन्योन्य इति सिद्धम् । पर अग्रे पर मध्ये सकारागमः । स्त्र० । परस्पर इत्यत्र वाचस्पत्यादित्वान्न विसर्गोपध्मानीय-कार्यम् ( स्व० ) परस्परम् । उभयत्रापि पूर्वोक्तवाशब्देन एकवद्भाव इति १–१ ( एकत्वे द्विगुद्वंद्वौ ) इति क्लीबत्वात् ( अतोऽम्० । अम्श० । मोनु० ) अन्योन्यं परस्परमिति सिद्धम् । एवमादिशब्देन हरिश्चन्द्रादीन्युदाहरणानि । अन्योन्यादयः सहादिमध्ये पठिता इत्यनेन तेषाम् एकशेषो नेष्यते । केचित्तु अन्योन्यमित्यत्र अन्यश्च अन्यश्चेत्येकशेषात्समासं नेच्छंति किंतु ( कर्मव्यतिहारेऽन्यादीनां द्वित्वं वक्तव्यं समासवच्च बहुलम् ) तत्र पूर्वपदे प्रथमैकवचनम् उत्तरपदे द्वितीयैकवचनम् इति । अन्योन्यं परस्परं नमंति साधवः । क्षेमेंद्राचार्यस्तु ( अन्यादीनां विभक्ति-लोपे सक् कर्मव्यतिहारे वक्तव्यः ) कर्मव्यतिहाराभावे तु अन्यश्च अन्यश्च अन्यौ इत्येकशेपसमासः इति व्याख्याति । प्रक्रियाकौमुद्यां तु कर्मव्यतिहारे सर्वनाम्नो द्वे स्तः समासवच्च बहुलम् । यदा तु समासवत्तदा प्रथमैकवचनं पूर्वपदस्य द्विती-याद्येकवचनांतत्वं परपदस्य । अन्योन्यं विप्रा नमंतिं अन्योन्येन कृतं अन्योन्यस्मै ददाति अन्योन्यस्मात् गृह्णाति अन्योन्यस्य अन्योन्यस्मिन् । एवं परस्परम् ॥

**एकत्वे द्विगुद्वंद्वौ॥ एकत्वे वर्तमानौ द्विगुद्वंद्वौ नपुंसकलिंगौ भवतः॥**

सांप्रतं लिंगविशेषमाह॥( एकत्वे० )इत्यादि सूत्रम्॥ एकस्य भावः एकत्वं तस्मि ७-१ ( अ इ ए ) द्विगुश्च द्वंद्वश्च द्विगुद्वंद्वौ १-२ ( ओ औ औ ) द्विपदं सूत्रम् एकत्वे इति । एकवचने वर्तमानौ द्विगुद्वंद्वसमासौ नपुंसकलिंगौ भवतः । तत्र द्विगु समासे नित्यमेकत्वमेव। तत्र आकारांतान्नित्यमीप्प्रत्ययस्तत्र स्त्रीलिंगत्वमेव। अकार तवर्जितानां तु नपुंसकलिंगत्वमेव । द्वंद्वे तु इतरेतरयोगे द्विवचनमेव । पक्षे कुत्रचिदे कवचनमपि । तत्र यत्रैकवचनं तत्र नपुंसकलिंगमेव । द्विवचनं बहुवचनं तु यथासंभ त्रिष्वपि लिंगेषु भवतीति भावः॥

**संख्यापूर्वो द्विगुः॥ संख्यापूर्वः समासो द्विगुर्निगद्यते । समाहारेऽत इप् द्विगुः॥ समाहारेऽर्थे द्विगुः समासो भवति ततोऽकारांतादीप्प्रत्ययो भवति । दशानां ग्रामाणां समाहारो दशग्रामी । अकारान्तो द्विगुः स्त्रियां भाष्यते । पंचाग्नयः समाहृता इति पंचाग्नि । पचानां गवां समाहारः पंचगु । नपुंसकत्वाद्ध्रस्वत्वम् । त्रिफलेति रूढितः ।**

द्वंद्वस्यैकत्वे नपुंसकत्वं पूर्वं दर्शितम् । अथ क्रमाभावेपि प्रस्तुतत्वाद्द्विगुलक्षणमाह सूत्रम् । ( संख्यापूर्वः० ) संख्या द्वित्रिचतुरादिका पूर्वा पूर्वपदवर्तिनी यस्य स संख्यापूर्वः १-१ ( स्रो० ) द्विगुः १-१ ( स्रो० ) संख्यावाची शब्दो यत्र पूर्वपदे भवति अग्रे समाहारवाचकत्वं च भवति स द्विगुरिति समासो भवति। तदेव सूत्रेणाह सूत्रम् । ( समाहारेऽत ईप् द्विगुः ) समाहार ७-१ ( अ इ ए ) अत् ५-१ । स्व० ( स्रो० । एदो० ) अतः अग्रे ईप् १-१ । पश्चात् ( आदवे० ) अग्रे द्विगुः १-१ ( स्रो० ) चतुष्पदमिदं सूत्रम् । समाहारेर्थे एकत्र करणेर्थे द्विगुः समासो भवति यत्र पूर्वपदे संख्यावाचि पदं भवति तत्र समाहारार्थवाचकमेकीकरणार्थसूचकं च पदं भवति । स द्विगुः समास इत्यर्थः । तत इति तस्माद्द्विगुसमासात् आकारांतात् ईप्प्रत्ययो भवति पात्रादिवर्जम्।यद्यपि द्विगुसमासस्य प्राक् क्लीवलिंगत्वं प्रतिपादितं तथापि आकारांतात्परत ईप्प्रत्यये कृते स्त्रीत्वमेव। तत्र हि अदंतवर्जितानां क्लीवलिंगता । उदा० । दशन् ६-३ ( ष्णः ) इति नुडागमः। दशन् नाम् (नोपधायाः)इति शकारस्याकारस्य दीर्घः ( नाम्नो० ) स्व० । ( मोनु० ) ग्राम ६-३ ( नुडामः । नामि ) इति दीर्घः( ष्र्नो० । मोनु० ) दशानां ग्रामाणां समाहार इति विग्रहे संख्यापूर्वपदं समाहारवाचकम् । अतो द्विगुसमाससंज्ञायामुभयत्रापि

योः ) इति आमो लोपः। दशन् ग्राम इति स्थिते ततः अकारांतत्वादीप् ( यस्य लोपः ) स्व०। दशग्रामी १-१ ( हसे० ) एवं त्रिलोकी पंचमूली। पंचन् १-३ जश्शसोर्लुक्। ( नाम्नो० ) अग्नि १-३ ( ए ओ जसि। ए अय् ) स्व० ( स्रो० ) पंचाग्नयः समाहृता एकत्र कृता इति विग्रहे विभक्तिलोपे ( नाम्नो०। सवर्णे० ) पंचाग्नि। अत्र अदंतत्वाभावान्न ईप्। ततः समाहारस्यैकत्वात् ( एकत्वे द्विगुद्वंद्वौ ) इति वा क्लीवत्वे १-१ ( नपुंसकात्स्यमोर्लुक् ) पञ्चाग्नि इति सिद्धम्। तथा पंचानां गवां समाहार इति विग्रहे ( समासप्रत्यययोः)इति उभयत्रापि आमो लोपः। पंचन् गो १-१ ( नाम्नो०। नपुंसकस्य० ) इति ह्रस्वः। ओकारस्य उकारः ( ह्रस्वादेशे सन्ध्यक्ष०। नपुंसकात्स्यमो० ) अत्राप्यकारांतवर्जितत्वान्नेप्। पंचगु इति सिद्धम्। त्रि ६-३ ( नुडामः। त्रेरयङ्। ष्रुनों० ) स्व०। ( मोनु० ) फल ६-३ (नुडामः। नामिनः०। मोनु० ) अग्रे समाहार इति पदम्। त्रयाणां फलानां समाहारः इति विग्रहे ( समासप्रत्यय० ) उक्तार्थानां०। ( आवतः स्त्रि०। आपः ) त्रिफला। ननु त्रिफला इत्यत्र संख्यापूर्वकत्वेपि द्विगुसमासे फलशब्दस्य अकारांतादीप्प्रत्ययः किं न क्रियते इत्याशंकायामाह। त्रिफला इति पदं रूढितो लोकप्रसिद्धितः सिद्धम्। "लक्षणैर्नोपपन्नस्य प्रयोगस्य कथंचन॥ बहुशिष्टादृतत्वं हि रूढिरित्यभिधीयते"॥ न तु नियतलक्षणोपपन्नम् इति। द्विगुसमासस्य। पात्रादिवर्जितत्वात् पंचानां पात्राणां समाहारः पंचपात्रम्। त्रयाणां भुवनानां समाहारस्त्रिभुवनम्। एवं चतुर्युगं चतुष्पथम् इत्यादावकारांतत्वेऽपि ईप् न भवति। त्रिलोकं त्रिलोकी। अत्र विकल्पेन ईप्॥ इति द्विगुसमासः॥ ॥

**बहुव्रीहिरन्यार्थे** ॥ अन्यपदार्थप्रधानो यः समासः स बहुव्रीहिसंज्ञको भवति। बहु धनं यस्य स बहुधनः। अस्ति धनं यस्य सः अस्तिधनः तस्य प्रधानस्यैकदेशो विशेषणतया यत्र ज्ञायते स तद्गुणसंविज्ञानः। लंबौ कर्णौ यस्य स लंबकर्णः॥

सांप्रतं बहुव्रीहिसमासं निरूपयति। सूत्रम् ( बहुव्रीहिरन्यार्थे ) बहुव्रीहि १-१ ( स्रो० ) अन्यार्थे अन्यस्य अर्थः अन्यार्थस्तस्मिन् ७-१(अ इ ए)पश्चात्( नामिनो रः द्विपदमिदं सूत्रम्। समासमध्यवर्तिपदापेक्षया अन्यपदस्यैव बाह्यपदस्यैवार्थः प्रधानो यस्य अर्थात् अन्यदेव पदं प्रधानं यत्र स बहुव्रीहिसंज्ञकः समासो भवति। बहु १-१(नपुंसका०) धन १-१ ( अतोम्। अम्श०। मोनु० ) बहु प्रचुरं धनं यस्य इति विग्रहे अत्र समासस्थौ बहुधनशब्दौ ताभ्यां यस्येति पदम् अन्यत्पदं प्रधानं ततो बहुव्रीहिसमासः। समाससंज्ञायामुभयत्रापि विभक्तिलोपः। यस्येत्यस्योक्तार्थानामप्रयोगः। बहु धन इति

स्थिते बहुव्रीहेर्वाच्यलिंगता । इति बहुव्रीहेरन्यपदप्रधानत्वात्परलिंगस्य नरशब्दस्य पुँल्लिगत्वात् पुंस्त्वे १-१ ( स्रो० ) बहुधनः इति सिद्धम् । एवमस्तीत्येव धनं यस्य सोऽस्तिधनः । यदि वा अस्तीत्यव्ययं सत्तार्थवाचकम् ततोऽस्ति विद्यमानं धनं यस्येत्यस्तिधनः १-१ ( स्रो० ) अस्त्यर्थे बहुव्रीहिः । एवं तपोधनः । सधनः । द्वितीयाद्यंतान्यपदेषु प्रधानेषु बहुव्रीहिर्भवति यथा प्राप्तो राजा यं स प्राप्तराजा । ऊढा कन्या येन स ऊढकन्यः । दत्तं वस्त्रं यस्मै स दत्तवस्त्रः । उद्धृतः शल्यो यस्मात्तदुद्धृतशल्यं क्षतम् । वीतो गतो रागो यस्मात्स वीतरागः । धर्मिणो लोका यस्मिन्स धर्मिलोको ग्रामः । इत्यादि । इह बहुव्रीहिर्द्विधा । तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च बहुव्रीहिसमासः । तस्य लक्षणं ग्रन्थकार एवाह । तस्येति । तस्य प्रधानभूतस्य पुरुषादेः एकदेशोऽवयवभूता हस्तपादादयो यत्र विशेषणतया विशेषणत्वेन ज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिः । तस्योदाहरणम् । लंबौ कर्णौ यस्य स लंबकर्ण इत्यत्र कर्ण इति नरस्य एकदेशः स एव समस्यमानविशेष्यभूतस्य नरादेर्विशेषणत्वेन ज्ञातोऽतस्तद्गुणसंविज्ञानो बहुव्रीहिः । चित्रा गावो यस्य स चित्रगुः । दीर्घकायः । अत्र कायस्य नरादेश्च ऐक्यत्त्वात् । एवं दीर्घग्रीवो महाभुज इत्यादयस्त्वतद्गुणसंविज्ञाने शब्दाः ॥

[ बहुव्रीहौ विशेषणसप्तम्यंतयोः पूर्वनिपातो वक्तव्यः ] चक्रपाणिः ॥

ननु लंबकर्ण इत्युदाहरणे लंब इत्यत्र अन्यपदार्थप्रधानत्वात्पदसाम्ये कर्ण इत्यत्र अन्यपदार्थप्रधानत्वात्पदसाम्ये कर्णलंब इति कथं न प्रयुज्यते इत्याह । ( बहुव्रीहौ० ) इति । बहुव्रीहिसमासे यद्विशेषणीभूतं पदं भवति यच्च सप्तम्यंतं पदं भवति एतयोः पदयोः पूर्वनिपातः प्रथमं प्रयोगो भवति । बहुव्रीहिरुपलक्षणत्वात्कर्मधारयेऽपि विशेषणस्यैव पूर्वनिपातो भवति । रक्तलतेत्यादौ संवंधं सत् व्यावर्तकं विशेषणम् । "विशेष्यं तु प्रधानं स्यात् स्वार्थस्यैव प्रकाशनात्" । यथा लंबकर्ण दीर्घग्रीव इत्यादि । सप्तम्यंतं तथा । ब्रह्मणि योनिरस्य स ब्रह्मयोनिः । अप्सु योनिरस्येत्यप्सुयोनिः । भाले लोचनं यस्य स भाललोचनः । भुवने कीर्तिर्यस्य स भुवनकीर्तिः । पद्मं नाभौ यस्य स पद्मनाभः ( टाडकाः ) इति डप्रत्ययः । चन्द्रमौलिः । शूलपाणिः । चक्रपाणिः । कपिध्वजः इत्यादौ सप्तम्यंतं पदम् ॥

[नञ्दुःसुभ्यः प्रजामेधयोरस् वक्तव्यः] अप्रजाः सुप्रजाः । सुमेधाः । दुर्मेधाः । [ धर्मादन् ] सुष्ठु धर्मो यस्य स सुधर्मा । रूपवती भार्या यस्य स रूपवद्भार्यः ॥

सुष्ठु प्रजा यस्येति विग्रहे तथा दुष्टा मेधा यस्येति विग्रहे विभक्तिलोपः । सुप्रजा दुर्मेधा इति स्थिते ( नञ्दुःसुभ्यः प्रजामेधयोः० ) इति बहुव्रीहौ नञ्सुदुर्पूर्वयोः

प्रजामेधाशब्दयोरन्यार्थे वर्तमानयोः असुग् आगमो भवति । किस्त्वादंते । उकार उच्चारणार्थः । सुप्रजाः । सुप्रजसौ । सुप्रजसः । दुर्मेधाः । दुर्मेधसौ । दुर्मेधसः । एवम् अप्रजाः । अमेधाः । क्वचिदन्यत्रापि । मन्दमेधाः । अल्पमेधाः । तथा ( धर्मादन्) अन्यार्थे वर्तमानाद्धर्मशब्दादन् आगमो भवति । बहुव्रीहेरुदाहरणम् । सुष्ठु शोभनो धर्मो यस्येति विग्रहे सुधर्म इति स्थिते ततोऽनेन अन् ( यस्य लोपः ) स्व० । १-१ ( नोपधायाः । हसे० । नाम्नो० ) सुधर्मा इति सिद्धम् । राजन्शब्दवत् । न वरम् । शसादौ मकारांतसंयुक्तत्वात् ( अल्लोपः स्वरे० ) इति न भवति ( धनुषश्च ) धनुषूशब्दस्य अन् आदशो भवति बहुव्रीहौ । शार्ङ्गं धनुर्यस्य स शार्ङ्गधन्वा एवं पुष्पधन्वा । इत्यादि । रूपवती भार्या यस्य इति विग्रहे विभक्तिलोपेऽवशिष्टं रूपवतीभार्या इति ॥

**अन्यार्थे ॥ स्त्रीलिंगस्यान्यार्थे वर्तमानस्य परस्य ह्रस्वो भवति । पुंवद्वा ॥ समासे सति समानाधिकरणे पूर्वस्य स्त्रीशब्दस्य पुंवद्वा भवति । पुंवद्भावादीपो निवृत्तिः॥वाग्रहणात् कल्याणीप्रिय इत्यादौ न भवति । कल्याणी प्रिया यस्यासौ कल्याणीप्रिय इति भवति ॥**

सूत्रम् ( अन्यार्थे ) अन्यार्थं ७-१ ( अ इ ए ) एकपदम् । स्त्रीलिंगस्य स्त्रीप्रत्ययांतस्य शब्दस्य अन्यार्थे परार्थे वर्त्तमानस्य ह्रस्वो भवति । उत्तरपदस्य इति शेषः । अन्यथा पूर्वपदे रूपवती इत्यादौ प्रसंगः । अतो भार्याशब्दस्य ह्रस्वः । रूपवतीभार्य इति स्थिते । सूत्रम् । पुंवत् १-१ ( अ०य० ) वा ३-१ ( अ०य० ) पश्चात् ( चपा अबे० ) तस्य दः । स्व० । द्विपदम् । समासे सति समानाधिकरणानाम् एकविभक्त्यंतानां विशेषणविशेष्यभावेन एकार्थनिष्ठत्वं समानाधिकरणत्वं तस्मिन् वर्त्तमानस्य पूर्वस्य पूर्वपदभूतस्य उक्तपुंस्कस्य स्त्रीलिंगस्य पुंवत् रूपं भवति । अनेन पुंवद्भावात् रूपवतीत्यत्र वर्तमानस्य ईपो निवृत्तिरतो रूपवद्भार्य इति स्थिते ( चपा अ० ) स्व० । १-१ ( स्रो० ) रूपवद्भार्यः इति सिद्धम् । न हि पुंवद्भावे केवलम् ईपो निवृत्तिः किंतु क्वचिदापोऽपि निवृत्तिः । शोभनभार्यः । दीर्घजंघः । रक्तलतेत्यादि । अयं वा शब्दो व्यवस्थितविकल्पं द्योतयतीत्याह । वा ग्रहणात् कल्याणीप्रिय इत्यादौ पुंवद्भावो न भवति । कल्याणी प्रिया यस्येति विग्रहे समानाधिकरणे उक्तपुंस्कस्य कल्याणीशब्दस्य न पुंवद्भावः । आदिशब्दात् वामोरूभार्यः पंचमीप्रिय इत्यादौ न पुंवद्भावः । मनोज्ञा सुभगा क्षांता चपला वामा वामना सचिवा श्यामा बाला तनया ब्राह्मणी दत्ता रसिका मैथिली इत्यादयः शब्दाः कल्याण्यादिषु ज्ञेयाः । तथा श्येन इवाचरतीति श्येनायते श्येनी इवाचरतीति श्येनायते । श्येनी इत्यत्र ईपो निवृत्तिः । श्येना इत्या-

दौ षङि। पंडितां मन्यते पंडितमानिनी। पट्व्या भावः पटुता पटुत्वम्। अल्पं देहि अल्पशः अल्पतरा अल्पतमा अनुकूलदेश्या अनुकूलदेशीया पंडिता पट्वी अल्पा अनुकूला इत्यादौ सर्वत्र पुंवद्भावः। प्रयोगानुसारेण पुंवद्भावो दर्शनीयः। अन्यार्थे वर्तमानस्येत्युक्तत्वात्। न केवलं बहुव्रीहाविति भावः। तेन ताशस्तरतमदेश्यदेशीयेषु प्रत्ययेषु परेष्वपि भवति। शुभ्राः रूप्या इत्यादौ न। वाग्रहणादेवेति ज्ञातव्यम्॥

गोः॥ गोशब्दस्यान्यार्थे वर्तमानस्य ह्रस्वो भवति। पंच गावो यस्य स पंचगुः॥

सूत्रम्। गो ६-१ ( ङस्य ) इत्यकारलोपः ( स्रो० ) एकपदम्। अन्यार्थे परार्थे वर्तमानस्य सतः गोशब्दस्य ह्रस्वो भवति। गोशब्दस्य पुंस्त्रीलिंगत्वे विशेषसूचकमिदं सूत्रम्। पंचन् १-३ ( जश्शसोर्लुक् ) गो १-३ ( ओरौ। औ आव् ) स्व० ( स्रो०। नाम्नो० ) पंच गावो यस्य इति विग्रहे बहुव्रीहिसमासः ( समासप्रत्यययोः ) उभयत्रापि जस्लोपः। पंचन् गो इति स्थिते पूर्वं ( नाम्नो०। गोः ) इत्यनेन सूत्रेण ह्रस्वत्वे ओकारस्य उकारः १-१ ( स्रो० ) पंचगुरिति सिद्धम्॥

[संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्याऽलोपो वक्तव्यः] सहस्रं पादाः यस्य स सहस्रपात्-सहस्रपाद्। शोभनौ पादौ यस्य स सुपात्। व्याघ्रस्य पादौ इव पादौ यस्य स व्याघ्रपात्। द्वौ पादौ यस्य स द्विपाद्। द्विपादौ। द्विपादः। द्विपादम्। द्विपादौ [ शसादौ स्वरे परे पदादेशश्च वक्तव्यः ] द्विपदः। द्विपदा। द्विपाद्भ्यामित्यादि॥

पुनर्विशेषमाह [संख्यासु०] इत्यादि। संख्या एकद्व्यादिका तद्वाचकः शब्दः तथा सु इत्यव्ययं शोभनार्थवाचकम्। व्याघ्रादयः शब्दा उपमात्वं प्राप्ताः एते पूर्वे आदौ वर्तमानाः यस्य पादशब्दस्य तत्संबंधिनोऽकारस्य लोपो वक्तव्यः। बहुव्रीहौ सर्वविभक्तिषु परतः। सहस्र १-१ ( स्रो० ) ( अतोऽम्। अम्श०। मोनु० ) पाद १-३ ( सवर्णे०। स्रो० ) सहस्रं पादा यस्य इति विग्रहे शोभनौ १-२ पादौ १-२ यस्य सः। तथा व्याघ्र ६-१ ( ङस्य ) पाद १-२ ( ओ औ औ ) इव १-१ ( अव्य० ) पाद १-२ ( ओ औ औ ) व्याघ्रस्य पादाविव पादौ यस्येति विग्रहे त्रयम्। सर्वत्रापि बहुव्रीहिसमासे ( समासप्र० ) इति विभक्तिलोपः। सहस्रपाद शोभनपाद व्याघ्रपाद इति स्थिते। द्वितीये ( सहादेः सादिः ) इति शोभनस्य सु आदेशः। व्याघ्रेत्यादौ ( वैयधिकरण्ये बहुव्रीहौ० ) इत्यादिना मध्यमपदभूतपादशब्दस्य लोपः। सर्वत्र [ संख्यासुव्याघ्रादि० ]

इत्यादिना दकारमध्यस्थाऽकारलोपः १-१ ( हसे० । वावसाने ) दस्य तः । सहस्रपात् । सुपात् । व्याघ्रपात् । सहस्रपादौ । सहस्रपादः । सहस्रपादम् । सहस्रपादौ । द्वौ पादौ यस्य स द्विपात्-द्विपाद् । द्विपादौ । द्विपादः । द्विपादम् । द्विपादौ । शसादौ विशेषमाह । [शसादौ स्वरे परे पादशब्दस्य पदादेशो वक्तव्यः ] अनेन शसादौ स्वरादौ विभक्तौ परे पद् इति आदेशः। चकारादन्यत्रापि नपुंसके स्त्रीलिंगे ईपि परे तद्धिते च पद् आदेशः । कुंभपदी शतपदी सहस्रपदी एकपदी द्विपदी स्त्री । नदादित्वादीप् । द्विपदोऽपत्यं द्वैपदः .इत्यादौ पदादेशः। प्रकृते द्विपदः । द्विपदा । द्विपाद्भ्यामित्यादिशब्दाः । सहस्रपदः । सहस्रपदा । सहस्रपाद्भ्याम्। सहस्रपाद्भिः । भ्याम् भिस् इत्यादौ स्वरादित्वाभावान्न पदादेशः [ संख्यासु०व्याघ्रादि० ] इत्यादिशब्दात्कचिदन्यत्रापि पादशब्दस्याकारलोपः । गूढपात् । अपात् ॥

टाडकाः॥ समासे सति ट अ ड क इत्येते प्रत्यया भवंति ।
"टश्च तत्पुरुषे ज्ञेयो ह्यकारो द्वन्द्व एव च ।
डकारश्च बहुव्रीहौ ककारोऽनियमो मतः" ॥

अचिंत्यो महिमा यस्यासावचिंत्यमहिमः। नो वा ॥ नांतस्य पदस्य टेर्लोपो वा भवति यकारे स्वरे च परे । वाग्रहणात्कचिन्न भवति किंतु उपधालोपश्च। अह्नो मध्यं मध्याह्नः। कवीनां राजा कविराजः।टकारानुबंध ईवर्थः। कविराजी । राज्ञां पूः राजपुरम्। वाक्च मनश्च वाङ्मनसे । दक्षिणस्यां दिशि पंथाः दक्षिणापथः। अहश्च रात्रिश्च अहोरात्रः ॥ द्वौ वा त्रयो वा द्वित्राः । बहवो राजानो यस्यां सा बहुराजा नगरी । अत्र टिलोपे कृते ( आबतः स्त्रियाम् ) बहवः कर्तारो यस्य स बहुकर्तृकः ॥

अथ सर्वसमाससाधारणान्प्रत्ययानाह। सूत्रम् ( टाडकाः ) टश्च अश्च डश्च कश्च टाडकाः१-३(सवर्णे०।स्रो०)सिद्धम् एकपदम्। समासे सति बहुव्रीहौ तत्पुरुषे, द्वंद्वे कर्मधारये च नाम्नः यथासंभवं ट अ ड क एते चत्वारः प्रत्यया भवंति । यथासंभवं टकार ईवर्थः। डकारश्च टिलोपार्थः । अकारः ककारश्च यथास्थित एव। तत्र प्रथमं टप्रत्ययोदाहरणमाह। अचित्य १-१ ( स्रो० ) महिमन् १-१ (नोपधायाः। नाम्नो० ) पश्चात् ( हचे । उ ओ ) अचिंत्यो महिमा यस्येति विग्रहे बहुव्रीहिसमासे विभक्तिलोपे अचिंत्यमहिमन् इति स्थिते ( टाडकाः ) इति टप्रत्ययः। अत्र सूत्रम् । न ६-१ । स्व० ( स्रो० )वा ३-१ ( अव्य० ) द्विपदम् । नकारांतस्य पदस्य टेर्लोपो

भवति यकारे स्वरे च परे । यथा राज्यम् । तथा स्वरे इति प्रस्तुतमेव । ततो महिमन् इत्यत्र अकारनकारयोर्लोपः । स्वर० १-१ ( स्तो० ) अचिंत्यमाहिमः इति सिद्धम् । परं न बहुसंमतोयं प्रयोगः । किंतु अचिंत्यमाहिमा इत्येव संमतः । वाग्रहणात्कचिट्टेर्लोपो न भवति । च पुनः यत्र टेर्लोपो न भवति तत्र उपधाया लोपो भवति । तस्योदाहरणं यथा अहन् ६-१ ( अल्लोपः स्वरे० ) स्व० ( स्तो० ) मध्य १-१ ( अतोऽम् । हवे । उ ओ ) अह्नो मध्यमिति विग्रहे षष्ठीतत्पुरुषसमासः ( समासप्रत्यययोः ) इति विभक्तिलोपे अहन् मध्य इति स्थिते । कचिदमाद्यंतस्य परत्वमिति । मध्य अहन् इति स्थिते ( सवर्णे० ) वाग्रहणादुपधाया लोपः । स्वर० । १-१ ( स्तो० ) मध्याह्नः । एवं सायाह्नः । टप्रत्यये तु तत्पुरुषः । कवीनां ६-३ राजा १-१ इति विग्रहे तत्पुरुषे विभक्तिलोपे कविराजन् टप्रत्ययः ( नो वा ) इति टिलोपः । स्वर० ( स्तो० ) कविराजः । तथा टकारानुबंध ईवर्थ ईप्प्रत्ययार्थस्ततः ( ष्ट्रिन्नतः ) इतीप् ( यस्य लोपः ) स्व० । १-१ ( हसे० ) कविराजी । एवं महाराजः । राज्ञां ६-३ पूः १-१ तत्पुरुषे ( समासप्रत्यययोः ) इति विभक्तिलोपः । राजन् पुर् इति स्थिते अत्र अप्रत्ययः । स्व० १-१ ( अतोऽम् । सवर्णे० ) राजपुरम् । पूः शब्दस्य अदंतत्वे नपुंसकत्वात् वाच् ( चोः कुः । हसेपः० । स्तो० ) च १-१ अव्य० । मनस् नपुंसकत्वम् ( नपुंसकात्स्यमोर्लुक् । स्तो० ) च ( अव्य० ) वाक् च मनश्च इति विग्रहे द्वंद्वसमासे विभक्तिलोपः ( चोः कुः ) चस्य कः । वाक्-मनस् ( ञमे ञमा वा ) कस्य ङः ( टाडकाः ) इति अप्रत्ययः । स्व० । १-१ ( ईमौ । अ इ ए ) वाङ्मनसे इति सिद्धम् । दक्षिणा ७-१ ( आम्ङेः ) इति ङेराम् । ( ङितां यट् । यटोच्च ) इति सक् आगमः पूर्वाकारस्य च अकारः । स्व० ( सवर्णे० ) पथिन् १-१ ( इतोत्पंचसु । थो न्थ् ) पन्थन् ( आ सौ । नश्चापदांते० । स्तो० ) दक्षिणस्यां पंथाः इति विग्रहे तत्पुरुषे ( समासप्र० ) इति विभक्तिलोपे पथिन् अप्रत्ययः ( नो वा ) इति टिलोपः इन्लोपः । स्वर० । १-१ ( स्तो० ) दक्षिणापथः इति सिद्धम् । केचित्त्वत्र डप्रत्ययमेवेच्छंति । अहन् १-१ ( हसे० । अह्नः । स्तो० ) च १-१ ( अव्य० । विसर्ज० । स्तोः श्चु० ) रात्रि १-१ ( स्तो० ) च १-१ ( अव्य० ) अहश्च रात्रिश्चेति विग्रहे द्वंद्वे ( समासप्रत्ययोः ) अहन् रात्रि इति स्थिते ( अह्नः । स्तो० ) रात्र्यादिवर्जितत्वात् न रेफः किंतु ( हवे । उ ओ । टाडकाः ) इति डप्रत्ययः । डित्त्वाट्टिलोपः । स्व० । १-१ ( स्तो० ) अहोरात्रः इति सिद्धम् । द्वि १-२ ( त्यदा० । ओ औ औ ) त्रि १-३ ( ए ओ जसि । ए अय् ) स्व० ( स्तो० ) द्वौ च त्रयश्च इति विग्रहे द्वन्द्वे विभक्तिलोपः ( टाडकाः ) इति डप्रत्ययः। टिलोपः। स्व० । १-३ ( सवर्णे० । स्तो० ) द्वित्राः । पंचन् १-३ अस ( जश्शसोर्लुक् । नाम्नो० ) षष् १-१ ( जश्शसोः० । षो डः ।

वावसाने ) डस्य टः। पंच च षट् च इति विग्रहे द्वंद्वे विभक्तिलोपे पंचन् षष् ( टाडकाः ) इति डप्रत्ययः । डित्त्वाट्टिलोपः । स्व० । १-३ ( सवर्णे० । स्रो० । नाम्नो० ) पंचषाः । एवम् एकश्च द्वौ च एकद्वाः । वहु १-३ ( ए ओ जसि । ओ अव् ) स्व० ( स्रो० ) राजन् १-३ ( नोपधायाः ) स्व० ( स्रो० ) पश्चात् ( हवे । उ ओ ) बहवो राजानो यस्यामिति विग्रहे बहुव्रीहौ विभक्तिलोपे ( टाडकाः ) इति डप्रत्ययः। टिलोपः । स्व० । अत्र टिलोपे कृते ( आन्नतः स्त्रियाम् ) इत्याप् ( सवर्णे० ) १-१ ( आपः ) इति सेर्लोपः । बहुराजा एषा नगरी । बहवः कर्त्तारो यस्य स बहुकर्तृकः । वहु १-३ पूर्ववत् । कर्तृ १-३ ( स्तुरार् ) स्व० । ( स्रो० ) बहवः कर्त्तारो यस्य इति विग्रहे बहुव्रीहिसमासे विभक्तिलोपे बहुकर्तृकः । ( टाडकाः ) इति कप्रत्ययः ( स्रो० ) बहुकर्तृकः प्रासादः ग्रंथो वा । अधातुस्त्रीलिंगेकारांतोकारांतऋकारांतेभ्यः उरश्शब्दाच्च नित्य एव कप्रत्यय इति ज्ञातव्यम् । सपत्नीकः । प्रियसीमंतिनीकः । सवधूकः फलितजंबूकः आरामः । नदीमातृको देशः । जीवत्पितृकः । व्यूढोरस्कः । नतु सपत्नी सवधूः जीवत्पिता व्यूढोरा इत्यादिप्रयोगा अर्हाः। एवमन्येपि प्रयोगाः । मैत्रस्य सखा मैत्रसखः । कंकणस्रजं मांसत्वचं वाक्त्विषं छत्रोपानहं द्विनावं द्विखारं ग्रामतक्षः पूर्वरात्रः अपररात्रः पुण्यरात्रः कृष्णभूमः पांडुभूमः द्विभूमः । उपदशाः । आसन्नविंशाः । बहुदातृकः । बहुलक्ष्मीकः । इत्यादयो यथासंभवं ज्ञेयाः ॥ ॥ इति बहुव्रीहिसमासः ॥

**कर्मधारयस्तुल्यार्थे** ॥ पदद्वये तुल्यार्थे एकार्थनिष्ठे सति कर्मधारयसंज्ञकः समासो भवति । नीलं च तदुत्पलं च नीलोत्पलम् । रक्ता चासौ लता चेति रक्तलता । पुमांश्चासौ कोकिलश्चेति पुंस्कोकिलः । पुंसूख्यातः [ पुंसः अवपरे खपे संयोगांतस्यालोपो वक्तव्यः ] नाम्नश्च कृतासमासः प्रादेरुपसर्गस्य नाम्नश्च कृदंतेन सह समासस्तत्पुरुषो भवति । प्रकर्षेण वादः प्रवादः । कुंभं करोतीति कुंभकारः । अपकृष्टो वादः अपवादः । **सहादेः सादिः** ॥ समासे सति सहादीनां सादिर्भवति ॥ पुत्रेण सह वर्तते इति सपुत्रः । सह संतिरसां सध्रिसमितिरयः । सहस्य सध्रिः । सध्र्यङ् । समः समिः । सम्यङ् । तिरसस्तिरिः । तिर्यङ् ॥

सांप्रतं कर्मधारयं निरूपयति ॥ सूत्रम् ( कर्मधारयस्तुल्यार्थे ) कर्मधारयः १-१ (स्रो०) तुल्यः सदृश अर्थादिक एव अर्थोऽभिधेयो वाच्यं प्रयोजनं यस्य स तुल्यार्थः।

तस्मिन् ७-१ ( अ इ ए ) पदद्वये इति पूर्वपद उत्तरपदे चैकार्थनिष्ठे एकार्थसंबंधपदद्वये एकवस्तुवाचके सति योऽन्वयः स कर्मधारयनामा समासो भवति । एकस्मिन्नर्थे निष्ठा स्थैर्यं प्रवृत्तिर्वा यस्य तत् एकार्थनिष्ठं तस्मिन् । उदा०। नील१-१ ( अतोऽम् । अम्श० । मोनु० ) च १-१ ( अव्य० ) तद् १-१ ( नपुंसकात्स्य०। वावसाने ) उत्पलं १-१ (अतोऽम् । अम्श०) च १-१(अव्य०) एकार्थताद्योतनाय चकारस्तच्छब्दश्च अथवा असौशब्दः आनीयते । नीलं च तदुत्पलं च इति विग्रहे अत्र नीलशब्दो विशेषणभूतः उत्पलशब्दश्च विशेष्यभूतः नीलं चेति विशेषणत्वात् पूर्वनिपातः । गुणद्रव्ययोराधाराधेयसंबंधित्वात् एकार्थनिष्ठत्वम् । ततः कर्मधारयसमासः ( समासप्रत्यययोः ) इति विभक्तिलोपः । उक्तार्थानामप्रयोगः । नीलउत्पल इति स्थिते ( उ ओ ) १-१ ( अतोऽम् । अम्श० ) नीलोत्पलम् । रक्ता चासौ लता च इति विग्रहे । रक्ता १-१ ( आपः ) च १-१ ( अव्य० ) अदस् १-१ ( त्यदा० । सौ सः । सेरौ । ओ औ० ) लता १-१ ( आपः ) च १-१ ( अव्य० ) ततः समाससंज्ञा प्राग्वत् विभक्तिलोपश्च । रक्तलता ( पुंवद्वा ) इति पुंवद्भावादीपो निवृत्तिः । पूर्वपदस्य रक्ता इत्यस्य रक्त ततो रक्तलताशब्दात् प्रथमैकवचने ( आपः ) पुंस्शब्दात् प्रथमैकवचने पुंस् १-१ ( पुंसोऽसुङ् ) सकारस्य अस् ( त्रितो नुम् ) पुमन्स् ( न्सम्महतोऽधौ० ) इति दीर्घः ( हसे० । संयोगांतस्य० ) इति सलोपः । पुमान् । च १-१ ( अव्य० ) पश्चात् ( नः सक् छते ) इति सकारागमः ( स्तोः श्चुभिः० । नश्चाप० ) अदस् १-१ ( त्यदा० । सौ सः । सेरौ । ओ औ औ ) पश्चात् ( सवर्णे० ) कोकिल १-१ ( स्रो० ) च १-१ ( अव्य० ) पुमांश्चासौ कोकिलश्चेति विग्रहे पूर्ववत्कर्मधारयः समासः विभक्तिलोपः । तत उक्तार्थानामप्रयोगः पुम्स्कोकिल इति स्थिते । ननु ( संयोगांतस्य० ) इति सकारलोपोऽत्र क्रियतां तत्राह ( पुंसः अवपरे खपे० ) इति । पुंस्शब्दस्य अवप्रत्याहारपरे खपप्रत्याहारे परे अलोपो भवति संयोगांतस्य सकारस्य अलोपो भवति । न लोपः अलोपः । तेन लोपो न भवतीत्यर्थः । ततो ( नश्चा० ) स्र० । पुंस्कोकिल इति सिद्धम् । एवं परमश्चासौ ईश्वरश्च परमेश्वरः । एवं महेश्वरः । महावीरः । महादेवः । पुनः विशेषमाह । सूत्रम् ( नाम्नश्च कृता० ) नामन् ६-१ ( अल्लोपः स्वरे ) स्र० । ( स्रोर्वि० ) च १-१ ( अव्य० ) पश्चात् ( विसर्ज० । स्तोः श्चु० ) कृत् ३-१ । स्र० । समासः १-१ ( स्रो० ) चतुष्पदं सूत्रम् । प्रादेरुपसर्गस्य तथा नाम्नश्च धातोः प्राक् प्रयुक्तस्य कृदन्तेन कृत्प्रत्ययांतशब्देन सह तत्पुरुषसंज्ञकः समासो भवति । चकारात् सहादयो गतिसंज्ञकाश्च ग्राह्याः । अथोदाहरणम् । वद व्यक्तायां वाचि। वदप्रपूर्वः । प्रवदनं प्रवादः । प्रकृष्टो वादः प्रवादः ( घञ् भावे ) इति घञ्प्रत्ययः । ञित्त्वात् ( अत उपधायाः ) इति वृद्धिः । स्र० ( स्रो० ) प्रवादः १-१ अत्र प्रोपसर्गस्य कृदंतेन तत्पुरुषः। तथा डुकृञ् करणे । कृ। कुंभपूर्वः ।कुंभ अग्रे २-१ अम् ( अम्श० । मोनु०) कृ (वर्तमाने तिप् । तनादेरुप् )

उ गुणः । कर उ इति स्थिते उकारस्य गुणः ओ । स्वर० । कुंभं करोतीति विग्रहे पश्चात् ( कार्येऽण् । समासप्रत्यययोः ) उभयत्रापि विभक्तिलोपः । कुंभ कृ अ इति स्थिते णित्वाद्वृद्धिः । कार । स्व० १–१ ( स्रो० ) अत्र कुंभशब्दस्य कृदंतेन सह तत्पुरुषः कुंभकारः । सूत्रम् ( सहादेः० ) सह आदिर्यस्य स सहादिस्तस्य ६–१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० ) सादिः स आदौ यस्य त सादिः १–१ ( स्रो० ) द्विपदम् । समासे कृते सति सहादीनां सह सम् तिरस् इत्यादीनां पूर्वपदानां क्रमेण समि सध्रि तिरि इत्यादय आदेशा भवंति । आदिशब्दादन्येऽप्यादेशा यथासंभवं भवंतीति भावः ॥ तत्रोदाहरणम् । सह १–१ ( अव्य० ) पुत्र ३–१ ( टेन । अ इ ए । ष्टनों० ) सह पुत्रेण अत्र ( नाम्नश्च ) इति चशब्दात्तत्पुरुषः । प्रक्रियामते तु बहुव्रीहिः । ( तेन सहेतितुल्ययोगे ) तुल्ययोगे सहेत्येतत्तृतीयांतेन समस्यते स बहुव्रीहिः । विभक्तिलोपे सहस्य स आदेशः १–१ (स्रो० ) आदिशब्दात्समानस्यापि सो भवतीति सूचितम् । तेन ज्योतिर्जनपदपिंडबंधुलोहितनाभिवेणीरात्रिगंधकुक्षिब्रह्मचारितीर्थ्यपत्नीपक्षेषु समानशब्दस्य स आदेशः । समानं ज्योतिर्यस्य स सज्योतिः । सजनपदः सपिंडः सबंधुः सलोहितः सनाभिः सवेणी सरात्रिः सगंधः सकुक्षिः सब्रह्मचारी सतीर्थ्यः समाना पत्नी सपत्नी सपक्षः समानपक्षः । रूपादिषु विकल्पेन समानशब्दस्य स आदेशः । समानं रूपं यस्य स सरूपः समानरूप इति वा । सवर्णः समानवर्णः सजातीयः समानजातीयः सगोत्रः समानगोत्रः संस्थानं समानस्थानं सधर्मा समानधर्मा सवयाः समानवयाः सनामा समाननामा इति यथाप्रयोगमूहनीयाः । अंचु गतिपूजनयोः अंच् सहपूर्वः सह १–१ ( अव्य० ) अंच् तिप् ( अप् कर्तरि ) इति अप् । सह अंचतीति विग्रहे कृदंतेन क्विप्प्रत्ययेन तत्पुरुषसमासः । ( क्विप् ) इति क्विप् । क्विपः सर्वापहारी लोपः । अंच् इत्यत्र ( नो लोपः ) इति नकारादेशरूपस्य अनुस्वारस्य लोपः ( सहादेः सादिः ) इति सहस्य सध्रि–आदेशः ( इ यं० ) सध्र्यच् १–१ ( अंचेः पंचसु नुम् ) इति नुमागमः ( स्तोः श्चु० ) नस्य ञ् ( हसे० । संयोगांतस्य० ) इति । चलोपे ( चोः कुः ) ञस्य ङ् । सध्र्यङ् अग्रे प्रत्यच्शब्दवत् । एवं सम्पूर्वः अंच् समः समि आदेशः अग्रे क्विप्प्रत्ययादिकं पूर्ववत् । सम्यगञ्चति सम्यक् प्रकारेण अञ्चतीति सम्यङ् । एवं तिरस्पूर्वः अञ्च् तिरसः तिरि आदेशः ( इ यं स्वरे ) तिर्यक् । द्वितीयाद्वित्वं यावत् प्रत्यच्वत् । शसादौ स्वरे तु तिरश्चादय आदेशा निपात्यंते उदच्शब्दस्य उदीच् इति निपातः शसादौ स्वरे इति । तिरश्चः । तिरश्चा । पूर्ववत् । एवं विष्वक् सर्वतः अञ्चतीति विष्वद्र्यङ् ( सहादेः सादिः ) इति विष्वक्स्थाने विष्वद्रि–आदेशः । देवम् अञ्चतीति देवद्र्यङ् ( सहादेः सादिः ) इति देवस्य देवद्रि–आदेशः । अमुम् अञ्चतीति अदद्र्यङ् । अमुम् इत्यस्य अदद्रि–आदेश इत्यादयो यथासंभवं ज्ञेयाः ॥

को कत् ॥कुशब्दस्य कुत्सितेषदर्थयोः वर्तमानस्य तत्पुरुषे कदादेशो भवति । कुत्सितम् अन्नं कदन्नम् । [ ईषदर्थे कोः का कव कदुष्णे] कोष्णं—कवोष्णं-कदुष्णम् । कालवणम् [पुरुषे वा ] कापुरुषः कुपुरुषः [ पथ्यक्षयोः ] कोः कादेशः स्यात् । कुपथः । कापथः । कक्षः । काक्षः । ईषदर्थे च । ईषज्जलं काजलम् । दधोर्डढौ स्याताम् ।षड्भिः अधिका दश षोडश । षड्भिः प्रकारैः षोढा। संख्यायाः प्रकारे धा [ षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च वा भवतीति वक्तव्यम् ] षोढा । षड्धा[2] । षट् दंता यस्य सः षोडन् । षष् दन्त इति स्थिते दंतस्य दतृ । ऋ इत् । षस्य उत्वम् । दस्य डः । (ऋितो नुम्) षोडन् । बृहच्छब्दस्य सुडागमे तलोपश्च । बृहतां पतिः बृहस्पतिः । महच्छब्दस्य टेराकारः समानाधिकरणे । महादेवः । महेश्वरः । द्यौश्च भूमिश्च द्यावाभूमी । द्योशब्दस्य द्यावादेशः । जायाया जंभावो दंभावो निपात्यते । दंपती—जंपती । क्वचित् जायापती । आकृतिगणोयम् ॥

( कुत्सितेषदर्थयोः कोः कुशब्दस्य कदादयो वक्तव्याः ) कु १—१ ( अव्य० ) अन्न १—१ ( अतोऽम् ) कुत्सितमन्नम् इति विग्रहे अत्र व्याकरणांतरमते तु तत्पुरुषः । स्वमते तु कर्मधारयः । कुशब्दस्य कत् ( चपा अबे० ) तस्य दः । स्वर० । कदन्न १—१ ( अतोऽम् । अम्श० । ) एवं कदशनं कदध्वा सर्वत्र कुपूर्वः । कु १—१ ( अव्य० ) उष्ण १—१ ( अतोऽम् ) ईषदर्थे उष्णशब्दे परे कोः कु इत्यस्य कत् का कव एते त्रयः आदेशा भवंति । कु ईषदुष्णमिति विग्रहे एकत्र कत् । द्वितीये का तृतीये कव । कदुष्णम् । कोष्णम् । कवोष्णम् १—१ । सर्वत्र कुलशब्दवत् । लवणः कुपूर्वः । कु ईषल्लवणमिति विग्रहे ईषदर्थे कोः का । कालवणम् ( पुरुषे वा ) पुरुषशब्दे परे कु इत्यस्य वा कादेशो भवति । कुत्सितः पुरुषः कुपुरुषः । कापुरुषः । एवं कत्तृणं कद्रथः कद्वदः कदध्वा कापथः काक्षः काग्निः कदग्निः इत्यादयः प्रयोगानुसारेण ज्ञेयाः । षष्दशन् उभयत्रापि १—३ ( जश्श० । षो डः । वावसाने । समासप्रत्यययोः । ( ष्टुभिः ष्टुः ) दस्य डः ( सहादेः० ) इत्यनेन ष् इत्यस्य उः षोडशन् । १—३ ( जश्श० । नाम्नो० ) षड्भिरधिका दश षोडश ।

१ ( कोः कदादिः ) इत्यन्यत्र पुस्तके पाठः । २ षड्ढेत्यपि क्वचित् ।

यद्वा षट् च दश चेति विग्रहे विभक्तिलोपे ( सहादेः सादिः ) इति षकारस्योकारो दस्य डः । इति वर्णविकारो जातः । यदि वा षोडशानां संख्यापूरणः षोडशः ( एकादशादिर्डः ) डित्त्वाट्टिलोपः । स्वर० । १-१ देवशब्दवत् षट् दंता अस्य स षोडन् । ( दंतस्य दतृ ) इति पूर्वं दंतस्य दतृ इति आदेशः । ऋकारो नुमागमार्थः । ततः ( ष्टुभिः ष्टुः ) दस्य डः । षषः । षोडन् १-१ सु ( ऋितो नुम् । हसे० । संयोगांत० । षो डः ) यद्वा ( सहादेः सादिः ) इति षस्य उः ( टाडकाः ) इति डप्रत्ययः । टिलोपः । स्वर० ( स्रो० । षो डः ) यद्वा षट् ददातीति षोडः ( नाम्नः० ) इति डप्रत्ययः विभक्तिलोपः ( सहादेः सादिः ) इति षस्य उत्वम् । दस्य डः ( उ ओ । षो डः ) तथा षष्-संख्यायाः प्रकारे धाप्रत्ययः । षड्भिः प्रकारैः षोढा । यद्वा षट् धा प्रकारा यस्य षोढा ( ष्टुभिः ष्टुः ) इति धस्य ढः ( सहादेः सादिः ) इति षोढा इत्यव्ययम् । तथोक्तम् [ षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वक्तव्यम् ] इति । बृहतां पतिः बृहत्पतिः बृहस्पतिः अत्र ( सहादेः सादिः ) इति तकारस्य सकारः । केचिदत्र बृहस्पतिरिति न पठंति । वाचस्पत्यादिषु साधितत्वात् । अथवा बृहत्याः पतिः बृहतां पतिः बृहस्पतिः ( सहादेः सादिः ) अनेन बृहती इत्यस्य बृहस् आदेशः । महांश्चासौ ईश्वरश्च अत्र ( सहादेः सादिः ) इति महच्छब्दस्य महा इत्यादेशः ( अ इ ए ) महेश्वरः । महादेवः । महामाया । महात्मा । द्यौभूमि ( औरी ) द्यौश्च भूमिश्च द्यावाभूमी । अत्र ( सहादेः० ) इति द्यौ इत्यस्य द्यावा इत्यादेशः । ततः १-२ ( औ यू ) ई ( सवर्णे० ) एवं दयितापतिः जायापतिः । दयिता च पतिश्च दंपती । जाया च पतिश्च जंपती । दयिताजाययोः क्रमेण दम् जम् इत्येतावादेशौ भवतः । उभयत्रापि १-२ ( औ यू । सवर्णे० ) दंपती २ । दंपतीभ्याम् ३ । दंपत्योः २ । एवं जंपती । प्रक्रियामते तु जायाया जंभावदंभावौ वा निपात्यौ । ननु स्वच्छंदमादेशाः कथं क्रियंते इत्याशंकायामाह । आकृतिगणोयम् । याहशी आकृतिः आकारः प्रयोगस्य दृश्यते ताहश एव प्रयोगो निपात्यते ताहश एवादेशः क्रियते अस्मिन्गणे इति आकृतिगणः कथ्यते । लक्ष्यानुसारेण सूत्रस्य प्रवृत्तिः । सिद्धं शब्दाकारमुपलभ्य तदनुसारेणादेशविधानमित्यर्थः ॥

अलुक् क्वचित् ॥ क्वचित्समासे कृदन्ते तद्धितेऽपि विभक्तेरलुग्भवति । कृच्छ्रान्मुक्तः । स्तोकान्मुक्तः । अप्सु योनिरस्येति अप्सुयोनिः । उरसि लोमानि यस्यासौ उरसिलोमा । हृदि स्पृशतीति हृदिस्पृक् । कंठे कालो यस्यासौ कंठेकालः । वाचोयुक्तिः । दिशोदंडः । पश्यतोहरः । वनेचर इत्यादि ॥ [ समानाधिकरणे

**शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः । ] शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ॥**

पुनर्विशेषमाह । सूत्रम् । अलुक् १-१ ( हसे० ) क्वचित् १-१ ( अव्य० ) क्वचिदिति । समासे कृदंते तद्धितप्रत्ययेपि परे पूर्वपदविभक्तेरलुक् लोपो न भवतीत्यर्थः । तद्धितप्रत्यये यथा । आमुष्यायणः । इत्यादौ विभक्तेरलुक् । समासे तु दर्शयति । कृच्छ्र ५-१ ( ङसिरत् । सवर्गे० ) मुक्त १-१ ( स्रो० । ञमे ञमा वा ) तस्य नः । कृच्छ्रान्मुक्त इति विग्रहे अत्र तत्पुरुषसमासः । अत्र पूर्वपदविभक्तेरलुक् । उत्तरपदविभक्तेस्तु ( समासप्रत्यययोः ) इति लुक् । पुनः १-१ ( स्रो० ) कृच्छ्रात् मुक्तः कृच्छ्रान्मुक्तः इति । एवं स्तोकान्मुक्तः । तथा अप्सुयोनिः । अप् ७-३ । स्व० । योनि १-१ ( स्रो० ) अप्सु पानीयेषु योनिर्यस्येति बहुव्रीहिः । अत्र सप्तमीवहुवचनस्य अलुक् केवलमुत्तरपदस्य सेर्लुक् । उरस् ७-१ । स्व० । लोमन् १-३ ( जश्शसोः० । नोपधायाः । नाम्नो० ) स्व० । उरसि लोमानि यस्येति विग्रहे पूर्वपदसप्तम्या अलुक् उत्तरपदस्य जसो लुक् । पुनः १-१ ( नोप० । हसे० । नाम्नो० ) उरसिलोमा । एवं हृद् ७-१ स्व० । स्पृश् संस्पर्शने हृद्पूर्वः हृदि स्पृशतीति विग्रहे तत्पुरुषसमासः । क्विप्-प्रत्ययः क्विपः सर्वापहारी लोपः १-१ ( दिशाम् ) इति शस्य कः ( हसेपः०) अत्र क्वचिदिति वचनात् कृदन्तेऽपि हृदि इति सप्तम्या विभक्तेरलुक् । एवं कंठे ७-१ कालः १-१ । वाचो ६-१ युक्तिः १-१ । दिशो ६-१ दंडः १-१ । पश्यतो ६-१ हरः १-१ । दास्याः ६-१ पुत्रः १-१ । एतेषु यथासंभवं विभक्तेरलुक् । कंठे इत्यत्र सप्तमी अन्यत्र षष्ठी । एवं स्तंबेरमः । कर्णेजपः । युधिष्ठिरः । ( अग्न्यादेः० ) इति षत्वम् । आत्मनेपदम् । परस्मैपदम् । देवानांप्रियः दिवस्पतिः वास्तोष्पतिः इत्यादावलुक् । एकविभक्त्यंतानां पदानां विशेषणविशेष्यभावेन एकार्थनिष्ठत्वं समानाधिकरणम् । तत्र वर्तमानानां शाकपार्थिवादीनां शब्दानां मध्यमपदस्य द्वयोः पदयोर्मध्यवर्तिनः पदस्य लोपो वक्तव्यः । केचित्तु उत्तरपदलोप इति पठंति ते पूर्वपदात् उत्तरपदस्य लोपमिति व्याचक्षते । अथवा प्रथमसमासापेक्षया उत्तरपदस्येति व्याख्यंति परं शाकप्रियपार्थिवादीनामित्यशेषस्यापि पदस्यानिरूपितत्वात्तन्न संमतम् । पुनर्श्चित्यम् । शाकप्रियपार्थिव इति स्थिते । शाकः प्रियो यस्य स शाकप्रियः शाकप्रियश्चासौ पार्थिवश्चेति विग्रहे अत्र एकविभक्तिकत्वेन समानाधिकरणम् । ततो मध्यमपदस्य प्रियशब्दस्य लोपः । शाकपार्थिव इति स्थिते १-१ ( स्रो० ) तथा देवपूजको ब्राह्मणः देवान्पूजयतीति देवपूजकः । देवपूजकश्चासौ ब्राह्मणश्चेति विग्रहे पूर्ववद्विभक्तिलोपे मध्यमपदस्य पूजकस्य लोपः । देवब्राह्मणः १-१ ( स्रो० ) प्राग्वत् ॥

आदेश्च द्वंद्वे ॥ द्वंद्वे समासे पूर्वपदस्य लोपो भवति । चकार-ग्रहणाद्विकल्पेन । माता च पिता च पितरौ । शिष्यमाणो लुप्य-मानार्थाभिधायी । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ ॥

पुनराह- सूत्रम् ( आदेश्च द्वंद्वे ) इति । आदि ६-१ । च १-१ । द्वंद्व ७-१ त्रिपदमिदं सूत्रम् । आदिशब्दस्य अजहल्लिंगत्वात् पदविशेषणत्वेपि पुंस्त्वम् । द्वंद्वे द्वंद्वसमासे इतरेतरयोगे आदिपदस्य लोपो भवति । चकारात् कुत्रचिन्न तु सर्वत्र । मातृ १-१ ( सेरा० ) डित्त्वाट्टिलोपः । ऋल्लोपः । स्व० । च १-१ ( अव्य० ) पितृ १-१ पूर्ववत् ( स्रो० ) च १-१ ( अव्य० ) माता च पिता च इति विग्रहे द्वंद्वसमासे ( समासप्रत्यययोः ) इति विभक्तिलोपे उक्तार्थानामिति चलोपे मातृपितृ ( आदेश्च द्वंद्वे ) इति मातृशब्दस्य लोपः । इतरे-तरयोगे द्विवचनम् । १-१ ( पंचसु ) इति अर् । स्व० । पितरौ । एवं श्वश्रूश्वशुरौ । श्वश्रूश्च श्वशुरश्च इति विग्रहे विभक्तिलोपे ( आदेश्च द्वंद्वे ) इति श्वश्रूपदलोपः । श्वशुर १-२ ( ओ औ औ ) एवं दुहितृपुत्रौ दुहिता च पुत्रश्चेति विग्रहे विभक्तिलोपे आदिभूतस्य दुहितृशब्दस्य लोपः । पुत्र १-२ । ( ओ औ औ ) चकारो बहुलार्थस्तेन कुत्रचिन्न तु सर्वत्र । यथा धवखदिरौ इत्यादौ लोपो न । चकारात्पक्षे मातापितरौ श्वश्रूश्वशुरौ इत्यपि भवति ॥

[ ऋतां द्वंद्वे ] द्वंद्वे समासे पूर्वपदस्य ऋकारस्य वाकारो वक्तव्यः । माता च पिता च मातापितरौ ॥

पुनर्विशेषमाह ( ऋतां० ) इति । ऋत् ६-३ । स्व० द्वंद्वे ७-१ ( अ इ ए ) ऋतामिति । ऋकारांतशब्दानां द्वंद्वे पूर्वं यत्पदं तत्संबंधिनः ऋकारस्य आकारो वा भवति । माता च पिता च अत्र विभक्तिलोपे मातृशब्दस्य ऋकारस्य आ । माता-पितृ १-२ ( पंचसु ) स्व० । मातापितरौ । एवं पितापुत्रौ दुहितापुत्रौ होतापो-तारौ । इत्यादि । पक्षे पूर्वपदलोपे पितरौ । वाग्रहणादेव मातरपितरावित्यपि ॥

[ द्वंद्वे सर्वादित्वं वा ] द्वंद्वे समासे सर्वादित्वं वा भवति । वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतरे वर्णाश्रमेतराः । वैयधिकरण्ये बहु-व्रीहौ मध्यमपदलोपश्च । कुमुदस्य गंध इव गंधो यस्य सः कुमुद-गंधिः । ( उपमानाच्च ) उपमानात्परस्य गंधशब्दस्याकारस्येकारो भवति । हंसस्य गमनमिव गमनं यस्याः सा हंसगमना ॥

( द्वन्द्वे सर्वादित्वं वा ) द्वन्द्वे समासे सर्वादीनां शब्दानां सर्वादित्वं सर्वादिकार्यं वा भवति । भवति वा न भवतीत्यर्थः । उदा० । वर्णाश्रमेतरे वर्णाश्रमेतराः । द्विस्थाने। वर्णा ब्राह्मणादयः । आश्रमा ब्रह्मचर्यादयः । इतरे शूद्रवृषलादयः । ततो वर्णाश्च आश्रमाश्च इतरे च समाहारद्वन्द्वस्ततो विभक्तिलोपे उभयत्रापि १–३ एकत्र सर्वादित्वात् ( जसी । अ इ ए ) आदौ ( सवर्णे० ) आश्रम अग्रे इतर ( अ इ ए ) यत्र सर्वादित्वं न तत्र १–३ (सवर्णे० । स्रो०) वैयधिकरण्ये इति भिन्नविभक्त्यंतानां पदानां भिन्नार्थनिष्ठत्वं वैयधिकरण्यम् । यद्वा भिन्नविभक्त्यंतत्वे सति भिन्नार्थप्रतिपादकद्वारा एकस्मिन्नर्थे वृत्तिर्व्यधिकरणं तस्य भावो वैयधिकरण्यं तस्मिन् वर्तमाने सति बहुव्रीहि-समासे मध्यमपदलोपो वक्तव्यः । कुमुद ६–१ ( ङस्स्य ) गंध १–१ ( स्रो० ) इव १–१ ( अव्य० ) गंध १–१ ( स्रो० ) कुमुदस्य गंध इव गंधो यस्येति विग्रहे अत्र कुमुदस्येति षष्ठ्यंतम् । शेषाणि प्रथमांतानि ( समासप्रत्यययोः ) इति विभक्तिलोपे ( उक्तार्थानां० ) इति इव लोपे कुमुदगंधगंध इति स्थिते अत्र मध्यमपदस्य गंधस्य लोपः । पश्चान्मध्यमपदलोपश्चेति चकाराद्गंधादेः इप्रत्ययः ( यस्य लोपः ) स्व० । १–१ । ( स्रो० ) कुमुदगंधिः । तथैव हंसस्य ६–१(ङस्स्य)गमन १–१(अतोऽम् । अम्श० । ) इव १–१ ( अव्य० ) गमनम् १–१ पूर्ववत् । हंसस्य गमनमिव गमनं यस्या इति विग्रहे बहुव्रीहिः( समास० )उक्तार्थानामप्रयोगः।हंसगमनगमन इति स्थिते मध्यमपदस्य गमनस्य लोपः । पश्चात् ( आवतः स्त्रियाम्) १–१ ( आपः ) हंसगमना । समासश्चतुर्द्धा । नित्य १ अनित्य २ लुक् ३ अलुक् ४ भेदात् ॥

**दिक्संख्ये संज्ञायाम्॥** दिग्वाचकसंख्यावाचकशब्दौ संज्ञायां विषये परपदतुल्यार्थे समस्येते स समासस्तत्पुरुषो भवति ।अविग्रहो नित्यसमासः । अन्यस्त्वस्वपदविग्रहोऽपि । दक्षिणाग्निः सप्तग्रामाः ॥

इति समासप्रक्रिया समाप्ता ।

अथ नित्यसमासमाह ( दिक्संख्ये० ) इति । दिक्संख्ये १–२ संज्ञायाम् ७–१ दिग्वाचकं संख्यावाचकं च पदं संज्ञायां वाच्यमानायां तुल्यार्थेन एकार्थेन उत्तरपदेन सह अविग्रहं विग्रहरहितं समस्यते समासश्च तत्पुरुषो भवति । तत्र समासश्च नित्यो भवति । अथ नित्यानित्यसमासस्वरूपमाह । अविग्रहो नित्यसमासः । यो नित्यसमासः स विग्रहरहितः असमस्यमानपदाविग्रहो भवति । परपदविग्रहोऽप्यपिशब्दात् स्वपदविग्रहो भवति । अस्वपदविग्रहो यथा । स्त्रियमधिकृत्य अत्राधिकृत्येति परपदेन विग्रहः । न त्वस्वपदत्वादस्वपदम् । अथवा बहु धनं यस्य सः अत्र यस्येति परपदेन विग्रहोपि भवति । अस्वपदविग्रहो यथा । अश्वादन्य इत्यप्यस्वपदविग्रहः।तथा ग्रामं प्राप्तः इत्यादौ स्वाभ्यां विग्रहः मध्यवर्तिभ्यां पदाभ्यां विग्रहः । अथ नित्यसमासोदाहरणम् । यथा ।

दक्षिणाग्निरिति अग्निभेदः । 'दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः' । इति दिग्वाची दक्षिणाशब्दः । एकार्थेन अग्निना परपदेन समस्यते समासश्च तत्पुरुषः । नित्यत्वाद्विग्रहो न क्रियते । तथा सप्तग्रामा इत्यत्र सप्तन्शब्दः संख्यावाचकः एकार्थेन ग्रामपदेन समासितः अत्र विग्रहं विनापि नित्यस्तत्पुरुषसमासः । नित्यं पदद्वयात्मकत्वात्तत्समासरूपमेव पदमित्यर्थः । दक्षिणाग्निरिति । अग्निभेदनामवाची शब्दः सप्तग्रामा इति । "पूर्वेऽव्ययेऽव्ययीभावोऽमादौ तत्पुरुषः स्मृतः । चकारबहुलो द्वन्द्वः संख्यापूर्वो द्विगुः स्मृतः ॥ १ ॥ यस्य येन बहुव्रीहिः स चासौ कर्मधारयः । इति किंचित्समासानां षण्णां लक्षणमीरितम्" ॥ २ ॥

इति चंद्रकीर्तिविरचितायां सुबोधिकायां समासदीपिका समाप्ता ।

---

## अथ तद्धितप्रक्रिया १७.

अथ तद्धितो निरूप्यते । अपत्येऽण् ॥ नाम्नोऽपत्येऽर्थेऽण्प्रत्ययो भवति। उपगोरपत्यमिति वाक्ये उपगोः अण् इति स्थिते ( समासप्रत्यययोः ) इति षष्ठीलोपः । णकारो वृद्ध्यर्थः। आदिस्वरस्य ञ्णिति वृद्धिः ॥ स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्भवति ञिति णिति च तद्धिते परतः । उकारस्य औकारो वृद्धिः ॥

अथ तद्धितो निरूप्यते । अथेति । समासकथनानंतरं तद्धितस्तद्धितसंज्ञकः प्रत्ययो निरूप्यते कथ्यत इत्यर्थः । तस्मै समामाय हितः यदि वा तेभ्यः पूर्वोक्तेभ्यः नामादिभ्यः अर्थांतरप्रकाशनेन हितस्तद्धितः स निरूप्यते कथ्यत इत्यर्थः।यद्यपि तद्धितसंज्ञकाः प्रत्यया बहवः संति तथापि जात्यभिप्रायेणैकवचनम् । सूत्रम् । ( अपत्ये० ) न पतति पिता यस्मात्तदपत्यं तस्मिन् अपत्ये७-१(अ इ ए)अण् १-१(हसे०।नाम्नो०)इति अपत्ये पुत्रपौत्रादिसंताने शिष्यप्रशिष्यादिसंताने वा वाच्ये सति नाम्नः अण् प्रत्ययो भवति । अत्रापि नामशब्देन पदमेव विवक्षितम्। अन्यथा अविभक्ति नामेत्युच्यमाने उपगोरिति षष्ठ्यंतात् अण् प्रत्ययो न स्यात् । यद्वा उपगुशब्दात्प्रथमम् अण् प्रत्ययः । ततः षष्ठीं दत्त्वा विग्रहः कार्यः । उदा० । उपगुशब्दात् अपत्येऽर्थे अण्प्रत्ययः। ततः उपगु ६-१ ( ङिति । ङस्य ) इत्यकारलोपः( स्रो० ) उपगोरपत्यमिति वाक्ये विग्रहे सति तद्धितेपि विग्रहो अन्वययोग्यत्वे सत्येव भवति। तेन वस्त्रमुपगोरत्रेत्यादौ न उपगुनाम्नः तापसस्यापत्यं संतानः पुत्रादिरिति विग्रहे कृते । ( समासप्रत्यययोः ) इति विभक्तिलोपे उक्तार्थानामिति अपत्यशब्दे लुप्ते उपगु अण् इति स्थिते णकारो वृद्ध्यर्थः । ईवर्थश्च । वृद्धिकरणे सूत्रम् । ( आदिस्वर० ) आदिश्चासौ स्वरश्च आदिस्वरस्तस्य ६-१ ( ङस्य )ञ्णिति ञ् च ण् च ञ्णौ तौ इतौ यस्य स ञ्णित्

तस्मिन् ञ्णिति ७-१ स्व०। वृद्धि १-१ ( स्तो० ) त्रिपदमिदं सूत्रम्। स्वराणां तद्धितप्रत्ययांतपदसंबंधिनां सर्वस्वराणां मध्ये यः आदिस्वरस्तस्य ञ्णिति ञिति णिति च तद्धिते प्रत्यये परे वृद्धिर्भवति। अनेन उकारस्य औकारो वृद्धिः ( आरै औ वृद्धिः ) इत्युक्तत्वात्। औपगुम् इति स्थिते ॥

**वोऽव्यस्वरे ॥ उकारस्य ओकारस्य चाव् भवति यकारे स्वरे च परे। औपगवः। वासिष्ठः। गौतमः ॥**

सूत्रम्। उश्च ओश्च वो। वो ६-२ ( सांके० ) अव् १-१ ( हसे० ) यश्च स्वरश्च यस्वरं तस्मिन् ७-१ ( अ इ ए ) त्रिपदं सूत्रम्। अंत्यस्य उवर्णस्य ओकारस्य च अव् भवति तद्धितसंबंधियकारे स्वरे च परे। उकारस्य अव्। गव्। स्व० औपगव ( कृत्तद्धितसमासाश्च ) इति नामसंज्ञायाम् १-१ ( स्तो० ) उपगुर्नाम कश्चिन्मुनिस्तस्य अपत्यम् औपगवः। स्त्री अपत्यं चेत्तर्हि औपगवी। एवं वसिष्ठस्यापत्यं वासिष्ठः। अण्प्रत्ययः। अत्र वकारस्थिताकारस्यादिस्वरस्य वृद्धिराकारः ( यस्य० ) स्व०। एवं गोतमस्यापत्यं गौतम इत्यत्राण्निमित्ता वृद्धिः। ओकारस्य औकारः १-१ ( स्तो० ) सर्वत्र तद्धिते विकल्पानुवृत्तिर्ज्ञेया इति स्वायंभुव इत्यादौ अवादेशो न ॥

**ऋ उरणि ॥ ऋकारस्य उर् भवति अणि परे [ षषो णो वाच्यो मातरि ] षाण्मातुरः। द्वयोर्मात्रोरपत्यं द्वैमातुरः ॥**

सूत्रम्। ऋ ६-१ ( सांके० ) उर् १-१ ( हसे० ) अण् ७-१ स्व०। अण्प्रत्यये परे मातृशब्दसंबंधिन ऋकारस्य उर् भवति। षष् मातृ। षष् ६-३ ( ष्णः ) इति नुट् ( षो डः। छुभिः छुः ) स्व० ( मोनु० ) मातृ ६-३ ( नुडामः। नामि ) षण्णां मातॄणामपत्यमिति विग्रहे अथवा षट् च ताः मातरश्चेति विग्रहे ( समासप्रत्यययोः ) इति विभक्तिलोपः। षष् मातृ इति स्थिते ( आदिस्वरस्य० ) इति वृद्धिः ( षो डः। वावसाने ) डस्य टः ( ञमे ञमा वा ) टस्य णः। यद्वा ( षषो णो वाच्यो मातरि ) इति केचित्। यथा ( क्वचिज्जवानामपि ञमा एष्टव्याः ) इति केचित् ( ऋ उरणि ) इति उर्। स्व० ( स्तो० ) षाण्मातुरः कार्तिकेय इत्यर्थः। एवं द्वयोः मात्रोरपत्यमिति विग्रहे उभयत्रापि द्वि ६-२ ( त्यदादेः०। आवतः०। टौसोरे। ए अय् ) स्व०। मातृ ६-२ ( ऋ रम्। स्तो०। अपत्येऽण् ) ञ्णित्त्वाद्वृद्धिः। द्वि इत्यस्य द्वै ( ऋ उरणि ) इति उर्। स्व० १-१ ( स्तो० ) द्वैमातुरः गणेशः। एवं भाद्रमातुरः। द्वावपि सतीसुतवाचकौ। "सत्यास्तु तनये षाण्मातुरवद्भाद्रमातुरः"। इत्यादि अणंताः। अन्यत्रापि अण्प्रत्ययो भवति। यतः "रागान्नक्षत्रयोगाच्च समूहात्सास्य देवता। तद्वेत्त्यधीते तस्येदमेवमादिष्वणिष्यते" ॥ १ ॥ रागाद्यथा। कुंकुमेन रक्तं वस्त्रं कौंकुमम्। नक्षत्रयोगात्। पुष्येण युक्तः

कालः पौषः। समूहात्। नराणां समूहो नारम्। स्त्रीणां समूहः स्त्रैणम्। सास्य देवतार्थे। इन्द्रो देवतास्येति ऐंद्रम्। तद्वेत्ति वा अधीते इत्यस्यार्थे। व्याकरणमधीते वेद वा वैयाकरणः। तस्येदमित्यस्यार्थे। देवदत्तस्येदं दैवदत्तम्। सुवर्णस्येदं सौवर्णम्। इत्याद्यर्थेष्वप्यणप्रत्ययः स्यात्। तदग्रे यथास्थाने साधयिष्यति॥

**अत इञनृषेः॥** अकारांतान्नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ्प्रत्ययो भवति ( यस्य लोपः ) देवदत्तस्यापत्यं दैवदत्तिः। श्रीधरस्यापत्यं श्रैधरिः। दशरथस्यापत्यं दाशरथिः। पुरंदरस्यापत्यं पौरंदरिः। रावणस्यापत्यं रावणिः॥

अथ अपत्यार्थे प्रत्ययांतरमाह। सूत्रम्। अत् ५-१ स्व० ( स्रो० ) इञ् १-१ ( हसे० ) पश्चात् ( आद्वे० ) अनृषिः न ऋषिः अनृषिः तस्मात् ५-१ ( ङिति ) इतीकारस्य एकारः ( ङस्य ) इत्यकारलोपः ( स्रो० ) पूर्व स्व०। त्रिपदम्। ऋषिवाचकशब्दवर्जितादकरांतान्नाम्नोऽपत्येऽर्थे इञ् प्रत्ययो भवति अणोऽपवादः। अत्र ञकारो वृद्ध्यर्थः। उदा०। देवदत्तस्यापत्यम् इञ्प्रत्ययः ञकारो वृद्ध्यर्थः। देवदत्त ( आदिस्वरस्य० ) इति वृद्धिः। दै ( यस्य लोपः ) स्व० १-१ ( स्रो० ) दैवदत्तिः। एवं श्रीधरस्यापत्यं श्रैधरिः। अत्र इञ्प्रत्यये श्री इत्यस्य श्रै इति वृद्धिः। तथा दशरथस्यापत्यं दाशरथिः अत्र वृद्धिकार्ये दस्य दा। पुरंदरस्यापत्यं पौरंदरिः। अत्र उकारस्य औकारो वृद्धिः। एवं रावणिः [ बाह्वादेश्च ] बाह्वादेस्तु अकारांतत्वाऽभावेपि इञ् वक्तव्यः। बाहविः। द्वापरिः। आग्निः। शार्म्मिः। सर्वत्र तद्धिते विकल्पानुवृत्तिरस्त्येव तेन वासुदेवः। शैवः। वैदेहः। इत्यादौ इञ् न स्यात्। [ व्यासवरुडसुधातृनिषादबिंबचंडालादंतस्य वाऽकः ] एभ्योऽपत्ये इञ् तद्योगे चैषामंतस्य अक् आदेशः। वैयासकिः। वारुडकिः। सौधातकिः। नैषादकिः। बैंबकिः। चांडालकिः॥

**ण्यायनणेयण्णीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः॥** गर्गादेर्नडादेरत्र्यादेः स्त्रीलिंगात्पितृष्वस्रादेश्च ण्य आयनण् एयण् णीय इत्येते प्रत्यया भवंति अपत्येऽर्थे। गर्गस्यापत्यं गार्ग्यः। वत्सस्यापत्यं वात्स्यः। नडस्यापत्यं नाडायनः। चरस्यापत्यं चारायणः। अमुष्यापत्यम् आमुष्यायणः। अत्रेरपत्यम् आत्रेयः। कपेरपत्यं कापेयः। गंगाया अपत्यं गांगेयः। मह्या अपत्यं माहेयः। पैतृष्वस्रीयः। मातृष्वस्रीयः॥

सूत्रम् ( ण्यायनणेयण्णीया० ) ण्यश्च आयनण् च एयण् च णीयश्च ण्यायनणे-

यण्णीयाः । १–३ ( सवर्णे० ) गर्गश्च नडश्च अत्रिश्च स्त्री च पितृष्वसा च गर्गनडात्रिस्त्रीपितृष्वसारस्ते आदौ यस्य स गर्गनडात्रिस्त्रीपितृष्वस्रादिस्तस्मात् ५–१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० ) द्विपदमिदं सूत्रम् । द्वंद्वांते श्रूयमाणं पदं प्रत्येकं संबध्यत इत्यादिशब्दस्य प्रत्येकं योगस्तेनापत्येऽर्थे गर्गादेर्ण्यः । नडादेरायनण् । अत्र्यादेः स्त्रीलिंगाच्च एयण् । पितृष्वस्रादेः णीयः । सर्वत्र णकारो वृद्ध्यर्थः । ण्यणीययोर्वृद्ध्यर्थमादौ प्रयुक्तो णकारोऽणंतत्वनिराससूचकः । अणंतत्वाभावादीबनिषेधः । गर्ग । वत्स । गर्गस्यापत्यं वत्सस्यापत्यमिति विग्रहे ण्यण् । णित्त्वाद्वृद्धिः । गार्ग वात्स ( यस्य लोपः ) उभयत्रापि स्त्र० (स्रो०) गार्ग्यः । वात्स्यः । स्त्र्यपत्यं चेत् गार्ग्या । वात्स्या । नडस्यापत्यं नाडायनः । आयनण् प्रत्ययः णित्त्वाद्वृद्धिः ( यस्य लोपः ) । स्त्र० १–१ एवं चरस्यापत्यं चारायणः । स्त्रियां नाडायनी । चारायणी । अदस् ६–१ ( त्यदा० । दस्य मः । ङस्य । मादू । क्वि० ) अमुष्यापत्यमिति विग्रहे आयनण्प्रत्ययः णित्त्वाद्वृद्धिः । आ ( अलुक् क्वचित् ) इति षष्ठ्या विभक्तेर्न लोपः । ( यस्य लोपः ) स्त्र० । १–१ ( स्रो० ) आमुष्यायणः । अस्यार्थः । "स्यादामुष्यायणो मुख्यपुत्रः प्रख्यातपुत्रकः" । इति । अत्रेरपत्यम् आत्रेयः । एयण्प्रत्ययः आदिवृद्धिः ( यस्य० ) स्त्र० १–१ ( स्रो० ) एवं कपेरपत्यं कापेयः । अणंतत्वादीप् । आत्रेयी । कापेयी । गंगायाः अपत्यं गांगेयः । मह्याः अपत्यं माहेयः । एवं वैनतेयः[1] । सैंहिकेयः[2] । काद्रवेयः । पितुः स्वसा पितृष्वसा । मातुः स्वसा मातृष्वसा [ मातृपितृभ्यां स्वसुः सकारस्य षत्वं वक्तव्यम् ] पितृष्वसृ ६–१ ( ऋतो ङ उः ) डित्त्वाट्टिलोपः । अग्रे अपत्य १–२ ( अतोऽम् ) पितृष्वसुरपत्यं पैतृष्वस्रीयः । एवं मातृष्वस्रीयः । उभयत्रापि णीयः प्रत्ययः । पितृशब्दस्य इकारस्य ऐकारो वृद्धिः । मातृशब्दे न वृद्धिः । वृद्धेरेव सद्भावात् । एवं स्वसुरपत्यं स्वस्रीयः । अत्र ( णितो वा ) इति विकल्पान्न वृद्धिः ॥

**लुग्बहुत्वे क्वचित् ॥** अपत्येऽर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिदृष्यनृषिविषये लुग् भवति । गर्गाः । वसिष्ठाः । अत्रयः । विदेहाः ॥

अथ स्यादौ विषये तद्धितप्रत्ययांतानां बहुवचने साधनविधिमाह । लुक् १–१ ( ह्से० ) बहुत्व ७–१ ( अ इ ए ) क्वचित् १–१ ( अव्य० ) त्रिपदम् । अपत्यर्थे उत्पन्नस्य अणादेःप्रत्ययस्य बहुवचने सति क्वचिदिति ऋषिवाचकशब्दविषये अनृषिवाचकविषये वा लुग्भवति न स्त्रियाम् । तत्र ण्यप्रत्ययस्य यथा । गार्ग्यः । गार्ग्यौ । बहुवचने गार्ग्य अस् इति स्थिते ( लुग्बहुत्वे० ) इति ण्यप्रत्ययस्य लुक् । निमित्ताभावे नैमित्तिकस्याप्यभाव इति वृद्धेरभावः । गर्ग अस् इति स्थिते ( सवर्णे० । स्रो० ) गर्गाः । अग्रेपि गार्ग्यम् । गार्ग्यौ । गर्गान् । गार्ग्येण । गार्ग्याभ्याम् । गर्गैः । एवं सर्वत्र

१ गरुडः । २ राहुः ।

बहुवचने ण्यप्रत्ययलुक् । एवं वासिष्ठः । वासिष्ठौ । बहुवचने वसिष्ठ १-३ अत्र अणो लोपः । निमित्ताभावे० इति वृद्धेरप्यभावः । वसिष्ठ अस् ( सव० । स्रो० ) वसिष्ठाः। आत्रेय १-१ एयण् लोपः । अत्रि अस् ( ए ओ ज० । ए अय् ) स्व० ( स्रो० ) आत्रेयः । आत्रेयौ । अत्रयः । आत्रेयम् । आत्रेयौ । अत्रीन् इत्यादिरूपाणि । वैदेह १-३ अणो लोपः । वृद्धेरप्यभावः । विदेह अस् ( सव० । स्रो० ) विदेहाः । एवं राघवः । राघवा । रघवः ॥

**देवतेदमर्थे ॥ देवतार्थे इदमर्थे चोक्ताः प्रत्यया भवंति । इंद्रो देवताऽस्येति ऐंद्रं हविः । सोमो देवतास्येति सौम्यम् । देवदत्तार्थमिदं वस्त्रं दैवदत्तम् ॥**

सूत्रम् । ( देवतेदमर्थे ) देवता च इदं च देवतेदमौ तयोरर्थौ देवतेदमर्थस्तस्मिन् ७-१ । ( अ इ ए ) एकपदमिदं सूत्रम् । देवता स्वामित्वेन अधिष्ठापकः तस्यार्थे । इदमर्थाति । अस्येदं वस्तु अस्मिन्नर्थेपि उक्ता अणादयः प्रत्यया भवंति । इंद्रो देवताऽस्येति वाक्ये अत्र देवतार्थे अण् प्रत्ययः । णित्त्वाद् वृद्धिः । ऐंद्र ( यस्य० ) स्व० १-१ ( अतोऽम् । अम्श० ) ऐंद्रं हविः । इंद्रार्थे कल्पितं घृतमित्यर्थः । सोमो देवता अस्येति वाक्ये अत्र देवतार्थे ण्यप्रत्ययः ( आदिस्वरस्य० ) इति वृद्धिः । सौ ( यस्य० ) स्व० १-१ कुलशब्दवत्सौम्यम् देवदत्तार्थमिदम् अत्र इदमर्थे अण् । वृद्धिः । दैवदत्तम् । ( यस्य० ) स्व० । १-१ कुलशब्दवत् । एवम् आग्नेयम् वायव्यम् पित्र्यम् । इति देवतार्थे । अथ इदमर्थे नद्या अयं नादेयः । इत्यादि । देवतेदमा इत्युक्तेपि सिद्धौ अर्थग्रहणादन्यत्राप्यर्थे च उक्ताः प्रत्यया भवंति । यथा उदुंबराणि संत्यस्मिन्देशे औदुंबरो देशः । एवं बादरः इत्यादि ज्ञेयम् ॥

**क्वचिद्द्वयोः ॥ पूर्वपदोत्तरपदयोः क्वचिद्वृद्धिर्भवति । आग्निमारुतं कर्म । सुहृदो भावः सौहार्दम् । [ अत्र भावे अण् वक्तव्यः ] ॥**

अथ वृद्धिविशेषमाह । क्वचित् १-१ ( अव्य० ) द्वि १-२ ( त्यदा० । ओसि । ए अय् ) स्व० । ( स्रो० ) पूर्व ( चपा अ० ) क्वचिदिति क्वचित्प्रयोगांतरे पूर्वपदादेः स्वरस्य उत्तरपदादेः स्वरस्य च द्वयोरपि वृद्धिर्भवति । यथा अग्निमरुत् अग्निश्च मरुच्च अग्निमरुतौ तयोरिदं कर्म । इदमर्थेऽण् । यद्वा [ कर्मण्यप्यण् वक्तव्यः ] ( क्वचिद्द्वयोः ) इति अग्निमरुतोरुभयोरप्याद्यस्वरस्य वृद्धिः । स्व० । १-१ कुलशब्दवत् । आग्निमारुतम् एतत्कर्म । सुहृद् । सु शोभन इव हृदयं यस्य स सुहृद् सुहृदो भावः [ अत्र भावेऽण् वक्तव्यः ] पश्चात् ( क्वचिद्द्वयोः ) इति सुहृद् इत्यत्र उकारऋकारयोरपि वृद्धिः । सौहार्द ( रहाद्य० ) जल० । स्व० । १-१ कुलशब्दवत् । सौहार्दम् । [ अत्र भावेऽण् वक्तव्यः ]

इति वक्तव्यवलादनुक्तेऽपि अण्। एवं सुभगस्य भावः सौभाग्यम्। एवं परस्त्रिया अपत्यं पारस्त्रैणेयः ॥

णितो वा ॥ उक्ताः प्रत्यया विषयांतरे णितो वा भवंति। अजो गौर्यस्यासौ अजगुः शिवः। तस्येदं धनुराजगवम्—अजगवं वा। कुमुदस्य गंध इव गंधोऽस्येति कुमुदगंधिः। तस्यापत्यं स्त्री कौमुदगंध्या। (आवतः स्त्रियाम्) इत्याप्प्रत्ययः। श्वशुरस्यायं ग्रामः श्वाशुर्यः। विष्णोरिदं वैष्णवम्। गव्यम्। कुल्यम् [चतुरश्चलोपः] चतुर्शब्दस्य चकारलोपो भवति ण्यणीययोः परतः। तुर्यः। तुरीयः। [अन्यस्य दक्] अन्यशब्दस्य दक् आगमो भवति ईयप्रत्यये परतः। अन्यदीयम्। अर्धजरतीयम् ॥

अथ प्रयोगानुसारेण वृद्धेरभावमाह। सूत्रम्। णित् १–३ स्वर० (स्रो०) वा ३–१ (अव्य०। ह्वे। उ ओ।) उक्ता अणादयः प्रत्यया विषयांतरे कार्यांतरे अर्थांतरे वा णितो णकारानुबंधा णित्संज्ञका वा भवंति। वा भवंतीत्यत्र वाशब्दो व्यवस्थावाचकः। बहुलार्थकः। तेन एतेषु परेष्वादिस्वरस्य क्वचिन्नित्यं वृद्धिः। क्वचिद्वृद्धेरभावोऽपीत्यर्थः। क्वचिद्विकल्पः। उदा०। अजगुः अजोऽजन्मा गौर्वृषभो यस्य स अजगुः शिवः (गोः) इति गोशब्दस्य ह्रस्वः। अजगुः। द्विस्थाने। अजगोरिदं धनुः। अत्र इदमर्थेऽण्। उभयत्रापि। एकत्र वृद्धिः। आ। अन्यत्र न वृद्धिः। (वोव्यस्वरे) अव्। स्वर०। १–१ कुलवत्। आजगवमजगवं वा धनुः। अत्र वा वृद्धिः। कुमुदस्य गंध इव गंधो यस्य स कुमुदगंधिः वैयधिकरण्ये बहुव्रीहौ मध्यमपदलोपः (गन्धादेरिः। यस्य०) स्व०। कुमुदगन्धिस्तस्यापत्यमिति वाक्ये (ण्यायनणेयण्णीयाः०) इति अपत्येर्थे ण्यः। अत्राद्यस्योकारस्य नित्यं वृद्धिः। कौ। (यस्य०) स्व० १–१ स्त्रीत्वात् (आवतः स्त्रियाम्) इत्याप्। अत्र नित्यं वृद्धिः। कौमुदगंध्या। एवं श्वशुरस्यायमिति वाक्ये इदमर्थे ण्यप्रत्ययः। वृद्धिः (यस्य०) स्वर०। १–१ श्वाशुर्यो ग्रामः। विष्णु। विष्णोरिदमिति वाक्ये अण्प्रत्ययः। वृद्धिः। वै (वोव्यस्वरे) स्व०। १–१ कुलवत्। केचित् विष्णोः स्वरूपं वैष्णवमिति पठंति इदमर्थस्य पूर्वं प्रणीतत्वाद्विष्णोरिदमिति न पठंति। एवं गोरिदं घृतादि गव्यम्। इदमर्थे ण्यप्रत्ययः (वोव्य०) गव्यम्। कुलवत्। कुले भवं कुल्यम् (कारकात्०) इति ण्यप्रत्ययः। य। अत्र प्रयोगद्वये वृद्धेरभावः (यस्य०) युष्मद् अस्मद्। तवेदं ममेदमिति विग्रहे इदमर्थे णीयः (त्वन्मदेकत्वे) त्वत् मत्। क्वचिदपदांतेपि पदांतताश्रयणात्

( चपा अ० ) स्व० १-१ ( अतोऽम् ) तवेदं त्वदीयम् । ममेदं मदीयम् । अत्रापि न वृद्धिः । एवं तस्येदं-तदीयम् । यस्येदं-यदीयम् । एतस्येदं-एतदीयम् । अत्र णीयप्रत्ययो न णित् । ( चतुरश्चलोपश्च ) इति । चतुर्शब्दसंबंधिनश्चकारस्य लोपो भवति ण्यणीयप्रत्यययोः परयोः । इत्यनेनोभयत्रापि चलोपः । चतुर्णां संख्यापूरणः अयं तुर्यः तुरीयः । अत्र पूरणार्थस्य इदमर्थातःपातित्वात् इदमर्थे ण्यणीयप्रत्यययोः अत्रापि न णित्त्वम् । ( अन्यस्य दृक् ) अन्यशब्दस्य णीयप्रत्यये परे दगागमो भवति । ऋकारः स्थाननियमार्थः । अकार उच्चारणार्थः । अन्यः । अन्यस्येदमिति विग्रहे इदमर्थे णीयप्रत्ययः । ईय । दगागमः । स्व० । अन्यदीयम् । अन्यत्रापि दगागममिच्छंति । अन्यदर्थः । अन्यद्रागः । अन्यदाशीः । अन्यदुत्सुकः । अन्यद्भाविः । अन्यदाशाः । अन्यदास्थाः । इत्यादि अर्द्धजरती । अर्द्धजरत्याः अर्द्धवृद्धायाः स्त्रियाः इदं वस्त्रादि अर्द्धजरतीयम् । इदमर्थे णीयप्रत्ययः (यस्य०) स्व० १-१ कुलवत् । गव्यमित्यारभ्योक्तप्रयोगेषु न वृद्धिः ॥

**कारकात्क्रियायुक्ते ॥ कारकादप्येते प्रत्यया भवंति क्रियायुक्ते कर्तरि कर्मणि चाभिधेये । कुंकुमेन रक्तं वस्त्रं कौंकुमम् । कौसुंभम् । मथुराया आगतस्तत्र जातो वा माथुरः । ग्रामे भवो ग्राम्यः । धुरं वहतीति धुर्यः-धौरेयः ॥**

सूत्रम् । कारक ५-१ ( ङसिरत् । सवर्णे० ) क्रियायुक्ते क्रियया युक्तं क्रियायुक्तं तस्मिन् ७-१ ( अइ ए ) द्विपदम् । कारकात् कर्तृकर्मकरणसंप्रदानापादानाधारलक्षणादपि एतेऽणादयः प्रत्यया भवंति क्रियासहिते कर्तरि कर्मणि च वाच्ये सति । षट् कारकाणि संति । ततः कारकेभ्यः इति वक्तव्ये कारकादित्येकवचनं जात्यभिप्रायेण । कुंकुम ३-१ ( टेन । अ इ ए ) कुंकुमेन रक्तं वस्त्रमिति विग्रहे अत्र कुंकुमेनेत्यत्र करणं कारकम् । तथा रंजनरूपक्रियासहितं वस्त्रं कर्म । तच्चात्राभिधेयम् । अतोऽण् ( समासप्रत्यययोः ) इति तृतीयालोपः । उक्तार्थानामप्रयोगः । णित्त्वात् वृद्धिः ( यस्य० ) कौंकुमम् । कुसुंभेन रक्तं वस्त्रं कौसुंभम् । मांजिष्ठम् । मथुरा ५-१ ( ङितों यट् । सवर्णे० ) मथुराया आगतस्तत्र जातो वा इति वाक्ये अत्र अपादानं कारकम् ( विश्लेषावधौ० ) इति पंचमी । आगमनक्रियायुक्तो नरः कर्ता अभिधेयस्ततोऽण् प्रत्ययः । ( आदिस्व० । यस्य० ) स्व० । माथुरः । एवं ग्रामे भवो ग्राम्यः । अत्र भवनक्रियायुक्ते कर्तरि अभिधेये ग्रामे इत्यधिकरणकारकात् ण्यप्रत्ययः । ( यस्य० ) स्व० । १-१ ( स्रो० ) । धुर् २-१ द्वितीयाने धुरं वहतीति धुर्यो धौरेयो वा । एकत्र ण्यप्रत्ययः । तत्र वाग्रहणान्न वृद्धिः । अन्यत्र एयण् । तत्र वृद्धिः धौ । स्व० । उभयत्रापि १-१ धुर्यः ( स्वोर्वि ह० ) इति ( तद्धितयकारे नेति वक्तव्यम् ) तेन धुर्यः इत्यत्र

दीर्घत्वाभावः । प्रक्रियामते तु ( नभकुर्छुराम् ) इति दीर्घत्वनिषेधः । धौरेयः । अत्र वहनक्रियाश्रये कर्त्तरि अभिधेये धुरमिति कर्मकारकात् एयण् प्रत्ययः । एवम् आत्मने हितः आत्मनीनः । विश्वजनाय हितः विश्वजनीनः । अत्र संप्रदानकारकाद्वक्ष्यमाणः ईनप्रत्ययः ॥

केनेयेकाः॥क ईन इय इक इत्येते प्रत्यया भवंति भवाद्यर्थेषु।णित्वं चैषां वैकल्पिकम् । कर्णाटे भवः कार्णाटकः—कर्णाटको वा । ग्रामादागतस्तत्र जातो वा । ग्रामीणः । सध्रीचीनः । समीचीनः । तिरश्चीनः । [ यलोपश्च ] क्वचिद्यकारलोपो भवति । कन्याया जातः कानीनः । पुष्येण युक्ता पौर्णमासी पौषी । पौष्यां भवः पौषीणः। [ इयो वा ] क्षत्त्रात् भवः क्षत्त्रियः—क्षात्त्रः।शुक्रो देवतास्येति शुक्रियम् । इंद्रस्य इदं इंद्रियम् । अक्षैर्दीव्यतीत्याक्षिकः । शाब्दिकः । वेदे भवा वैदिकी स्तुतिः ऋक् वा । तार्किकः ॥

सूत्रम् ( केनेयेकाः ) कश्च ईनश्च इयश्च इकश्च केनेयेकाः १–३ ( सवर्णे० । स्रो०) एकपदम् ( नाम्नो० ) भवाद्यर्थेषु उत्पन्नागताद्यर्थेषु इदमर्थे च वाच्ये सति क ईन इय इक एते चत्वारः प्रत्यया भवंति । णित्वं चैषामिति । एषां कादीनां प्रत्ययानामणित्त्वेऽपि वैकल्पिकं णित्वं व्यवस्थितविकल्पेन णित्वं भवति ( णितो वा ) इत्युक्तत्वात् । तेन क्वचित्प्रयोगे विकल्पेन वृद्धिः । क्वचिन्नित्यं वृद्धिः । क्वचित्सर्वथापि वृद्धिर्न भवतीति भावार्थः । कर्णाटे कर्णाटदेशे भवः कार्णाटकः—कर्णाटको वा । उभयत्रापि कप्रत्ययः । एकत्र वृद्धिः । अन्यत्र न वृद्धिः । १–१ ( स्रो० ) अत्र भवार्थे कप्रत्ययः । ग्राम । ग्रामादागतस्तत्र जातो वा ग्रामीणः । आदिशब्दात् अत्र आगमार्थे ईनप्रत्ययः । ( यस्य० । ऋर्न्नो० ) । १–१ सध्र्यच् । सध्र्यङ् । एवं सध्रीचीनः । अथवा सध्रीचि भवः सध्रीचीनः अत्र स्वार्थे ईनप्रत्ययः । भवार्थे वा ईनः । वर्णविश्लेषे सध्रि अंच् ( अंचेर्दीर्घश्च ) इति अलोपः । इकारस्य च ई दीर्घः । स्व० । १–१ एवं सम्यङ् । एवं समीचीनः । यद्वा । समीचि भवः समीचीनः । सम्यच् ईनप्रत्ययः । ( अंचेर्दीर्घश्च ) समीच् । स्व० । १–१ प्रयोगद्वयेपि वैकल्पिकत्वान्न वृद्धिः । एवं तिरश्चि भवस्तिरश्चीनः । तिर्यच् ईनप्रत्ययः (तिरश्चादयः) इति तिरश्च् आदेशः । स्व० १–१ ( स्रो० ) यलोपश्च । तद्धितप्रत्यये परे नाम्नासुपधाभूतस्य यकारस्य लोपो भवति । कन्या १–१ कन्यायां भवः कानीनः । ईप्रत्ययः कल्पितणित्वाद् वृद्धिः ( यस्य० ) यलोपश्च । अनेन यकारलोपः । कानीनः १–१ ।

ननु कन्यायाः कथमपत्यं संभवति । नैवम् । देवतामुनिमाहात्म्यात् कन्याया अपत्य घटते । कानीनो द्वैपायनमुनिः । एवं पुष्या । पुष्येण युक्ता रात्रिः पौर्णमासी वा पौषी । अत्र ( कारकात्० ) इति अण् । वृद्धिः । पौ ( यस्य० ) यलोपश्च । स्व० ( त्रण ईप् ) पुनः ( यस्य० ) स्व० । १-१ ( हसे० ) पौषी । यकारलोपप्रसंगादि- हैदमुदाहरणम् । अन्यत्रापि यलोपमाह । "मत्स्यस्य यस्य स्त्रीकारे ईपि वाऽगस्त्य- सूर्ययोः । तिष्यपुष्ययोर्नक्षत्रे अणि यस्य विभंजना" ॥ मत्सी । अगस्त्यस्यायम् आगस्तीयः । अगस्त्यस्येयं दिक् आगस्ती । सूर्यस्यायं सौर्यः । तत्र भवः सौरीयः सौर्यस्येयं दिक् सौरी । तिष्येण युक्तः कालस्तैषः । पुष्येण युक्तः कालः पौषः । इत्यादि । क्षतात्प्रहारात् त्रायते इति क्षत्रम् । क्षत्राद्भवः क्षत्रस्यापत्यं वा क्षत्रियः । अत्र इय् ( यस्य० ) स्व० । १-१ ( अतोऽम् ) पक्षेऽण् । क्षात्रः । एवं शुक्राद्भवं शुक्रियम् । यद्वा शुक्रो देवता अस्येति वा शुक्रियम् । तथा इंद्राद्भवमिंद्रियम् । तथा इंद्रस्यात्मनः प्रत्यक्षज्ञानकारणम् इंद्रियम् । क्षत्रियम् । शुक्रियम् । अत्र प्रयोगत्र- योपि विकल्पनात्सर्वथापि न वृद्धिः । अक्षैः पाशकैर्दीव्यति आक्षिकः । अत्र ( कारकात् ) इति क्रीडनार्थे इकप्रत्ययः । भवादित्वाद्वा णित्त्वं चैषाम् । इति णित्त्वं वृद्धिश्च ( यस्य० ) स्व० । १-१ ( स्रो० ) शब्दमधीते वेत्ति वा शाब्दिकः । वेदे भवा वैदिकी स्तुतिः ऋक् वा । इक्प्रत्यये ( इकण् ) इति णित्वाश्रयणादणं- तत्वे ( त्रण ईप् । यस्य० ) १-१ ( हसे० ) वैदिकी । एवं शास्त्रेण जयतीति शास्त्रिकः । धनुषा जयतीति धानुष्कः । भवता प्रोक्तं भवतः इदं वा भावत्कम् ॥

**त्यतनौ ॥ किमादेरद्यादेर्भवाद्यर्थे च त्यतनौ प्रत्ययौ भवतः। कुत्र- भवः कुत्रत्यः।कुतस्त्यः।ततस्त्यः।अद्यभवः अद्यतनः।ह्योभवः ह्यस्तनः। श्वोभवः श्वस्तनः।सदाभवः सदातनः । सनातनः [ दक्षिणापश्चात्पु- रसस्त्यण् वक्तव्यः ] दाक्षिणात्यः । पाश्चात्त्यः । पौरस्त्यः ॥**

सूत्रम् ( त्यतनौ ) त्यश्च तनश्च त्यतनौ १-२ ( ओ औ औ ) एकपदम् । किमादेरद्यादेश्चेति । किमादेर्भवाद्यर्थे त्यप्रत्ययो भवति तथैव अद्यादेस्तनः । अद्या- द्यव्ययसाहचर्यात् किमादिरप्यव्ययं गृह्यते । भवाद्यर्थे इत्यत्र आदिशब्दादागतस- दृशा गृह्यंते । कुत्र भवः कुत्रत्यः । अत्र किमोऽव्ययाद्भवे अर्थे त्यप्रत्ययः एवं तत्र भव इति तत्रत्यः । तदोऽव्ययात् । अत्र भवः अत्रत्यः । इत्यत्र इदमो अव्ययम् । तथा कुतो भवः कुत आगतो वा कुतस्त्यः । अमा सह भवो अमात्यः । इह भव इहत्यः। इत्यादिशब्दाज्ज्ञेयम् । अद्य भवः अद्यतनः । अत्र अद्यादेर्भवार्थे तनप्रत्ययः । ह्यो गत- दिने भवो ह्यस्तनः । श्व आगामिदिने भवतीति श्वस्तनः।सदाभवः सदातनः । सना निरं-

तरं भवतीति सनातनः । एवं दोषातनम् । सायंतनम् । चिरंतनम् । पुरातनम् । प्राक्तनम् । इत्यादि । [ दक्षिणापश्चात्पुरसस्त्यण् वक्तव्यः ] दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥

**स्वार्थेऽपि ॥** उक्ताः वक्ष्यमाणाश्च प्रत्ययाः स्वार्थेऽपि भवंति । देवदत्त एव दैवदत्तकः । चत्वार एव वर्णाश्चातुर्वर्ण्यम् । चोर एव चौरः । ( भागरूपनामभ्यो धेयः ) भागधेयम् । रूपधेयम् । नामधेयम् ॥

सूत्रम् ( स्वार्थेऽपि ) स्वस्य अर्थः स्वार्थस्तस्मिन् ७-१ ( अ इ ए ) अपि १-१ ( अव्य० ) पूर्वोक्ता अणादयः केनेयेकाश्च प्रत्ययाः स्वार्थे अपत्याद्यर्थवर्जितेपि मूलार्थे एव भवंति । देवदत्त एव देवदत्तकः । अत्र स्वार्थे कः । चतुर्वर्णाः । चत्वार एव वर्णा इति वाक्ये ष्यप्रत्ययः वृद्धिः । जल० ( यस्य लोपः ) स्व० । १-१ । कुलवत् । चातुर्वर्ण्यम् । चोर एव चौरः । स्वार्थे अण् ( यस्य० ) वृद्धिः । द्वितीय एव द्वैतीयिकः । तृतीय एव तार्तीयिकः । त्रयो लोका एव त्रैलोक्यम् ॥

[ अणीनयोर्युष्मदस्मदोस्तवकादिः ] अण् च ईनश्च अणीनौ तयोः परतः युष्मदस्मदोः यथासंख्येन तवकममकौ आदेशौ भवतः।एकत्वे तवकममकौ । द्वित्वबहुत्वयोर्युष्माकास्माकौ।तव इदं तावकम्।मम इदं मामकम् । तावकीनः । मामकीनः । यौष्माकः । आस्माकः। यौष्माकीणः । आस्माकीनः ॥

[ अणीनयोः० ] इत्यादि वक्तव्यरूपम् । युष्मदस्मादित्येतयोः अण्प्रत्यये ईनप्रत्यये च परे तवकादिरादेशो भवति । आदिशब्दाद्विवचनबहुवचनयोर्विषये युष्मदस्मदोर्युष्माकास्माकौ आदेशौ भवतः । तत्र युष्मद एकत्वे अणीनयोः परयोस्तवकादेशः । द्वित्वे बहुत्वे च युष्माकः।अस्मदश्च एकत्वे ममकादेशः। द्वित्वे बहुत्वे च अस्माकः । युष्मद् अस्मद् । तवायं तावकः । ममायं मामकः । उभयत्रापि इदमर्थे अण् । एकस्य तवकः । द्वितीयस्य ममकः। णित्त्वात् ( आदिस्वरस्य० ) इति वृद्धिः ( यस्य लोपः ) १-१ ( स्रो० ) पुनः युष्मद् अस्मद् । तवायं तावकीनः । ममायं मामकीनः । भवाद्यर्थे इति । आदिशब्दात् इदमर्थेऽपि ईनप्रत्ययः वृद्धिश्च ( यस्य० ) स्व० । सिद्धम् । युष्मद् अस्मद् । युवयोः युष्माकं वा अयं यौष्माकीणः । आवयोः अस्माकं वा अयम् आस्माकीनः । द्वाभ्यामण् । द्वाभ्यामीनः । युष्मदो युष्माकः आदेशः । अस्मदश्च अस्माकः । वृद्धिः । यौष्माकः । आस्माकः। सर्वत्र ( यस्य० ) यौष्माकीण इत्यत्र अवप्रत्याहारकवर्गपवर्गान्तरत्वात् ( ष्रनो० ) ॥

वत्तुल्ये ॥ तुल्ये सादृश्यार्थे वत्प्रत्ययो भवति ।चंद्रेण तुल्यं चंद्रवन्मुखम् । घटेन तुल्यं घटवत् उदरम् । पटवत् कम्बलम् ॥

सूत्रम् । वत् १-१ ( हसे० ) तुल्य ७-१ सदृशत्वस्यार्थे उपमानार्थे वाच्ये वत्प्रत्ययो भवति । चंद्र । चंद्रेण तुल्यं सदृशं चंद्रवत् । वत्प्रत्ययः । ( क्त्वाद्यंतं वा ) इति वत्प्रत्ययांतस्य अव्ययसंज्ञा । ततः १-१ ( अव्य० ) एवं घटेन तुल्यं घटवत् । ( सार्वविभक्तिकाद्वत् ) इत्येके । यथा-घटवत् वेणुकरंडे तिष्ठति किं निर्मलं नीरम् । अत्र घटवत् पटवत् इति सप्तम्यंताद्वत् । गिरिवत्तुंगो गजः । इत्यादौ गुणतुल्यत्वेऽपि वत् । राजेव वर्त्तते राजवत् । देवमिव भवंतं पश्यामि इति देववत् । राज्ञेव व्यवहृतमनेन राजवत् । ब्राह्मणायेव देवदत्ताय ददाति ब्राह्मणवत् । पर्वतादिव आसनादवरोहति पर्वतवत् । ब्राह्मणस्येव वृत्तमस्येति ब्राह्मणवत् । मथुरायामिव पाटलिपुत्रे प्रासादाः मथुरावत् । एवं यथाप्रयोगं ज्ञेयम् ॥

भावे तत्वयणः॥शब्दस्य प्रवृत्तिनिमित्तं भावः तस्मिन्भावे त त्व यण् इत्येते प्रत्यया भवंति । ब्राह्मणस्य भावो ब्राह्मणता । तांतस्य नित्यं स्त्रीलिंगत्वादसमाहारे ता च । [ त्रेर्गुणश्च ] त्रेता । जनता । त्वयणौ नपुंसकलिंगौ भवतः। ब्राह्मणत्वम् । ब्राह्मण्यम् । सुमनसो भावः सौमनस्यम् । सौभाग्यम् । विदुषो भावः वैदुष्यम् [ कर्मण्यपि यण् वक्तव्यः]ब्राह्मणस्य कर्म ब्राह्मण्यम्।राज्ञ इदं कर्म राज्यम्-राजन्यम्। नो वा॥ नांतस्य टेर्लोपो भवति यकारे स्वरे च परे। इति टिलोपः ॥

सूत्रम्। भावे ७-१ ( अ इ ए ) तत्वयण् तश्च त्वश्च यण् च तत्वयण् १-३ स्व०। ( स्रो० ) अथ सूत्रं व्याचिख्यासुः प्रथमं भावशब्दं व्याचष्टे । शब्दस्य प्रवृत्तिनिमित्तं भावः । येन शब्दस्य प्रवृत्तिः प्रवर्त्तनं संपद्यते भवति तत्प्रवृत्तिनिमित्तम् । ततो यच्छब्दस्य ब्राह्मणादेः प्रवृत्तेः कारणं स एव भावः । जातिद्रव्यगुणक्रियाभिः शब्दस्य प्रवृत्तिनिमित्तं भाव इत्युच्यते तस्मिन् भावेर्थे त त्व यण् इत्येते त्रयः प्रत्यया भवंति । उदा० । ब्राह्मणस्य भाव इति विग्रहे अत्र ब्राह्मण इति जातिरूपशब्दस्य यो भावो यजनादिक्रियानिष्ठत्वलक्षणः स ब्राह्मणशब्दप्रवृत्तिनिमित्तमतस्तत्प्रत्ययः । अत्र तप्रत्ययांतं नाम स्त्रीलिंगम् । त्व यण् इत्येतदंतं नपुंसकलिंगं तत्र तांतस्य नित्यं स्त्रीलिंगे वर्त्तमानत्वात् ( आवतः स्त्रियाम् ) इत्याप् । स्त्रीलिंगाधिकारात् पुनर्विशेषं वक्तव्येनाह [ समाहारे ता च ] समाहारेर्थेपि ताप्रत्ययो भवति । चशब्दात्तस्मिन् परे त्रेर्गुणः । ताप्रत्य-

ांतश्च आवंत इत्यर्थः। क्वचित्तु ( समाहारेतश्च ) इति पश्चात् ( आवतः स्त्रियाम् ) त्रि–त्रयाणां समाहारस्त्रेता। अत्र ताप्रत्यये कृते त्रेर्गुणः। १–१ ( आपः )सेर्लोपः। जन–जनानां समाहारो जनता। एवं यण्प्रत्यये ब्राह्मणस्य भावो ब्राह्मण्यम् १–१ ( अतोऽम् ) सुमनस्–सुमनसो भावः सौमनस्यम्। द्रव्यम्। अत्र यण् वृद्धिः। सौ। स्व०। १–१ ( अतोम् ) सुभग–सुभगस्य भावः सौभाग्यम्। अत्र गुणः। अत्र यण्प्रत्यये ( क्वचिद्द्वयोः ) इति सु भग इत्युभयोर्द्वयोर्वृद्धिः ( यस्य० ) स्व०। ( अतोम् ) विद्वस्–विदुषो भावो वैदुष्यम्। अत्र क्रिया यण् वृद्धिः। वै ( वसोर्व उः ) स्व० ( क्विला० ) सस्य षः। स्व०। कुलवत् एवं विद्वत्ता। विद्वत्त्वम्। ( वसां रसे। खसे च० ) स्व०। सर्वत्र तद्धितविकल्पानुवृत्तिः। तेन यूनो भावो यौवनम्–रमणीयस्य भावो रमणीयकम्–रामणीयकम्। वृद्धस्य भावो वार्द्धकम्। चपलस्य भावश्चापलम्। इत्यादौ अण्प्रत्ययोपि भवति। ( कर्मण्यपि० )कर्मार्थेपि यण्प्रत्ययो वक्तव्यः। ब्राह्मणस्य कर्म ब्राह्मण्यम्। सुगमम्। राजन्–राज्ञ इदं कर्म राज्यम्। राजन्यं च। उभयत्रापि कर्मणि यण् एकत्र ( नो वा ) इति टिलोपः। राज्। स्व०। अन्यत्र न टिलोपः। स्व०। उभयत्रापि १–१ कुलवत्। जातावपि यण्। राज्ञो जातीयः राजनीयः। अपिशब्दात् मुनेः मौनम्। कर्मणि साधुः कर्मण्यः। सभायां साधुः सभ्यः। यशसे हितं यशस्यम्॥

**लोहितादेर्डिदिमन्॥** लोहितादेर्भावेऽर्थे इमन्प्रत्ययो भवति स च डित्। डित्वाट्टिलोपः। लोहितिमा। अणोर्भावः अणिमा। लघोर्भावो लघिमा। महतो भावो महिमा। **ऋ र इमनि॥** ऋकारस्य रेफो भवति इमनि परे। प्रथिमा। बहोर्भाव इति विग्रहे। **बहोर्लोपो भू च बहोः॥** बहोरुत्तरेषामिमनादीनामिकारस्य लोपो भवति। बहोः स्थाने भू चादेशः। भूमा॥

सूत्रम्। ( लोहितादे० ) लोहित आदिर्यस्य स लोहितादिस्तस्मात् ५–१ ( ङिति। ङस्य )इत्यलोपः ( स्रो० ) डिदिमन् १–१ ( हसेपः० ) लोहितादेर्नाम्नो भावेऽर्थे इमन्प्रत्ययो भवति स च डित्संज्ञकः। परम् ( अनेकस्वरात् डिदिति वक्तव्यम् ) तेन भूमा इत्यत्र एकस्वरे टिलोपो न। उदा०। लोहितस्य रक्तस्य भाव इति विग्रहे इमन्प्रत्ययः डित्वाट्टिलोपः ( डिति टेः ) स्व०। १–१ ( नोपधायाः। हसे०। नाम्नो० ) एवम् अणोर्भावः अणिमा। तथा लघोर्भावो लघिमा। एवं महतो भावो महिमा। राजन्शब्दवत्। ऋ ६–१ ( सांके० ) र १–१ इमनि ७–१ पृथुमृदुदृढकृशइत्यादीनां नाम्नाम् आदेर्ऋकारस्य इमनि प्रत्यये परे र आदेशो भवति। पृथु–पृथोर्भाव इति विग्रहे अनेन ऋस्थाने रः। टिलोपः। पूर्ववत् प्रथिमा।

एवं मृदोर्भावो म्रदिमा । दृढस्य भावो द्रढिमा । कृशस्य भावः क्रशिमा । हसादेर्लघोश्च ऋकारस्येति व्याख्येयम् । तेन कृष्णिमा । ऋजिमा इत्यादौ रकारो न भवति । सर्वत्र तद्धिते विकल्पानुवृत्तिरिति । लोहिततता । लोहितत्वम् । लौहित्यम् । अणुता । अणुत्वम् । लघुता । लघुत्वम् । पृथुता । पृथुत्वम् । मृदुता । मृदुत्वम् । कृशता । कृशत्वम् । दृढता । दृढत्वम् । इत्यादि भवति । सूत्रम् । बहु ५-१ ( ङिति । ङस्य ) इति अलोपः ( स्रो० ) लोपः १-१ पश्चात् ( नामिनो० ) भू १-१ ( सांके० ) पश्चात् ( हवे । उओ ) च १-१ ( अव्य० ) बहु ६-१ ( ङिति । ङस्य ) इत्यकारलोपः ( स्रो० ) पंचपदम् । बहुशब्दात्परेषामिमन्प्रत्ययादीनां संबंधिन इकारस्य लोपो भवति बहुशब्दस्य च भू इत्ययमादेशो भवति । अत्र इमनादीनामिति आदिशब्दात् इमन् इष्ठ ईयस् इत्येते प्रत्यया गृह्यन्ते । यद्यपि ईयस्-ईकारोऽस्ति कारग्रहणेन केवलग्रहणमिति न्यायस्तथापि भू चादेश इत्यत्र चकारान्न दोषः । केचित्तु इमनादीनामादेर्लोपो भवतीत्येवं व्याख्यंति । अन्ये तु इमनादीनामिवर्णस्य लोपमिति व्याख्यंति । बहु । बहोर्भाव इति विग्रहे लोहितादित्वाड्डिदिमन् । एकस्वरत्वाट्टेरलोपः ( बहोर्लोपो० ) इति इकारलोपः । बहोर्भू-आदेशः । पूर्ववत् । सि ( नोपधा० । हसे० । नाम्नो० ) भूमा ॥

**अस्त्यर्थे मतुः ॥** नाम्नो मतुःप्रत्ययो भवति अस्यास्मिन्वास्तीति एतस्मिन्नर्थे । उकारो नुमीब्विधानार्थः ( ञ्वितो नुम् ) गोमान् । गोमती । श्रीमान् । श्रीमती । **अइकौ च मत्वर्थे ॥** मत्वर्थे अइकौ प्रत्ययौ भवतः । वैजयंती पताका अस्य अस्मिन् वा वैजयंतः प्रासादः माया विद्यते अस्य अस्मिन् वा मायिकः ॥

सूत्रम् । ( अस्त्यर्थे० ) अस्तेर्द्धातोरर्थोऽस्त्यर्थस्तस्मिन् ७-१ ( अ इ ए ) मतु १-१ ( स्रो० ) अस्यास्ति स्वेन आस्ति अस्मिन्विषये वा इदमस्ति इत्येतस्मिन्नर्थे तद्धितान्नाम्नो मतुप्रत्ययो भवति । अत्र मतुप्रत्यये उकारः ( ञ्वितो नुम् ) इति नुम्विधानार्थस्तथा ( ष्ञ्वितः ) इति ईब्विधानार्थश्च । गौरस्यास्तीति द्वितीये स्त्रीविशेषणे गौरस्यास्तीति उभयत्रापि मतुः । मत् । आद्ये १-१ ( ञ्वितो नुम् ) मनत् ( अत्वसोः सौ दीर्घः ) मानत् ( हसे० । संयोगां० ) गोमान् । द्वितीये ( ष्ञ्वितः ) इति ईप् । स्व० । १-१ ( हसे० ) गोमती । नपुंसकलिंगे तु गोमत् । एवं श्रीमान् । श्रीमती । नित्ययोगातिशयप्रशस्तादिविशिष्टे अस्त्यर्थे मतुरिति केचित् । तन्मते नित्यं श्रीरस्त्यस्येति श्रीमान् । अतिशयिता प्रीतिरस्यास्तीति प्रीतिमान् । प्रशस्ता धीरस्त्यस्येति धीमान् । किंच सूत्रम् ( अइकौ च मत्वर्थे ) अश्च इकश्च अइकौ १-२ मतोः अर्थो मत्वर्थस्तस्मिन् मत्वर्थे ७-१ यद्यपि समासे संधिर्निश्चयेन स्यात्तथाप्यत्र स्पष्टार्थत्वात् ( अइकौ० ) इत्यत्र संधिर्न

कृतः । कचित्तु ( एकौ च मत्वर्थे ) इत्येव दृश्यते । मत्वर्थे इति मतुप्प्रत्ययार्थे अर्थात् अस्त्यर्थे एव नाम्नः अइकौ इत्येतौ प्रत्ययौ भवतः । वैजयंती नाम पताका ध्वजो विद्यते अस्मिन् प्रासादे इति विग्रहे अप्रत्ययः ( यस्य० ) इति इलोपः । स्व० । १–१ ( स्रो० ) वैजयंतः प्रासादः । तथा माया । माया अस्त्यस्येति मायिकः पूर्ववत् इकप्रत्ययः ( यस्य० ) स्व० । मायिकः । क्वचिदप्रत्ययो णिदपि । प्रज्ञा अस्यास्तीति प्राज्ञः । श्रद्धा अस्यास्तीति श्राद्धः ॥

**मांतोपधाद्वत्विनौ ॥** मकारांतान्मकारोपधादकारांतादकारोपधाच्च वत्विनौ प्रत्ययौ भवतोऽस्त्यर्थे । धनवान् । धनी । छत्री । दंडी । दृषद्वती भूमिः । किंवान् । शमी । ( तडिदादिभ्यश्च ) तडिदादिभ्यः शब्देभ्यो वतुप्रत्ययो भवति । तडित्वान् ॥

म् [ मांतोपधात्० ] मश्च अश्च मा । अत्र ( सवर्णे० ) अंतश्च उपधा च मौ अंतोपधे यस्य स मांतोपधस्तस्मात् ५–१ पुनः पूर्वम् ( सवर्णे० ) अग्रे । वतुश्च इन् च वत्विनौ १–२ स्व० । पूर्वम् ( चपा अबे जबाः ) द्विपदमि- मकारांतान्मकारोपधाच्च तथा अकारांतादकारोपधाच्च । यद्वा अवर्णांतात् अव- नोऽस्त्यर्थे वतु इन् एतौ द्वौ प्रत्ययौ भवतः । इन्प्रत्ययस्तु अकारांता- । प्रथमं मांतोदाहरणम् । किम् । किमस्यास्तीति वाक्ये अत्र चित्पदांतताश्रयणात् ( मोनु० ) १–१ ( त्रितो नु० । अत्वसोः० । हस० । संयो० ) किंवान् । लक्ष्मी । लक्ष्मीरस्यास्तीति लक्ष्मीवान् । अत्र मकारोपधात् वतुः । ( नाम्न्यादिभ्यः ) इति ऊर्मिमान् भूमिमान् इत्यादौ मांतोपधत्वेऽपि न वतुप्रत्ययः । किंतु मतुप्रत्ययः । एवं शम । शमोऽस्यास्तीति शमी । अत्र मकारोपधत्वात् अकारांतत्वाच्च इन् । एवं भानि नक्षत्राणि संत्यस्येति भवान् चंद्रः । यद्वा भानि नक्षत्राणि संत्यस्मिन् इति भवान् आकाशः । अत्र अकारांतात् वतुः । एवं मालावान् । दयावान् । अत्र आकारांतात् वतुः । धनच्छत्रदंडाः । धनमस्यास्तीति धनी । छत्रमस्यास्तीति छत्री । दंडोऽस्यास्तीति दंडी । एषु सर्वत्र इन् अकारांतेभ्यः ( यस्य० ) स्व० । त्रिष्वपि १–१ ( इनां शौ सौ ) इति दीर्घः । ( हसे० । नाम्नो० ) दृषद् । दृषदः संत्यस्यामिति दृषद्वती । अकारोपधत्वाद्वतुः । उकारानुबंधत्वात् ( उदितः ) इति ईप् ( क्वचिद्वतौ दीर्घः ) क्वचिद्वतुप्रत्यये परे दीर्घत्वमपि भवति । यथा । अमरावती । पद्मावती । मृगावती । पुष्करावती । कुसुमावती । भोगावती । अहावती । पुष्पावती । क्वचिन्मतुप्रत्ययेपि दीर्घत्वम् । यथा । हनूमान् । सांप्रतं मांतोपधत्वं विनापि वतुप्रत्ययं वक्तुमनाह ( तडिदादि-

भ्यश्च ) इति । तडिदादिभ्यो मांतोपधत्वरहितेभ्योपि वतुप्रत्ययो भवति । चकारात् तडित् इत्यत्र चपस्य जवत्वं न भवति । तडिदस्यास्मिन्वास्तीति तडित्वान् । एवं विद्युत् अस्यास्मिन्न वास्तीति विद्युत्वान् । उभयत्रापि वतुप्रत्ययो भवति । पूर्ववत् । एवं सरस्वान् । मरुत्वान् । समिध्वान् । चकारात् राजन्वान् । राजन्वती सौराज्ये । उदधौ उदन्वान् । एतौ निपात्यौ । तथा चूडासिध्मादेश्च लप्रत्ययः । चूडाऽस्त्यस्येति चूडालः । सिध्मलः । मांसलः । अंसलः । इत्यादि । ऐश्वर्ये स्वशब्दादामिन् । स्वम् ऐश्वर्यमस्त्यस्येति स्वामी ॥

[ एतत्कियत्तद्भ्यः परिमाणे वतुः ] यत्तदोरा ॥ यत्तच्छब्दयोराभवति । [ किमः कियश्च ] किंशब्दस्य किरादेशो भवति वतौ परे । चकारात प्रत्ययस्य वकारस्य यकारादेशो भवति । यावान् । तावान् । कियान् । आइश्चैतदो वा ॥ वतुप्रत्यये परे एतच्छब्दस्य आ इश् इत्येतावादेशौ भवतः । गुरुः शिच्चेति शित्वात्कृत्स्नस्य आ इति गुरुस्तथापि चकारादंतस्यैव टेराकारादेशो भवति न कृत्स्नस्य । यस्मिन्पक्षे इशादेशस्तस्मिन् पक्षे प्रत्ययस्य वकारस्य यकारादेशो भवति । एतावान् । इयान् । [ तुंदादेरिलः ] तुंदादेरिलप्रत्ययो भवति अस्त्यर्थे । तुंदिलः [ औन्नत्ये दंतादुरः ] दंतुरः । (स्वाम्याद्यर्थे) स्वामी [ गंधादेरिः ] सुगंधिः । आमगंधिः । [ श्रद्धादेर्लुः ] श्रद्धादेर्गणाल्लुप्रत्ययो भवति । श्रद्धा अस्यास्तीति श्रद्धालुः । कृपालुः । [ अस्मायामेधास्रग्भ्योऽस्त्यर्थे विनिर्वक्तव्यः ] तपस्वी । मायावी । मेधावी । स्रग्वी । [ वाचो ग्मिनिः ] वाग्मी [ आलाटौ कुत्सितभाषिणि ] वाचालः । वाचाटः [ ईषदपरिसमाप्तौ कल्पदेश्यदेशीयाः ] ईषदपरिसमाप्तः सर्वज्ञः सर्वज्ञकल्पः । पटुदेश्यः । कविदेशीयः । [ प्रशंसायां रूपः ] प्रशस्तो वैयाकरणो वैयाकरणरूपः । [ पाशः कुत्सायाम् ] कुत्सितो वैयाकरणो वैयाकरणपाशः [ भूतपूर्वे चरट् ] दृष्टचरः । दृष्टचरी । [ प्राचुर्यविकारप्राधान्यादिषु मयट् ] अन्नं प्रचुरं यस्मिन्नन्नमयो यज्ञः । मृन्मयो घटः । स्त्रीमयो जाल्मः । अमृतमयश्चंद्रः । [ तदधीते वेद वेत्यत्राण् वक्तव्यः ] व्याकरणमधीते वेद वेति वैयाकरणः । शोभनोऽश्वः स्वश्वः तं वेदेति सौवश्वः ॥

( एतत्किं० ) इत्यादि । एतद् किम् यद् तद् इत्येतेभ्यः शब्देभ्यः परिमाणेऽर्थे वतुप्रत्ययो भवति । उकार उच्चारणार्थः । नुमीब्विधानार्थः । यद् । तद् । यत् परिमाणमस्य यावान् । तत्परिमाणमस्य तावान् । परिमाणे वतुः ( यत्तदोरा ) यद् तद् इत्येतयोष्टेराकारो भवति परिमाणेऽर्थे वतौ परे इत्यर्थः । यावत् । तावत् । उभयत्रापि १–१ ( व्रितो नु० । अत्वसोः० । हसे० । संयो० ) इति लोपः । सिद्धम् । स्त्रीलिंगात् यावती । नपुंसके यावत् । किम् । किं परिमाणमस्येति कियान् ( एतत्किं० ) इत्यादिना वतुप्रत्ययः ( किमः कियश्च ) वतुप्रत्यये परे किम्शब्दस्य कि इत्यादेशः कृत्स्नस्य भवति वतोर्वकारस्य च यकारो भवति । अनेन किमः किः वस्य च यः । चकारात् गुरुः शिच्चेति । गुरुत्वं विनापि सर्वस्य किरादेशः १–१ पूर्ववत् । एतत् ६–२ उभयत्रापि वतुप्रत्ययः ( आइश्चैतदो वा ) वतुप्रत्यये परे एतच्छब्दस्य आ इश् इत्येतावादेशौ भवतः । ( गुरुः शिच्च० ) इति न्यायात् कृत्स्नस्य आ इति गुरुस्तथापि चकारग्रहणादंतस्यैव टेराकारादेशो न कृत्स्नस्य । इश् इति शित् ( गुरुः शिच्च० ) इति शित्त्वात्सर्वस्य एतद् इत्यस्यादेशः वाग्रहणात् यत्र इशादेशः तत्र वकारस्य यकारः अन्यत्र न । एतावत् इयान् १–१ पूर्ववत् ( व्रितो० । हसे० । संयो० ) एतावान्–इयान् । ( तुंदादेरिलः ) तुंदादेः शब्दादस्त्यर्थे इलप्रत्ययो भवति । तुंदमस्यास्तीति तुंदिलः । इलप्रत्ययः ( यस्य० ) स्व० । १–१ । एवम् उदरिलः । फेनिलः ( औन्नत्ये दंताडुरः ) दंतशब्दात् औन्नत्ये उच्चत्वे अर्थे उरप्रत्ययो भवति । उन्नता उच्चा दंताः अस्येति दंतुरः । ( श्रद्धादेर्लुः ) श्रद्धादेर्नाम्नोस्त्यर्थे लुप्रत्ययो भवति । श्रद्धा दया कृपा । श्रद्धा अस्यास्तीति श्रद्धालुः । दया अस्यास्तीति दयालुः । कृपा अस्यास्तीति कृपालुः । सर्वत्र लुप्रत्ययः १–१ ( स्वो० ) ( अस्मायामेधा० ) इत्यादि । अस् इति ( वचादेरस् ) इत्युणादिसूत्रोक्तोऽसप्रत्ययस्तदंतान्नाम्नः पुनः मायामेधास्रज्-शब्देभ्यश्च अस्त्यर्थे विनिः प्रत्ययो वक्तव्यः । इकार उच्चारणार्थः । तपस् । तप संतापे इत्यस्याऽसंतस्य रूपम् । विन् । तपोऽस्यास्तीति तपस्वी । दंडिन्शब्दवत् । १–१ ( इनां शौ सौ । हसे० । नाम्नो० ) एवं यशस्वी । एवं मायाऽस्यास्तीति मायावी । मेधा बुद्धिरस्त्यस्येति मेधावी । स्रक् मालाऽस्यास्तीति स्रग्वीति । ( दिशाम् ) इति कत्वम् । स्रज इत्यत्र अंतर्वर्तिनी विभक्तिमाश्रित्य पदांतताश्रयणात् ( चोः कुः ) जस्य गः । १–१ सिः । पूर्ववत् । ( वाचो ग्मिनिः ) वाच्शब्दात् ग्मिनिः प्रत्ययो भवति अस्त्यर्थे । गकारानुबंधः मकारत्वनिषेधार्थः[1] । तेन ( ञमे ञमा वा ) इति न भवति । वाच् । प्रशस्ता वागस्यास्तीति वाग्मी । ग्मिन्प्रत्ययः ( चोः कुः ) पदांतताश्रयणात् । ( चपा० ) कस्य गः । स्व० । दंडिन्शब्दवत् । गोरपि अस्त्यर्थे ग्मिनिः । गावो विद्यंतेऽस्येति गोमी । ( आलाटौ कुत्सितभा-

---

१ ञमत्वप्रतिषेधार्थः ।

षिणि ) आलश्च आटश्च आलाटौ । १-२ बहुभाषिणीत्येके । कुत्सितं भाषत इत्येवंशीलः कुत्सितभाषी तस्मिन् अभिधेये वाच्शब्दात् आल आट इत्येतौ प्रत्ययौ भवतः। वाच् । कुत्सिता वागस्येति वाचालः । वाचाटः । एकत्र आलः । अन्यत्र आटः । ( स्व० ) १-१ ( स्रो० ) ईषदपरिसमाप्तौ कल्पदेश्यदेशीयाः । स्तोकमात्रमपरिसमाप्तौ अपरिपूर्णत्वे किंचिन्न्यूनत्वे वाच्ये नाम्नः कल्प देश्य देशीय इत्येते त्रयः प्रत्यया भवंति । सर्वज्ञ पटु कवि । ईषदपरिसमाप्तः अपरिपूर्णः सर्वज्ञः सर्वज्ञकल्पः । ईषदपरिसमाप्तः पटुः पटुदेश्यः । पटुदेशीयः । ईषदपरिसमाप्तः कविः कविदेशीयः । त्रिषु क्रमेण कल्पदेश्यदेशीयप्रत्ययाः । ( प्रशंसायां रूपः ) प्रशंसायां श्लाघायां वाच्यमानायां रूपप्रत्ययो भवति । वैयाकरणः । प्रशस्तो वैयाकरणो व्याकरणस्य पाठी वैयाकरणरूपः । केचिदत्र कुत्सायां पाशः इत्यपि पठंति । तन्मते कुत्सितः पाषंडः पाषंडपाशः । एवं भिषक्पाशः । इत्युदाहरणम् ( भूतपूर्वे चरट् ) पूर्वं भूत इति दर्शनादिक्रियया तत्समयात्प्राग्विषयीभूतो भूतपूर्वः तस्मिन्नर्थे चरट्प्रत्ययो भवति । दृष्ट । पूर्वं दृष्ट इति विग्रहे अत्र दर्शनक्रियाया वर्तमानकालात्प्रागपि दृष्टत्वात् स्मृतिज्ञानेन विषयीभूतत्वात् भूतपूर्वोऽतश्चरट् । उभयत्रापि टकारः ईवर्थः । एकत्र पुंसि देववत् । अन्यत्रापि टित्त्वादीप् ( स्त्रितः । यस्य० ) स्व० । नदीवत् ( प्राचुर्यविकारप्राधान्यादिषु मयट् ) प्रचुरस्य भावः प्राचुर्यम् । विकारोऽवस्थांतरापादनम् । प्राधान्यं मुख्यत्वं तथा आदिशब्दान्निर्वर्तनस्वरूपपुरीषावयवेषु च एष्वर्थेषु नाम्नो मयट् प्रत्ययो भवति । उदाहरणानि । अन्न १-१ अन्नं प्रचुरं अस्त्यस्मिन्निति अन्नमयो यज्ञः । अत्र प्राचुर्यर्थे मयट् । टित्त्वादीप् । अन्नमयी स्थाली । मृद् ६-१ मृदो विकारो मृन्मयः । अत्र विकारे मयट् । ( वावसाने ) दस्य तः ( ञमे ञमा० ) तस्य नः । स्वर० । यद्वा ( क्वचिज्जबानामपि ञमा एष्टव्याः ) इति दस्य नः । स्व० । मृन्मयो घटः । स्त्री प्रधानास्येति स्त्रीमयो जाल्मः मूर्खः अविचार्यकारी इत्यर्थः । अमृतेन निर्वृत्तोऽमृतमेव स्वरूपं यस्य वा सोऽमृतमयश्चंद्रः । अत्र निर्वर्त्तनार्थे मयट् । गोः पुरीषं गोमयम् । शरस्याऽवयवाः शरमयाः बाणाः । ( तदधीते० ) इत्यादि । तच्छास्त्रादि । तच्छास्त्रमधीते पठति तदेव जानाति वा इत्येतस्मिन्नर्थे अण् प्रत्ययो वक्तव्यः । उदाह० । व्याकरण २-१ व्याकरणमधीते पठति अथवा वेद जानाति वैयाकरणः । स्वश्व २-१ सु शोभनोऽश्वः स्वश्वस्तं वेदेति सौवश्वः पुरुषः । व्याकरण २ स्वश्व २ । एकत्राध्ययनज्ञानार्थेण् । अन्यत्र वेदेत्यर्थेऽण् । णकारो वृद्ध्यर्थः ॥

न संधिय्वोर्युट् च॥संधिजौ य्वौ संधिय्वौ तयोः संधिजयोर्यकारवकारयोः संबंधिनः स्वरस्य वृद्धिर्न भवति।किंतु तयोर्युडागमो भवति। इट् उट् इत्येतावागमौ भवतः । वर्णविश्लेषं कृत्वा यकारात्पूर्वमि-

कारः । वकारात्पूर्वमुकारः । स्वरहीनं परेण संयोज्यम् । पश्चात् ( आदिस्वरस्य ञ्णिति वृद्धिः ) वैयाकरणः । सौवश्वः ॥

नन्वत्र स्वपदे वृद्धिराकारः क्रियतां तत्राह सूत्रम् । न १-१ ( अव्य० ) संधिय्वोः एतस्य समासो वृत्तावेव विहितः यथा संधिजौ य्वौ संधिय्वौ तयोः संधिय्वोः ६-२ स्व०।(स्रो०) इट् च उट् च युट् १-१ (हसे०) च १-१ (अव्य०) पूर्वम् ( नामिनोः)जल०।चतुष्पदम् । संधिजातयोर्यकारवकारयोः संबंधिनः स्वरस्य वृद्धिर्न भवति । अत्र य्वोः इत्यत्र वि आङ् उपसर्गयोर्योगे संधिजो यकारस्तत्संबंधी स्वरश्च आकारः स च वृद्धिरूप एव । अतो न तस्य वृद्धिकार्यं किंतु य्वोर्यकारवकारयोर्युडागमः तत्संबंधी स्वर आकारः स च वृद्धिरूपः । एतस्य णित्त्वाद्वृद्धिसंभवेऽपि प्रस्तुतसूत्रेण वृद्धिनिषेधः । किंतु य्वोर्यकारवकारयोर्युडागमो भवति । युडागमः इति कोऽर्थः । तदेव विवृणोति । इट् उट् इत्येतावागमौ भवतः । टित्त्वादादौ । ननु कथं संश्लिष्टस्य यकारस्य वकारस्य च इट् उट् इत्येतौ आगमौ भवत इत्याह । व्य् आस इति वर्णविश्लेषवियोजनामसंयोगेनोच्चारणं कृत्वा यकारात्पूर्वमिकारः कर्तव्यः । वकारात्पूर्वमुकारः कर्तव्यः । स्व० । वियास इति जातम् । पश्चात् ( आदिस्वरस्य ञ्णिति० ) इति वृद्धिः । वैयासः ( यस्य० ) स्व० ( स्रो० ) वैयाकरणः । सौवश्वः । इति सिद्ध्यति । अन्यः । अत्राप्यर्थे स्वस्ति आह इति सौवस्तिकः । द्वारे नियुक्त इति दौवारिकः । एवम् ऐतिहासिकः । पौराणिकः । स्वस्येदं सौवम् । त्रिपक्षस्येदं त्रैपक्षम् । व्यर्थस्य भावो वैयर्थ्यम् । इत्यादि ॥

( इतो जातार्थे ) लज्जा जाता अस्य लज्जितः । पंडितः । तृपितः ॥

( इतो जातार्थे ) इतः १-१ जातार्थे ७-१ जातार्थे उत्पन्नार्थे इतप्रत्ययो भवति । उदा० । लज्जा जाताऽस्येति लज्जितः । जातार्थे इतप्रत्ययः ( यस्य० ) स्व० ( स्रो० ) एवं पुष्पितः फलितो वा वृक्षः । तारकितं नभः । पुलकितः । कंडलितः । कंटकितः । क्षुधितः ॥

तरतमेयस्विष्ठाः प्रकर्षे ॥ अतिशयेऽर्थे तर तम ईयसु इष्ठ इत्येते प्रत्यया भवंति ॥ अतिशयेन कृष्णः कृष्णतरः । कृष्णतमः ।शुक्लतमः [ ईयस्विष्ठौ डिताविति वक्तव्यौ ]( डितिटेर्लोपः) उकारो नुमीत्विधानार्थः । (न्सम्महतो धौ दीर्घः०) अतिशयेन लघुः लघीयान् । पापीयान्।लघीयसी।पापीयसी।लघिष्ठः। पापिष्ठः।(गुर्वादेरिष्ठेमन्नीयस्सु गरादिष्टचलोपश्च) गुरु प्रिय स्थिर स्फिर उरु बहुल वृद्ध दीर्घ प्रशस्य बाढ युवन् अल्प स्थूल दूर अंतिकानां क्रमेण गर प्र स्थ स्फ वर

बंहि ज्या द्राघ श्र साध यव कन स्थव दव नेद एते आदेशा भवंति। अतिशयेन गुरुर्गरीयान् गरीयसी गरिष्ठः। गुरोर्भावः गरिमा। प्रेष्ठः प्रेयान्। स्थविष्ठः स्थवीयान्।ईलोपो ज्याशब्दादीयसः ॥ज्याशब्दादुत्तरस्य ईयस्प्रत्ययस्य ईकारस्य लोपो भवति। ज्यायान् ज्येष्ठः। अतिशयेन दीर्घो द्राघीयान् द्राघिष्ठः। अतिशयेन प्रशस्यः श्रेयान् श्रेष्ठः। ( बहोरिष्ठेयि ) भूयिष्ठः भूयान् ॥

सूत्रम्। तरश्च तमश्च ईयसुश्च इष्ठश्च तरतमेयस्विष्ठाः १-३ ( सव०। स्रो० ) प्रकर्षे ७-१ ( अ इ ए ) प्रकर्षे अतिशयार्थे नाम्नस्तर तम इयसु इष्ठ इत्येते चत्वारः प्रत्यया भवंति। इष्ठः प्रत्ययः ठांतः। कृष्ण २ अतिशयेन कृष्णः श्यामः कृष्णतरः कृष्णतमः। एकत्र तरप्रत्ययः। एकत्र तमप्रत्ययः। १-१ ( स्रो० ) एवं शुक्लतरः। शुक्लतमः [ ईयस्विष्ठौ० ] इति ईयसु इष्ठ इत्येतौ प्रत्ययौ डित्संज्ञौ वक्तव्यौ। लघु ३। अतिशयेन लघुर्लघीयान्। अतिशयेन लघुः स्त्री लघीयसी। अतिशयेन लघुर्लघिष्ठः। सूत्रद्वये ईयसुः। तृतीये इष्ठः। [ ईयस्विष्ठौ डितौ० ] इति डित्त्वादुकारलोपः। स्व०। आद्ये १-१ उकारानुबंधत्वात् ( ञितो नुम् ) इति नुमागमः। ( न्सम्महतो०। हसे०। संयोगां० ) द्वितीये ( ऋञितः ) स्व०। १-१ ( हसे० ) लघीयसी। तृतीये इष्ठप्रत्ययः। डित्त्वाट्टिलोपः। स्व०। १-१ ( स्रो० ) लघिष्ठः। पाप ३। अत्र पापशब्दः पापयुक्तस्य नरस्य वाचको न पापस्य। यतः पापशब्दस्य व्याकरणांतरेषु इन्प्रतिषेधोऽस्तीति यथा। ( नो पापदरिद्राभ्यामिन्। छंदसि तु भवति ) अतः अतिशयेन पापः पापवान्पुरुषः इति पापीयान्। स्त्री चेत् पापीयसी। उभयत्रापि ईयस्। डित्त्वाट्टिलोपः। स्व०। आद्ये १-१ लघीयस्वत्। द्वितीये ( ऋञितः ) इति ईप्। पुनः अतिशयेन पापः पापिष्ठः पापवान् पुरुषः। इष्ठप्रत्ययः। डित्त्वाट्टिलोपः। स्व०। १-१ ( स्रो० ) पापिष्ठः ( गुर्वादेरिष्ठेमन्नीयस्सु गरादिष्टचलोपश्च ) गुर्वादेः शब्दस्य इष्ठ इमन् ईयस इत्येतेषु गर् इत्यादय आदेशा भवंति। गुरु १ प्रिय २ स्थिर ३ स्थूल ४ प्रशस्य ५ वृद्ध ६ दीर्घ ७ बहुल ८ दूर ९ अंतिकाऽल्पा १० नां ११ क्रमेण गर् १ प्र २ स्थ ३ स्थव ४ श्र ५ ज्या ६ द्राघ् ७ बंह् ८ दव् ९ नेद् १० कनाः ११ एते आदेशा भवंति। टेश्च अलोप इति। लोपो न भवतीत्यर्थः। गुरु ३। एकत्र ईयस् अन्यत्र इष्ठ। तृतीये भावेर्थे लोहितादेर्डिदिमन् सर्वत्र। गुरु इत्यस्य गर्। अत्र ( ईयस्विष्ठौ० ) इति डित्त्वेपि निषेधकथनाट्टेर्न लोपः। अतिशयेन गुरुर्गरीयान् गरिष्ठः। तृतीये गुरोर्भावो गरिमा। इमन्। स्व०।१-१ राजन्-शब्दवत्। स्त्री चेत् गरीयसी। प्रिय२अति-

शयेन प्रियः प्रेयान्—प्रेष्ठः । ईयस् इष्ठ । उभयत्रापि ( गुर्वादेः० ) इत्यादिना प्रियस्य प्र इति आदेशः ( अ इ ए ) स्त्री चेत्प्रेयसी । एवं स्थिर इत्यस्य स्थः । अतिशयेन स्थिरः स्थेयान्—स्थेष्ठः । स्थेयसी । स्थिरस्य भावः स्थेमा । स्थूलस्य स्थव । अतिशयेन स्थूलः स्थवीयान्—स्थविष्ठः । प्रशस्यस्य श्र आदेशः । अतिशयेन प्रशस्यः श्रेयान्—श्रेष्ठः । श्रेयसी । वृद्ध २ अतिशयेन वृद्धो ज्यायान्—ज्येष्ठः । स्त्री चेत् ज्यायसी । वृद्धस्य ज्या आदेशः । एकत्र ( ईलोपो ज्याशब्दादीयसः । बहोश्च) ज्याशब्दात् बहुशब्दाच्च परस्य ईयसः प्रत्ययस्य ईकारस्य लोपो वक्तव्यः । १—१ ( त्रितो नु० । न्सम्महतो धौ० । हसे० । संयो० ) अन्यत्र इष्ठप्रत्ययः ( अ इ ए ) दीर्घः । अतिशयेन दीर्घो द्राघीयान् । द्राघिष्ठः । द्राघीयसी । दीर्घस्य द्राघ आदेशः । अतिशयेन बहुलः बंहीयान् । बंहिष्ठः । बंहीयसी । अतिशयेन दूरः दवीयान्-दविष्ठः । स्त्री चेद्दवीयसी । अतिशयेन अंतिकः नेदयिान्-नेदिष्ठः । नेदीयसी । अतिशयेन लघुः लघियान्-लघीष्ठः । लघीयसी । युवा अल्पो वा कनीयान्-कनिष्ठः। कनीयसी । पाणिनीये तु ( युवाऽल्पयोः कनन्यतरस्याम् ) अतिशयेन युवा अल्पो वा कनीयान्-कनिष्ठः । पक्षे यविष्ठः । अल्पिष्ठः ( अंतिकबाढयोर्नेदसाधौ ) अतिशयेन अंतिकः नेदीयान्—नेदिष्ठः । अतिशयेन बाढः साधीयान्—साधिष्ठः । गुरु १ स्थिर २ वृद्ध ३ तृप्राणां ४ क्रमेण गर १ स्फ २ वर्ष ३ त्रपः ४ स्युः ( विन्मतोर्लुक् ) विनो मतुपश्च लुक् स्यात् इष्ठेयसोः परयोः । अतिशयेन स्रग्वी स्रजिष्ठः-स्रजीयान् अतिशयेन त्वग्वान् त्वचिष्ठः—त्वचीयान् । एवमन्येपि यथासंभवं ज्ञेयाः । क्वचित्तु स्थूल १ दूर २ युवन् ३ ह्रस्व ४ क्षिप्र ५ क्षुद्राणाम् ६ अंत्या यरलवाः ससरा एव लोप्याः । पूर्वस्य च गुणः इष्ठेयसोः परयोः । स्थविष्ठः-स्थवीयान् । दविष्ठः३यविष्ठः३ ह्रस्वस्य गुणासंभवः ह्रसिष्ठः २ क्षेपिष्ठः । बहु । अतिशयेन बहुर्भूयान् । अत्र ईयस्प्रत्यये ( बहोर्लोपो० ) इत्यादिना भूआदेशः । चकारात् ( इमनादीनां० ) इति बहुवचनत्वात् ईकारस्य लोपः । अथवा ( बहोश्च ) इति कथनादीकारलोपः । पुनः बहु इष्ठप्रत्ययः ( बहोर्लोपः० ) इति उकारलोपः । बहोश्च भू-आदेशः । ततः ( बहोरिष्ठे यिः ) बहुशब्दात् इष्ठप्रत्यये परे यिर्भवति । इति इकारस्वरस्य यकारागमो भवति । उक्तं च प्रक्रियायाम् ( इष्ठस्य इट् च ) अत्र बहोर्भू आदेशो यदादेशस्तद्वद्भवति इति बहुवत् । तथा इष्ठस्य इकारे लुप्तेपि एकदेशविकृतमनन्यवद्भवतीति न्यायात् न विरुद्धम् । भूयिष्ठः। अत्र केचिद्बहुशब्दादिष्ठसंबंधिनः इकारस्यापि इत्येव व्याचक्षते । तदसंगतम् । इकारलोपस्य प्रधानत्वात् । भूइत्यादेशस्तु इकारलोपादने दुःसाधः पुनश्चिन्त्यम् ॥

[ किमोऽव्ययादाख्याताच्च तरतमयोराम् वक्तव्यः] कुतस्तरां परमाणवः । कुतस्तमां तेषां प्रारंभकत्वम् । उच्चैस्तरां गायति । पचति-

तराम् । पचतितमाम् । [ अव्ययसर्वनाम्नामकच् प्राक्टेः ]उच्चकैः । यकः । सकः । सर्वकः ॥

[ किमोऽव्ययात्० ] इति । किम् इति अव्ययरूपात्किमः किम्-शब्दसंबंधिनोऽव्ययात् अन्यस्मादपि उच्चैस्इत्यादिकादव्ययात् आख्यातसिद्धात् भ्वादिरूपाद्भवति पचतीत्यादिरूपात् स्वार्थे अतिशयार्थे वा तरतमप्रत्ययौ भवतः । तस्मात्पुरतः आमत्ययो भवति । उदा० । कुत इति तत्रादिगणः । किमः पंचम्यंतस्य निपातरूपमव्ययं तस्मात्तरप्रत्ययस्तमप्रत्ययश्च । उभयत्रापि आम् । कुतस्तरां परमाणवः । प्रादुर्भवंतीत्यध्याहारः । तथा तेषां परमाणूनां कुतस्तमामारंभकत्वं परमाणुद्वययोगेन द्व्यणुकाद्युत्पादकत्वं कुतः कुतोमूलोत्पत्तिरित्यर्थः । उच्चैस्तरां गायति इत्यव्ययम् । केचित्तु केवलात्किम एव प्रत्ययात्तरतमयोराम् इति व्याचक्षते । चशब्दात् उच्चैर्नीचैरव्यययोरपीति । तथा डुपचष् पाके । पच् तिप् ( अप् कर्त्तरि ) स्व० । पचति । अग्रे स्वार्थे तरस्तमश्च तस्माच्च आम् । पचतितराम् पचतितमाम् । एवं पठ व्यक्तायां वाचि । पठ पूर्ववत् । पठतितमाम् । एतदाख्यातिकम् ॥

परिमाणे दघ्नादयः ॥ परिमाणेऽर्थे दघ्नट् द्वयसट् मात्रट् इत्येते प्रत्यया भवंति । जानुदघ्नं जलम् । शिरोद्वयसम् । पुरुषमात्रम्[द्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरडतमौ वक्तव्यौ ] कतरो भवतोः काण्वः । कतमो भवतां तांत्रिकः । भवतोर्यतरस्तार्किकस्ततर उद्गृह्णातु [ संख्येयविशेषावधारणे द्वित्रिभ्यां तीयः ] द्वितीयः । [त्रेः संप्रसारणम्]तृतीयः । (षट्चतुरोः स्थट्)षष्ठः । चतुर्थः[पंचादेर्मट्] पंचमः । सप्तमः । अष्टमः । नवमः । [एकादशादेर्डट् ]एकादशः ॥

( परिमाणे दघ्नादयः ) इति । ऊर्ध्वप्रमाणार्थे दघ्नट् द्वयसट् मात्रट् इत्येते त्रयः प्रत्यया भवंति । वक्तव्यमात्रमेतदुदाहरणम् । जानु । जानु परिमाणमस्य जानुदघ्नम् । अत्र परिमाणे दघ्नट्प्रत्ययः । जानुपरिमितं जलमित्यर्थः । तथा पुरुष । पुरुषः प्रमाणमस्येति पुरुषमात्रम् । तथा शिरस् । शिरः परिमाणमस्य शिरोद्वयसम् । टकारानुबंधत्वात् ( ष्ट्वित्रितः ) इतीप् । तेन ऊरुद्वयसी । ऊरुदघ्नी । शिरोद्वयसी । गजपतिद्वयसी । इत्यादि । द्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरडतमौ वक्तव्यौ । व्याख्या । द्वयोर्मध्यात् बहूनां मध्यात् एकस्य निर्द्धारणे पृथक्करणे जात्यादिपरिप्रश्ने च किमादिभ्यः कियत्तद्भ्यो डितौ तरतमौ भवत इत्यर्थः । किम् । बहूनां द्वयोर्वा मध्ये क इति

कतरः । कतमः । अत्र निर्द्धारणं पृथक्करणं तस्यार्थे डतरः । डित्वाट्टिलोपः । स्व० । कतरो भवतोः काण्वः क इति कतरः । भवतोर्द्वयोर्मध्ये काण्वः कथगोत्रीयः काण्ववंशीयः कः । तथा किम् । डतमः । पूर्ववत् । कतमो भवतां मध्ये तांत्रिकः शास्त्रविदित्यर्थः । सैद्धांतिकस्तु तांत्रिकः । यद् तद् उभयत्रापि डतरः टिलोपः । स्व० ( सुवर्णे० ) ( स्रो० ) भवतोर्द्वयोर्मध्ये यतरस्तार्किकस्ततर उद्गृह्णातु ब्रवीतु इति भावः । चकारात् एकशब्दात् अन्यशब्दादपि डतरडतमौ वक्तव्यौ । एकतरः । एकतमः । अन्यतरः । अन्यतमः । ( संख्येय० ) इति । संख्यातुं योग्यः संख्येयः । द्वयोस्त्रयाणां वा मध्ये योऽन्त्यः संख्येयो गणनायां प्रस्तुतः संख्यापूरणस्तस्य विशेषेण अवधारणे अयं कथित इत्यस्मिन्नर्थे परिच्छेदे द्वित्रिशब्दाभ्यां तीयप्रत्ययो भवति । [ त्रेः संप्रसारणं च वक्तव्यम् ] त्रिशब्दस्य संप्रसारणम् । रेफस्य ऋकारः । द्वि त्रि । द्वयोः संख्यापूरणो द्वितीयः । एकस्यापेक्षयाऽपरः संख्येयः तस्य विशेषेण परिच्छेदः क्रियत इति द्विशब्दात्तीयप्रत्ययः । अन्यत्र तु त्रयाणां संख्यापूरणत्वेन विशेषावधारणे तत्रापि तीयः तस्मिंश्च परे त्रेः संप्रसारणम् । यकारस्य सस्वरस्य संप्रसारणमिकारः । वकारस्य उकारः । रेफस्य ऋकारः सस्वरस्य च । दीर्घस्वरयुक्तस्य च दीर्घेकारादिरिति संप्रसारणं वक्तव्यम् । अत्र त्रिशब्दे रेफस्य ऋकारः । द्वितीयः । तृतीयः । ( पट्चतुरोस्थट् ) इति षष् चतुर् इत्येतयोः संख्येयविशेषावधारणे संख्यापूरणेऽर्थे थट् प्रत्ययो भवति । षष् । षण्णां संख्यापूरणः षष्ठः । थट् प्रत्ययः ( ष्टुभिः ष्टुः ) थस्य ठः । स्व० । १-१ ( स्रो० ) चतुर्णां संख्यापूरणश्चतुर्थः । थट्प्रत्ययः । जल० । टित्वादीप् । षष्ठी । चतुर्थी । चतुर्णां संख्यापूरणः तुर्यः तुरीयः इति पूर्वमेवोक्तम् ( पंचादेर्मट् ) पंचादेर्नाम्नो दशपर्यंतात्संख्येयविशेषावधारणे मट्प्रत्ययो भवति । पंचानां संख्यापूरणः पंचमः । मट् प्रत्ययः ( नाम्नो० ) पंचमः । एवं सप्तमः । अष्टमः । नवमः । दशमः । इति ( एकादशादेर्डः ) टकारानुवंधत्वमत्राप्यनुवर्तनीयम् । एकादशन् इत्यादेः अष्टादश यावत्संख्येय विशेषावधारणे संख्यापूरणेऽर्थे डः प्रत्ययो भवति । विकल्पेन मट्प्रत्ययोऽपीति केचित् । एकादशन् एकादशानां संख्यापूरण एकादशः । डप्रत्ययः अत्र डित्वाट्टिलोपः । स्व० । १-१ ( स्रो० । सहादेः सादिः ) इति एकस्य । एका इत्यादेशः । प्रक्रियामते तु (आन्महतः०)इति योगविभागादात्वम् । देवशब्दवत् । एकत्वात् । प्राय एकवचनमेव । एवं द्वादशः । त्रयोदशः ( द्वित्र्यष्टानां द्वात्रयोष्टाः ) इति द्विशब्दस्य द्वा इत्यादेशः । अष्टन् इत्यस्य अष्टा इत्यादेशः। चतुर्दशः । पंचदशः । षोडशः ( सहादेः सादिः ) इति षस्य उः दस्य डः । (उ ओ) सप्तदशः । अष्टादशः । एकोनविंशतिः । अत्र डप्रत्यये कृते निपातनात् तिसहितस्य टेरकारस्य लोपः । स्व० । एकोनविंशतितमः । तथा स्त्रीत्वे विंशतितमी इत्यपि भवति । द्वितीये डः प्रत्ययः । "डानुबंधेंत्यस्वरादेर्लोपस्तेर्विंशतेरपि" इत्यनेन सह टिलोपः । पूर्व ति इत्यस्य लोपः ।

पश्चाट्टिलोपः । स्व० । विंशः । तथा प्रक्रियायाम् ( तिर्विंशतेर्डिति ) विंशतिश-ब्दस्य तेः लोपः स्यात् डिति परे । यद्वा केचित्तु टिलोपे कृते पुनः ( हलादे-रीपादौ ) इति टिलोपमिच्छन्ति । केचित्तु टिलोपे कृते ( सहादेः सादिः ) इति विंशति इत्यस्य विंश इत्यादेशमिच्छंति । केचित्तु वाग्रहणादेव ( पंचादेर्मः ) इति मप्रत्ययमपीच्छंति । तन्मते विंशतितमः इत्यपि स्यात् । एवं एकविंशतितमः एक-विंशः । द्वाविंशतितमः द्वाविंशः । त्रयोविंशतितमः त्रयोविंशः । द्वात्रिंशत्तमः द्वात्रिंशः । त्रयस्त्रिंशत्तमः त्रयस्त्रिंशः । चत्वारिंशत्तमः चत्वारिंशः । पंचाशत्तमः पंचाशः । एवं षष्टितमः । एकषष्टिः । इत्यादि ज्ञेयम् । अत्र ग्रन्थांतरेप्वेतानि वक्तव्यानि संति । द्विन्यष्टानां द्वात्रयोष्टा भवंति ( प्राक् शतादनशीतेर्वा ) शतात् प्राक् शतं यावत् अनशीतेः अशीतिशब्दं वर्जयित्वान्यत्र यत्र द्वित्रिअष्टशब्दाः संति तत्र क्रमेण द्वा त्रयः अष्टा एते आदेशा भवंति । यथा । द्वादशः। त्रयोदशः।अष्टादशः ( चत्वारिंशदादौ वा ) चत्वारिंशदादिषु शब्देषु परेषु द्विन्यष्टानां द्वात्रयोष्टा वा भवंति। द्विचत्वारिंशत् । द्वाचत्वारिंशत् । त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् । अष्टचत्वा-रिंशत् अष्टाचत्वारिंशत् । द्विपंचाशत् द्वापंचाशत् । त्रिपंचाशत् त्रयःपंचाशत् । अष्टपंचाशत् अष्टापंचाशत् । एवं द्विषष्टिः द्वाषष्टिः । द्विसप्ततिःद्वासप्ततिः । द्विनवतिः द्वानवतिः । अनशीतिरिति विशेषणात् द्व्यशीतिः द्व्यशीतितमः । त्र्यशीतिः । अष्टाशीतिः । अत्र द्वात्रयोष्टा न भवंति । शतादेर्नित्यं तमट् प्रत्ययः स्यात् । शत-तमः । एकादशादेरधिकार्थात् सप्तम्यर्थे शते सहस्रे च डप्रत्ययः । एकादश अधिका यस्मिन् तत् एकादशशतम् । एवं द्वादश त्रयोदश एकविंशतिशतम् इत्यादि ज्ञेयम् । शतादेरित्यादिशब्दात् शततमः । एकशततमः ।मासतमः । अर्धमासतमः । संवत्सर तमः इत्यादि ज्ञेयम् । शतादीनि संख्योपयोगानि लोकादवगंतव्यानि ॥

[ कतिकतिपयाभ्यां थः] कतिथः ।कतिपयथः । [संख्यायाः प्रकारे धा ] द्विधा। त्रिधा । चतुर्धा । पञ्चधा । [ गुणोऽण् च ] द्वैधा।त्रैधा। द्वैधम् । त्रैधम् [ क्रियाया आवृत्तौ कृत्वस् ]पंचकृत्वः। सप्तकृत्वः। [द्वित्रिभ्यां सुः ] द्विरुक्तम् । त्रिरुक्तम् [ बह्वादेः शस् ] बहुशः । शतशः । [ तयायडौ संख्याया अवयवार्थे ] द्वितयम् । त्रितयम् । द्वयम् । त्रयम् ॥ [ शेषा निपात्याः कत्यादयः ]का संख्या येषां ते कति ॥ ॥ इति तद्धितप्रक्रिया संपूर्णा ॥

इति श्रीमदनुभूतिस्वरूपाचार्यकृतसारस्वतस्य

प्रथमा वृत्तिः संपूर्णा ॥

( संख्यायाः प्रकारे धा ) संख्यावाचिनो नाम्नः प्रकारेर्थे धाप्रत्ययो भवति । द्विप्रकार इति । द्वौ प्रकारौ अस्येति वा द्विधा । त्रिधा । चतुर्धा । पंचधा । षोढा इत्यादि । ( गुणोऽण् च ) धाप्रत्यये परे द्वित्रिशब्दयोर्गुणो भवति अण् च वा भवति इकारस्य ए गुणः । द्वेधा । त्रेधा । १-१ ( क्त्वाद्यंतं च ) इति । ( अव्ययाद्विभक्तेर्लुक् ) तथा धाप्रत्ययात्स्वार्थेऽण्प्रत्ययो भवति । णकारो वृद्ध्यर्थः । द्विधा । त्रिधा । उभयत्रापि अण् वृद्धिः ( यस्य लोपः ) गायत्र्याद्यण् इति नपुंसके १-१ ( अतोम्) द्वैधम् । त्रैधम् ( क्रियाया आवृत्तौ कृत्वस् ) क्रियायाश्चलनगमनकरणादिकाया आवृत्तौ तत्संख्यापरावृत्तेन पौनःपुन्ये वारंवारार्थे पंचसप्तादिसंख्यायाः कृत्वस् इति प्रत्ययो भवति । पंचन् । पंच वारान् इति पंचन् कृत्वस्प्रत्ययः ( नाम्नो०) प्रथमैकवचनं सि ( अव्य० । स्रो० ) पंचकृत्वः । सप्तकृत्वः । त्रिः सप्तकृत्वः । कतिकृत्वः । इत्यादीन्युदाहरणानि ( द्वित्रिभ्यां सुः ) द्वित्रिशब्दाभ्यां क्रियाया आवृत्तौ सुप्रत्ययो भवति । उकार उच्चारणार्थः । द्वौ वारौ इति द्विः । त्रीन्वारान् इति त्रिः । सुप्रत्यये कृते १-१ ( अव्य० । स्रो० ) अग्रे उक्तमिति ( नामिनो रः ) स्व० । एवं द्विर्भुंक्ते । द्वौ वारौ इत्यर्थः । त्रिरधीते । त्रिः । त्रीन् वारान् अधीते पठतीत्यर्थः । चतुः स्वपिति इत्यपि क्वचित् दृश्यते [ एकस्य सुप्रत्ययसहितस्य सकृदादेशो वक्तव्यः ] सकृत् एकवारम् । (बह्वादेः शस्) बह्वादेर्नाम्नो वारंवारार्थे संख्यायां वा शस् प्रत्ययो भवति । बहु । बहून् वारान् इति बहुशः । अथवा बहवः एव बहुशः । कोटिः संख्या येषां ते कोटिशः । शस् प्रत्ययः ( अव्य० ) एवं शतशः । सहस्रशः । लक्षशः । कोटिशः । अनेकशः । भूरिशः । गणशः । कतिशः इत्यादीनि ( तयायडौ संख्यायामवयवार्थे ) अवयवार्थे संख्यायां वाच्यमानायां तयट् अयट् इत्येतौ प्रत्ययौ भवतः । तत्र तयट् संख्यावाचिनः शब्दात् संभवति अयट् द्वित्रिशब्दाभ्यामेव । द्वि त्रि । उभयत्र तयट् । क्लीबे द्वितयं त्रितयं चतुष्टयम् । अयडित्यत्र डकारष्टिलोपार्थः । इति चित्यम् । द्वौ अवयवौ यस्य समुदायस्य तत् द्वितयम् । यद्वा द्वावेव द्वयम् । त्रय एव त्रयम् । त्रयोऽवयवा यस्येति त्रयम् । एवं द्वयम् द्वि त्रि । अयट् प्रत्ययः ( यस्य० ) स्व० । १-१ ( अतोऽम् ) स्त्रीलिंगे द्वितयी । त्रितयी । चतुष्टयी । द्वयी । त्रयी [ उभयशब्दादप्ययट् वक्तव्यः ] उभौ अवयवौ अस्येत्युभयः । टित्वादुभयी । ( यस्य लोपः ) ( अल्पे शमीकुटीशुंडाभ्यो रः ) अल्पार्थे लघ्वर्थे वाच्ये शमी कुटी शुंडा इति त्रिभ्यः शब्देभ्यः रप्रत्ययो भवति । अल्पा शमी शमीरः । अल्पा कुटी कुटीरः । अल्पा शुंडा शुंडारः ( स्त्रीपुंसोर्नणस्नणौ ) स्त्रीपुंसोः शब्दयोः क्रमेण नणस्नणौ प्रत्ययौ भवतः अपत्याद्यर्थे । णकारो वृद्ध्यर्थः । स्त्रीषु भवः स्त्रिया अपत्यं स्त्रीणां समूहो वा स्त्रैणम् । पुंसि भवः पुंसोऽपत्यं पुंसां समूहो वा पौंस्नम् । तत्र स्त्रैण-

मित्यत्र नण् । णित्वात् वृद्धिः ( ऋनौं० ) तथा पुंसः स्नणप्रत्ययः । णत्त्वाद्वृद्धिः पौंस्नम् ( संयोगांतस्य० ) इति सलोपः । १–१ । क्लीबे ( अतोऽम् । अम्श० ) पसंहारमाह । ( शेषा निपात्याः कत्यादयः ) इति । शेषाः अत्र ग्रन्थांतरेषु च उदाहृताः शब्दाः कति कतिपय कतिथ कतिपयथ याति तति विंशत् त्रिंशत् चत्वारिंशत् पंचाशत् षष्टि सप्तति अशीति नवति शत इत्याद शब्दाः निपात्याः निपातसिद्धाः प्रयोगानुसारेण साध्याः ॥ ॥ इति चन्द्रकी विरचितायां सुबोधिकायां तद्धितदीपिका ॥

सुबोधिकायां क्लृप्तायां सूरिश्रीचन्द्रकीर्तिभिः ॥
स्यादीनां प्रक्रिया पूर्णा बभूवेत्थं मनोहरा ॥ १ ॥
तेषामेव हि सच्छिष्यो हर्षकीर्त्याह्वपाठकः ॥
लिखनोपक्रमं चास्याः प्रपेदे प्रीतमानसः ॥ २ ॥

इति श्रीनागपुरीयतपागच्छाऽधिराजभट्टारकश्रीचन्द्रकीर्तिसूरिकृतायां सारस्वतटीकायां प्रथमा वृत्तिः सम्पूर्णा ॥

१ कीर्तिस्तपोधनः पा० ।

इति सचन्द्रकीर्त्ति–सारस्वतस्य प्रथमा वृत्तिः ।

पुस्तकमिलनेका ठिकाना–खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" ( स्टीम् ) यन्त्रालय, खेतवाडी–बंबई.